EPRINT FROM THE PANDIT.

तार्किकरक्षा ।

ीमदाचार्यवरदराजविरचिता ।

त्कृतसारसङ्ग्रहाभिधव्याख्यासहिता ।

ाध्यायकोलाचलश्रीमल्लिनाथसूरिविरचितया
ण्टकाख्यया व्याख्यया ज्ञानपूर्णनिर्मितया
घुदीपिकाख्यया टीकया च समन्विता ।

ाणसीस्थराजकीयप्रधानसंस्कृतपाठशालीयपुस्तका-
लयाध्यक्षेण पण्डितविन्ध्येश्वरीप्रसाद-
द्विवेदिना संस्कृता ।

वाराणस्याम्

मेडिकल्हाल्नामकयन्त्रालये
१९०३ ईसवीयवर्षे
मुद्रिता ।

॥ श्रीः ॥

ॐ नमः परमात्मने ।

सटीकतार्किकरक्षायाः

भूमिका ।

।वाचार्याणां सर्वदर्शनसङ्ग्रहे(१) पूर्णप्रज्ञदर्श-
(२)

एशियाटिक्सेसाइटीसमादेशेन कलिकातानगरे मुद्रिते
ग्रहपुस्तके तन्मूलतया मुद्रिते पुस्तकान्तरे ऽपि समाप्तावेवं
। "इतः परं सर्वदर्शनशिरोमणिभूतं शाङ्करदर्शनमन्यत्र
त्रापेक्षितमिति ।" इदमेवावलम्ब्येदानीं विद्वांसः कल्पयन्ति
ितं पञ्चदशीग्रन्थे तथा विवरणप्रमेयसङ्ग्रहग्रन्थे च माध-
ासाश्रमे नाम्ना विद्यारण्यस्वामिना लिखितं तस्मात् सर्व-
पञ्चदशीग्रन्थेन विवरणप्रमेयसङ्ग्रहेण च सम्बन्ध इति ।
ीनिवासिश्रीयुक्तबाबूगोविन्ददासमहोदयानां निकटे वर्त-
सङ्ग्रहान्तिमभागे पातञ्जलदर्शननिरूपणानन्तरं शाङ्करद-
य विद्यमानत्वादनुमीयते मुद्रितपुस्तकमूलभूतलिखितादर्श-
ादर्शपुस्तकस्य वा खण्डितत्वात् "इतः परं सर्वदर्शनशिरो-
त्यादिलेखो लेखकशोधककल्पितः, सर्वदर्शनसंग्रहलेखशैली-
ात् पञ्चदशीविवरणप्रमेयसंग्रहसम्बन्धोऽप्यसङ्गत एवेति ।
ार्किकशिरोमणिरघुनाथकृतं सर्वदर्शनशिरोमणिग्रन्थं माधवा-
र्शनसङ्ग्रहस्य व्याख्यानमिति वर्णयन्ति । तदप्यदर्शनमूलकम्
डी०, सी० आई० ई० उपाधिधारिणा राजेन्द्रलालमित्रेण नोटि-
कतमेनुस्क्रिप्ट्सपुस्तके १८४७ संख्यायां तद्ग्रन्थस्य वर्णनं लिखि-
ऽपि ग्रन्थो माधवाचार्यकृतसर्वदर्शनसंग्रहवदेव बोध्यः ।
एशियाटिक्सोसाइटीमुद्रितपुस्तके ७० पृष्ठे ।

"तार्किकरक्षायां[1] च ।

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः ।

धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत् ॥"

इति लेखदर्शनात् कोऽसौ तार्किकरक्षाग्रन्थः केन चाचार्येण रचितो यो हि वेदभाष्यादेः प्रणेतृभिर्माधवाचार्यैः[2] रुद्धृत इति पर्यालोचयता मया चिरं तदन्वेषणे कृते भूतपूर्वैर्वाराणसीस्थैर्विद्वद्वरैः श्रीहरिकृष्णव्यासैः सम्पादितं तज्ज्येष्ठसूनुश्रीविद्याधरव्यासेन दत्तं वरदराजाचार्यकृततार्किकरक्षापुस्तकं[3] तत्कृततद्व्याख्यानसारसङ्ग्रहपुस्तकं[4]

(१) अत्र मुद्रितपुस्तके पृष्ठे ३०० ।

(२) सर्वदर्शनसङ्ग्रहारम्भे ।

"श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसङ्ग्रहः ॥
पूर्वेषामतिदुस्तराणि सुतरामालोड्य शास्त्राण्यसौ
श्रीमत्सायणमाधवः प्रभुरुपन्यास्यत् सतां प्रीतये ॥" इत्यादि ।

सायणमाधवाचार्यैरेव वेदभाष्यपराशरमाधवव्यवहारमाधवकालमाधवजैमिनीयन्यायमालाविस्तरादिग्रन्थाः प्रणीता इति नैव तिरोहितमस्ति विदुषाम् ।

(३) पुस्तकमिदं कागजाख्याधारे प्राचीनदेवनागराक्षरैः कुटिलेतिप्रसिद्धैर्लिखितं विशुद्धं मूलमात्रं सम्पूर्णम् ।

(४) इदमपि पूर्ववत् । अत्र लेखकेन लिपिकाल एवं लिखितः "संवत् ५७ श्रावणसुदि २" परन्तु संवत् १४५७ इति बोध्यः निष्कण्टकमाणलघुदीपिकापुस्तकान्ते लेखकेन लिपिकालस्य "संवत् १४५९ वर्षे वैशाख(ख)शु॰ २" एवंलिखितत्वात् तयोः कागजाख्याधारस्य लिपेश्चैकाकारत्वादेकलेखकलिखितत्वाच्च ।

ज्ञानपूर्णविरचितलघुदीपिकाख्यतट्टिप्पणपुस्तकं(१) च लब्धम् ।

तल्लब्ध्या जातोत्साहेन मया व्याख्यानान्तरान्वेषणे कृते एकस्य वृद्धस्यास्मत्सम्बन्धिनो गृहे ब्राह्मणसम्पादनीयत्वेन(२) स्थापितेषु वस्तुषु संख्यापूरकत्वेन निक्षिप्तेषु दुर्दशापन्नेषूत्तमेषु हस्तलिखितपुस्तकेषु हठादाकर्षितेषु भूयोभूयो निवार्यमाणेन मया कोलाचलमल्लिनाथसूरिकृतस्य निष्कण्टकाभिधस्य सारसङ्ग्रहानुगततार्किकरक्षाव्याख्यानस्य पुस्तकं प्रथमपरिच्छेदमात्रं(३) लब्धम् । तदनन्तरमस्यैव ग्रन्थस्य पुस्तकान्तरमपि वाराणस्यामेवैकस्य संन्यासिनो निकटे वर्तमानं कृमिभक्षितसर्वदेशं विशीर्णमन्ते खण्डितं च(४) लब्धम् । अनन्तरं वाराणसीस्थराजकीयाङ्गलपाठ-

(१) इदमपि सम्पूर्णं किन्त्वनेकस्थलेष्वलग्नपाठमशुद्धं च ।

(२) अध्ययनाध्यापनादिर्ब्राह्मणधर्मः स च पुस्तकेन विना न भवतीति पुस्तकं शालग्रामशिलासमीपे स्थाप्यं वा गङ्गायां प्रक्षेपणीयमिति तस्य वृद्धस्य सिद्धान्तः ।

(३) इदं पुस्तकं कागजाख्याधारे देवनागराक्षरैर्लिखितं जीर्णं त्रुटितपार्श्वभागं स्पर्शानर्हमशुद्धम् । अत्र यद्यपि लेखकेन लिपिकालो न लिखितस्तथापि जीर्णत्वाद्याकारेणानुमीयते यत् वर्षसार्द्धशतद्वयात् पूर्वं लिखितमिति ।

(४) अत्र रम्भपत्रस्य पूर्वपृष्ठे एवं लिखितमस्ति । "श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां वरदराजीयटीकानिष्कण्टकापुस्तकम् ॥" एवं हस्ताक्षरमुद्राचिह्नितान्यनेकानि पुस्तकानि वाराणस्यां क्वचिद्देशान्तरेष्वपि महापुस्तकालयेषु वर्तमानानि दृश्यन्ते । तस्मादनुमीयते यत् वाराणस्यां कोऽपि महान् पुस्तकालय उक्तमहात्मन आसीदिति ॥

शालाध्यापकेन पण्डितगणेशदत्तत्रिपाठिना प्रदत्तं सारसङ्ग्रहसहितं तार्किकरक्षापुस्तकं प्रथमपरिच्छेदमात्र(१)मन्यच्च पण्डितवरगौरीनाथशास्त्रिणा समर्पितं तदपि प्रथमपरिच्छेदमात्रं(२) प्राप्तम् ।

एतेषां पुस्तकानां प्राप्त्यातीवमुदितचित्तोहममुं निबन्धोत्तमं सटीकं मुद्रणद्वारा प्रकाशयितुं समुत्सुको वाराणसीस्थराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षाणां प्रभुवराणां श्रीयुतानाम् आर्थरवेनिससाहबमहाशयानां निदेशं समधिगम्य पूर्वं विजयनगरसंस्कृतसीरीज्नामकपुस्तकावल्यां मुद्रयितुं प्रवृत्तः किं तु तस्या विश्रान्तत्वात् काशीविद्यासुधानिधिनामके मासिकपत्त्र इदानीं मुद्रितवान् । मुद्रणारम्भश्च येन प्रकारेण जातः स चोक्तमहाशयैरेव पुस्तकारम्भे ऽङ्गलभाषया सङ्क्षेपतः प्रकाशितः ।

पूर्वोक्तेषु पुस्तकेष्वस्मन्निकटे वर्तमानेष्वपि संशोधनस्य सम्यक्त्वसम्पादनेच्छया मया श्रीयुक्तरामकृष्णगोपालभाण्डारकर एम्. ए. पीएच्. डी., महाशयसम्पादितं निष्कण्टकापुस्तकं पुण्यग्राम(पूना)स्थडेकन्कालेज्पुस्तकालयस्थमुक्तमहाशयैः कृपया प्रदत्तं समानायितम् । तेन खण्डितेनाशुद्धेनापि परमादर्शस्थैः कतिपयगुणैर्युक्तत्वादुपयोगः सम्पादितः ।

(१) अत्र लेखकेन लिपिकाल एवं लिखितः । संवत् १६६१ वर्षे । आश्विनवदि १४ चतुर्दश्यां लिखितमदः पुस्तकं कृष्णभट्टात्मजेन माधवभट्टेन वशिष्ठगोत्रिणा स्वपाठार्थं परपाठार्थं च ।

(२) अत्र यद्यपि लेखकेन लिपिकालो न लिखितस्तथापि जीर्णत्वाद्याकारेणानुमीयते वर्षशतद्वयात् पूर्वं लिखितमिदं प्रायः शुद्धम् ।

अत्र वाराणसीस्थराजकीयसंस्कृतपाठशालीयन्यायाध्यापकेन तर्कतीर्थोपाधिधारिणा श्रीसुरेन्द्रलालगोस्वामिना प्रूफ्पत्रसमालोचनया उपकृतोऽस्मि ।

एतावतापीदं मुद्रितं पुस्तकं विशुद्धं जातमिति वक्तुमशक्यं किं त्वस्मिन् कार्ये ऽननुभूतपूर्वजातीयो महानाऽऽयासः कृतो मयेति ।

प्रथमपरिच्छेदस्य ज्ञानपूर्णकृता लघुदीपिकाटीका त्वन्ते मुद्रिता भविष्यतीत्यादर्शपुस्तकस्यापाततो दर्शनेन पूर्वं प्रतिज्ञातम् । किं तु पश्चात् सम्यक्समालोचनेनादर्शपुस्तकस्यात्यन्ताशुद्धत्वं छिन्नस्थलेषु ग्रन्थत्रुटिं चावगम्येदानीं तन्मुद्रणं साहसं मन्यमानेन मयोपेक्षितमित्यादर्शान्तरदानेनानुग्राह्योऽहमुत्साहवर्धकैर्देशोपकारपरैः पुस्तकान्वेषकैः पुस्तकोद्धारकैर्विद्वद्वरैर्यतो द्वितीयसंस्करणे तत्सम्पन्नं भवेदिति ।

दुर्लभेन पुरातनेन न्यायदर्शनानुरागिजनानन्दवर्धकेनामुना निबन्धेन मनस्तावद् विनोदयन्तो विद्वद्वरा मामकीनं परिश्रममिदानीं सफलयन्तु इति जगदीश्वरं प्रार्थय इति ॥

सटीकतार्किकरक्षायाः प्रणेता आचार्यवरदराजश्च(१) कस्मिन् देशे कस्मिन् काले आसीदितीदानींपर्यन्तं

(१) अपरोऽपि वरदराजो वैयाकरणसिद्धान्तकौमुदीप्रणेतॄणां भट्टोजिदीक्षितानां शिष्य आसीत् । अनेन सारसिद्धान्तकौमुदी लघुसिद्धान्तकौमुदी मध्यसिद्धान्तकौमुदी च रचिता । यथाह मध्यसिद्धान्तकौमुद्याम् ।

"नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥"

सारसिद्धान्तकौमुदीपुष्पिकायां "श्रीचटविटिकपाटवरदराजभट्टविरचिता सारसिद्धान्तकौमुदी समाप्ता" अत्र चटविटिकपटीत्युक्त्या तैलङ्गोऽयमित्यनुमीयते। अयं च भट्टोजिदीक्षितानां समय एवासीत्। भट्टोजिदीक्षितसमयश्च १६७६–१७१६ संवत्सरात्मकः यतस्तस्मिन्नेव काले वाराणस्यामेव निवसता जगन्नाथपण्डितराजेन सम्राट्जगन्नाथापरनामधेयेन* भट्टोजिदीक्षितकृतप्रौढमनोरमाग्रन्थस्य कुचमर्दननामकः खण्डनग्रन्थः कृतः तत्पुस्तकं च काव्यप्रकाशटीकाकारस्य भट्टवामनाचार्यस्य निकटे वर्तत इति मुम्बईनगरे द्वितीयावृत्तिमुद्रिते काव्यप्रकाशपुस्तके भूमिकायां २४ पृष्ठे लिखितम्। अत एव भट्टोजिदीक्षितेन स्वपाण्डित्यप्रख्यापनाय मनोरमाग्रन्थो जगन्नाथपण्डितराजस्य समीपे प्रेषित इति किंवदन्ती सङ्गच्छत इति॥

अपि च नागेशभट्टेन महाभाष्यप्रदीपोद्द्योतारम्भे "हरिदीक्षितपादाब्जसेवनाल्लब्धसन्मति"रिति वैयाकरणमञ्जूषायामपि "अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितादि"त्युक्तं तस्मात् नागेशभट्टो हरिदीक्षितशिष्यः। लघुशब्दरत्ने "भट्टोजिदीक्षितपौत्रहरिदीक्षितविरचिते लघुशब्दरत्ने" इति लेखदर्शनात् हरिदीक्षितो भट्टोजिदीक्षितानां पौत्रः तत्समानकालिको नागेशभट्टस्तेन च वैयाकरणवृहन्मञ्जूषाग्रन्थो रचितस्तत्पुस्तकं च १९६३ संवत्सरलिखितमस्मन्निकटे वर्तते। तस्मिन् अनेकानि क्रोडपत्राणि वर्तन्ते ऽनेकस्थलेषु एकः पाठः पूर्वं लिखितोऽनन्तरं कुण्डलनां कृत्वा तदर्थबोधकैः शब्दान्तरैरेव लाघवेन स एव पाठो लिखित

* वाराणसेयराजकीयसंस्कृतपाठशालीयपुस्तकालये सम्राट्जगन्नाथकृतरेखागणितपुस्तकमस्ति तच्च पुस्तकं ग्रन्थकर्तुराज्ञया लिखितं तथाहि।

युगवसुनगभूवर्षे १७८४ शुचिशुक्ल युगतिथौ रवेर्वारे।
व्यलिखल्लोकमणिः किल सम्राजामाज्ञया पुस्तम्॥

विंशतिवर्षासन्नवयस्केन जगन्नाथेन महत्पाण्डित्यं सम्पादितमिति गणकतरङ्गिण्यां निरूपितं महामहोपाध्यायसुधाकरद्विवेदिभिः।

महामहोपाध्यायदुर्गाप्रसादस्तु काव्यमालामुद्रितरसगङ्गाधरभूमिकायां २ पृष्ठे १६२८–१६६६ खृस्ताब्दे शाहजहाभिधयवनसार्वभौमसमये जगन्नाथसमाजो भिन्नस्य जगन्नाथपण्डितराजस्य स्थितिं निरूपयति। अनेनैव कुचमर्दननामकं खण्डनं कृतमिति।

सम्यङ्निश्चयो न भवति किं तु ग्रन्थान्ते

"आलोड्य दुस्तरगभीरतरान् निबन्धान्
वाचस्पतेरुदयनस्य तथापरेषाम् ।
सारो मयात्र समगृह्यत वावदूकै-
र्नित्यं कथासु विजिगीषुभिरेष धार्यः ॥"(१)

इत्युक्तत्वादुदयनाचार्यकृतात्मतत्त्वविवेकन्यायकुसुमाञ्जलिप्रबोधसिद्धि(२)ग्रन्थानामनेकत्रोद्धृतत्वात् उदय-

---

एवं पञ्चाङ्का अपि भिन्नक्रमा वर्तन्ते तस्मात् तत्पुस्तकं नागेशभट्टपरिशोधितमुपबृंहितं चेत्यनुमीयते । एतेनापि १६७३–१७१६ संवत्सरकाले भट्टोजिदीक्षितानां स्थितिरासीदिति सुवचम् ।

अपरं च वाराणसीस्थराजकीयाङ्गलपाठालयाध्यापकपण्डितगणेशदत्तत्रिपाठिनो निकटे वर्तमाने सिद्धान्तकौमुदीपुस्तके लेखकलिखितेन लिपिकालेन संवत् १७३८ एतदात्मकेन पूर्वोक्ता स्थितिरविरुद्धैव ।

सामवेदीयकल्पसूत्रव्याख्याकारो वरदराजो भिन्नः । यथाह "इति वामनाचार्यसूनुः कौशिकान्वयसम्भवो वरदराजः कल्पसंवत्सरकल्प(?)-व्याख्यां चक्रे' पाठोऽयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तके ८३ पत्रे वर्तते ।

अन्योऽपि वरदराजो येन मीमांसाशास्त्रे नयविवेकटीकाख्यो महानिबन्धो रचितो यथाह "आत्रेयस्य श्रीसुदर्शनाचार्यस्य शिष्यस्य श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ नयविवेकटीकाया"मित्यादि । इदं पुस्तकं वर्षचतुःशत्याः पूर्वं लिखितमिवाभाति वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये खण्डितं भग्नं तृतीयाध्यायमात्रं वर्तते ॥

(१) अस्मिन् मुद्रितपुस्तके ३६४ पृष्ठे ।

(२) आत्मतत्त्वविवेकः १७९ । १८९ । १९४ । २०३ । पृष्ठेषु । न्यायकुसुमाञ्जलिः १०७ पृष्ठे । प्रबोधसिद्धिः १८९ । ३०८ । ३५७ । पृष्ठेषु ।

नाचार्येण लक्षणावलीग्रन्थस्य ९०६ शाकवर्षे (१०४१ संवत्सरे) प्रणयनात्[1] ज्ञानपूर्णकृततार्किकरक्षाटिप्पणलघुदीपिकापुस्तकस्य १४५९ संवत्सरलिखितस्यास्मन्निकटे वर्तमानत्वात् १४५९ संवत्सरात् पूर्वं १०४१ संवत्सरतश्च पश्चात् तार्किकरक्षाकर्तृवरदराजस्य स्थितिरासीदित्यत्र नास्ति वादावकाशः।

विशेषजिज्ञासायां तु ज्ञानपूर्णेन लघुदीपिकासमाप्तौ "विष्णुस्वामिगुरुं नुमः" इत्युक्तत्वात् विष्णुस्वामिनः शिष्य इति कथितं भवति। यज्ञेश्वरभट्टेन आर्यविद्यासुधाकरे २३१ पृष्ठे "ततः शङ्करमतानुयायिना यादवनाम्ना[2] मातुलेनाध्यापितोऽयं रामानुजोऽभिनववैष्णवसम्प्रदायप्रवर्तको बभूव। अयमाचार्यो विष्णुस्वामिशिष्यसन्ताने गृहीतजन्मनो बिल्वमङ्गलस्य[3] पश्चादि"त्यादि लिखितम्। प्रपन्नामृतनामधेये रामानुजचरिते तु १०१२ शाकवर्षे (११४७ संवत्सरे) यादवाद्रिपर्वते नारायणप्रतिमा स्थापिता रामानुजाचार्येणेति प्रतिपादितम्[4]। अपि

(१) बनारससंस्कृतसीरीजमुद्रिते ऽस्मच्छोधिते प्रशस्तपादभाष्यपुस्तके २ खण्डे ऽन्ते।

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्॥

(२) यो हि यादवप्रकाश इति पूर्णनाम्ना प्रसिद्धः।

(३) बिल्वमङ्गलस्य लीलाशुक इति नामान्तरम्। अनेन श्रीकृष्णकर्णामृतं काव्यं रचितम्।

(४) प्रपन्नामृते ४४-४८ अध्यायेषु। अथ भक्तनगरे सार्द्धं शिष्यसङ्घेन निवसतस्तस्य स्वप्नदर्शनानन्तरं भगवन्मूर्त्युद्धरणार्थं यादवाद्रिग-

च आर्यविद्यासुधाकरे २२८ पृष्ठे विष्णुस्वामिन इतिहासनिरूपणप्रसङ्गे इदमपि लिखितम् "अयं च शङ्कराचार्यादर्वाचीनः।" "यतोऽनेनाद्वितीयनिराकारब्रह्मप्रतिपादकं शङ्करसम्मतवेदान्तसिद्धान्तं प्रतिक्षिप्य साकारब्रह्मप्रतिपादकं स्वमतं प्रवर्तितमिति माधवीयसर्वदर्शनसंग्रहाभिधग्रन्थाल्लभ्यते।"

नीलकण्ठभट्टकृतशङ्करमन्दारसौरभे तु
"प्रासूत तिष्यशरदामतियातवत्या-
मेकादशाधिकशतोनचतुःसहस्र्याम्।"

इत्युक्त्या ३८८९ कलिवर्षे ८४५ वैक्रमसंवत्सरे शङ्कराचार्याविर्भावः सिद्ध्यति(१)। एतेन ८४५ संवत्सरस्य च पश्चात् ११४७ संवत्सरात् पूर्वं विष्णुस्वामिनः स्थितिरिति(२) सिद्धम्। अपरं च लक्षणावलीग्रन्थात् १०४१ संव-

---

मनक्रयनम् १०१२ शकाब्दे चैत्रशुक्लचतुर्दश्यां रामानुजाचार्यस्तत्र नारायणप्रतिमां प्रतिष्ठापितवानित्यादि सर्वं निरूपितम्।

(१) प्रस्थानत्रयभाष्यकर्तुः शिवावतारस्य श्रीशङ्कराचार्यस्याविर्भावजीवनचरितादिविषये बहवो विकल्पा इदानीं दृश्यन्ते ते च परीक्षापूर्वकं न्यायवार्त्तिकभूमिकायां निरूपयिष्यन्तेऽस्माभिरास्तां तावत्।

(२) यज्ञेश्वरभट्टेन आर्यविद्यासुधाकरे पृष्ठे २३४ "विक्रमसंवत्सरकालस्य त्रयोदशे शतके मध्वाचार्यः समभवत्। गुर्जराधिपतेः कुमारपालाभिधस्य राज्ञो राज्यसमये सम्प्रदायप्रदीपकृता मध्वाचार्यस्य समुद्भववर्णनात्। विक्रमार्कसमयात् प्रगतेषु ११९९ नवनवत्यधिकैकादशशतीमितेषु संवत्सरेषु कार्त्तिकशुक्लदशम्यां कुमारपालस्य राज्याभिषेको बभूवेति प्रबन्धचिन्तामणिग्रन्थे मेरुतुङ्गाचार्येण लिखितत्वाच्च।" इति लिखितम्।

भविष्यपुराणपरिशिष्टे भगवद्भक्तमाहात्म्ये २१ अध्याये तु

"विष्णुस्वामी प्रथमतो निम्बादित्यो द्वितीयकः ।
मध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजः स्मृतः ॥"

इति लिखितत्वात् रङ्गरामानुजात् पूर्वं विक्रमवर्षाणां त्रयोदशशतके मध्वाचार्यस्तस्मादपि पूर्वं निम्बादित्यस्तस्मात् पूर्वं विष्णुस्वामीति क्रमोऽपि १०४१ संवत्सरात्परं ११४० संवत्सरात् पूर्वं विष्णुस्वामिनः स्थितिं न विरोधयति। तुर्यो रामानुजः स्मृत इति भविष्यपुराणपरिशिष्टं तु उपनिषद्भाष्यकाररङ्गरामानुजपरं बोध्यमन्यथा तस्मिन्नेव पुराणे सम्प्रदायप्रवर्तकरामानुजस्यापि वर्णनीयत्वादुन्मत्तप्रलापापत्तेरिति* ।

मध्वाचार्याणामितिहासस्तु विस्तरतो महाभारतीयभविष्यत्पर्वणि निरूपितः । यद्यपि शङ्कराचार्याणामितिहासो माधवीयशङ्करविजयादौ प्रसङ्गादन्येषामाचार्याणामपि तत्रैव, रामानुजाचार्याणां प्रपन्नामृते वल्लभाचार्याणां वल्लभदिग्विजये निरूपित एव तथापि न पर्याप्तः किं तु महाभारतस्य पूरको हरिवंशो वर्तत एव तदनन्तरमपि भविष्यत्पर्व वर्तते, एवं भविष्यपुराणपूरकं भविष्योत्तरपुराणं तस्यापि पूरकं भविष्यपुराणपरिशिष्टं वर्तत इति चित्रम् ॥

~~~~~~

* वाराणसीस्थराजकीयसंस्कृतपाठशालाध्यापकपण्डितभागवताचार्यास्तु तुर्यो रामानुजः स्मृत इत्यस्याभिप्रायं वक्ष्यमाणरीत्या निरूपयन्ति ।

द्वापरान्ते कलेरादौ प्रोक्तः सङ्कर्षणेन च इति महाभारतादिप्रोक्तविधया ऽवतीर्णोऽनन्तमूर्तिर्भगवान् रामानुजमुनिरार्षब्रह्ममीमांसासिद्धान्तप्रत्यवस्थानेन श्रीशङ्कराचार्येण सूत्राभिप्रायसंवृत्या स्वाभिप्रायप्रकाशनादिति तत्सयूथ्यभास्कराचार्याद्युक्तरीत्या युक्त्यवष्टम्भेन ब्रह्मसूत्राणि बोधायनसिद्धान्तपराकरणामुद्रया व्याचक्षाणेनोपनिबद्धान्प्रतिबिम्बवादावच्छेदवादाभासवादप्रमुखानर्थान् कार्त्स्न्येन निरस्य भगवद्बोधायनकृतां ब्रह्मसूत्रवृत्तिमित्यादिप्रतिज्ञानुसारं तं प्रतिष्ठापयितुकामो व्याचकारेति तुर्यो रामानुज इति न क्रमाभिप्रायं तुर्यत्वमपि तु विष्णुस्वामिप्रभृतिभिरपाकृततत्तदर्थजातपराकर्तृतया सिद्धान्तप्रतिष्ठापनपर्याप्त्यभिप्रायम् । यथान्यदीयग्रन्थकारा अपि रामानुजः शिष्टगणाग्रगण्यो निनिन्द बिम्बप्रतिबिम्बवादमित्यादि स्वस्वग्रन्थेष्वधिकमपेक्षमाणैः श्रीभाष्यमालोकनीयमिति तात्पर्येण सनिर्भरमाहुः । रङ्गरामानुजाचार्यास्तु संप्रदायधूर्वहपुरुषत्वाभावेन न व्यपदेशमर्हन्ति । तुर्यो नाम संन्यस्तवानिति आश्रमानुसार्यपि क्रमस्सर्वांशे न प्रमाणसिद्ध इति ।
~~~~~~

त्सरे उदयनाचार्याणां स्थितिरासीदित्यप्युक्तम् । तस्मात् "वाचस्पतेरुदयनस्य तथापरेषा"मिति वदतस्तार्किकरक्षाकर्तुरुदयनाचार्यसमयपश्चाद्भाविनो वरदराजाचार्यस्य तथा अस्मात् किञ्चित्पश्चाद्भाविन एतत्समानकालिकस्य वा तार्किकरक्षाटीकालघुदीपिकाकर्तुर्विष्णुस्वामिशिष्यस्य ज्ञानपूर्णस्य च १०४१ संवत्सरादनन्तरं ११४७ संवत्सरात् पूर्वं स्थितिरासीदित्यनुमीयते ॥

वरदराजाचार्येण "आलोच्य दुस्तरगभीरतरान् निबन्धान्" इत्याद्युक्तत्वात् तार्किकरक्षाग्रन्थसमालोचनात् मल्लिनाथेन चोपोद्घाते "इह खलु तत्रभवान् बालानुकम्पी वरदराजः सकलन्यायशास्त्ररहस्योपदिदिक्षया स्वविरचिततार्किकरक्षाश्लोकव्याख्यानाय सारसङ्ग्रहं नाम प्रकरणमारभमाण" इत्याद्युक्तत्वात् सिद्धं भवति यत् सूत्राणामतिसंक्षिप्तत्वात् भाष्यवार्त्तिकादिग्रन्थानां विस्तृतत्वाद्दुरूहत्वाच्च न्यायसिद्धान्तसिद्धान् प्रमाणादिपदार्थान् प्रथमतः श्लोकात्मकेन ग्रन्थेन निबबन्ध पश्चात् तस्याप्यस्फुटार्थत्वं विचार्य सारसंग्रहटीकाग्रन्थेन व्याख्यातवान् ।

केचित्तु तार्किकरक्षाग्रन्थं तर्ककारिकानाम्ना व्यवहृतवन्तोऽदः पुरातनं न्यायप्रकरणं वरदराजाचार्येण स्वकृतया सारङ्ग्रहाभिधटीकया विशदीकृतमिति वदन्ति । तन्मन्दम् ज्ञानपूर्णेन लघुदीपिकायाम्

"पुरा वरदराजेन न्यायशास्त्रार्थसंग्रहः ।
कृतः परत्वतो बुद्ध्वा (!) पद्यानां दुर्ग्रहार्थताम् ॥
तेनैव रचिता व्याख्या सा च शास्त्रपदं गता ।
ततस्तदर्थसिद्ध्यर्थं करोमि लघुदीपिकाम् ॥"

इत्याद्युक्तत्वात् ।

ग्रन्थोऽयमतीवोपयुक्तो यतो विस्तृतदुरूहशङ्का-समाधिवाग्जालाकाण्डताण्डवादिराहित्येन सरलरीत्या न्यायसूत्रभाष्यादिप्रतिपादिताः प्रसङ्गात् कणादसूत्रप्रशस्तपादभाष्यप्रतिपादिता अपि सर्वे प्रमाणादयः पदार्था द्रव्यादयश्च पदार्था अत्र परिच्छेदत्रये निरूपिताः। तत्र प्रथमपरिच्छेदे प्रमाणादयश्छलान्ताः पदार्था निरूपिताः। द्वितीयपरिच्छेदे जातिपदार्थो निरूपितः। तृतीये निग्रहस्थानपदार्थ इति। अत्रत्या विशेषविषयास्तु मुद्रितात् पदार्थनिरूपणक्रमसूचीपत्त्रादवगन्तव्या इति।

वरदराजाचार्येण न्यायकुसुमाञ्जलिटीकापि रचिता मल्लिनाथेन तार्किकरक्षाटीकायां ४६ पृष्ठे उक्तत्वादिति।

सटीकतार्किकरक्षाटिप्पणलघुदीपिकाकारस्य ज्ञानपूर्णस्य समयस्तु यथोपलब्धं निरूपितप्राय एव प्राक्। इदानीं निष्कण्टकाकर्तुः कोलाचलमल्लिनाथसूरेर्जीवनचरितविषयो यथोपलब्धि निरूप्यते।

तत्र तावदनेके मल्लिनाथनामानो विद्वांसो बभूवुः। तथाहि भोजप्रबन्धे(१)।

"अन्यदा राजा क्रीडोद्याने रममाणः श्रान्तः चिरेण सहकारतरोरधस्तात् तस्थौ। ततस्तत्र सहकारतरुमूले

(१) वाराणसीस्थराजकीयसंस्कृतपाठशालीयलिखितपुस्तके १०२ संख्यके १२५ पत्ते लेखोऽयं वर्तते। अस्मिन् पुस्तके लेखकेन लिपिकाल एवं लिखितः॥ "श्रीसंवत् १८५४ आषाढसुदि पूर्णमासी वार शनि लिखितं भोजप्रबन्ध धनीराम ब्राह्मण।"

पण्डितजीवानन्दविद्यासागरेण कलिकातानगरे प्रकाशिते पुस्तकेऽपि ६७ पृष्ठे पाठोऽयं वर्तत इति।

रत्नकम्बलमध्यासीनं भूपालं वीक्ष्य कोऽपि मल्लिनाथकविरागत्य स्वस्तीत्युक्त्वा प्राह ।

शाखाशतचितवियतः
सन्ति कियन्तो न कानने तरवः ।
परिमलभरमिलदलिकुल-
दलितदलाः शाखिनो विरलाः ॥ १० ॥

ततो राजा श्रुत्वा तुष्टः पाणिवलयं ददौ । ततः कोशाधिकारी कवये पाणिवलयं दत्तं ज्ञात्वा धर्मपत्रे लिखति स्म ।

सहकारतरोर्मूले वर्णिते शाखिनां कुले ।
मल्लिनाथाय धारेन्द्रः स्वपाणिवलयं ददौ ॥" इति ।

भोजप्रबन्धग्रन्थश्च मिथिलादिदेशाधिपतिमहाराजलक्ष्मणसेनपुत्रेण बल्लालसेनेन(१) भोजराजीयधर्मपत्र(२)सङ्ग्रहमवलम्ब्य रचितः । बल्लालसेनसमयश्च तत्कृताद्भुतसागरग्रन्थस्थ "भुजवसुदशमितशाके १०८२ श्रीमद्बल्लालसेनराज्यादौ" इत्यादिलेखदर्शनात् १२१७ संवत्सरः, अस्मात् पूर्वं १०७९ संवत्सरासन्ने धाराधिपभोज-

(१) इतिहाससंशोधकास्तु बल्लालसेनस्य पुत्रो लक्ष्मणसेन इति निरूपयन्ति । तत्र सङ्गच्छते ऽद्भुतसागरे "लक्ष्मणसेनात्मजबल्लालसेनविरचिते ऽद्भुतसागरे" इति लेखस्य वर्तमानत्वात् । अपि च मिथिलादेशप्रचलितेन ल० सं० इत्याकारकेण लक्ष्मणसेनसंवत्सरेण १०३० शकाब्दे लक्ष्मणसेनराज्यकालस्य सर्वजनसुप्रसिद्धत्वात् । विस्तरस्तु न्यायवार्त्तिकभूमिकायामनुसन्धेयः ।

(२) विक्रमादित्यस्यापि धर्मपत्रसंग्रह आसीदिति तत्रैव सूचितम् ।

राजसमये [१] मल्लिनाथकविरासीदित्येको मल्लिनाथकविः। केचित्तु

"मल्लिनाथकविः सोयं मन्दात्मानुजिघृक्षया।
व्याचष्टे कालीदासीयं काव्यत्रयमनाकुलम् ॥"

इति रघुवंशटीकास्थश्लोकदर्शनात् कविशब्दसाम्याद् भोजराजकालिक एव रघुवंशादिकाव्यटीकाकारो मल्लिनाथ इत्याहुः। तन्मन्दम् रघुवंशादिटीकासूद्धृतानां ग्रन्थानां नवीनत्वात्। तच्चाग्रे निरूपयिष्यामः।

अथापरोऽपि मल्लिनाथ आसीत् तथाहि सरस्वतीतीर्थकृतायां काव्यप्रकाशटीकायाम् [२]।

"विधातुकामः सुकृतं गरीयः
क्ष्मातलं स्वर्ग इवावतीर्णः।

---

(१) भोजराजसमयस्तु ९६४ शककाल इति महामहोपाध्यायसुधाकरद्विवेदिना गणकतरङ्गिण्यां ३१ पृष्ठे लिखितम्। भट्टवामनाचार्यकृतटीकासहिते मुम्बईनगरे द्वितीयावृत्तिमुद्रिते काव्यप्रकाशपुस्तके भूमिकायां ५ पृष्ठे "भोजराजस्य स्थितिकालस्तु खृस्त ९९६ वत्सरादारभ्य १०५१ वत्सरपर्यन्तः" "१०२२ मिते खृस्तवत्सरे भट्टगोविन्दसुताय धनपतिभट्टाय ब्राह्मणाय दत्तं दानपत्रमपि भोजराजस्य पूर्वोक्तमेव स्थितिकालं स्पष्टं कथयति। तच्च दानपत्रं महामहोपाध्यायदुर्गाप्रसादेन प्राचीनलेखमालायामङ्कयित्वा प्रसिद्धिं प्रापितमिति।" तच्च दानपत्रं धाराधिपभोजराजस्यैवेति तद्दर्शनादेव व्यक्तं भवतीति ॥

(२) भट्टवामनाचार्यकृतटीकासहिते मुम्बईनगरे द्वितीयावृत्तिमुद्रिते काव्यप्रकाशपुस्तके भूमिकायां २८ पृष्ठे लेखोऽयं वर्तते। नायं मल्लिनाथो रघुवंशादिकाव्यटीकाकार इत्यपि निरूपितं तत्रैव भट्टवामनाचार्यैः।

आलम्बनं सर्वविशेषणानां
जयत्यखण्डस्थितिरान्ध्रदेशः(१) ॥ ५ ॥
फलमिव सुकृतानां लोकधात्र्याः समग्रं
विगलितमिव भूमौ नाकलोकस्य खण्डम्।
नगरमतिगरीयः सर्वसंसारसारः
त्रिभुवनगिरिनाम्ना तत्र विख्यातमास्ते ॥ ६ ॥
तत्राभवत् सकलशास्त्रविचारपात्रं
श्रीवत्सगोत्रसुरकाननपारिजातः।
अन्यद्विधातु(?)रवलम्बनमाप्तवाचां
रामेश्वरः कलिकलङ्ककथान्तरायः ॥ ७ ॥
आसीत् प्रमाणपदवाक्यविचारशीलः
साहित्यसूक्तिबिसिनीकलराजहंसः।
ब्रह्मामृतग्रहणनाटितलोभवृत्तिः
तस्यात्मजो निपुणधीर्नरसिंहभट्टः ॥ ८ ॥
तस्मादचिन्त्यमहिमा महनीयकीर्तिः
श्रीमल्लिनाथ इति मान्यगुणो बभूव।
यः सोमयागविधिना कलिखण्डनाभि-
रद्वैतसिद्धमिव सत्ययुगं चकार ॥ ९ ॥
लक्ष्मीरिव मुरारातेः पुरारातेरिवाम्बिका।
तस्य धर्मवधूरासीन्नागम्मेति गुणोज्ज्वला ॥ १० ॥
ज्येष्ठस्तदीयतनयो विनयोदितश्री-
र्नारायणोऽभवदशेषनरेन्द्रमान्यः।
वाग्देवताकमलयोरपि यस्य गात्रे
सीमाविवादकलहो न कदापि शान्तः ॥ ११ ॥

(१) आन्ध्रदेशः तैलङ्गदेशः।

विरिञ्चेः पर्यायो भुवि सदवतारः फणिपते-
स्त्रिदोषो दोषाणां सकलगुणमाणिक्यजलधिः ।
अवाचां प्राचां वा सकलविदुषां मौलिकुसुमं
कनीयांस्तत्सूनुर्जयति नयशाली नरहरिः ॥ १२॥
सवसुग्रहहस्तेन ब्रह्मणा १२९८ समलङ्कृते ।
काले [1] नरहरेर्जन्म कस्य नासीन्मनोरमम् ॥ १३॥"

एतेन आन्ध्रदेशे त्रिभुवनगिरिनाम्नि नगरे वत्सगोत्रे १२९८ विक्रमसंवत्सरे नरहरिनामा विद्वद्वरः समजनि तस्य पिता मल्लिनाथ आसीदिति निष्पन्नम् ।

केचित्तु अयमेव मल्लिनाथो नैषधचरितं विहाय रघुवंशादिपञ्चकाव्यटीकां चकार मल्लिनाथपुत्राभ्यां नारायणनरहरिभ्यां नैषधचरितटीके चक्राते इति वदन्ति । तन्न यतः १२९८ संवत्सरादपि पूर्वकालवर्ती मल्लिनाथो रघुवंशादिकाव्यटीकासु अर्वाचीनान् निबन्धान् कथमुद्धरेदिति । इदं सर्वं वृत्तं मल्लिनाथेन नैषधचरितमपि व्याख्यातमिति चाग्रे प्रपञ्चयिष्यामः ॥

येन नारायणेन नैषधचरितं व्याख्यातं सोऽन्यो नारायणो वेदकरोपनामको महालसानरसिंहपुत्रो न तु नागम्मामल्लिनाथपुत्रो यथाह नैषधचरितटीकारम्भे

(१) ब्रह्मेति एकसंख्याबोधकम् एकमेवाद्वितीयं ब्रह्मेति श्रुतेः । काले विक्रमसंवत्सर इति यावत् यतः सरस्वतीतीर्थेन वाराणस्यामेव निवसता टीका कृता वाराणस्यां तु विक्रमसंवत्सरलेखस्यैव प्रचारात् अग्रिमश्लोकेन नरहरिजन्मकालिकग्रहस्थितिवर्णनाच्च । अयमेवार्थो भट्टवामनाचार्याणामपि सम्मतः । सरस्वतीतीर्थस्य वाराणसेयत्वमग्रिमश्लोकेन स्फुटमत्र विस्तरभीत्या न लिखितमिति ॥

"नत्वा श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं
मातुश्चापि महालसेत्यभिधया विख्यातकीर्तेः क्षितौ।
श्रीरामेश्वरसोतयोः सुमनसोर्गुर्वोरगर्वो यथा-
बुद्धि श्रीनिषधेन्द्रकाव्यविवृतिं निर्माति नारायणः॥"

इति ॥

नरहरिणापि नैषधचरितं व्याख्यातं सोऽन्यो नरहरिः यथाह नैषधचरितटीकाप्रथमसर्गान्ते

"यं प्रासूत त्रिलिङ्ग-
क्षितिपतिसततारा धिताङ्घ्रिः स्वयम्भूः
पातिव्रत्यैकसीमा
सुकविनरहरिं नालमा यं च माता ।
यं विद्यारण्ययोगी
कलयति कृपया तत्कृतौ दीपिकाया-
माद्यः सर्गोतिमाद्य-
त्कविकुलविजयी चारु नीराजितोऽभूत्" ॥इति॥

ततश्चान्योऽपि मल्लिनाथ आसीत् । वाराणसीस्थराजकीयसंस्कृतपाठशालीयसामवेदीयराणायनिशाखीयारण्यगानपुस्तके (७ संख्यके) लेखकेनोद्धृतो यथा "संवत् १५६७ वर्षे चैत्रसुदि ४ बुधवासरे मभ्भिआरी(१)*****छ पुत्त्रमल्लिनाथपाठार्थे विश्वनाथसुत-आदित्येनालेखि।" पुस्तकमिदं कागजाख्याधारे आर्यावर्तप्रचलिताकारविशिष्टदेवनागराक्षरैर्लिखितम् ॥

(१) अस्मिन्नेव पुस्तके ५४ पत्रे "आरण्यकं समाप्तमिति" । "मभ्भिआरीग्रामे" इति च लिखितमस्ति ।

तद्भिन्नोऽपि मल्लिनाथ आसीत्। यस्य पुत्त्रेण लिखितं कुमारसम्भवकाव्यपुस्तकमष्टमसर्गान्तमत्यन्तपरिशुद्धं सटिप्पणमस्मन्निकटे वर्तते तत्र लिपिकाल एवं लिखितः।

"संवत् १६०३ वर्षे आनन्दनामसंवत्सरे ज्येष्ठवदि १ शनौ दिने काश्यामन्तर्गृहे श्रीविश्वेश्वरप्रसादेन मल्लिनाथात्मजेन गणेशपण्डितेन गौडेन स्वपरोपकारार्थं लिखितमिदं पुस्तकम् ॥"

—— ——

तद्भिन्नोऽपि मल्लिनाथो येन च चिकित्साशास्त्रे ऽनेके निबन्धाः कृता यथाह स एव स्वकृतपथ्यापथ्यनिरूपणे। "शाके वेदाब्धिशास्त्रेन्दौ १६४४ मल्लिनाथो भिषग्वरः। चक्रे बालावबोधाय पथ्यापथ्यनिरूपणम् ॥" १६४४ शाकवर्षे १७७९ विक्रमसंवत्सरेऽयं मल्लिनाथ आसीदिति।

—— ——

जैनास्तु पार्श्वनाथचरितं प्रमाणयन्तश्चतुर्विंशतितीर्थङ्करेषूनविंशो मल्लिनाथ इति वदन्तस्तन्नाम्नैव लब्धनामा पञ्चकाव्यटीकाकारो मल्लिनाथः(१) पूर्वं जैनः पश्चाद् ब्राह्मणः संवृत्तः अनेके पूर्वं जैनाः पश्चात् संस्कारं विधाय ब्राह्मणाः क्षत्त्रियाश्चाभूवन्निति धर्मस्थितिस्थापकभूतानां शङ्कराचार्यादीनामितिहासग्रन्थादवगतेरिति वदन्ति। तत्तूपहासास्पदम् निरूपितानां मल्लिनाथानां कस्मिँश्चिदपि ग्रन्थे आर-

(१) मल्लिनाथशब्दस्यार्थस्तु "मल्लो महाबलो मल्लिर्मल्लिकाकुसुमप्रिय" इति शिवनामाष्टोत्तरशतकात् मल्लिः शिवः। मल्लते धारयति विज्ञानमिति मल्ल + सर्वधातुभ्य इन् उणादौ ४। ११७। ईशानः सर्वविद्यानामिति श्रुतेश्च। मल्लिर्नाथो यस्य स मल्लिनाथो रामनाथवदिति।

मल्लिश्चतुर्विंशतेरर्हतां मध्ये ऊनविंश इति हेमचन्द्रः १। २८।

म्भसमाप्तिवाक्येषु जैनत्वानुपलब्धेः नाममात्रसाम्यादेव जैनत्वे गौतममहावीरस्वामिसंवादात्मकानां जैनागमानां दर्शनात् महावीरस्वामिशिष्यस्य गणधरस्य जैनमुख्यस्य गौतमस्यापि ब्राह्मणत्वापत्तेरहल्यापतिगौतमस्यापि जैनत्वापत्तेश्च।

A. C. Burnell. ए. सी. बर्नैल् महाशयप्रकाशिते वंशब्राह्मणे तु प्रतिपादितम् काकटेयराज्ये १३१० ईसवीयवर्षे राजा प्रतापरुद्रदेवाभिध आसीत् तत्समये सरस्वतीविलासनामको ग्रन्थो रचित इति कोलाचलमल्लिनाथपुत्रः कुमारस्वामी निरूपयति।

रामकृष्णगोपालभाण्डारकर, एम्. ए., पीएच्. डी., महाशयसङ्कलिते १८९७ इसवीयवर्षसम्बन्धिरिपोर्टपुस्तके प्रतिपादितम् उत्कलदेशे १२८२–१३०० ईसवीयवर्षे नरसिंहराज आसीत् तत्समये विद्याधरेण एकावलीग्रन्थो रचितः स च मल्लिनाथेन व्याख्यात इति।

Theodor Aufrecht's Catalogus Catalogorum. औफ्रेख्टमहाशयसङ्कलिते सूचीपत्त्राणां सूचीपत्त्रपुस्तके २३९ पृष्ठे लिखितमस्ति आदित्यवर्मणः पुत्रो मल्लिनाथः तत्पुत्रस्त्रिविक्रमदेवोऽनेन प्राकृतव्याकरणवृत्तिर्निर्मितेति।

अस्माभिस्त्वेवमनुमीयते। वाराणसीस्थराजकीयसंस्कृतपाठशालीये (१०० संख्यके) कोलाचलमल्लिनाथसूरिकृतकिरातार्जुनीयटीकाघण्टापथपुस्तके लेखकेन लिपिकालः १५८० शाकवर्षो लिखितः(१)। तेनैव मल्लिनाथेन

(१) "शके १५८० जयवत्सरे दक्षिणायने शरदृतौ कार्त्तिके मासे वरिष्ठपक्षे द्वादशीपूर्वकत्रयोदश्यां तिथौ सायं सुरारिगुरुवासरे हरिहरेश्वरपुण्यतीर्थवासिभट्टंभट्टात्मजकाव्यवक्तृसुधीनारायणाभिधानेन गौतमी-

च किरातार्जुनीयटीकायां(१) ४ सर्गे उपारता इति १० श्लोकव्याख्यायां "पीयूषवर्ष(२)स्त्वेकदेशिसमासमेवाश्रित्य समासान्तमाहे"त्युक्तम् । पीयूषवर्षस्तु तत्त्वचिन्तामण्यालोकचन्द्रालोकप्रसन्नराघवनाटकादिग्रन्थकर्ता पक्ष-

---

तटस्थजनस्थाने किरातोपायघण्टापथाख्यपुस्तकं लिखितमात्मकार्यार्थं परोपकारार्थम् ।" इति तत्पुस्तकस्यान्तिमपत्रे लिखितमस्ति ॥

(१) रघुवंशादिनैषधान्तकाव्यटीकायाः सटीकतार्किकरक्षाटीकायाश्चैकमल्लिनाथकर्तृकत्वं तेनैव मल्लिनाथेन के के ग्रन्था रचिता इति चाग्रे सविस्तरं निरूपयिष्यते ।

(२) पीयूषवर्षकृता किरातार्जुनीयटीका तु वाराणसीस्थराजकीयसंस्कृतपाठशालीयभूतपूर्वाध्यापकानां त्रिपाठिवेचनरामशर्मणां निकट आसीत् । मुद्रिते मल्लिनाथकृतटीकापुस्तके तु पीयूषवर्ष इत्यस्य स्थाने "प्रकाशवर्ष" इति केनचिच्छोधितम् । औफ्रेखट्महाशयसङ्कलितसूचीपत्रदर्शनादवगम्यते प्रकाशवर्षकृतापि काचित् किरातार्जुनीयटीका वर्तते तस्यामयं पाठो वर्तते न वेति विद्वद्भिः समालोचनीयम् ।

एवं मुद्रिते मल्लिनाथकृतटीकासहितशिशुपालवधपुस्तके १ सर्गे गतं तिरश्चीनमिति २ श्लोकव्याख्याने "दिवाकरस्तु वृत्तरत्नाकरटीकायां प्रथमपठितेन 'द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः ।' इति चरणद्वयेन सहेममेव श्लोकं षट्पदच्छन्दस उदाहरणमाहे"ति पाठो दृश्यते । अयं च केनचित् कस्मिँश्चिल्लिखितपुस्तके टिप्पण्यादिरूपेण लिखितः केनचिन्मूले एव प्रक्षिप्तः यतो मल्लिनाथकृतटीकापुस्तकस्य १७१५ संवत्सरलिखितस्योपलब्धेः दिवाकरेण च १७४० संवत्सरे वृत्तरत्नाकरस्य टीकाया रचितत्वात्* वाराणसीस्थराजकीयसंस्कृतपाठ-

---

* "भारद्वाजकुले श्रुतिस्मृतिपटुः श्रीसूर्यभक्तस्तया-
ऽयमाराधनतत्परोऽपि(?)च महादेवोऽभवत् तार्किकः ।
तत्पुत्रेण दिवाकरेण रचिते श्रीवृत्तरत्नाकरा-
दर्शे भट्टमतानुसारिणि परं षष्ठः समाप्तिं गतः ॥

धरान्वर्थनामा जयदेवमिश्र[1] एव । स च १४७८ शाकवर्षे वर्तमानस्य मिथिलादेशाधिपतेः श्रीमहेशठक्कुरस्य मध्यमभ्रातुर्भगीरथठक्कुरस्य गुरुरासीदिति १५८० शाकवर्षात् पूर्वं १४७८ शाकवर्षात् पश्चात् तदासन्नसमये[2] वा रघुवंशादिटीकाकारस्य कोलाचलमल्लिनाथसूरेः स्थितिरासीदिति ।

शास्त्रीये प्राचीने माघटीकापुस्तके ऽस्मन्निकटे वर्तमाने प्राचीने पुस्तके ऽप्यस्य पाठस्याभावाच्च । खेदस्थानं यदिदानीमपि शोधकमहाशया मल्लिनाथकृतकाव्यटीकासु निवेशप्रवेशादिना टीकायन्यमन्तर्गडुं कृत्वाल्पज्ञजनभ्रान्तिजनकं कुर्वन्ति न तु प्राचीनपरिशुद्धादर्शसंवादपूर्वकं परिष्कुर्वन्तीति ।

(१) जगदीशभट्टाचार्येणानुमानदीधितिटीकायां सिद्धान्तलक्षणप्रकरणे "पक्षधरमिश्रादिसम्मतत्वात्" "शब्दमस्यालोके तैः सार्थकत्वं समर्थितम् ।" इत्युक्तत्वाद् आलोकग्रन्थस्य जयदेवकृतत्वात् जयदेव एव पक्षधरः । पक्षस्य मासार्द्धस्य तिथिवारनक्षत्रयोगकरणानि एकदैव पञ्चाङ्गं दृष्ट्वा मनसि धारयतीति पक्षधर इति किंवदन्ती ।

(२) महेशठक्कुरशिष्येण केनचित् पण्डितेन दिल्लीनगराधिष्ठितात् भारतेश्वरात् मिथिलादेशाधिपत्यं प्राप्य गुरवे गुरुदक्षिणात्वेन तत् समर्पितमिति किंवदन्त्या महेशठक्कुरेण वृद्धावस्थायां यौवनान्ते वा राज्यं प्राप्तम् । महेशठक्कुरानुजस्य भगीरथस्य च "विंशाब्दे जयदेवपण्डितकवेस्तर्काब्धिपारं गत" इति द्रव्यकिरणावलीप्रकाशटीकान्ते उक्त्या जयदेवस्य

पूर्णाब्धिसप्तैकमिते १७४० प्रवर्षे सत्कार्त्तिके मासि विशुद्धपक्षे ।
त्वार्तीयपूर्खे दिवसे सुपुण्ये ह्यादर्श इत्थंघटितः समाप्तः ॥"
इति तट्टीकान्ते वर्तते ।

अत्र वर्षे इत्यनेन विक्रमसंवत्सरो ग्राह्यः इण्डिआआफिसपुस्तकालये वर्तमाने पुस्तके १६९९ शालिवाहनवर्षस्य लिपिकालत्वेन लिखितत्वात् ।

अनेनैव दिनकरापरनामधेयेन दिवाकरेण सिद्धान्तमुक्तावल्या व्याख्यानं दिनकरीत्यपरनामधेयं मुक्तावलीप्रकाशाभिधं प्रणीतम् ।

तथाहि चन्द्रालोकारम्भे

"चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती।"

प्रथममयूखसमाप्तावपि

"महादेवः सत्त्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।
अनेनासावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः॥

इति पीयूषवर्षपण्डितजयदेवविरचिते चन्द्रालोके प्रथमो मयूखः॥"

अन्ते

"पीयूषवर्षप्रभवं चन्द्रालोकं मनोहरम्।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम्॥
जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मनः।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः॥"

प्रसन्नराघवनाटकेऽपि प्रस्तावनायाम्

"विलासो यद्वाचामसमरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः॥

पण्डितत्वं कवित्वं निबन्धकर्तृत्वं च भगीरथस्य विंशाब्दे* सम्पन्नमासीदिति तस्यापि वृद्धत्वसम्भवे किरातार्जुनीयटीकाया यौवने प्रणीतत्वे तदानीं किरातार्जुनीयटीकायाः ७५ वर्षप्राचीनत्वकल्पनमपि सम्भवतीति।

गीतगोविन्दकर्ता जयदेवस्त्वस्माद्भिन्न एवेति प्रसन्नराघवभूमिकायां प्रतिपादितं पण्डितगोविन्ददेवशास्त्रिणा काशीविद्यासुधानिधौ।

* विंशतिवर्षमिते वयसीत्यर्थः।

अपि च।

लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मः।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः॥

नटः। एवमेतत्। नन्वयं प्रमाणप्रवीणोऽपि श्रूयते। तदिह चन्द्रिकाचण्डातपयोरिव कवितातार्किकत्वयोरेकाधिकरणतामालोक्य विस्मितोऽस्मि।

सूत्रधारः। क इह विस्मयः।

येषां कोमलकाव्यकौशलकलालीलावती भारती
तेषां कर्कशतर्कवक्रवचनोद्गारे ऽपि किं हीयते।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता-
स्तैः किं मत्तकरीन्द्रकुम्भशिखरे नारोपणीयाः शराः॥"
इति।

चिन्तामण्यालोकारम्भे च

"अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः।
तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते॥"

एतेन जयदेवमिश्र एव(१) पीयूषवर्षपण्डितस्तार्किकः कविश्च। अस्य माता सुमित्रा पिता महादेवो गुरुः पितृव्यश्च हरिमिश्र इति निष्पन्नम्।

भगीरथठक्कुरेण च द्रव्यप्रकाशिकायां द्रव्यकिरणावलीप्रकाशटीकायामन्ते

"विंशाब्दे जयदेवपण्डितकवेस्तर्काब्धिपारं गतः
श्रीमानेष भगीरथः समजनि श्रीचन्द्रपत्यात्मजः।
श्रीधीरातनयेन तेन रचिता श्रीमन्महेशाग्रज-
श्रीदामोदरपूर्वजेन जयतादाचन्द्रमेषा कृतिः॥" इति।

(१) पितृव्यः पितुर्भ्राता स च मिश्रोपनामक इति जयदेवोऽपि मिश्रोऽत्र नास्ति वादावकाशः।

मिथिलादेशे जनकपुरस्थानात् पञ्चक्रोशान्तरे ईशानदिग्भागे धनुःक्षेत्रे 'धनुखा' इतिप्रसिद्धे कूपे प्रस्तरपट्टे वक्ष्यमाणं पद्यं लिखितमस्ति ।

"आसीत् पण्डितमण्डलाग्रगणितो भूमण्डलाखण्डलो
जातः खण्डवलाकुले(?)गिरिसुताभक्तो महेशः कृती ।
शाके रन्ध्रतुरङ्गमश्रुतिमही १४७८ संलक्षिते हायने
वाग्देवीकृपयाशु येन मिथिलादेशः समस्तोऽर्जितः ॥"

इत्यादीन्यनेकानि पद्यानि तत्र वर्तन्ते ।

श्रीमहेशठक्कुरेण थेघठक्कुरापरनामधेयेन भगीरथठक्कुरेण च मेघठक्कुरापरनामधेयेन(१) चानेके ग्रन्था रचिताः विस्तरस्तु तेष्वनुसन्धेयः ।

अपि च ।

मार्कण्डेयपुराणान्तर्गतस्य चण्ड्याः सप्तशतीस्तोत्रस्य व्याख्यानं चित्रकूटसमीपे १६३३ वैक्रमवर्षे मल्लिनाथात्मजेन भीमसेनानुजेन वीरभद्रेण रचित(२)मित्ययं

(१) "यः कैशोरे विश्वविख्यातकर्मा धर्माचार्यः श्रीमहादेवशर्मा ।
तत्सोदर्यो वर्द्धमानस्य सूक्तो भावं मेघः सम्यगाविष्करोति ॥"

इति भगीरथठक्कुरकृतद्रव्यप्रकाशिकारम्भे दर्शनात् तस्य मेघापरनामधेयत्वं श्रीमहेशठक्कुरस्य महादेवापरनामधेयत्वं च स्फुटमवगम्यत इति ।

(२) ग्रन्थे ऽस्मिन् स्थूलमानेन श्लोकानां पञ्च सहस्राणि वर्तन्ते । आरम्भे "श्रीकृष्णद्वैपायनाभिधानमहर्षिवेदव्यासप्रोक्तमार्कण्डेयपुराणान्तर्गतजयाख्यदेवीमाहात्म्यप्रकाशकसप्तशतिकाभिधानं सावर्णिः सूर्यतनय इत्यादिसावर्णिर्भवितामनुरित्यन्तग्रन्थसन्दर्भं क्रौष्टुकिनामा द्विजन्मा प्रियशिष्यो मार्कण्डेयं शिरसा प्रणम्यापृच्छत् ।" इत्यादि ।

पुस्तकान्ते लेखकेन लिपिकाल एवं लिखितः ।

"खगुणार्षियुतैश्चन्द्रैर्यामिते ऽब्दे १०३० तु वैक्रमे ।
नभसोऽग्नितिथौ शुभ्रे छायाहृदयनन्दने ॥
लिखितं नीलकण्ठेन दुर्गापुस्तं सटीककम् ।
लिखितं खलु यत्नेन यश्चोरयति पुस्तकम् ॥
शूकरी तस्य माता स्यात् पिता तस्य च गर्दभः ॥" इति ।

मल्लिनाथवद्वीरभद्रोऽपि महावैयाकरणोऽस्यां टीकायां प्रतिश्लोकं बहूनां पदानां पाणिनिव्याकरणेन साधुत्वं दर्शयति । क्वचित् क्वचिदेकस्यैव वाक्यस्य प्रकारान्तरैर्नानाविधानर्थान् निरूपयति प्रमाणयति च तैत्तिरीयोपनिषदं भगवद्गीतां व्यासं पाणिनिं याज्ञवल्क्यं मातृगुप्ताचार्यं मुरारिमिश्रममरकोशं विश्वकोशं यादवकोशं मेदिनीकरकोशं च । अस्यां टीकायां कस्यापि टीकाकारस्य नाम न लिखति किं तु प्रतिश्लोकं "कस्यचिन्मते" "अपर आह" एवं रूपेण मतान्तरमुपन्यस्यति स च कश्चिदनतिप्राचीनष्टीकाकारो यतस्तेन पाणिन्यमरहेमचन्द्रयादवचीरतरङ्गिण्यादयो ग्रन्थाः प्रमाणत्वेनोपन्यस्ताः ।

अपरोऽपि वीरभद्र आसीद् येन वात्स्यायनकामसूत्रव्याख्यानभूत आर्याच्छन्दसा निबद्धः कन्दर्पचूडामणिग्रन्थो रचितः । कन्दर्पचूडामणिग्रन्थे च भोजराजनाम्न उल्लेखात् स्वस्य च वीरशब्देनोल्लेखनात् स कश्चिदनतिप्राचीनो राधिराज इत्याभाति । यथाह कन्दर्पचूडामणौ ।

"अधिकरणे पञ्चमके कुरुते व्याख्या तृतीयके ऽध्याये ।
भूचक्रचक्रवर्त्ती वीरः श्रीवीरभद्रोऽसौ ॥

अस्मन्निकटे वर्तमानं पुस्तकं चाद्यन्तहीनम् आकारेण वर्षाणां त्रिशत्याः पूर्वं लिखितमिवाभाति ।

अपरोऽपि दीक्षितभीमसेन आसीद् येन सुधासागरनामकं काव्यप्रकाशव्याख्यानं १७७९ वैक्रमसंवत्सरे कृतं चण्डीसप्तशतीव्याख्यानमपि । अयं च कान्यकुब्ज इति तट्टीकादर्शनात् व्यक्तमवगम्यते ।

१६३३ संवत्सरोऽपि पूर्वोक्तां मल्लिनाथस्य स्थितिं द्रढयति। तथाहि

तद्व्याख्याने प्रथमाध्यायान्ते

"यो नित्यं गुरुपादपूजनरतः श्रीमल्लिनाथात्मजः
क्षेमश्रीवदनाम्बुजाहिमकरः श्रीवीरभद्रो द्विजः।
देवीचारुपदाब्जदत्तहृदयो लोकप्रियस्तत्कृतौ
टीकायां किल चण्डिकानुचरिते ऽध्यायोयमाद्यो
गतः॥" इति।

एवमेव द्वितीयतृतीयचतुर्थानामध्यायानामन्ते।

पञ्चमाध्यायान्ते तु

"यस्मै वाग्वादिनीयं वरममलमदाच्छ्रीभवानी पुनर्यं
कारुण्यादात्मभृत्यं कलयति सुषुवे मल्लिनाथः सुतं यम्।
क्षेमश्रीर्वर्धयन्ती सुखमतुलमलं प्राप चाङ्के गतं यं
तस्यागात् पञ्चमोऽसौ स्तुतिललितगुणोऽध्याय एवात्र
देव्याः॥" इति।

अष्टमाध्यायान्ते तु

"येन द्विजातिनिवहः समादृतो वीरभद्रेण।
तेन व्यधायि देव्याष्टीकायामष्टमोऽध्यायः॥" इति।

दशमाध्यायान्ते तु

"शास्त्रयुक्त्या जिता येन वीरभद्रेण वादिनः।
तत्सृष्टदुर्गाटीकायामध्यायो दशमो गतः॥" इति।

एकादशाध्यायान्ते तु

"शब्दशास्त्रार्थसाहित्यच्छन्दोव्याख्यानकोविदः।
यस्तेन वीरभद्रेण चण्डिकाविवृतिः कृता॥" इति।

समाप्तौ तु

"शास्त्रयुक्त्या जिता येन वीरभद्रेण वादिनः।
तत्सृष्टदुर्गाटीकायां गतोऽध्यायस्त्रयोदशः॥

यो वै भूपालचूडामणिनिकरकरैरर्चिताङ्घ्रिर्द्विजेन्द्रः
काणादे चाक्षपादे कपिलफणिपतिप्रोक्ततन्त्रे च तन्त्रे(१) ।
वैयासे पाणिनीये ऽप्रतिहतधिषणोऽलङ्कृतौ काव्यमूले
टीकां कृत्वाग्रगण्योऽभवदिह विदुषां मल्लिनाथः कवीन्द्रः ॥
तत्सूनुर्वीरभद्रः कुलपतिपदभाग्भीमसेनानुजोसौ
चण्ड्याः स्तोत्रस्य टीकां विबुधजनमनोमोदसम्पादयित्रीम् ।
वर्षे रामाङ्गचन्द्रे शिवनयनयुते १६३३ चित्रकूटोपकण्ठे
चक्रे चण्डीप्रसादात् प्रतिपदममलं भावयंस्तत्पदाब्जम् ॥"
इति ।

मल्लिनाथेन काव्यटीकासु तार्किकरक्षाटीकायामपि "कोलाचलमल्लिनाथसूरिविरचितायां"मित्यादेर्लिखितत्वात् कोलाचलनिवासीत्युक्तं भवति कोलप्रधानोऽचल इति कोलश्चासावचलश्चेति वा व्युत्पत्त्या कोलनामकः कश्चित् पर्वतः(२) स च चित्रकूटसमीपस्थ इति महाभारतात् मार्कण्डेयपुराणाच्च प्रतिभाति । तथाहि

(१) कपिलप्रोक्ततन्त्रे सांख्ये फणिपतिप्रोक्ततन्त्रे योगशास्त्रे तन्त्रे जैमिनिप्रोक्ते पूर्वमीमांसाशास्त्रे ।

(२) पर्वतः । अद्रिगोत्रगिरिग्रावाचलेत्यमरः ।

केचित्तु वराहः शूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरकोशात् कोलाचलं कूर्माचलवत् वाराहक्षेत्रं वर्णयन्तः कान्यकुब्जदेशे गङ्गातटे वर्तमानमनेकपुरातनविभ्रष्टराजहर्म्यादियुतमुच्चावचप्रदेशमिदानीं "सोरों वदरिआ" इति प्रसिद्धमेवेति वदन्ति ।

मार्कण्डेयपुराणान्तर्गतचण्डीसप्तशत्यां "कोलाविध्वंसिनस्तथे"ति यदुक्तं तत्र कोलानाम नगरी सुरथराजस्य राजधानीति टीकाकारैर्व्याख्यातत्वात् सा कोलाचलशब्देन कथमपि न व्यपदेशमर्हतीति विद्वद्भिर्विवेचनीयम् ।

महाभारते सभापर्वणि ३० अध्याये(१)

"वशे चक्रे महातेजा दण्डकाँश्च महाबलः ।
सागरद्वीपवासाँश्च नृपतीन् म्लेच्छयोनिजान् ॥
निषादान् पुरुषादाँश्च कर्णप्रावरणानपि ।
ये च कालमुखा नाम नरराक्षसयोनयः ॥
कृत्स्नं कोलगिरिं चैव सुरभीपट्टणं तथा ।
द्वीपं ताम्राह्वयं चैव पर्वतं रामकं तथा ॥" इति ।

अत्र रामकं पर्वतमित्युक्त्या चित्रकूट एव बोध्यः मल्लिनाथेनैव कश्चित् कान्ताविरहगुरुणेति मेघदूतारम्भश्लोकव्याख्याने "रामगिरेश्चित्रकूटस्ये" ति व्याख्यातत्वात् । सुरभीपट्टणस्येदानीं किमपि नामान्तरं जातमित्यतस्तन्न विज्ञायते ।

मार्कण्डेयपुराणे कूर्मनिवेशाध्याये

"आवन्तयो दासुपुरास्तथैवाकरिणो जनाः (?) ।
महाकर्णाः सकर्णाश्च गोनन्दाश्चित्रकूटकाः ॥
चोल्लाः कोलगिराश्चैव क्रौञ्चद्वीपाः जटाधराः ।
कावेरा ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ॥
शङ्खमुक्ताश्च वैदूर्यशैलप्रान्तरिताश्च ये(२)॥"इत्यादि।

इत्यनेन मल्लिनाथस्य चित्रकूटसमीपस्थत्वात् वीरभद्रेण च चित्रकूटोपकण्ठे सप्तशतीटीकाप्रणयनाद् द्वयोरप्येकदेशनिवासित्वं सिद्धम् । वाणीं काणभुजीमिति श्लोकस्य काणादे चाक्षपादे इत्यनेन श्लोकेनानूदितत्वात्

(१) वङ्गदेशस्थ-एशिआटिकसोसाइटी-द्वारा मुद्रिते महाभारतपुस्तके ३५० पृष्ठे द्रष्टव्यम् ।

(२) पाठोऽयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तके १४३ पत्रे वर्तते ।

रघुवंशादिकाव्यटीकाकर्तुर्मल्लिनाथस्य पुत्रो वीरभद्र इत्यपि सुवचम्। मल्लिनाथः शिशुपालवधादिटीकासु मेदिनीकरकृतनानार्थकोशं प्रमाणयति[1] वीरभद्रोऽपि सप्तशतीटीकायां १ अध्याये २ श्लोकव्याख्याने "माया स्याच्छाम्बरीबुद्ध्योरिति मेदिनीकरः।" २ अध्याये ३० श्लोकव्याख्यानेऽपि "अट्टं भक्ते च शुष्के च क्षौमेऽत्यर्थे गृहान्तरे इति मेदिनीकरः।" इति। मेदिनीकरश्च खृस्ताब्दस्य चतुर्दशशतके समभवदिति रामकृष्णगोपालभाण्डाकर, एम्. ए, पीएच्.डी., महाशयेन मालतीमाधवभूमिकायां निरूपितम् तदप्यस्मन्निरूपितमल्लिनाथतत्पुत्रस्थितौ साधकमेवेति।

कोलाचलमल्लिनाथेन रघुवंशटीकायां "व्याचष्टे कालिदासीयं काव्यत्रयमनाकुल"मित्युक्तत्वात् रघुवंशकुमारसम्भवमेघदूतटीकानां सञ्जीविनीत्येकनामत्वात् तासु वाणीं काणभुजीमितिमुद्राश्लोकदर्शनात् तासामेककर्तृकत्वं सर्वजनसुप्रसिद्धम्। शिशुपालवधटीकायां १ सर्गे अभूदभूमिरिति ४२ श्लोकव्याख्याया"मित्युक्तमस्माभिर्दैवपूर्वं गिरिं ते इति, धनुरुपपदमस्मै वेदमभ्यादिदेश इत्येतद्व्याख्यानावसरे सञ्जीविन्यां घण्टापथे च।" शिशुपालवधटीकायां १३ सर्गे मुदितैरिति २४ श्लोकव्याख्याने "तदेतत्सर्वमस्माभिः कालिदासत्रयसञ्जीविन्यां विवेचितम्।" अपि च शिशुपालवधटीकायां १२ सर्गे उत्क्षिप्तगोत्र इति ५ श्लोकव्याख्याने "तदेतत् सम्यग्विवेचितमस्माभिः किरातार्जुनीयटीकायां घण्टापथे"। इत्यनेन कालिदासत्रयसञ्जीविन्याः शिशुपालवधसर्वङ्कषा-

(१) शिशुपालवधटीकायां २ सर्गे "यजतां पाण्डव"इति ६५ श्लोकव्याख्याने १४ सर्गे "निर्जिताखिले"ति २९ श्लोकव्याख्याने द्रष्टव्यम्।

टीकाकिरातार्जुनीयघण्टापथटीकयोरप्येकमल्लिनाथकर्तृकत्वं सुव्यक्तम्(१)। मल्लिनाथेन तार्किकरक्षाटीकायामस्मिन्नेव पुस्तके ३९ पृष्ठे "स्फुटीकृतं चैतदस्माभिः पञ्चकाव्यादिटीकासु अलं महीपाल तव श्रमेणेत्यादावित्युक्तत्वात् आदौ वाणीं काणभुजीमितिश्लोकस्य वर्तमानत्वात् तदेकमल्लिनाथकर्तृकत्वमस्यापि सिद्धम्।

केचित्तु "स्पष्टीकृतं चैतदस्माभिः पञ्चकाव्यादिटीकासु" इति मल्लिनाथेनोक्तत्वात् नैषधचरितस्य तदानीमसत्त्वात् नैषधचरितं तेन न व्याख्यातम्। मुद्रिता जीवातुसमाख्या नैषधचरितटीका त्वाधुनिकेन केनचित् पण्डितेन पुस्तकविक्रयप्राचुर्यार्थं कृतेति वदन्ति। तन्न मल्लिनाथेन रघुवंशटीकायां ४ सर्गे स सैन्यपरिभोगेणेति ४५ श्लोकव्याख्याने "नैषधे च। अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा"(२) इति। शिशुपालवधटीकायामपि ३ सर्गे कपाटविस्तीर्णेति १३ श्लोकव्याख्याने "प्रायेणैकार्थमप्यनेकश्लोकमुक्तिविशेषलाभाल्लिखन्ति कवयः यथा हि नैषधे आदावेव निपीयेत्यादिश्लोकद्वयं तथा स्वकेलिलेशेत्यादिश्लोकद्वयं चे"त्युक्तत्वात् तदानीमेव मल्लिनाथेन नैषधचरितस्य समालोचितत्वात् भगीरथेन च नैषधचरितगूढार्थदीपिकायां टीकायां(३) मल्लिनाथकृतजीवातुटी-

(१) मयाध्ययनसमये मल्लिनाथकृतकाव्यटीकायन्यानामपि विवरणस्य मनोरमं पुस्तकं दृष्टम्। खेदितोऽस्मि तत् कौतुककरं पुस्तकमिदानीं हस्तगतं न भवतीति।

(२) नैषधे ३ सर्गे ९३ श्लोकः।

(३) अस्याष्टीकायाः पुस्तकं १६२९ शाकवर्षलिखितं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तते। अत्रानेकेषु स्थलेषु पूर्वलि-

काया अनेकेषु स्थलेषूद्धृतत्वाच्च । तथाहि नैषधगूढार्थदीपिकायां १ सर्गे कथं विधातर्मयि पाणिपङ्कजात् तव प्रियाशैत्यमृदुत्वशिल्पिन इति १३८ श्लोकव्याख्याने "कथमिति । हे विधातः भो विधे मयि विषये तव ब्रह्मणः पाणिर्हस्तः" "लिपिरक्षरपङ्क्तिः तवेत्यस्य विशेषणमिति नृहरिः ।" "जीवातुस्तु पाणेर्विशेषणमिति ।" इति भगीरथः ।

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुसहिते नैषधचरितपुस्तके ५५ पृष्ठे "कथमिति । हे विधातः प्रियायाः वरटायाः शैत्यमृदुत्वशिल्पिनस्तादृकूतरङ्गशैत्यमार्दवनिर्माणकात् तव पाणिपङ्कजात्"इति ।

खितेषु वाक्येषु कुण्डलनां विधाय तदर्थबोधकैरेव पदान्तरैरपूर्वाणि वाक्यानि लिखितानि अनेकेषां टीकाकाराणां मतानि पत्रपार्श्वभागे टिप्पणरूपेण लिखितानीतीदं पुस्तकं टीकाकारेणैव शोधितं समालोचितं वेत्यनुमीयते । अत्र नृहरि–लक्ष्मण–नारायण–विश्वेश्वर–जगद्गुरु–ताण्डव–मुकुट–जीवातुप्रभृतिभिः शब्दैष्टीकान्तराणि प्रमाणयति । क्वचित् प्रकारान्तरैरनेकानर्थान् दर्शयति टीकाकारः । अस्मदवलोकितासु भवदत्त–गदाधर–नरहरि–नारायण–मल्लिनाथ–महेश्वर–भगीरथ–रामचन्द्र–प्रेमचन्द्र–भावार्थदीपिकाकारकृतासु टीकासु सर्वापेक्षया महती सर्वोत्तमा इयमेव टीका । अस्यां प्रतिसर्गमन्ते "इति श्रीकूर्माचलेन्द्रश्रीरुद्रचन्द्रगोत्रापत्यकल्पद्रुमसद्रुशराजर्षिवर्यश्रीमदुद्द्योतचन्द्रात्मजश्रीज्ञानचन्द्राश्रितपुरोहितसोमयाजिपण्डितबलभद्रगोत्रापत्यश्रीहर्षदेवात्मजावसथ्यभगीरथविरचितायाः"मिति पुष्पिका वर्तते । अपि च

"अध्यापकं विना यो नैषधगूढार्थदीपिकां टीकाम् ।
पश्यति रसनाग्रे तु वाग्देवी तस्य स्फुरति भृशम्(?)॥" इति ।

बहुखेदितोऽस्मि यदिदं पुस्तकं खण्डितमिति ।

नैषधगूढार्थदीपिकायां १ सर्गे अयि स्वयूथ्यैरिति १३८ श्लोकव्याख्याने "पुनः प्रियां प्रत्याह । अयीति । अयि प्रिये संबुद्धिरिति नृहरिः । अपीति पाठ इति जीवातुः । अपि चेत्यपेरर्थः ।"

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुसहिते नैषधचरितपुस्तके ५९ पृष्ठे । "अपीति । अपि चेत्यपेरर्थः ।"

नैषधगूढार्थदीपिकायां १ सर्गे तवापि हाहा विरहात् क्षुधाकुला इति १४१ श्लोकव्याख्याने "तेषु प्रसिद्धेषु" "स्वसम्पादितेषु तेषु इति जीवातुः ।"

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुसहिते नैषधचरिते ५६ पृष्ठे "क्षुधाकुलाः क्षुत्पीडिताः तेषु स्वसम्पादितेष्वित्यर्थः ।"

नैषधगूढार्थदीपिकायां २ सर्गे स गरुद्वनदुर्गदुर्ग्रहान् इति ४ श्लोकव्याख्याने "ह्रस्वान्तं पृथक्पदमिति जीवातुः । यत्तु गोस्त्रियोर्ह्रस्व इति तेनोक्तं तन्न स्त्रीप्रत्ययान्तत्वाभावात् अतो ह्रस्वो नपुंसके इति ह्रस्व इत्याहुः" ॥

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुपुस्तके ६० "पृष्ठे तनुकण्डु यथा तथा गोस्त्रियोरुपसर्जनस्येति ह्रस्वः । नुनदे निवारितवान् स्वरितञित इत्यात्मनेपदम् ।"

एवमग्रेऽपि अनेकस्थलेषु वर्तन्ते ।

यद्यपि माघे मेघे गतं वय इति मल्लिनाथविषयककिंवदन्त्याऽनुमीयते वृद्धावस्थायां तेन नैषधचरितं व्याख्यातम् तथापि रघुवंशादिटीकास्विवानेकानाचार्याननेकान् ग्रन्थांश्च प्रमाणयति । तद्यथा मनुः विष्णुपुराण महाभारतं सामुद्रिकं वैजयन्तीकोशः हलायुधकोश वर्द्धमानः काव्यप्रकाशः क्षीरस्वामी पाणिनिः अमर-

कोशः वृत्तरत्नाकरः विश्वकोशः हलायुधकोशः तार्किकः उपाध्यायविश्वेश्वरभट्टारकः(१) एवमन्येऽपि ।

मल्लिनाथेन तार्किकरक्षाटीकायां ७६ पृष्ठे "प्रशस्तपादभाष्यनिकषटीकायामस्माभिर्व्याख्यातार्थो(२) द्रष्टव्य" एवमेव १३८ पृष्ठेऽप्युक्तत्वात् प्रशस्तपादभाष्यमपि विस्तरतो व्याख्यातमिति निष्पन्नम् ।

मल्लिनाथकृतामरकोशटीकाभट्टिकाव्यटीकैकावलीटीकादयो ग्रन्था न समालोचिता मयेति ।

वात्स्यायनापरनामधेयो मल्लिनागस्तु(३) नामत एव भिन्नो महर्षिरित्येतत् सर्वं न्यायवार्त्तिकभूमिकायां विस्तरेण निरूपयिष्यत इत्युपरम्यते ॥

वाराणसीस्थराजकीय-
संस्कृतपाठशालीयपुस्तकालये
२२ जनवरी १९०३ ।

विन्ध्येश्वरीप्रसादद्विवेदी

---

(१) विश्वेश्वरभट्टारको नैषधचरितटीकाकारः ।

(२) आदर्शपुस्तके "प्रशस्तपादभाष्यनिष्कण्टकायामिति" पाठो दृश्यते स च प्रामादिकः १४२ पृष्ठे "निकषे द्रष्टव्य" इत्यस्य वर्तमानत्वात् ।

(३) क्वचित् मल्लनाग इति पाठः ।

अथ
सटीकतार्किकरक्षाग्रन्थे निरूपितानां पदार्थाना-मकारादिक्रमेण सूचीपत्त्रम् ।

अथ
तार्किकरक्षाग्रन्थस्य पदार्थनिरूपणक्रम-सूचीपत्रम् ।

अथ
सटीकतार्किकरक्षाग्रन्थे उद्धृतानामाचार्याणां सूचीपत्त्रम् ।

अथ
सटीकतार्किकरक्षाग्रन्थे उद्धृतानां ग्रन्थानां सूचीपत्त्रम् ।

अथ
सटीकतार्किकरक्षाव्याख्यायां कोलाचलमल्लिनाथसूरिविरचितायां निष्कण्टकायामुद्धृतानामाचार्याणां सूचीपत्त्रम् ।

अथ
सटीकतार्किकरक्षाव्याख्यायां कोलाचलमल्लिनाथसूरि-विरचितायां निष्कण्टकायामुद्धृतानां ग्रन्थानां सूचीपत्रम् ।

अथ
सटीकतार्किकरक्षाव्याख्यायां ज्ञानपूर्णविरचितायां लघुदीपिकायामुद्धृतानामाचार्याणां
सूचीपत्त्रम् ।

अथ

सटीकतार्किकरक्षाव्याख्यायां ज्ञानपूर्णविरचितायां लघुदीपिकायामुद्धृतानां ग्रन्थानां

सूचीपत्त्रम् ।

अथ सटीकतार्किकरक्षायाः शुद्धिपत्त्रम्[१] ।

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
३	१४	गृह्यत	गृह्यते
४	१६	निःप्रयोजन	निष्प्रयोजन
४	२२	दोषेष	दोषेषु
६	८	प्रमाणसम्बन्ध	प्रमासम्बन्ध
७	११	मत्त्वा	मत्वा
७	२१	स्कन्दनीति	स्कन्दतीति
९	२१	यथार्थ	याथार्थ्य
१०	१५	व्यक्तुं	व्यङ्क्तुं
१०	१७	प्रधान्यात्	प्राधान्यात्
११	१०	प्रमेति	प्रमेत्यनेन
१२	१९	प्रमाणलक्षण	प्रमालक्षण
१३	२०	पूर्वादुप	प्रपूर्वादुप
१७	२२	प्रसक्तेन	प्रसक्तेर्न
१८	५	तत्र वा	तत्रैव
२०	१५	स्मृतीति	स्मृतीति ।
२०	१५	ज्ञापनाय ।	ज्ञापनाय
२०	१८	करणत्वा	कारणत्वा
२२	२२	मात्रंशयो	मात्रांशयो
२४	१४	नातीव युक्ति	नातीवयुक्ति
३६	९	त्स्वरदेवेत्या	त्स्वरवदित्या
३८	२३	वैय°	वैयर्थ्य
४१	१५	त्रांश	त्तांश
४२	८	शाखागते	शाखाविहिते

(१) यासामशुद्धीनां दर्शनमात्रादेव बोधो भवति तासां नात्र समुल्लेखः कृतः यथा ३ पृष्ठे १३ पङ्क्तौ "वाऽपिकस्य चित्" । एव मग्रे ऽपि ज्ञेयम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
४९	६	तद्द्रव्य	तद्द्रव्यं
५६	२१	मत्त्वति	मत्त्वेति
५७	१४	स्पुटार्थम्	स्फुटार्थम्
६५	२२	व्याप्तिरिति	व्याप्तीति
६८	१८	। तत्	तत् ।
७५	१६	साधन	साध्य
७५	१९	साधन	साध्य
७६	७	कस्यचि	क्वचि
७७	९	व्यवहृाय	व्यवहृिय
८०	९	धर्मवत्त्वेति	धर्मवत्त्वेनेति
८३	११	द्वीतीय	द्वितीय
८४	१६	दानां	दानीं
८५	८	तूद्दश	तूद्देश
९३	१५	साध्यविशि	साध्याविशि
१०१	१०	वहिष्टेषु	वहिष्ठेषु
१०६	२२	जन्य ऐन्द्रिय	जन्यमैन्द्रिय
१०९	७	स्येन्द्रिय	स्यैन्द्रिय
११४	११	सर्वबुद्ध्य	सर्वबुद्ध्यु
११६	८	अभावोभाव	अभावो न भाव
११८	७	मोक्षश्चद्वा	मोक्षश्चाद्वा
१२४	१७	स्पर्शन	स्पार्शन
१२५	१४	षल्ल	षड् ल
१२५	१६	सूत्रकारात्त	सूत्रकारोक्तं
१२५	१६	नन्वी	नन्वि
१२९	१४	चारत	चरित
१३०	२१	प्राद्रु	प्राद्रुः
१३३	२२	भावाभाव	भाभाव
१३४	१५	भावमेव	अभावमेव
१३४	२१	सिद्धेर्भाव	सिद्धेरभाव

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
१३५	१०	भूर्विकारत्वात्	भूविकारत्वात्
१३५	११	भूर्विकारत्वम्	भूविकारत्वम्
१३५	१४	स्यायकथन	स्यार्थकथन
१३७	१७	दनलनव	दनलव
१३८	१६	पल्ल	पड्ल
१३९	१	यत्	यतः
१४१	४	रुद्विष्टा	रुद्विष्टा
१४३	१२	व्यंभि	व्यभि
१४५	७	पेत्ताया	पेत्तया
१४६	२१	रूपं करोत्यर्थभूत	रूपकरोत्यर्थभूता
१४६	२२	प्रयत्वलिङ्ग	प्रयत्नात्मिका लिङ्ग
१६४	१४	येतरग्रन्थे	येतनग्रन्थे
१६४	२२	गतत्वा	गता त्वा
१६५	२२	न्येनासङ्	न्येन सङ्
१६६	२१	कोटीत्यर्थः	करोतीत्यर्थः
१७१	२०	सर्वत	सर्वत्र त
१७२	१२	सकर्तृ	कर्तृ
१७५	६	त्यानिष्ठ	त्यातिष्ठ
१७५	१०	इति । वदते	इति वदते
१७६	८	सिद्ध	सिद्धं
१७६	२३	समार्ष्टौ	सम्मार्ष्टौ
१७७	५	तकत्वमिक्ष	क्षतकत्वमि
१९३	१७	न भवति	न प्रभवति
१९४	१४	कारणानां	करणानां
२०२	१६	सिद्धं	सिद्धान्त-
२१३	१६	जिगीषवो	जिगीषो

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
२१५	१७	तस्या	तस्याः
२१६	२०	शङ्क्या	शङ्क्यो
२२०	८	हतु	हेतु
२२२	१९	निर्णयाथ	निर्णयार्थं
२३१	७	जाननस्य	जानानस्य
२३२	१६	स्तनु	तदनु
२३७	११	यथाऽनित्यः	यथा नित्यः
२५१	१९	साधर्म्यवैधर्म्यसम	साधर्म्यसमवैधर्म्यसमेति
२५३	१८	अजाती	जाती
२५३	१९	नन्तरभा	नन्तर्भा
२५३	२०	लक्षणैक	लक्षणैका
२५४	१६	ल्लक्षणप	ल्लक्ष्यलक्षणप
२५४	१७	समाहत्य	समाहृत्य
२५४	१८	दूषणासक्तं	दूषणाशक्तं
२५४	१८	सह उक्त	सदुक्त
२५५	२०	नाचिक्तेत	नाचिकेत
२५५	२१	गमादनित्यः	गमात् नित्यः
२५६	२०	साध्यसिद्धे-	साध्यसिद्धिं-
२५७	१५	कर्तृमत्वे	कर्तृमत्त्वे
२५७	१८	तस्मात्	न तस्मात्
२५९	१९	शब्दनित्य	शब्दानित्य
२५९	२०	साध्यपक्ष इति	साध्यापकर्षेति
२५९	२४	सिद्धत्व	ऽसिद्धत्व
२५९	२४	मारोप्य	मारोप्यम्
२५९	२४	उत्कर्षसमव	उत्कर्षसमाव
२६०	१९	असिद्धार्थे	सिद्धार्थे

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
२६०	२२	वत्पत्तो	वत्सपत्तो
२६१	११	त्वव्याघातः	स्वव्याघातः
२६१	२२	दिप्रति	दिति प्रति
२६२	३	तदासाध्य	तदाऽसाध्य
२६२	१०	द्वेतुमत्वे	द्वेतुमत्त्वे
२६३	२२	साध्यासाद्धः	साध्यसिद्धिः
२६७	१४	दोषस्या	दोषश्चा
२७१	१०	प्राप्ता	अप्राप्ता
२७१	१७	व्याप्त्या	व्याप्त्यादि
२७३	१६	इति मित्ते	इति निमित्ते
२७४	५	सिद्धिमात्र	सिद्धमात्र
२७५	२२	ज्ञापकत्वा	ज्ञापकत्वाद्
२७६	१२	प्रतिषधो	प्रतिषेधेऽ
२७७	२२	केनचिद्भंभा	केनचिद्दर्दभा
२८१	१८	प्रतिपत्त्या	प्रतिपत्त्यादि-
२८३	१०	धर्मसमानो	धर्मसमाता
२८४	६	योनित्विन	योगित्वेन
२८४	६	साध्याभावे	सहाभावे
२८४	१३	त्रिकाल्या	त्रैकाल्या
२८८	२१	पादनात्मकधर्मः	पादनार्थम्
२९६	५	तादूपेण	तादूप्येण
२९८	१	लब्धो	लब्धे
२९८	१५	धमापपत्ते	धर्मोपपत्ते
३०३	८	प्रतिषेध्य	प्रतिषेध्ये
३०३	२२	साध्यभाने	साध्यमाने
३१२	१७	वोदिनोः स	वोदिनोऽस

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
३२०	१७	सम्मति	सम्मतिना
३२४	९	साध्यधर्मा	साध्यधर्मे
३२८	२१	ज्ञत्वविधा	ज्ञत्वावधा
३३५	१५	वृत्तेः	वृतेः
३३७	१२	भङ्गतर	भङ्गन्तर
३४४	१६	सिद्धीरिति	सिद्धीति
३४४	१६	शब्दोनित्यः	शब्दोऽनित्यः
३४६	२२	सात	सति
३४६	२२	शब्दावयवयोः	शब्दार्थयोः
३४८	७	प्रतिभायोः	प्रतिभयोः
३५८	१९	शब्दो	शब्दः
३५८	२०	नित्यं कृत	कृत
३५८	२३	हेत्वन्तरमति	अर्थान्तरमिति

THE

TĀRKIKARAKṢĀ

AND

SĀRASAṂGRAHA

OF

VARADARĀJA

WITH THE GLOSSES

NIṢKAṆṬAKĀ

OF

MALLINĀTHA KOLĀCALA

AND

LAGHUDĪPIKĀ

OF

JÑĀNAPŪRṆA.

PREFATORY NOTICE.

Varadarāja's Tārkikarakṣā and commentary entitled Sārasaṁgraha were briefly noticed by Dr. R. G. Bhandarkar in the Report for 1883-84, p. 81. Further information is now appended. Varadarāja is silent in regard to himself. But he must have lived after Vācaspatimiçra and Udayanācārya to whom he constantly refers as authorities, and before Mādhavācārya by whom the Tārkikarakṣā is mentioned in the Sarvadarçanasaṁgraha. The two earlier Schoolmen were literary contemporaries. Vācaspatimiçra wrote his Nyāyasūcī in the year 976 A. D. (vide Bibliotheca Indica ed. Pandit Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares). Udayanācārya wrote his Lakṣaṇāvalī in 984-5 A. D. (vide Benares Sanskrit Series ed. P. Vindhyeçvarīprasāda Dvivedin). But Udayanācārya was probably much the younger man, as his Pariçuddhi is a commentary on Vācaspati's Tātparyaṭikā. He may be supposed to have lived as late as 1050 A. D. This date would furnish the *terminus a quo* for the time of Varadarāja. The *terminus ad quem* would be about 1300 A. D., that is to say, fifty years roughly before the time of Mādhavācārya.

Possibly Varadarāja may have to be placed not later than the first half of the XII Century. This conjecture is based on the existence of a commentary on the Tārkikarakṣā entitled Laghudīpikā composed by Jñānapūrṇa. The Laghudipikā is not mentioned in the Catalogus Catalogorum; nor has a notice of it been met with elsewhere. A copy of the work (on paper), transcribed in Samvat 1459, exists in the possession of P. Vindhyeçvarīprasāda (vide Appendix A.) Jñānapūrṇa mentions as his guru Viṣṇusvāmin, the son of Yajñeçvarahari, but gives no certain indication of his date. If Jñānapūrna be identified, conjecturally, with Jñānadeva who was the immediate successor of Viṣṇusvāmin the accepted founder of the Vallabhācārīs (vide Wilson's Religious Sects of the Hindus pp. 34 and 120), a nearer approach may be made to the date of Varadarāja. Viṣṇuswāmin is represented in the Bhaviṣyapurāṇa as preceding Nimbāditya and Madhvācārya (vide Appendix B.).

Madhvācārya is known to have lived during the first half of the XII Century. Viṣṇusvāmin may have preceded him by a few years only; for the word *prathamataḥ* of the Bhaviṣyapurāṇa does not necessarily imply any considerable interval of time. And Varadarāja may thus have been one of Viṣṇusvāmin's contemporaries.

We may be pretty sure that Viṣṇusvāmin did not live after 1300 A. D., as he is mentioned in the Sarvadarçanasaṁgraha; which fact in itself is an indirect confirmation of the account given of the Vaiṣṇava Schools in the Bhaviṣyapurāṇa So little seems to be known for certain about these earlier writers that the present conjectures may be just worth recording.

The Tārkikarakṣā, as its name implies, is a controversial treatise in defence of the Nyāya and Vaiçeṣika Systems. Aproppriating largely the labours of Vācaspatimiçra and Udayana, it attempts, in a concise and fairly easy manner, to make good the ground which these systems had lost in the Schools. It is divided into three chapters whose order of discussion adheres mainly to that of the original Nyāyasūtras. As might be expected, it discusses at some length such topics as the nature of true knowledge, and of the means whereby such knowledge may be attained and of the things that can be truly known and, as subservient to these, the nature of reasoning and logical fallacies and the rhetorical methods of debate. A fuller treatment of the work is reserved for the Introduction to the present edition.

The MS. materials employed are as follows:—

(1). MS. of Kārikā only, designated A.

(2). " and Sārasaṁgraha designated B.

This MS. is dated Sam. 57, which must be read 1457; because this MS. and No. 7 below were evidently written by the same hand, the form and size of the letters and of the paper corresponding exactly.

(3). MS. of Kārikā and Sārasaṁgraha designated C.

This MS. was transcribed by Mādhavabhaṭṭa, son of Kṛṣṇabhaṭṭa in Sam. 1661.

(4). Do. do. designated D.

Comprises 1st Pariccheda only: undated but old.

(5). Mallinātha's Niṣkaṇṭaka designated E.

Comprises 1st Pariccheda only.

(6). " " " F. "

Pariccheda only.

(7). Jñānapūrṇa's Laghudīpikā " G.

As the remaining chapters of the Niṣkaṇṭaka are not available, their place will be taken by those of the Laghudīpikā, and the first chapter of the latter work will be printed separately at the end of this edition.

A. V.

Appendix A.

लघुदीपिकाया आरम्भः ।

॥ ॐ नमो गणेशाय ॥

वन्दे मानससंफुल्लसरोजाननहंसगां ।
सरस्वतीं चतुर्वक्त्रां चन्द्ररेखावतंसकां ॥
न्यायरत्नाकरोत्था या विद्याश्रीरखिलार्थदा ।
तस्यास्तार्किकरक्षायाः करोमि पदचिन्तनं ॥
पुरा वरदराजेन न्यायशास्त्रार्थसंग्रहः ।
कृतः परत्वतो बुद्धा पद्यानां दुर्ग्रहार्थतां ॥
तेनैव रचिता व्याख्या सा च शास्त्रपदं गता ।
ततस्तदर्थसिद्धर्थं करोमि लघुदीपिकां ॥

पुस्तकस्य १५ पत्रे ।

एवं तार्किकरक्षायां ज्ञानपूर्णमुखोद्गता ।
प्रमेयस्य पदार्थस्य संपूर्णा लघुदीपिका ॥

ग्रन्थसमाप्तौ ।

सर्वैश्वर्यनिजावासं सर्वविद्यानिषेवितं ।
श्रीयज्ञेश्वरहरेः सूनुं श्रीविष्णुस्वामिगुरुं नुमः ॥
वरदराजीयटीका समाप्ता ॥ मंगलमस्तु ॥ संवत् १४८९
वर्षे वैशाष (ख) शु २ व्यासगोवर्द्धन एतेषाम् ।
व्यासकाह्न एतेषां ।

Appendix B.

भविष्यपुराणे भक्तिमाहात्म्ये २१ अध्याये ।

अतः परं त्वनुक्तानां पुराणे चरितं ब्रुवे ।
आसन् सिद्धान्तकर्तारश्चत्वारो वैष्णवा द्विजाः ॥
यैरयं पृथिवीमध्ये भक्तिमार्गो दृढीकृतः ।
विष्णुस्वामी प्रथमतो निम्बादित्यो द्वितीयकः ॥
मध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजः स्मृतः ॥

ॐ नमः परमात्मने ।

तार्किकरक्षा ।

श्रीवरदराजकृता ।

तत्कृतन्यायसारसंग्रहाभिधव्याख्यासहिता ।

कोलाचलश्रीमल्लिनाथसूरिविरचित-
निष्कण्टकाव्याख्यानुगता ।

ॐ श्रीकृष्णाय नमः ।

नमामि परमात्मानं स्वतः सर्वार्थवेदिनम् ।
विद्यानामादिकर्तारं निमित्तं जगतामपि ॥

श्रीगणेशाय नमः ।

परस्परोपासकभावभाजौ कौचिद्दयालू कलये पुमांसौ ।
ययोरभूदेकतरः कलत्री भूकन्यया भूधरकन्ययाऽन्यः ॥ १ ॥

वाणीं काणभुजीमजीगणदवासासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुराम्
लोके ऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ २ ॥

श्रीमल्लिनाथकविरेष करोति टीकाम्
वाणीगणेशचरणाम्बुरुहावलम्बी ।
निःशेषकण्टकनिराकरणेन नाम्ना
निष्कण्टकां वरदराजनिबन्धनस्य ॥ ३ ॥

प्रारिप्सितस्य ग्रन्थस्य(१) प्रेक्षावदुपादित्साप्रयोजिकामभिमतफलसाधनतामभिधाय श्रोतृबुद्धिमनुकूलयन् वर्त्तिष्यमाणमेवाग्रे दर्शयति ।

इह खलु तत्रभवान् बालानुकम्पी वरदराजः सकलन्यायशास्त्ररहस्योपदिदिक्षया(२) स्वविरचिततार्किकरक्षाश्लोकव्याख्यानाय सारसंग्रहं नाम प्रकरणमारभमाणस्तदविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलकाम्यया विशिष्टामिष्टां च देवतामभिवादयते । नमामीति(३) । परमात्मानमिति परमः सर्वोत्कृष्टो जीवात्मभ्यो विशिष्टः तमात्मानमीश्वरमित्यर्थः । सन्महत्परमेत्यादिना समासः । परमत्वे हेतुमाह सर्वार्थवेदिनमिति । योगिसाधारण्यं परिहरति स्वत इति । नित्यसर्वज्ञतया स्वाभाविकमस्य सार्वज्ञ्यं न तु योगप्रसादासादितमिति भावः(४) तत्सद्भावे प्रमाणद्वयं सूचयति । विद्यानामिति । चतुर्दशविद्यानामपीति भावः । आदिकर्त्तारं सर्गादौ प्रणेतारं तथा जगतां जनिमतां निमित्तमादिकर्त्तारम् ईशानः सर्वविद्यानां तस्मात्तपस्तेपनाच्चत्वारो वेदा अजायन्त यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतेरिति भावः । एतेन वैदिकः सन्दर्भः केनचित् प्रणीतः सन्दर्भत्वाद्रामायणवत् । तथाङ्कुरादिकं सर्वं सकर्तृकं कार्यत्वात् घटवदिति चानुमानद्वयादीश्वरसिद्धिरिति सिद्धम् । अत्रैव केवलव्यतिरेकिद्वयं चानुमाने स्वयं वक्ष्यति ।

(१) प्रारिप्सितग्रन्थस्य—पा· B पु· ।
(२) संक्षिप्य -इत्यधिकम् E पु· ।
(३) नमामि परमात्मानमिति—पा· E पु· ।
(४) नित्यसर्वज्ञतया स्वाभाविकी सर्वार्थवेदिता न तु योगप्रसादासादिततया सर्वार्थवेदित्वमिति भावः—पा· E पु· ।

(१)निःश्रेयसफलं प्राहुर्येषां तत्त्वावधारणम् ।
प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् ॥१॥

येषां प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां तत्त्वतोऽवधारणमात्यन्तिकदुःखविच्छेदलक्षण-

---

एतेन देवताया वैदिकत्वाद्विघ्नाकर्तृत्वाच्च वैशिष्ट्यमिष्टत्वं चोक्तमिति द्रष्टव्यम् । ननु यदभिधित्सितं तदभिधीयतां फले व्यक्तिर्भविष्यतीति न्यायात् किं मृषाग्रे(२) वक्ष्यमाणार्थप्रतिज्ञाडम्बरविलम्बैरित्याद्यश्लोकाक्षेपमाशङ्क्य समाधत्ते । प्रारिप्सितस्येति । प्रेक्षावतां धीमतामुपादित्सा स्वचिकीर्षा तत्र प्रयोजिकां हेतुभूतामित्यर्थः । प्रेक्षावत्प्रवृत्तेः प्रयोजनज्ञानाधीनत्वात् तज्ज्ञापनायाग्रे प्रतिज्ञा कार्येति भावः । यथाहुः कारिकायामाचार्याः ।

सर्वस्यापि हि शास्त्रस्य कर्मणो वाऽपिकस्य चित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ॥ इति

ततस्तदर्थपरामर्शितामाह । येषां पदार्थानामिति । किं षण्णां नेत्याह । षोडशेति । दिक्संख्ये सञ्ज्ञायामिति समासः सप्तर्षिवत् अन्यथा बहुत्वाद्यसिद्धेः । यद्वा पूरणप्रत्ययान्तोऽयं षोडशशब्दः तेषां च प्रत्येकमेव षोडशसंख्यापूरकत्वात् सर्वे षोडशाः ते च ते पदार्थाश्चेति विग्रहः । ते च सूत्रोद्दिष्टा एवेति स्मारयति । प्रमाणादीति । तत्त्वा-

---

(१) अत्र प्रथमं "नमामि परमात्मान"मिति पद्यं A पुस्तके वर्तते तच्च टीकास्थं लेखकप्रमादादत्र सन्निविष्टम् यतो मल्लिनाथेन निष्कण्टकायां "तार्किकरक्षाश्लोकव्याख्यानाय सारसंग्रहं नाम प्रकरणमारभमाण" इत्याद्युक्त्वा "इष्टां देवतामभिवादयते । नमामि परमात्मानमिति" उक्तम् ।

(२) किं मुधाग्रे–पा· E पु· ।

निःश्रेयसफलत्वेनाक्षचरण(१)पक्षिलमुनिप्रभृतयो वर्ण-यन्ति । यथा प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसि-द्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छ-लजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति(२) । तदिदानीं पदार्था लक्ष्यन्ते समानासमान-जातीयव्यवच्छेदकधर्मवत्तया प्रदर्श्यन्त इत्यर्थः । ननु

वधारणं याथात्म्येन निर्णयः । निश्चितं श्रेयो निःश्रेयसं मोक्षः । अचतुरादिना निपातनात् साधुः । तत्स्वरूपे वादि-विप्रतिपत्तेर्विवक्षितं लक्षणमाह । आत्यन्तिकेति । एत-च्चोपरि विवेचयिष्यते । प्राहुरित्यस्य प्रशब्दस्य सामर्थ्या-त्प्रतिपादनमर्थो नोक्तिमात्रमित्याह । वर्णयन्तीति । तस्य कर्त्राकाङ्क्षां पूरयति । अक्षचरणेति । अक्षचरणपक्षिलौ सूत्रभाष्यकारौ प्रभृतिशब्दाद्वार्त्तिककारादिसंग्रहः । तत्र सूत्रं संवादयति । यथा प्रमाणेत्यादि । प्रमाणं विना प्रमे-याद्यसिद्धेः । विषयं विना प्रमाणाप्रवृत्तेः । असन्दिग्ध-स्याप्रतिपित्सितत्वात् । सन्दिग्धस्यापि निःप्रयोजनस्याप्र-तिपित्सितत्वात् । प्रतिपत्तेश्च दृष्टान्तमुखत्वात् । अवय-वादिनियमस्य सिद्धान्तानुसारित्वात् । प्रमाकरणशरी-रनिर्वर्तकाङ्गत्वात् प्रमाणानुग्राहकत्वात् । तत्फलत्वात् । तस्यापि कथासाध्यत्वे वादस्य तत्त्वनिर्णयफलत्वात् । जल्पस्योभयपक्षसाधनवत्त्वसाम्यात् । वितण्डायाः कथा-पारिशेष्यात् । निग्रहहेतुषु सर्वथा हेयत्वात् । दोषेषु लघु-त्वात् फलत्वाच्चेति प्रमाणादिपदार्थोद्देशक्रमः । यत्तदोः

---

(१) अक्षपाद-पा॰ C पु॰ ।

(२) न्यायस्यादिमं सूत्र-मित्यधिकं C पु॰ ।

चिरन्तननिबन्धनानि तत्र तत्र विद्यन्ते तान्येव शिष्येभ्यो व्याक्रियन्तां किमनेनापूर्वनिर्माण[1]क्लेशेनेत्यत उक्तम् । नातिविस्तरमिति । अतिविततगहनगम्भीरैस्तैरलसप्रायाः शिष्या न व्युत्पादयितुं शक्यन्त इत्यर्थवानेवायमारम्भः । शब्दमात्रस्यैवेह[2] प्रपञ्चो निषिध्यते नार्थस्येति विस्तरशब्दं प्रयुञ्जानस्याशयः[3] ॥ १ ॥

सामानाधिकरण्येनोत्तरार्द्धं योजयति । तइदानीमिति । लक्ष्यन्ते इति लक्षेर्दर्शनार्थत्वात् तस्य चोपलब्धिपर्यायस्योद्देशादित्रये ऽपि सम्भवात् त्रयस्यापि कर्तव्यत्वाचार्थसन्देहे लक्षणपरत्वेन व्याचष्टे । लक्ष्यन्ते समानेति । अत्रोद्देशस्य सौत्रस्यैव स्थितत्वात् परीक्षायास्तु लक्षणशेषत्वादाहत्य तस्यैव तत्त्वावधारणहेतुत्वात् प्राधान्येन लक्षणतः प्रदर्शनं लक्षेरर्थ इति भावः । नातिविस्तरमिति न वक्तव्यं विस्तरेऽपि सप्रयोजने प्रवृत्तिसिद्धेरित्याशङ्क्यान्यथासिद्धिमूलानारम्भशङ्कोत्तरत्वेनावतारयति । ननु चिरन्तनेति । निबन्धनानि सूत्रभाष्यवार्त्तिकप्रभृतीनीत्यर्थः । एतावता कथमारम्भसिद्धिरत आह । अतिविततेति । विततं विस्तृतं टीकादि । गहनमकृत्स्नार्थतया साकाङ्क्षप्रकरणान्तरं गम्भीरं गुर्वर्थं सूत्रभाष्यादि । अतिशब्दः प्रत्येकं सम्बन्धनीयः । नन्वस्यापि सङ्क्षेपादकृत्स्नार्थतादोषः इत्यत आह । शब्दमात्रस्यैवेति । प्रथने वाक्शब्द इति तन्मात्रे विस्तरशब्दानुशासनादिति भावः ।

(१) ग्रन्थसन्दर्भनिर्माण—पा· C पु· ।

(२) मात्रस्यैवात्र–पा· B पु· ।

(३) भावः–पा· B पु· ।

प्रमाणाधीनसिद्धित्वात् इतरपदार्थानां प्राधान्येन[1] प्रथमोद्दिष्टं प्रमाणं लक्षयति तावत्[2] ॥

तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनम् ।
प्रमाश्रयो वा तद्व्याप्तो यथार्थानुभवः प्रमा ॥ २ ॥

(प्रमया वक्ष्यमाणलक्षणया अयोगव्यवच्छेदेन सम्बन्धः प्रामाण्यम् । यथाहुः नैयायिकाः । प्रमायोगव्यवच्छेदसम्बन्धः प्रामाण्यम् । तद्वत्प्रमाणम् । प्रमाणसम्बन्धश्चाश्रयत्वेन करणत्वेन च विवक्षितः । तेन न केवलं साधनमेव प्रमाणम् अपि त्वाश्रयोऽपी-

अतिशब्दाच्छब्दविस्तरस्यापि स्तोकशोऽङ्गीकारान्नास्त्यवैशद्यदोषोऽपीत्यभिसन्धिरनुसन्धेयः । एतेन पदार्थतत्त्वं विषयः । तत्त्वज्ञानं प्रयोजनम् । [3]साध्यसाधनभावः सम्बन्धः । मुमुक्षुरधिकारीत्यनुबन्धचतुष्टयसम्भवादिह प्रेक्षावतां प्रवृत्तिलाभ इति सिद्धम् ॥ १ ॥

अथोत्तरश्लोके प्रथमतः प्रमाणलक्षणे हेतुमाह । प्रथमोद्दिष्टमिति । सूत्र इति शेषः । सौत्रे प्रथमोद्देशे हेतुमाह । प्रमाणाधीनेति । तत्र तेषां पदार्थानां मध्ये इत्यर्थः । इह श्लोके वाशब्दात् प्रमाव्याप्तपदावृत्त्या च साधनमाश्रयो वान्यतरत्प्रमाव्याप्तं प्रमाणमिति व्रीहियववदैच्छिको विकल्पः प्रतीयते । तदसत् । उभयप्रामाण्यवादिनामन्यतराव्याप्तेरपसिद्धान्ताच्चेत्याशङ्क्य साधनमाश्रयश्चेति द्वयमपि प्रमाव्याप्तं प्रमाणं वाशब्दश्चार्थः ।

(१) प्रधानत्वेन–पा· B पु· ।
(२) तावदिति–C पु· नास्ति ।
(३) एतेन–इत्यधिकं F पु· ।

त्येतावत्प्रदर्शनायोक्तम् । अयोगव्यवच्छेदेनेति । साधनत्वेन प्रमासम्बन्धेनाभिनिवेष्टव्यम् । असम्बन्धनिवृत्तिमात्रेण प्रामाण्यमित्येतावदुक्तं भवति ।)(१)

साधनाश्रययोरन्यतरत्वे सति प्रमाव्याप्तं प्रमाणम् । ततश्चेश्वरस्यापि प्रमाश्रयतया प्रामाण्यसिद्धेर्नाव्याप्तिरिति भावः । न च प्रमाश्रयैरनीश्वरात्मभिः प्रमाकरणैश्च यादृच्छिकसंवादिलिङ्गविभ्रमादिभिरतिव्याप्तिः । तेषां प्रमासम्बन्धे नियमाभावात् । न तर्हीन्द्रियलिङ्गशब्दाः प्रमाणं भवेयुः तेषामपि नियमाभावादिति चेत् । माभूवन् । न हि वयं तेषां प्रामा-

प्रमाव्याप्तपदावृत्तिश्च प्रत्येकं विशेषणार्थेति मत्वा व्याचष्टे । साधनाश्रययोरिति । साधनाश्रययोरन्यतरत्वं नाम तदुभयव्यतिरिक्तत्वानधिकरणत्वम् । एवं चानुगतार्थलाभान्नान्यतरशब्दार्थखण्डनावकाशः । अत्राश्रयपदोपादानस्य फलमाह । ततश्चेति । साधनपदस्य तु स्फुटमेव करणव्याप्तिः फलमिति भावः । शेषमतिव्याप्तिनिरासार्थमित्याह । न चेति । लिङ्गविभ्रमो बाष्पादिः । आदिशब्दाद्भ्रान्तादिवाक्यानां गवयादौ महिषादिसादृश्यस्य च संग्रहः । कुतो नातिव्याप्तिरित्याशङ्क्य प्रमाव्याप्त्यभावादित्याह । तेषामिति । हन्तैकं सन्धित्सतोऽपरं प्रच्यवते यतोऽतिव्याप्तिं प्रतिक्षिपन्तमव्याप्तिरास्कन्दतीति शङ्कते । न तर्हीति । अव्याप्तौ हेतुमाह । तेषामपीति । तेषामौदासीन्यस्यापि सम्भवादिति भावः । इष्टापत्त्या परिहरति । माभू-

(१) ( ) एतन्मध्यस्थः B पु॰ नास्ति ।

वयमभ्युपगच्छामः । इन्द्रियार्थसन्निकर्षविशेषस्य लिङ्गपरामर्शादेश्च प्रामाण्याभ्युपगमात् । ते च प्रमां न व्यभिचरन्तीति नाव्याप्तिः । एवं प्रमासम्बन्धे ऽपि प्रमेयस्य व्यभिचारान्न प्रामाण्यप्रसङ्गः । किमर्थं तर्हि साधनमाश्रयो वेति विशेषणम् व्याप्त्युपादानादेव प्रमेयादिव्यावृत्तिसिद्धेरिति चेत् सत्यम् । तयोरेव प्रमाव्याप्तिः सम्भवतीत्येतावता तदुपादानम् न तु लक्षणशरीरानुप्रवेशेन सुखादिप्रमेयव्यावर्त्तनेन वा तदनुप्रवेश इति(१) न वैयर्थ्यम् ।

यथार्थानुभवः प्रमा । यथार्थानुभव इति प्रमा-

वन्निति । किं तर्हि प्रमाणमत आह । इन्द्रियार्थेति । सन्निकर्षविशेषस्यालोकादिसहकारिसाकल्यमेव विशेषः । लिङ्गपरामर्शस्तृतीयः प्रत्ययः आदिशब्दाच्च गृहीतसङ्गतिकशब्दविशेषसादृश्यविशेषयोः संग्रहः । न चैवमव्याप्तेरवकाश इत्याह । ते चेति । नापि प्रमेये ऽतिव्याप्तिः व्याप्त्यभावादेवेत्याह । एवमिति । तर्हि व्यावृत्त्यभावात् साधनाश्रयग्रहणं व्यर्थमिति शङ्कते । किमर्थमिति । प्रौढवादेनाङ्गीकृत्योत्तरमाह । सत्यमिति । प्रमाव्याप्तमित्येतावदेव लक्षणं शेषं तूदाहरणार्थमिति भावः । अथवा वास्तवपरिहारमाह । सुखादीति । सुखदुःखयोरनुभूतैकसत्त्वेन प्रमाव्याप्तत्वमिति भावः । किं चेश्वरप्रमया नित्यसर्वार्थगोचरया प्रमेयमात्रस्यापि प्रमाव्याप्तेस्तन्निरासेनार्थवत्त्वं द्रष्टव्यम् ।

ननु प्रमाणलक्षणप्रस्तावे प्रमालक्षणमसङ्गतमित्या-

---

(१) तदुपादानं स्यादिति-पा॰ C पु॰ ।

लक्षणम् । तत्र यथार्थेत्ययथार्थविषयाः पीतशङ्खादिविभ्रमा व्युदस्यन्ते तत एव तर्कसंशययोरपि व्यवच्छेदसिद्धिः । तर्कस्याहार्यलिङ्गजनितत्वेनारोपितविषयत्वस्याग्रे समर्थयिष्यमाणत्वात् । विरुद्धानियतकोटिद्वयावलम्बिनश्च संशयस्य तादृशविषयासम्भवेनायथार्थत्वात् । अनुभव इति स्मृतेर्निरासः । किमिदमनु-

---

शङ्क्य प्रकृतोपयोगान्न दोष इत्यभिप्रेत्याह । यथार्थानुभव इति । तत्राद्यविशेषणस्य व्यावर्त्त्यमाह । यथार्थेति । अयथार्थविषयत्वं तु तेषां बाधदर्शनादिति भावः । तस्यैव व्यावर्त्त्यान्तरमाह । तत एवेति । अयथार्थविषयत्वादेवेत्यर्थः । ननु तर्कस्य व्याप्तलिङ्गसमुत्थस्य प्रमाणाङ्गभावेन प्रमितिजनकस्य कथमयाथार्थ्यमित्याशङ्क्य बाधादित्याह । तर्कस्येति । व्याप्तलिङ्गस्याप्यारोपितत्वाद्दोषमूलारोपवद्बुद्धिमूलारोपेऽपि विषयापहारस्य तुल्यत्वादयाथार्थ्यं तथात्वेऽप्यनिष्टप्रसञ्जनद्वारा साध्याभावशङ्कोच्छेदकत्वात् प्रमाणाङ्गत्वं चेति भावः । तर्हि संशयो नायथार्थः तद्विषयस्य विभ्रमवन्नेदमिति बाधादर्शनादित्याशङ्क्याह । विरुद्धेति । यस्य ज्ञानस्य यावद्विषयः तस्य तथैव सत्त्वे तद्यथार्थं नान्यथेति स्थितिः । संशयस्य हि विरुद्धानियतकोटिद्वयात्मा विषयः । तस्य च तादृशस्यानन्तरमेव नियतैककोटिग्राहिणा तदुपमर्दकज्ञानेन बाधादसम्भवादयथार्थ्यमित्यर्थः । तदुक्तं शालिकायां पूर्वपक्षे ।

स्थाणुर्वा पुरुषो वेति सन्देहो योऽपि जायते ।
अभावात् तादृशार्थस्य स यथार्थः कथं भवेत् ॥ इति ।

अथानुभवपदव्यावर्त्त्यमाह । अनुभव इति । तद्ध्वंस्याः

भवत्वं नाम । प्रत्युत्पन्नासाधारणकारणप्रसूतप्रत्ययत्वं वा(१) तदविदूरप्राक्कालोत्पत्तिनियतासाधारणकारण-प्रसूतप्रत्ययत्वं वा । स्मृतेस्त्वसाधारणकारणं संस्कारः । तस्य तदुत्पादने तात्कालिकत्वनियमाभावान्न

स्मृतेर्भेदकं वाच्यम् । अन्यथा तद्व्यावर्तकत्वासम्भवादिति पृच्छति । किमिदमनुभवत्वं नामेति । कारणवैलक्षण्यं तावच्छेदकमाह । प्रत्युत्पन्नेति । प्रत्युत्पन्नं प्रत्यग्रजातम् । ननु स्मृतावपि समानमेतत् तत्कारणसंस्कारस्यापि स्वोत्पत्तिकाले प्रत्यग्रत्वादित्याशङ्क्य एतदेव निर्ब्रूते । तदविदूरेति । तस्य कार्यभूतस्य योऽविदूरः प्राक्कालसन्निहितपूर्वक्षणः तत्रोत्पत्त्या नियतव्याप्तं तत्कालैकजन्यमित्यर्थः । स्मृत्यसमवायिकारणात्ममनःसंयोगनिरासार्थमसाधारणेत्युक्तम् । घटादिव्यभिचारवारणार्थं प्रत्ययपदं स्वोत्पत्तिसन्निहितपूर्वक्षणजन्यासाधारणकारणोत्थज्ञानत्वमनुभवत्वमित्यर्थः । स्मृतेरेतद्व्यतिरेकमभिव्यक्तुं तत्कारणं चाह । स्मृतेस्त्विति । संस्कारमात्रजन्यं ज्ञानं स्मृतिरित्यर्थः । मात्रपदेन प्रत्यभिज्ञादिव्युदासः । तत्र सन्निकर्षप्राधान्यात् । यथाहुः । अथ ग्रहणस्मरणयोः कियती सामग्री । अधिकार्थसन्निकर्षो ग्रहणस्य संस्कारमात्रसंनिकर्षः स्मरणस्येति । ननु प्रत्युत्पन्नसंस्कारोत्थस्मृतावतिव्याप्तिरित्याशङ्क्य तन्निरासार्थमेव नियतपदमित्याह । तस्येति । एतेनानुभवत्वं नामौपाधिकं सामान्यमित्युक्तम् । सम्प्रति मुख्यमेवास्तु ज्ञानत्वव्याप्यमित्याह । ज्ञानत्वेति । प्रमाऽप्रमावृत्तिज्ञानत्वसाक्षाद्व्याप्यसामान्यमनुभवत्वं पूर्वोक्तस्यैव व्यवस्था-

---

(१) प्रत्युत्पन्नेत्यादि नास्ति B पु· ।

तत्र प्रसक्तिः । ज्ञानत्वावान्तरजातिभेदो वा अनुभवत्वम् । स्मृतिव्यतिरिक्तज्ञानत्वं वेति ॥ २ ॥

साधनमाश्रयो वेत्युक्तमेवार्थं विषयविशेषव्यवस्थया प्रपञ्चयति ॥

नित्यानित्यतया द्वेधा प्रमा नित्यप्रमाश्रयः ।
प्रमाणमितरस्यास्तु करणस्य प्रमाणता ॥ ३ ॥

एवं च नित्यप्रमाश्रयत्वादीश्वरस्यापि प्रतितन्त्रसिद्धान्तसिद्धं प्रामाण्यमपि लक्षितं भवति । तदुक्तम् । आप्तप्रामाण्यादिति । तन्मे प्रमाणं शिव

पकमिति भावः । प्रमेतिस्मृतित्वसंशयत्वादिव्युदासः । अप्रमेति प्रमात्वादिनिरासः(१) । शेषं सत्तागुणत्वज्ञानत्वनिरासाय । साक्षात्पदेन परोक्षत्वादिव्यावृत्तिः । अथ रूढिर्वा गुरुमतवदित्याह । स्मृतिव्यतिरिक्तज्ञानत्वं वेति । न च स्मृतिरप्यनुभवव्यतिरिक्तेत्यन्योन्याश्रयता । स्मृतेः पूर्वज्ञानजसंस्कारमात्रजन्यत्वेन लक्षणे तदनपेक्षणादिति ॥ २ ॥

उत्तरश्लोकं पूर्वपौनरुक्त्येनावतारयति । साधनमाश्रयो वेति ।

नित्यप्रमाया आश्रय एव प्रमाणं तस्याः करणासम्भवात् । अनित्यायास्तु करणमेव प्रमाणम् । सम्भवेऽप्याश्रयस्य प्रमाव्याप्त्यभावादिति भावः । नित्यप्रमाश्रयप्रामाण्यकथनफलमाह । एवं चेति । तदलक्षणे सिद्धान्तविरोधं सूचयति । प्रतितन्त्रसिद्धान्तसिद्धमिति । स्वतन्त्रमात्रसिद्धमित्यर्थः । तत्र सूत्रसंवादमाह । तदुक्तमिति । मन्त्रायुर्वेद-

(१) व्युदासः–पा· E पु· ।

इति च । अत्र प्रमासाधकतमं प्रमाणमित्यादीनि न्यायविदां लक्षणवचनानि लौकिकप्रमाणमात्रपराणि । अत एव हि प्रमातुरेवेश्वरस्य प्रमाविनाभावेन प्रामाण्यमुपपादयन्त आहुः ।

मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।

प्रामाण्यवत्तत्प्रामाण्यमाप्तप्रामाण्यादिति सूत्रे वेदप्रामाण्यं प्रतीश्वरप्रामाण्यस्याप्तप्रामाण्यादिति हेतुत्वेन सिद्धवदुपादानात् सिद्धमीश्वरप्रामाण्यमित्यर्थः । उदयनसंवादं चाह । तन्मे प्रमाणमिति । परोक्तलक्षणानां गतिमाहात्रेति । अकरणत्वे ऽप्याश्रयत्वादेव प्रामाण्यमीश्वरस्य प्रमाव्याप्तेरित्यत्रोदयनाचार्यवचनं संवादित्वेनावतारयति । अत एवेति । करणप्रामाण्यनियमाभावादेवेत्यर्थः । प्रमाश्रयत्वेनैवास्य प्रामाण्यं न तु लौकिकवत् करणत्वेनेत्याह । प्रमातुरेवेति । अकरणत्वे कथं प्रामाण्यमत आह । प्रमाविनाभावेनेति । अत्र संवादः । तदयोगव्यवच्छेदः प्रामाण्यमिति । तस्याः प्रमाया अयोगोऽसम्बन्धः तद्व्यवच्छेदः प्रमाव्याप्तिरिति यावत् । तदेव प्रामाण्यं तच्चेश्वरस्यापि सम्भवत्येवेति भावः ॥

नन्वीश्वरस्य कुतः प्रमाव्याप्तिः तज्ज्ञानस्याकार्यस्याफलत्वेनाप्रमात्वादित्याशङ्क्य प्रमालक्षणमाह । मितिः सम्यक्परिच्छित्तिरिति । अकार्यत्वे ऽपि सम्यगनुभूतित्वादीश्वरज्ञानं प्रमेति भावः । तथापि नेश्वरः प्रमाता नित्यप्रमां प्रति चाकर्तृत्वादित्याशङ्क्य प्रमातृलक्षणमाह । तद्वत्ता चेति । प्रमासमवायित्वं प्रमातृत्वं न तु कर्तृत्वमितीश्वरोऽपि प्रमातेति भावः । तर्हि नेश्वरः प्रमाणम् प्रमातृत्वकरणत्वयोर्विरोधादित्याशङ्क्य प्रमाव्याप्तं प्रमाणमिति

तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ इति(१) ॥ ३ ॥

अथ स्फुटतरानल्पदोषतया तेषां स्वरूपव्याक्रियैव निराक्रियेति मन्वानः प्रावादुकानां प्रमाणलक्षणा(२)न्युपन्यस्यति ।

अविसंवादिविज्ञानं प्रमाणमिति सौगताः ।
अनुभूतिः प्रमाणं सा स्मृतेरन्येति केचन ॥ ४ ॥
अज्ञातचरतत्त्वार्थनिश्चायकमथापरे(३) ।
प्रमेयव्याप्यमपरे प्रमाणमिति मन्वते ॥ ५ ॥
प्रमा नियतसामग्रीं प्रमाणं केचिदूचिरे ॥

नो मतं न तु तत्करणमिति अतो न विरोध इत्याह । तदयोगेति । प्रमाश्रयत्वात् प्रमातृत्वं प्रमाव्याप्तत्वात् प्रमाणत्वं च। न चानयोर्विरोधः करणत्वेन प्रामाण्यं तु लौकिकविषये न च तत्राश्रयत्वमिति न कुत्रापि विरोधवार्तेति भावः । न चेन्द्रियलिङ्गादिचतुष्करणकोटिष्वनन्तर्भावादीश्वरस्य पञ्चमप्रमाणत्वप्रसङ्गः साक्षात्कारिप्रमाव्याप्तत्वेन प्रत्यक्षान्तर्भावादिति ॥ ३ ॥

अथ यदेतदविसंवादिविज्ञानमित्यादिना सार्द्धश्लोकद्वयेन परेषां लक्षणपञ्चकमुपन्यस्तं तदप्यप्रतिषिद्धत्वादनुमतमिति शङ्कां शमयंस्तदवतारयति । अथेति । प्रावादुकाः प्रवक्तारः वदतेः प्रपूर्वादुपसंख्यानादुकञ्प्रत्ययः । अन्येषामपि दृश्यत इति पूर्वस्य दीर्घः ॥

अज्ञातचरोऽज्ञातपूर्वः । भूतपूर्वे चरट् इति ।

(१) न्यायकुसुमाञ्जलौ ४ स्तवके ५ कारिका ।
(२) लक्षणवचना-पा॰ C पु॰ ।
(३) अगृहीततथाभूतगोचरामपरे धियम्-पा॰ A पु॰ ।

तथागतमतानुवर्त्तिनो ह्यविसंवादिविज्ञानं प्रमाणम् अविसंवादश्चार्थक्रियास्थितिरिति लक्षयन्ति । तथाहुः ।

प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः ।

अविसंवादनमिति । तदसत् । भूतभविष्यद्विषयेष्वनुमानेष्वव्याप्तेः । न ह्यसतोर्भूतभविष्यतोः काचिदर्थक्रिया नामास्ति(१) । स्मृतिज्ञानसविकल्पकज्ञानाभ्यां चातिव्याप्तेः । न हि ततः प्रवृत्तो विसंवाद्यते । विकल्पस्य(२) चाविसंवादानङ्गीकारे निर्विकल्पकस्यापि तन्न स्यात् । तद्द्वारकत्वात् तत्संवादनस्य ।

अविसंवादिविज्ञानमित्यत्राद्यं क्रियाध्याहारेण व्याचष्टे । तथागतेति । नन्वविसंवादिविशेषणमनर्थकं सर्वस्यापि विज्ञानस्य विज्ञानत्वे विसंवादाभावादित्याशङ्क्यार्थद्वारको विसंवादो दृष्टो न स्वरूपप्रतिबन्धन इत्यभिप्रेत्याह । अविसंवादश्चेति । अर्थक्रियासमर्थविषयत्वमविसंवादित्वमित्यर्थः । अत्र सौगतवाक्यं संवादयति । तथाहुरिति । तदेतद्दूषयति । तदसदिति । अव्याप्तिं तावदाह । भूतेति । कुत इत्याशङ्क्य त्वदुक्ताविसंवादासम्भवादित्याह । न हीति । अतिव्याप्तिं चाह स्मृतीति । तदेव स्फोरयति । न हीति । अभिमतविषयं स्मृत्वा विकल्प्य वा प्रवृत्तस्य विसंवादाभावादित्यर्थः । विकल्पस्याविसंवादानङ्गीकारान्नातिव्याप्तिरित्याशङ्क्याह । विकल्पस्येति । तदविसंवादनं कुतो न स्यादित्यत्राह । तद्द्वारकत्वादिति । सविकल्पकावि-

(१) अर्थक्रियास्थितिर्नामास्ति—पा॰ C पु॰ ।
(२) सविकल्पकस्य च—पा॰ C पु॰ ।

न च शुक्तिकारजतादिविकल्पनिदर्शनेन तस्य विसंवादः साधयितुं शक्यते । पक्षादिग्राहिभिरेव विकल्पैः सकललैङ्गिकविकल्पैश्चानैकान्त्यात् । तन्मिथ्यात्वे चाश्रयाद्यसिद्धिः प्रसज्येत । अनुमानप्रामाण्यमप्युत्सन्नसंकथमापद्येत । एतेनार्थजत्वमर्थविषयत्वमपि(१) अविसंवाद इति निरस्तम् । विकल्पस्यापि तथाभावेन प्रामाण्यप्रसङ्गात् । अथैवं मनुषे स्वलक्षणप्रभवनि-

संवादनप्रमाणकत्वान्निर्विकल्पकाविसंवादनस्येत्यर्थः । विमतो विकल्पो विकल्पत्वाद् विसंवादी शुक्तिरजतविकल्पवदित्यनुमानं स्यादित्याशङ्क्याह । न चेति । कुत इत्यत आह । पक्षादीति । पक्षहेतुदृष्टान्तग्राहिविकल्पप्रामाण्ये तत्रैव विकल्पत्वहेतोरनैकान्तिकत्वं तदप्रामाण्ये हेत्वाद्यसिद्धिः स्यादित्यर्थः । किं चेत्थं प्रलपतो बौद्धस्य मूर्द्धनि भगवता बुद्धेनापि दुर्द्धर्षो महानयं वज्रपातः कृत इत्याह । अनुमानेति । विकल्पत्वाविशेषादिति भावः । उक्तदोषं पक्षान्तरे ऽप्यतिदिशति । एतेनेति । अर्थक्रियास्थितिलक्षणाविसंवादस्य विकल्पे ऽतिव्याप्तिकथनेनेत्यर्थः । साक्षात्स्वलक्षणप्रभवत्वमर्थजत्वम् अनारोपितार्थत्वमर्थविषयत्वमिति विवेकः । कथमन्यनिरासादन्यनिरास इत्याशङ्क्य दोषसाम्यादित्याह । विकल्पस्यापीति । विकल्पस्य प्रामाण्यप्रसङ्गमाह । तथाभावेनेति । अर्थजत्वेनार्थविषयत्वेन चेत्यर्थः । अन्यथा प्रवृत्तिसंवादौ न स्यातामिति भावः । ननु भ्रान्त्यैव प्रवृत्तिः अर्थक्रियासंवादस्तु यादृच्छिक इत्यप्रमाणमेव विकल्प इति नातिव्याप्तिरिति शङ्कते । अथैवमित्यादिना । अप्रामा-

(१) अर्थविषयत्वं वा—पा॰ B पु॰ ।

र्विकल्पकजन्मा तदारोपितार्थप्रतिभासश्च विकल्पः स्वलक्षणे पुरुषं प्रवर्तयति संवादयति च मणिप्रभाविषयमणिविकल्पन्यायेन परम्परयार्थप्रतिबन्धात्(१) न त्वाहत्यार्थजत्वमर्थविषयत्वं वाऽस्यास्तीत्यप्रामाण्यमेवेति । तर्हि तत एवाप्रामाण्यमनुमानस्यापि स्यात्(२) । अथ वह्निस्वलक्षणाद्धूमस्वलक्षणं तस्मादनुभवः तस्माद्धूमविकल्पः ततो दहनविकल्प इति परम्परयार्थजत्वेनानुमानप्रामाण्यमभ्युपगम्येत । तर्हि

ण्यमित्यन्तेन । अप्रामाण्ये कारणमाह । न त्वाहत्येति । साक्षादर्थजत्वार्थविषयत्वयोरभावं व्यनक्ति । स्वलक्षणप्रभवनिर्विकल्पकजन्मेति । अर्थजप्रसूतोऽयं न तु स्वयमर्थज इत्यर्थः । नन्वनर्थजत्वे ऽनर्थविषयत्वे वा कथमर्थावभासः तस्याप्यपह्नवे वा कथमस्मादर्थे प्रवृत्तिः संवादश्चेत्यत आह । तदारोपितार्थप्रतिभासश्चेति । नन्वारोपितार्थावभासात् प्रवृत्तिरस्तु शुक्तिरूप्यादिविकल्पवत् संवादस्तु कथमत आह । मणिप्रभेति । यथा मणिप्रभायां मणिबुद्धेर्भ्रान्तत्वे ऽपि मणिप्रभवप्रभाविषयतया परम्परया याथार्थ्यसम्बन्धादर्थक्रियासंवादो यादृच्छिको दृष्टः तथा विकल्पस्याप्यर्थजप्रत्यक्षप्रसूतेः पारम्पर्येणार्थसम्बन्धनियमादर्थक्रियासंवाद इत्यर्थः । तर्ह्यानुमानिकविकल्पेष्वव्याप्तिरित्याह । तर्हीति । तत एवाहत्यार्थजत्वाभावादेव अनुमानस्यानुमानिकविकल्पस्येत्यर्थः । अनुमानप्रतिबन्दिमोचनमाशङ्कते । अथेति । अनुभवः प्रत्यक्षनिर्विकल्पकमिति यावत् ।

(१) अर्थसम्बन्धात्–पा॰ C पु॰

(२) तर्ह्यनुमानस्यापि प्रामाण्यं न स्यात्–पा॰ C पु॰ ।

तत एव विकल्पस्मृत्योरपि प्रामाण्यमभ्युपगच्छ । तत्रापि पारम्पर्यस्य सुवचत्वात् । एतेन बाधविरहोऽविसंवाद इति च प्रत्युक्तम् । न चावस्तुभूतसामान्यविषयत्वादप्रामाण्यं विकल्पस्य । अनुमानस्यापि तथाभावप्रसङ्गात् । ततश्चैतन्निरस्तम् । यथाहुः ।

विकल्पोऽवस्तुनिर्भासादसंवादादुपप्लवः । इति ।

तथा ।

तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ।
व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः ॥ इति ।

तर्ह्यव्याप्तिं परिहरतः पुनः सैवातिव्याप्तिरावर्त्तते इत्यहो कष्टमायुष्मतः स्वभ्रादभ्रमध्ये प्रवेश इत्याह । तर्हीति । तत एव पारम्पर्येणार्थजत्वादेवेत्यर्थः । तत्र विकल्पस्यार्थजनिर्विकल्पकोत्थत्वादर्थजत्वम् । स्मृतेस्तु तादृग्विकल्पाहितसंस्कारप्रभवत्वादिति पारम्पर्येणार्थजत्वस्य सुवचत्वादित्यर्थः । अबाध्यत्वमविसंवादनमिति पक्षान्तरमाशङ्क्याह । एतेनेति । विकल्पे ऽतिव्याप्तिकथनेनेत्यर्थः । विकल्पस्यापि बाध्यत्वान्नातिव्याप्तिरित्याशङ्क्य किं तस्य बाध्यत्वमलीकसामान्यगोचरत्वात् । अशब्दात्मकस्यार्थस्य शब्दात्मकत्वेनावभासनाद्वेति द्वेधा विकल्प्याद्यं दूषयति । न चेति । कुत इत्याशङ्क्याबाध्यत्वस्यानुमानाव्याप्तेरित्याह । अनुमानस्यापीति । अनुमानस्यापि सामान्यगोचरत्वाविशेषादप्रामाण्यप्रसक्तेर्न सामान्यालीकत्वं युक्तमिति भावः । एतेन परेषां प्रलापाः परास्ता इत्याह । ततश्चेति । सामान्यालीकत्वायोगादित्यर्थः ॥

विकल्पः सविकल्पकम् उपप्लवो भ्रान्तिः कुतः अव-

अनुमानेन समानयोगक्षेमत्वाद्विकल्पस्य । न चाशब्दात्मकस्यार्थस्य शब्दात्मनावभासान्मिथ्यात्वं विकल्पस्य । न हि घटोऽयमित्यस्यायमर्थो घटशब्दोऽयमिति किं तु घटशब्दवाच्योऽयमिति । यथाहुः ।

स्तुनस्तुच्छस्य निर्भासात् तत्र वा स्वतन्त्रो हेतुः असंवादादिति। तस्यां विकल्पसंविदि बाह्यं विज्ञानातिरिक्तमिव एकमिव वस्तुनः परमाणुपुञ्जानतिरेके ऽप्यतिरिक्तमेकमाश्रितं स्थूलमिव तथा अन्यतो व्यावृत्तमिव व्यावर्त्तकसामान्यालीकत्वे ऽपि तत्कृतव्यावृत्तिविशिष्टमिव यद्रूपमाकारो भाति तन्निस्तत्त्वं तुच्छम्। कुतः परीक्षानङ्गभावतः विचारासहत्वादित्येतत्सर्वं पूर्वोक्तानुमानाप्रामाण्यप्रसङ्गादपास्तमित्यर्थः। द्वितीयं दूषयति। न चाशब्दात्मकस्येति। कुत इत्याशङ्क्य उक्तहेत्वसिद्धेरित्याह । न हीति । घटोऽयमिति घटशब्दवाच्यत्वावभासोऽयं न तु तत्तादात्म्यावभासः सामानाधिकरण्यनिर्देशसाम्यात्तु तादात्म्यावभासभ्रमो भवताम् । अन्यथाक्षादिशब्दश्रवणाद्देवनाद्यनेकार्थेष्वेकत्वावभासः घटादिमूर्तार्थेष्वमूर्तत्वावभासः यजेतेत्यादितिङन्तार्थेषु साध्यरूपेषु सिद्धरूपतावभासश्च स्यात् । सर्वस्यापि शब्दस्य निष्पन्नरूपत्वाविशेषादिति भावः ।

माभूत् तादात्म्यावभासः तथापि सञ्ज्ञायाः स्मर्यमाणविशेषणतया(१) पारोक्ष्यात् तद्विशिष्टसञ्ज्ञिविकल्पस्यापि पारोक्ष्यापत्तौ प्रत्यक्षत्वबाधः(२) स्यादिति शङ्कां वृद्धसंवादमुखेन परिहरति। यथाहुः सञ्ज्ञा हीत्यादि। यद्यपि प्रति-

(१) घटशब्दवाच्योऽयमिति निर्विकल्पकज्ञाने वाच्यदर्शनाद्वाचकस्मृतिः ।
(२) घटस्य यत् प्रत्यक्षत्वं तस्य बाधः स्यादित्यर्थः ।

सञ्ज्ञा हि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते ।
सञ्ज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥ इति ।

(इति बौद्धवादप्रकरणम्) ।(१)

प्राभाकरास्तु अनुभूतिः प्रमाणम् । स्मृतिव्य-

सम्बन्धिसञ्ज्ञिनिर्विकल्पकोद्बोधितसंस्कारोत्थस्मृतिपथपथिकतया परोक्षैव सञ्ज्ञा तथापि सञ्ज्ञिनो घटादेर्विकल्प्यमानस्य(२) प्रत्यक्षत्वं न बाधते परोक्षतां नापादयतीत्यर्थः । पराकृत इत्याशङ्क्य तदशक्तेरित्याह । न रूपाच्छादनक्षमेति । सञ्ज्ञिनः प्रत्यक्षत्वतिरोधानाशक्तेरित्यर्थः । अशक्तौ हेतुमाह । सा तटस्था हीति । हि यस्मात् सा सञ्ज्ञा तटस्था स्मृतिद्वारा इन्द्रियस्य स्वसम्प्रयुक्तसञ्ज्ञिविकल्पजनने सहकारित्वेन सन्निहिता न तु समबलत्वेनेति यावत् । अन्यथा स्मृतिसम्प्रयोगयोस्तुल्यबलत्वे मिश्रकार्योत्पत्तौ परोक्षत्वापरोक्षत्वसङ्करप्रसङ्गः । तस्मात् पूर्वकालतास्मृतिः प्रत्यभिज्ञायामिव सञ्ज्ञास्मृतिरपीन्द्रियसहकारितया न सञ्ज्ञिविकल्पे प्रत्यक्षतां बाधते । यथा सुरभि चन्दनमित्यादौ घ्राणजन्या गन्धबुद्धिरिन्द्रियान्तरसहकारिणी गन्धविशिष्टचन्दनविकल्पस्य चाक्षुषत्वं स्पार्शनत्वं वा न विरुन्धेत् तद्वदिति सुष्ठूक्तं तटस्थेति ।

अथ प्राभाकरीयं प्रमाणसामान्यलक्षणं दूषयितुमुपन्यस्यति । प्राभाकरास्त्विति । अनुभूतिः प्रमाणमित्यत्र भावसाधनोऽयं प्रमाणशब्दः । येयमिन्द्रियलिङ्गादिजन्या संवित् सानुभूतेरनुभवः । सा सर्वा प्रमाणं प्रमिति-

---

(१) ( ) एतन्मध्यस्थो नास्ति B पु· ।

(२) सविकल्पविषयस्य ।

तिरिक्ता(१) संविदनुभूतिः । स्मृतिश्च संस्कारमात्रजं ज्ञानमिति वर्णयन्ति । यथाहुः ।

प्रमाणमनुभूतिः सा स्मृतेरन्या स्मृतिः पुनः ।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ॥ इति ।

तत्र तावत् प्रमाणलक्षणे प्रथमाध्याये वेदाप्रामाण्यवादिनो बौद्धादीन् प्रति वेदवाक्यजनितस्य ज्ञानस्य स्वतः प्रामाण्यं प्रसाध्येदानीं स्मृतिव्यव-

---

रित्यर्थः । तस्याश्च हानादिव्यवहारानुगुणत्वात् स एव फलम् । यदा त्विन्द्रियतत्सन्निकर्षादेः प्रमाणत्वं विवक्षितं तदा प्रमाणशब्दः करणसाधनः अनुभूतिः फलमिति च द्रष्टव्यम् । तदुक्तं शालिकायां प्रमाणफलविभागप्रस्तावे ।

मानत्वे संविदो भाव्यं हानादानादिकं फलम्(२) ।
ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥ इति ।

ज्ञानस्य ज्ञानकरणस्येन्द्रियादेरित्यर्थः । न च स्मृतावतिव्याप्तिरित्याह । स्मृतीति स्मृतिव्यतिरेकज्ञापनाय । तामपि लक्षयति । स्मृतिश्चेति । संस्कारपदेनेन्द्रियलिङ्गादिजन्यज्ञानव्यवच्छेदः मात्रपदेन त्ववधारणार्थेन प्रत्यभिज्ञाव्यावृत्तिः । तत्र सम्प्रयोगस्यापि करणत्वादिति । कारणत्वा

अत्र शालिकासंवादमाह । यथाहुरिति । तदेतत्तुरगाधिरूढस्य तुरगविस्मरणम् यद्वेदप्रामाण्यसाधने प्रवृत्तस्य मीमांसागुरोस्तत्प्रमाद इति सोपहासं परिहरति ।

तत्र तावदिति । तावच्छब्द एष्यद्दोषसूचनार्थः । कथं तत्प्रमाद इत्याशङ्क्य स्वोक्तप्रमाणलक्षणस्य प्रकृतवेदवा-

---

(१) स्मृतेरन्या च-पा· B पु· ।
(२) संविदो मानत्वे हानादानादिकं फलं भाव्यमित्यन्वयः ।

च्छेदेनानुभूतित्वलक्षणं प्रामाण्यं प्रसाध्यत इति महदिदं व्याख्यानकौशलमायुष्मताम्। किं च स्मृतिज्ञानानामात्मस्वात्मनोरभिमतं प्रामाण्यं न सिध्येत् स्मृतीनां स्मृतिव्यतिरिक्तत्वासम्भवेनाननुभूतित्वात्। त्रितयप्रकाशरूपायास्तस्या वेद्यांश एव संस्कारजनितत्वेन स्मृतित्वं न त्वंशान्तरयोरिति चेत् न तयोः

व्याव्याप्त्यनवेक्षणादित्याह। प्रमाणेत्यादि। वाक्यजन्यस्य ज्ञानस्यानुभूतित्वेन प्रामाण्यं तज्जनकवाक्यस्यातल्लक्षणत्वादप्रामाण्यं दुर्वारमिति भावः। तावच्छब्दसूचितं दूषणान्तरं च प्रस्तौति। किं चेति। द्विविधं हि विज्ञानं ग्रहणं स्मरणं च तदुभयमपि पात्रप्रदीप इवात्मानमाश्रयतया स्वात्मानं स्वप्रकाशत्वेन विषयतया बाह्यं चावभासयतीति त्रिपुटीप्रत्यक्षतामाचक्षते गुरवः। तत्रात्मस्वात्मांशयोरुभयं प्रमाणं प्रत्यक्षं च वेद्यांशो स्मरणमप्रमाणमप्रत्यक्षं च। ग्रहणं तु पञ्चविधमपि(१) प्रमाणमेव तद्यथायथं प्रत्यक्षमप्रत्यक्षं चेति मन्यन्ते। तत्र स्मार्त्तयोरात्मस्वात्मांशयोः प्रमाणाभिमतयोरनुभूतित्वलक्षणमव्याप्तमित्याह। स्मृतिज्ञानानामिति। असिद्धौ कारणमाह। स्मृतीनामिति। आत्मस्वात्मांशयोरपीति शेषः। स्मृतिप्रयोजकसंस्कारजत्वाभावेन स्मृतित्वाभावादात्मस्वात्मांशयोः स्मृतिव्यतिरिक्तत्वं व्याप्तमिति शङ्कते। त्रितयेति। तत्रापि तत्प्रयोजकसम्भवादव्याप्तिस्तदवस्थेति परिहरति। न तयोरिति। नन्वस्त्येव कारणान्तरं तयोस्तत्रैव(२) यदन्यदात्ममनःसंयो-

(१). प्रत्यक्षादीनि चत्वारि अर्थापत्तिश्चेति पञ्चविधम्।
(२) तयोरात्मस्वात्मांशावभासयोः तत्रैव स्मृतौ।

संस्कारजनितत्वाभावे कारणान्तरं वाच्यम् । न हि सर्वसंविदां विषयप्रकाशांशकारणव्यतिरेकेण कारणान्तरं दृष्टमिष्टं वा । यथोक्तं प्राभाकरतन्त्रसागरपारदृश्वना शालिकानाथेन ।

सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा ।
साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मता ॥ इति ।

गादिकमित्याशङ्क्याह । न हीति । स्मृत्यादिषड्विधज्ञानेष्वपि संस्कारसम्प्रयोगादिविशेषयोगिन्यात्ममनःसंयोगादिसामग्री हि विषयप्रकाशांशे कारणं सैवात्मस्वात्मांशयोरपि कारणं वाच्यम् । अन्यथा सामग्र्यैकदेशानामंशतो विरुद्धानेकजाति[(१)]मद्विज्ञानजनकत्वे घटादिकार्येष्वपि तथाभावप्रसङ्ग[(२)] इत्यर्थः । अन्यथा प्रमाणविरोधस्वाभ्युपगमविरोधौ स्यातामित्याशयेनाह । दृष्टमिष्टं वेति । उक्तः प्रमाणविरोधः ।

स्वाभ्युपगमं दर्शयति । यथोक्तमिति । मेये त्विन्द्रिययोगोत्थेत्युक्त्वोच्यते । सर्वेत्यादि । येयं जगति ग्रहणस्मरणात्मिका संवित् सा सर्वापि मितौ स्वात्मांशे मातर्यात्मांशे च सर्वैः समग्रैरेव विज्ञानहेतुभिः संस्कारसम्प्रयोगादिभिरुत्थिता न तु सामग्र्यैकदेशेनेत्यर्थः । सा च प्रमा प्रमाणमेव किं च यथा मेयांशं साक्षात्कुर्वन्ती प्रत्यक्षा भवति एवमात्मस्वात्मांशयोरपि साक्षात्कर्तृत्वसाम्यात् प्रत्यक्षा च किं तु मेयमात्रांशयोस्तदतिरिक्ता मित्यंशे तु मितेरव्यतिरिक्तेति विशेष इति शालिकार्थः । तस्मादा-

(१) स्मृतित्वग्रहणत्वादि ।
(२) कुत्रचिद् घटत्वं कुत्रचिदन्यत् ।

एतेन स्वोत्पत्तौ संविदन्तरानपेक्षत्वमनुभूतित्वमित्यपास्तम् । पूर्वोक्तसकलदोषानतिवृत्तेः । अपि च सविकल्पकप्रत्यक्षस्यानुमानादीनां च संविदन्तरापेक्षोत्पत्तित्वेनाननुभूतित्वात्(१) तत्प्रामाण्यं न स्यात् । स्वसमानविषयसंविदन्तरानपेक्षत्वमभिमत-

त्मस्यात्मांशयोरपि स्मृतेः संस्कारजत्वाविशेषात् तत्रानुभूतित्वमव्याप्तमिति सिद्धम् । एवं परेषां कण्ठोक्तमनुभूतिलक्षणं निरस्य सम्प्रति सम्भावितानि लक्षणान्तराण्यपि निरसिष्यन् स्वोत्पत्तौ संविदन्तरानपेक्षा संविदनुभूतिरिति पक्षं तावदतिदेशेन निरस्यति । एतेनेति । कण्ठोक्तलक्षणनिरासेनेत्यर्थः । अत्रापि स्वोत्पत्तावित्यादिविशेषणात् स्मृतिव्यावृत्तिः । कुतो निरस्तमित्याशङ्क्य पूर्ववद्वेदवाक्येषु विशेष्याव्याप्तेः स्मार्त्तयोरात्मस्वात्मांशयोर्विशेषणाव्याप्तेश्चेत्याशयेनाह । पूर्वोक्तेति । अन्यत्रापि विशेषणाव्याप्तिं समुच्चिनोति । अपि चेति । निर्विकल्पकलिङ्गशब्दसदृशवस्त्वनुपपद्यमानार्थज्ञानसापेक्षत्वात् निर्विकल्पकव्यतिरिक्तप्रत्यक्षादिप्रमितिपञ्चकस्यापि अप्रामाण्यप्रसङ्ग इत्यर्थः । अनन्तरोक्तदोषनिरासाय लक्षणं विशिनष्टि । स्वसमानेति । स्वोत्पत्तावित्येव सविकल्पकादीनां निर्विकल्पकादिसापेक्षत्वेऽपि तत्समान(२)विषयत्वाभावान्न तेष्वव्याप्तिः । स्मृतिस्तु स्वोत्पत्तौ स्वसमानविषयपूर्वानुभवसापेक्षत्वान्न तत्रातिव्याप्तिश्चेत्याशङ्कितुराशयः । तथापि लैङ्गिकशाब्दयोरव्याप्तिर्विमर्शेऽतिव्याप्तिश्च

(१) अननुभूतित्वे—पा॰ B पु॰ ।
(२) तेन निर्विकल्पकादिना समानम् ।

मिति चेत् । तर्हि व्याप्तिग्राहकप्रमाणानधिकविषयमनुमानमित्यभ्युपगमात् शाब्दस्य स्वसमानविषयविमर्शापेक्षत्वाङ्गीकाराच्च तयोरनुभूतित्वं न स्यात् स्याच्च विमर्शस्येत्यात्मीय एव बाणो भवन्तं प्रहरति । अथार्थपरिच्छेदलक्षणे स्वकार्ये स्वसमानविष-

---

स्यातामिति परिहरति । तर्हीति । व्याप्तिग्राहकं प्रमाणं नाम यत्रेदं तत्रेदमिति लिङ्गलिङ्गिनोर्निरुपाधिकसम्बन्धग्राहकं प्रत्यक्षादि । तदुक्तम् ।

यः कश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥ इति ।

विमर्शस्तु शब्दप्रमाणानुग्राहकस्तर्करूपः स्मृतिविशेषः । नन्वस्य स्मृतित्वे कथं स्वोत्पत्तौ स्वसमानविषयसंविदन्तरानपेक्षत्वं तथात्वे वा कथं स्मृतित्वमतस्तत्राति-व्याप्तिवाचो युक्तिर्नातीव युक्तिमतीति चेत् सत्यम् तस्य सापेक्षत्वेऽपि स्मृतिप्रमोषवदनुभूतविषयत्वाभिमानाभावादनपेक्षत्ववाचो युक्तिः शब्दानुमानयोः स्वसमानविषयविमर्शादिसापेक्षत्वाभ्युपगमलक्षणं स्वचेष्टितमेव स्वस्य बाधकं जातमित्याशयेनाह । आत्मीय एवेति । अथ शाब्दलैङ्गिकयोः स्वोत्पत्तौ विमर्शादिसापेक्षत्वेऽपि स्वकार्ये तदभावात्तथा विशेषणे व्यापकं लक्षणमिति शङ्कते । अथेति । तच्च स्वकार्यमर्थपरिच्छेदोर्थव्यवहारश्चेति द्वयमस्ति । तत्र तावदाद्यावलम्बेनाह । अर्थपरिच्छेदेति । किं परिच्छित्तिः परिच्छेद इति भावसाधनोऽयं शब्द उत परिच्छिद्यतेऽनेनेति परिच्छेद इति करणसाधनो वेति द्वेधा विकल्प्याद्ये इन्द्रियलिङ्गादिकरणफलस्य संविदः स्वातिरिक्तपरिच्छेदाभावात्

यसंविदन्तरानपेक्षत्वमिति चेत् न स्वव्यतिरेकेण स्वकार्यस्य परिच्छेदान्तरस्याभावात् । भावे वा स्मृतिरपि तथा स्यात् । तस्या अपि स्वोत्पत्तावेव परापेक्षा नार्थपरिच्छेदे । अर्थव्यवहारः संवित्कार्य इत्यभ्युपगमे ऽपि तथा शब्दानुमानयोरिव स्मृतेरपि वेद्यव्यवहारहेतुत्वे पारतन्त्र्याभावात् । भावे वा स्मृतेरात्मस्वात्मनोरपि तथाभावेनानुभूतित्वं न स्यात् । तयोरंशयोः सर्वसंवित्साधारणत्वेन परानपेक्षत्वमिति

स्वस्यैव स्वकार्यत्वे आत्माश्रयणाल्लक्षणमसम्भवि स्यादित्याशङ्क्याह (1)। न स्वेति। द्वितीये स्मृतावतिव्याप्तिरित्याह। भावे वेति। कुत इत्यत आह। तस्या अपीति। अर्थपरिच्छेद इति । हेयत्वादिज्ञानरूपकार्य इत्यर्थः । व्यवहारपक्षावलम्बे ऽप्ययमेव दोष इत्याह। अर्थेति । अत्रापि व्यवहारशब्दो भावार्थः करणार्थो वेति विकल्प्याद्ये पूर्ववदात्माश्रयस्य(2) स्फुटत्वाद् द्वितीये स्मृतावतिव्याप्तिमतिदिशति । तथेति । कथं तथेत्यत आह। शब्देति। यथा शाब्दलैङ्गिकयोरुत्पत्तावेव संविदन्तरापेक्षा नार्थव्यवहारकार्ये तद्वत्स्मृतेरपीति तत्रातिव्याप्तिरित्यर्थः। अथातिव्याप्तिपरिहाराय स्मृतेर्वेद्यव्यवहारे ऽपि सापेक्षत्वमुच्येत तर्हि आत्मस्वात्मांशयोरपि तथात्वात् तयोरव्याप्तिः स्यादित्यहो कष्टमेकं सन्धित्सतोऽपरं प्रच्यवत इत्याह । भावे वेति । अथात्मस्वात्मांशयोः सकलसापेक्षज्ञानसाधारणत्वेनानपेक्षत्वान्न

---

(१) इत्याशयेनाह—पा· E पु·।

(२) इन्द्रियलिङ्गादिकरणफलस्य संविदः स्वातिरिक्तस्वकार्यार्थव्यवहाराभावात् स्वस्यैवार्थव्यवहारत्वे आत्माश्रयः ।

चेत् न अंशान्तरस्यापि साधारणत्वात् । न चात्मस्वात्मव्यवहारसमर्थत्वेन जातायाः संविदो वेद्यव्यवहारसामर्थ्यं हेत्वन्तरेण पश्चाद्भवतीति वाच्यम् । कार्यगतशक्तीनां कार्यकारणादेव कार्येण सहोत्पत्तेः । अन्यथा विरम्यव्यापारप्रसङ्गात् । न च बुद्धिशब्दकर्मणामनावृत्तानां विरम्यव्यापार उपपद्यते । स्वसमा-

तयोरव्याप्तिरिति शङ्कते तयोरिति । तर्हि वेद्यांशस्यापि तथात्वात् तत्रातिव्याप्तिरिति सेयमुभयतः पाशारज्जुरायुष्मत इति परिहरति । नेति । न त्वात्मस्वात्मव्यवहारजनने सहजशक्तियुक्तत्वात् तत्रानपेक्षैव संविद् वेद्यव्यवहारजनने त्वागन्तुकशक्तिकत्वात् तत्र तत्संविदन्तरसापेक्षेति न कुत्राप्यव्याप्तिरतिव्याप्तिर्वेति शङ्कामनूद्य शकलयति । न चेति । कुतो न वाच्यमित्याशङ्क्य स्वस्वाकाराधेय(१)शक्तीनां सर्वसंविदामागन्तुकशक्त्ययोगाद्वेद्यांशेऽपि स्मृतेरनपेक्षत्वेनातिव्याप्तिरित्याह । कार्येति । आगन्तुकशक्तिवादे ऽनिष्टमाह । अन्यथेति । सहजागन्तुकशक्तिकार्ययोः क्रमेण करणं विरम्यव्यापारः । इष्टापत्तिं परिहरति । न चेति । ननु वीणादिशब्दस्य क्रमिकानेकज्ञानजनकत्वात् तज्ज्ञानस्य च क्रमिकानेकसुखव्यक्तिजनकत्वात् कर्मणश्चेष्टादेः क्रमिकानेकाकाशादिदेशसंयोगविभागजनकत्वाच्चास्त्येव शब्दबुद्धिकर्मणां च विरम्यव्यापार इत्याशङ्क्याह । अनावृत्तानामिति । असन्तन्यमानानामित्यर्थः । तथा च तेषामेकसन्तानवर्त्तिनामनेकेषामेव क्रमकारित्वं न त्वेकस्यैव विरम्यव्यापृतिरिति भावः । लक्षणा-

(१) स्वस्वलक्षणाधेय—पा० E पु० ।

नव्यवहारहेतुसंविदन्तरानधीनोत्पत्तित्वमनुभूतित्वमिति चेत् । तर्हि स्मृतिज्ञानस्य वेद्यांशे ऽप्यनुभूतित्वापत्तिः । न हि तदितिव्यवहारस्य पूर्वानुभवकार्येणेदमितिव्यवहारेण समानविषयत्वम् । एकस्य वर्तमानकालावच्छिन्नवस्तुविषयत्वात् अतीतानुभवकालावच्छिन्नवस्तुविषयत्वाच्चान्यस्य । अन्यथा द्वयोरपि समानविषयत्वेन तत्तेदन्ताव्यवहारसङ्करप्रसङ्गात् । शब्दानुमानयोरपि विमर्शाद्यपेक्षत्वेन वेद्ये

न्तरमाशङ्कते । स्वसमानेति । स्मृतेरात्मस्वात्मांशयोरीदृक्संविदन्तरानपेक्षत्वाद्वेद्यांशे तदपेक्षत्वाच्च नाव्याप्तिरित्याशयः । माभूदव्याप्तिरतिव्याप्तिस्तु न शक्रेणापि शक्यते वारयितुमित्याह । तर्हीति । कुत इत्याशङ्क्य तत्तेदन्ताव्यवहारयोरसमानविषयत्वादित्याह । न हीति । ननु तदिदंशब्दपरामृष्टार्थस्यैकत्वात् कथं विषयभेद इत्याशङ्क्य विशेषणकालभेदाद्भेद इत्याह । एकस्येति । अनुभवकार्यस्येदमितिव्यवहारस्येत्यर्थः । अन्यस्येति । स्मृतिकार्यस्य तदितिव्यवहारस्येत्यर्थः । तथापि विषयभेदानङ्गीकारे दण्डमाह । अन्यथेति । तच्छब्दादिदमर्थे प्रवृत्तिरिदंशब्दाच्च तदर्थे प्रवृत्तिरुभाभ्यामुभयत्र वा प्रवृत्तिरुभयोः पर्यायतापत्तिश्च स्यादिति सङ्करार्थः । अव्याप्तिं चाह । शब्देति । अतिव्याप्त्यन्तरमाह । भवेच्चेति । कुत इत्याशङ्क्य तत्रोक्तलक्षणसंक्रमादित्याह । स्वसमानेति । विमर्शस्य स्मृतिरूपत्वादीदृक्पूर्वानुभवसापेक्षत्वे ऽपि स्मृतिप्रमोषवत् तथाभिमानाभावादनपेक्षत्ववाचो युक्तिः । अथान्यथालक्षणमाशङ्कते ।

नानुभूतित्वं भवेद् भवेच्च विमर्शस्य स्वसमानव्यवहारहेतुसंविदन्तरानपेक्षत्वात् । स्वहेतुसंविदन्तरानवच्छिन्नार्थविषया संविदनुभूतिरिति चेत् । तर्हि स्मृतिप्रमोषे वेद्ये ऽप्यनुभूतिः स्यात् । वक्तृज्ञानानुमिते ऽर्थे लौकिकवाक्यजन्यस्य वेदे ऽपि य एवं विद्वानित्याद्यनुवादवाक्यजन्यस्य[१] च ज्ञानस्यानुभूतित्वं

स्वहेत्विति । माभूदेवं स्मृतिवेद्यांशे ऽतिव्याप्तिः स्मृतिप्रमोषवेद्यांशे ऽतिव्याप्तेः कः प्रतीकार इत्याह । तर्हीति । इदं रजतमित्यादिविभ्रमस्थलेऽष्वख्यातिपक्षे नैकमिदं विज्ञानं किं त्विदमितीन्द्रियादिदोषवशादगृहीतशुक्तित्वादिविशेषपुरोवर्तिद्रव्यमात्रग्रहणं रजतमिति तु दोषप्रमुषिततत्तांशस्मरणं स स्मृतिप्रमोष इत्युच्यते । तस्य वस्तुनः स्वहेतुसंविदन्तरावच्छिन्नार्थत्वे ऽपि तथाभिमानाभावात् तदभाव इत्यनुभूतित्वापत्तिरित्यर्थः । अव्याप्तिं चाह । वक्तृज्ञानेति । वक्तृज्ञानावच्छिन्नार्थानुमानकाले ऽनुमित[२] इत्यर्थः । विषयघटितस्यैव ज्ञानस्यानुमेयत्वादिति भावः । गुरुमते सर्वत्र गामानयेत्यादिषु वाक्येषु वाक्यश्रवणानन्तरमेतद्वाक्यार्थज्ञानवानयं वक्ता एतद्वाक्यप्रयोक्तृत्वात् यो यद्वाक्यं प्रयुङ्क्ते स तस्यार्थं वेद यथाहम् । अन्यथा तत्प्रयोगायोगादित्यनुमित एवार्थे वाक्यं बोधकमित्युच्यते । किं च वेदे ऽपि य एवं विद्वानमावास्यां यजते य एवं विद्वान् पौर्णमासीं यजत इति विद्वद्वाक्याभ्यामाग्नेयादिषड्वाक्यावगत एव यागषट्के त्रिकद्वयानु-

(१) जनितस्य—पा· C पु· ।
(२) वक्तृज्ञानानुमानकाले ऽनुमित—पा· E पु· ।

न स्यात् । स्याच्च विमर्शस्यानुभूतित्वेन प्रामाण्यम् । किं चात्र सर्वत्रापि पीतशङ्खादिविभ्रमाः प्रमाणं भवेयुः । तत्र रूपरूपिणोर्निरन्तरभानमात्रेण सामानाधिकरण्यप्रतीतिमपलपतो बहिष्कार एव प्रामाणि-

वादेन ज्ञानं जन्यते तत्रोभयत्रापि स्वहेतुसंविदन्तरानवच्छिन्नार्थविषयत्वाभावादव्याप्तिः स्यादित्यर्थः । पुनश्चातिव्याप्तिमाह । स्याच्चेति । अथोक्तसकलपक्षसाधारणी[1]-मतिव्याप्तिमाह । किं चात्रेति । सर्वत्रापि स्मृतिव्यतिरिक्तस्यैव संविदः प्रामाण्ये प्रयोजकत्वोक्तेस्तस्य पीतशङ्खादिविभ्रमेष्वपि सम्भवात् तेष्वतिव्याप्तिरित्यर्थः । आदिशब्दाच्छुक्तिरजतादिसङ्ग्रहः । ननु सति कुड्ये चित्रकर्म तथाहि दोषच्छन्नधवलिम्नः शङ्खमात्रस्यागृहीताश्रयसम्बन्धस्य पित्तपीतिम्नश्च गृह्यमाणयोरेवासंसर्गाग्रहात्[2] तथा शुक्तिरजतादौ च विषयेन्द्रियमनोदोषमहिम्ना शुक्तित्वतत्त्वांशतिरोधानेन पुरोवर्तिरजतमात्रयोर्ग्रहणस्मरणाभ्यामेव भेदाग्रहाच्च विनापि विभ्रमं विपरीतव्यवहार[3]-सिद्धेर्निराश्रयो व्यभिचारो दुर्वच इत्याशङ्क्याह । तत्रेति । रूपरूपिणोरिति । शङ्खपीतिम्नोरित्यर्थः । इदं च धर्मारोपोदाहरणम् रजतादिधर्म्यारोपस्याप्युपलक्षणम् । निरन्तरभानमात्रेणेति । पूर्वोक्तप्रकारेणाधिष्ठानारोप्ययोर्यथायथमसंसर्गाग्रहणं भेदाग्रहेण वा यज्ज्ञानं तन्निरन्तरभानं तन्मात्रेणेत्यर्थः । सामानाधिकरण्यप्रतीतिमन्यथाख्यातिमित्यर्थः । बहिष्कार इति । प्रमाणसिद्धार्थापह्नोतुरप्रामा-

(१) अनुभूतिः प्रमाणं सेत्यत्रोक्ताम् ।
(२) विद्यमानोऽप्यसंसर्गो दोषाच्च गृह्यते ।
(३) अयथार्थव्यवहारः ।

कैः करणीय इति । एतेन साक्षात्प्रतीतिः प्रत्यक्ष-मिति तेषां प्रत्यक्षलक्षणमपि निरस्तम्[1] । यथाहुः ।

साक्षात्प्रतीतिः प्रत्यक्षं मेयमातृप्रमासु सा । इति ।

न तावत् त्वन्मते गुणस्य सतो ज्ञानस्य

णिकत्वं स्यादित्यर्थः । विमतः शङ्खः पीतज्ञानगोचरः पीतव्यवहारविषयत्वात् हरिद्रादिवदिति तु प्रमाणमन्यथाख्यातौ । तदेवं प्राभाकरीयं प्रमाणसामान्यलक्षणं पराणुद्य सम्प्रति तन्मतस्यातिफल्गुत्वप्रकटनार्थमप्रस्तावेऽपि तदीयं प्रत्यक्षलक्षणमपि पराणुदति । एतेनेति । सामान्यलक्षणप्रतिक्षेपेणेत्यर्थः । तथाहि साक्षात्प्रतीतिरित्यत्र प्रतीतिशब्देन किं संविन्मात्रमुच्यते अनुभूतिर्वा । आद्ये भावनाप्रकर्षपर्यन्तजस्मृतौ साक्षात्कारवत्यामतिव्याप्तिः स्यात् । द्वितीये तु पूर्ववत्[2] स्मार्तयोरात्मस्वात्मांशयोः प्रत्यक्षाभिमतयोरव्याप्तिरिति ॥

अथ लक्षणांशे शालिकासंवादमाह । यथाहुः साक्षात्प्रतीतिरिति । साक्षात्कारिण्यनुभूतिः प्रत्यक्षमित्यर्थः । अन्यथा पूर्वोक्तस्मृतिविशेषे ऽतिव्यापनात् लैङ्गिकादिव्युदासाय साक्षाद्विशेषणं मेयेत्यादि तु विषयप्रदर्शनपरम् । तत्र विशेष्यदूषणमतिदेशग्रन्थे गतमिति साक्षाद्विशेषणं दूषयिष्यन् किमिदं साक्षात्त्वं नाम मुख्यमेव ज्ञानत्वावान्तरसामान्यं वा भूतत्वादिवत् किञ्चिदौपाधिकं सामान्यं वेति द्वेधा विकल्प्याद्ये लक्षणमसम्भवीत्याह । न तावदिति । साक्षात्त्वजात्यभावे कार-

---

(१) परास्तम्—पा· B पु· ।

(२) अनुभूतिः प्रमाणमित्यादिवत् ।

साक्षात्त्वं नामावान्तरजातिरस्ति । गुणानामवान्तरजात्यनभ्युपगमात् । न च तद्व्यतिरेकेण साक्षात्त्वमिति किञ्चित् सम्भवति । तथाहि तत् किं प्रतीतेः प्रतीत्यन्तराव्यवहितेन्द्रियजत्वम्[1] १ स्वविषये प्रतीत्यन्तराव्यवहितत्वं वा २ स्वकालाकलितवस्त्ववभासित्वं वा ३ पदार्थस्वरूपविषयत्वं वा ४ सजातीयविजातीयसमस्तवस्त्वन्तरव्यावृत्तवस्तुस्वरूपविषयत्वं वा ५ वस्त्वन्तरप्रतीतिनिरपेक्षस्वगृहीतभेदवशेन दृष्टसमस्तवस्त्वन्तरव्यावृत्तवस्तुव्यवहारोत्पादनशक्तत्वं वा[2] ६ इदमहं जानामीति त्रितयव्यवहारानुगुणत्वं वा ७ किञ्चिद्धर्मान्तरं वा ८ ।

णमाह । गुणानामिति । रूपरसादीनां सर्वत्र गोघटादिष्वेकाकारावभासादेकव्यक्तिकत्वेनावान्तरजात्यभाव इति तेषां समयः । ननु माभूद् गुणानामवान्तरजातिः ज्ञानस्य किमिति नास्तीत्याशङ्क्य तस्यापि गुणत्वादित्याह । गुणस्य सत इति । ज्ञानस्यापि तन्मते सर्वत्रैकत्वादिति भावः । द्वितीये त्वसम्भव इत्याह । न चेति ।

असम्भवमेवाभिव्यक्तुमष्टधा साक्षात्त्वं विकल्पयति तथाहि तत् किमित्यादिना । यदेतत् प्रतीतेः साक्षात्त्वं तत् किमिति सर्वविकल्पशेषत्वेन योज्यम् । अनुभवव्यवधानेनेन्द्रियजत्वं स्मृतेरपीति तन्निरासार्थमुक्तं प्रतीत्यन्तराव्यवहितेति । शेषं चोदनाजन्यप्रतीतिनिरासार्थम् । एवं विकल्पान्तरेष्वपि यथायथं विशेषणफलमर्थाश्च तत्तन्नि-

---

(१) जन्यत्वम्–पा॰ C पु॰ ।

(२) शक्तिमत्त्वं वा–पा॰ C पु॰ ।

तत्र न प्रथमः कल्पः[१] । अनुमानादिसंविदां स्वात्मात्मनोरप्रत्यक्षत्वप्रसङ्गात्[२] ।

न द्वितीयः । चोदनाजनितायाः संविदो वेद्ये ऽपि प्रत्यक्षतापातात् । सापि विमर्शव्यवहितेति चेत् । तर्हि विमर्शस्य वेद्ये ऽपि प्रत्यक्षत्वप्रसङ्गात्[३] ।

रासदशायामेव सूत्प्रेक्ष्याः प्रेक्षावद्भिरित्युपेक्ष्यन्ते विस्तरभयात् । किञ्चिद्धर्मान्तरं वेति पूर्वोक्तसप्तभङ्गिव्यतिरिक्तमित्यर्थः ।

तत्राद्यमव्याप्त्या दूषयति । न प्रथम इति । व्याप्त्यादिज्ञानान्तरितलिङ्गादिजन्यत्वादनुमित्यादीनामात्मस्वात्मांशयोः प्रत्यक्षाभिमतयोरुक्तलक्षणमव्याप्तमित्यर्थः ।

अथोक्तदोषपरिजिहीर्षया द्वितीयपक्षावलम्बे सोऽप्यतिव्याप्तिहत इत्याह । न द्वितीय इति । तत्र स्वविषय इति विशेषणात् प्रागुक्ताव्याप्तिनिरासः । अनुमानादिसंविदामप्यात्मस्वात्मविषये वेद्यांशवत् प्रतीत्यन्तरापेक्षाविरहादिति । चोदना विधिवाक्यम् । चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति कारिकोक्तेः । तज्जन्यबुद्धे[४]रत्यन्तापूर्वार्थगोचरत्वेन स्वविषये वेद्ये ऽपि संविदन्तरायोगात् तत्रेदं लक्षणमतिव्याप्तमित्यर्थः । उक्तातिव्याप्तिपरिहाराय परः शङ्कते । सापीति । विमर्शो व्याख्यातः । तदेतदङ्गीकृत्यान्यत्रातिव्याप्तिमाह सिद्धान्ती । तर्हीति । तत्रापि

(१) कल्प-इति नास्ति B पु॰ ।
(२) प्रत्यक्षत्वापातात्—पा॰ B पु॰ ।
(३) प्रत्यक्षत्वं स्यात्—पा॰ B पु॰ ।
(४) चोदनाजन्यबुद्धेः ।

प्रमाणत्वे सतीति विशेषयिष्याम इति चेत् । तर्ह्युपमानस्य(१) प्रत्यक्षत्वप्रसङ्गः ।

न तृतीयः । अनुमानादावपि तथाभावप्रसङ्गात् । स्वकाले सत एवार्थस्यावभासकत्वनियम इति चेत् । न अत्रायं नियमो नान्यत्रेति विवेक्तुमशक्यत्वात् । यत्र विषयस्य ज्ञानं प्रति हेतुत्वं तत्रायं नियमः ।

प्रतीत्यन्तरव्यवधानकल्पनायामनवस्था स्यादिति भावः । अत्र विशेष्यप्रतीतिशब्देनानुभूतित्वस्य विवक्षितत्वाद् विमर्शस्य चास्मन्मते स्मृतावन्तर्भावान्न तत्रातिव्याप्तिरिति शङ्कते । प्रमाणत्व इति । तर्ह्युपमितावतिव्याप्त्या स्वस्थो भवेत्याह । तर्ह्युपमानस्येति । अनेन सदृशी सा गौरिति पुरोवर्तिप्रतियोगिकपरोक्षवस्तुनिष्ठसादृश्यज्ञानस्य स्वविषयप्रतीत्यन्तराव्यवहितत्वादिति भावः ।

अथैतत्कल्पानिर्वाहनिर्वेदात् तृतीयकल्पाश्रयणे सोऽपि तथेत्याह । न तृतीय इति । कुत इत्याशङ्क्य किं तत्र स्वकालाकलितत्वं नाम वस्तुनः स्वकाले सत्त्वं वा स्वकालविशिष्टत्वं वा । आद्ये स्वकाले सतोऽप्यवभासकत्वं स्वकाले सत एवेति द्वेधा विकल्प्याद्ये त्रैकालिकार्थावभासिन्यनुमानादावतिव्याप्तिरित्याह । अनुमानादावपीति । तथाभावः सतोऽप्यवभासकत्वम् । द्वितीयमाशङ्कते । स्वकाल इति । ज्ञानकाल इत्यर्थः । सत एवेति । वर्तमानस्यैवेत्यर्थः । गूढाभिसन्धिरुत्तरमाह । नेति । अत्र प्रत्यक्षे । अन्यत्रानुमानादौ । विवेक्तुं नियन्तुमित्यर्थः । अज्ञातपराशयः परो नियामकमाशङ्कते । यत्रेति । यस्मिन् प्रमाण

(१) वेद्ये ऽपि—इत्यधिकम् C पु· ।

असतो ज्ञानं प्रति हेतुत्वायोगादिति चेत् । एवं सति सर्वसंविदां स्वात्मन्यप्रत्यक्षत्वप्रसङ्गः । स्वात्मनि स्वस्य हेतुत्वायोगात् स्वविषयत्वानभ्युपगमाच्च । स्वकालविशेषितार्थावभासित्वमिति चेत् । तर्हि निर्विकल्पकस्य सर्वसंविदां स्वात्मात्मनोरप्रत्यक्षत्वापातः ।

न चतुर्थः । तत्र यदि वस्तुस्वरूपं साक्षादित्यु-

इत्यर्थः । ज्ञानं प्रति हेतुत्वमेव अत्र नियामकं तच्च प्रत्यक्ष एव सम्भवति नान्यत्रेति भावः । अन्यत्रासम्भवे कारणमाह । असत इति । भूतभाव्यनुमानादिविषयभूतार्थस्य तत्कालासत्त्वेन हेतुत्वादित्यर्थः। अथ सिद्धान्ती प्रव्यक्ताभिसन्धिरव्याप्त्या दूषयति । एवं सतीति । कुत इत्याशङ्क्य स्वोक्तनियामकाभावादित्याह । स्वात्मनीति । विषयत्वादेव हेतुत्वमित्याशङ्क्य तदपि नास्तीत्याह । स्वविषयत्वेति । तदभ्युपगमे त्वात्माश्रयः स्यादिति भावः । विशिष्टपक्षमाशङ्कते । स्वकालेति । अत्राप्यव्याप्तिमाह । तर्हीति । निर्विकल्पकस्याविशिष्टविषयत्वाद् ज्ञानात्मनोः स्वमते विषयतयानवभासाच्च(१) तेषु कालविशिष्टार्थावभासकत्वमव्याप्तमित्यर्थः ।

अथ चतुर्थपक्षोपन्यासोऽपि व्यर्थ इत्याह । न चतुर्थ इति । कुतो नेत्याशङ्क्य यदेतत्प्रतीतेः साक्षात्त्वं नाम पदार्थस्वरूपविषयत्वमित्यात्थ तत् किं पदार्थमात्रस्वरूपविषयत्वं साक्षाद्भूतपदार्थस्वरूपविषयत्वं वा । आद्ये ऽनुमानादावतिव्याप्तिरित्यास्तां तत् । द्वितीये तु साक्षाद्भूतपदार्थ एव स्वरूपमात्मा तद्विषयत्वं वा उत साक्षाद्भूतप-

---

(१) विषयत्वानवभासाच्च-पा॰ E पु॰ ।

त्का तद्विषया संवित् साक्षादित्य(१)भिधीयते । ततः प्रत्यक्षसमानविषया स्मृतिरपि तथा स्यात् । यदि स्वस्य रूपं स्वरूपमिति जात्यादिधर्मभेदप्रतीतिः । तर्ह्यनुमानादेरपि तथात्वं प्रसज्येत । यदा स्वस्यैव

दार्थे यत् स्वरूपमित्यनवधारितषष्ठीसमासाश्रयणात् तन्निष्ठसामान्यादिसाधारणधर्मस्तद्विषयत्वं वा अथवा स्वस्यैव रूपमित्यवधारणात् तन्निष्ठासाधारणधर्मस्तद्विषयत्वं वा स्वमेव रूपमिति सावधारणकर्मधारयाश्रयणान्नामाद्यविशिष्टापरोक्षवस्तुविषयत्वं वा यद्वा स्वरूपशब्दस्य प्रतीत्यन्तरसंस्पर्शनिषेधपरत्वमाश्रित्याज्ञातचरसाक्षाद्भूतवस्तुविषयत्वं वेति पञ्चधा विकल्प्याद्यमनुवदति। तत्र यदीति। साक्षात्त्वस्य विषयधर्मतामाह । वस्तुस्वरूपं साक्षादित्युक्त्वेति । सर्वविकल्पशेषं चैतत् । अत्र वस्त्वेव स्वरूपमात्मेति विग्रहार्थः स्वरूपशब्दश्चात्र रूढवृत्तिः। तथा च साक्षाद्भूतपदार्थस्वरूपविषयत्वं(२) साक्षात्त्वमित्यर्थः । एतत्प्रत्यक्षानुभवजन्यस्मृतावतिव्याप्तमित्याह । तत इति । द्वितीयमनुवदति । यदि स्वस्येति । आदिशब्दात् संख्यादिसंग्रहः । अत्र प्रतीतेः साक्षाद्भूतवस्तुनिष्ठसाधारणधर्मविषयत्वं साक्षात्त्वमित्यर्थः। अस्य धूमानुमानादावतिव्याप्तिरित्याह । तर्हीति । अत्रादिशब्दात् स्मृतेरपि संग्रहः। तृतीयमनुभाषते । यदा स्वस्यैवेति । साक्षाद्भूतवस्तुनिष्ठासाधारणधर्मविषयत्वं साक्षात्त्वमित्यर्थः । इदं तावदयं स्वरो मत्पुत्त्रीयः विशिष्टस्वरत्वात् पूर्वानुभूतैत-

(१) साक्षात्प्रतीतिरित्य-पा॰ C पु॰ ।

(२) वस्तुविषयत्वं -पा॰ E पु॰ ।

रूपं स्वरूपमित्यसाधारणधर्मप्रतीतिः[1] तदा पुत्त्रादिस्वराद्यनुमानेऽतिव्याप्तिः[2] न व्याप्नोति च साधारणधर्मदर्शनम् । अथ स्वयमेव रूपं स्वरूपं रूप्यतेऽनेन संविदिति च रूपम् । तेन या स्वरूपेण स्वात्मना वस्तु विषयीकरोति सा साक्षात्प्रतीतिः नैवमनुमानादिरिति चेत् । तर्हि सविकल्पकस्याप्रत्यक्षत्वप्रसङ्गः[3] । तत्र नामादिरूपेण विषयीकरणात् ।

स्वविषयान्तर्गतप्रतीत्यन्तराव्यवहितत्वं स्वरू-

त्स्वरदेत्याद्यसाधारणधर्मानुमानेऽवतिव्याप्तमित्याह । तदा पुत्त्रादीति । आदिशब्दाद्भ्रात्रादिसंग्रहः । स्वरादीत्यादिशब्दाद्देशभाषादिसंग्रहः । अथ सङ्ख्यादिसाधारणधर्मप्रत्यक्षेऽव्याप्तिश्चेत्याह । न व्याप्नोति चेति ।

चतुर्थमाशङ्कते । अथ स्वयमेवेति । नन्वेकस्यैव कथं धर्मधर्मिभाव इत्याशङ्क्य रूपशब्दं च निरुक्तिभेदेन धर्मिपरत्वेन व्याचष्टे । रूप्यत इति । तथा च रूपमिति निरूपकमित्यर्थः । फलितमाह । तेनेति । स्वरूपशब्दस्य पूर्वोक्तनिरुक्तिसिद्धार्थमाह । स्वात्मनेति । अविशिष्टाकारेणेति यावत् । इत्थम्भावे तृतीया । तथा च यद्वस्तु यथाभूतं तत्तथैवोल्लिखति न तु विशिष्टमित्यर्थः । एतेन नामाद्यविशिष्टसाक्षाद्भूतवस्तुविषयत्वं साक्षात्त्वमिति सिद्धम् । तथा च पूर्वोक्तातिव्याप्तिर्निरस्तेत्याह । नैवमिति । अनुमानस्य विशिष्टविषयत्वादिति भावः । तर्हि मूले कुठार इत्याह । तर्हीति ।

(१) धर्मभेदप्रतीतिः—पा॰ C पु॰ ।
(२) अतिव्याप्नोति—पा॰ B पु॰ ।
(३) प्रसक्तिः—पा॰ B पु॰ ।

पप्रतीतित्वमित्ययं पक्षः स्मृतेः स्वात्मात्मनोरप्रत्यक्षत्वापातेन निरस्त एव ।

न पञ्चमः । पुत्त्रादिविषयस्वराद्यनुमाने ऽतिव्याप्तेः । सजातीयविजातीयसमस्तवस्तुदर्शनाशक्तेस्तद्व्यावृत्तप्रत्ययासम्भवाच्च । वस्तुतो व्यावृत्तविषयत्वमात्रेण प्रत्यक्षत्वे ऽनुमानादेरपि तथात्वं स्यादिति ।

नापि षष्ठः । निर्विकल्पकसापेक्षमेव विकल्पेन विकल्पितरूपग्रहणमिति विकल्पस्याप्रत्यक्षत्वप्रसङ्गात् । उत्पत्तावेव विकल्पस्य तदपेक्षा न

पञ्चमोऽप्यव्याप्तिग्रस्त इत्याह । स्वविषयेति । अत्र स्वरूपशब्देनाज्ञातचरत्वं विवक्षितं तच्च स्मार्तयोरात्मस्वात्मांशयोः प्रत्यक्षाभिमतयोरनुभवपूर्वकयोरव्याप्तमित्यर्थः ।

अथ पञ्चमं दूषयति । न पञ्चम इति । अत्र वस्तुनः समस्तवस्तुव्यावृत्तिर्ज्ञाततया विशिष्यते सत्तया वा । आद्ये ऽपि किं ज्ञातुं शक्यते वा न वा । आद्येऽतिव्याप्तिरित्याह । पुत्त्रादीति । विषयशब्दः सम्बन्धिवचनः गतमन्यत् । द्वितीये त्वसम्भव इत्याह । सजातीयेति । सत्तापक्षे त्वतिव्याप्तिरित्याह । वस्तुत इति ।

अथ षष्ठोऽप्यपट्वित्याह । नापीति । ननु कथं तस्यापटुत्वं वस्त्वन्तरेत्यादिविशेषणेन पूर्वोक्तपुत्त्रादिस्वरानुमाने स्वगृहीतेत्यनेन स्मृतौ चातिव्याप्तेर्दृष्टेत्यनेन प्रागुक्तासम्भवस्य च निरासादित्यत आह(१) । निर्विकल्पकेति । विकल्पितेति विशिष्टेत्यर्थः । उक्ताव्याप्तिपरिहारमाशङ्कते । उत्पत्ताविति । तर्हि पूर्वोक्तातिव्याप्तिर्न मुञ्चति ।

(१) दित्याशङ्क्याह—पा० E पु० ।

स्वविषयभेदग्रहण इति चेत् । न पुत्त्रादिविषयस्वराद्यनुमाने ऽपि सुवचत्वात् । असाधारणधर्मदर्शनसापेक्षभेदप्रतीतेरप्रत्यक्षता च स्यादिति ।

निर्विकल्पकसंविदस्त्रितयव्यवहारानुगुण्याभावेन सप्तमः पक्षोऽपि न कक्षीकार्यः ।

अष्टममपि विकल्पं विकल्पयामः । किं तद्धर्मान्तरमनुमानादिसंविदामस्ति वा न वेति । यद्यस्ति तासामपि प्रत्यक्षत्वप्रसङ्गः । साक्षात्त्वविशेषणस्य व्यवच्छेद्याभावेन वैयर्थ्यं चापद्येत । यदि नास्ति तासां

तत्राप्यनुमितेरुत्पत्तावेव लिङ्गज्ञानापेक्षा नार्थपरिच्छेद इति सुवचत्वादित्याह । नेति । अव्याप्तिश्चापरा लगतीत्याह । असाधारणेति । स्थाण्वादिधर्मिविशेषावधारणस्य वक्रकोटरादिविशेषज्ञानापेक्षत्वेन त्वदुक्तलक्षणायोगादित्यर्थः ।

सप्तमस्तु निर्विकल्पक एवाव्याप्त इत्याह । निर्विकल्पकेति । वेद्यवेदकवित्तिस्फुरणमात्रात्मकं तत्र तद्विशेषोल्लेखिव्यवहारानुगुण्यायोगादिति भावः ।

अष्टमस्तु कष्टादपि कष्ट इत्याशयेनाह । अष्टममपीति । विकल्पयति । किं तदित्यादि । तस्य स्वरूपं यद्वा तद्वास्तु किंतु तदितराव्यावृत्तं तदितरव्यावृत्तं वा तावदेव ब्रूहीति भावः । अव्यावृत्तिपक्षे ऽतिव्याप्तिरित्याह । यद्यस्तीति । किं चास्मिन् पक्षे साक्षात्प्रतीतिरित्यत्र विशेष्यवद्विशेषणस्यापि सर्वसंवित्साधारणत्वे विशेषणवैयर्थ्यं च स्यादित्याह । साक्षात्त्वेति । द्वितीये त्वव्याप्तिरित्याह । यदि नास्तीति । व्याकोपो हानिः । तत्रापि तदभावादिति

स्वात्मात्मनोरपि प्रत्यक्षताव्याकोपः स्यादिति कृतं विस्तरेण । अनतिभेदा अप्येते पक्षभेदा मन्दमतीनां विभ्रमो माभूदिति पृथगुपन्यस्य निरस्ता इति ।

अनधिगततथाभूतार्थनिश्चायकं प्रमाणमिति मीमांसाचार्याः । यथाहुः ।

भावः । नन्वज्ञानकरणत्वे सत्यनुभूतित्वं तद्भविष्यति तच्चेतरव्यावृत्तमेवेत्याशङ्क्य ज्ञानकरणानामनुमानादिसंविदां स्मृतेश्चाननुभूतेरात्मस्वात्मांशयोरव्याप्तिं किं न पश्यसीत्याशयेनाह । कृतमिति । निषेधार्थेऽव्ययमेतत् । विस्तरेण साध्यं नास्तीत्यर्थः । गम्यमानसाधनक्रियां प्रति करणत्वात् तृतीया । तदुक्तं न्यासोद्द्योतेन । न केवलं श्रूयमाणैव क्रिया निमित्तं करणभावस्य अपि तु गम्यमानापीति स्फुटीकृतं चैतदस्माभिः पञ्चकाव्यादिटीकासु अलं महीपाल तव श्रमेण(१)त्यादौ । ननु विस्तरमनिच्छतो किमनेनातिविलक्षणबहुपक्षोपन्यासेन दिङ्मात्रप्रदर्शनेनापि सुगमत्वादित्याशङ्क्य मन्दानुग्रहार्थमित्याह । अनतिभेदा इति । अत्यन्तभेदरहिता अपीत्यर्थः । इतिशब्दः समाप्तौ ॥

तदेवं गुरुमतं निरस्येदानीं परमगुरुभट्टपादमतं निरसितुं तत्सङ्ग्राहकमज्ञातचरेत्यादिश्लोकमर्थतो व्याचष्टे । अनधिगतेत्यादि । तथाभूतोऽन्यथात्वमप्राप्त इत्यर्थः । निश्चायकं निश्चयकरणमित्यर्थः । करणे कर्तृत्वोपचारात् ण्वुल्प्रत्ययः । क्रमात् पदत्रयेण स्मृतिविपर्ययतर्कसंशयानां व्यवच्छेदः । संग्रहस्यापरशब्दार्थ(२)माह । मीमांसाचार्या इति ।

---

(१) रघुवंशे २ सर्गे ।

(२) प्रकारिकास्थस्यापरशब्दस्यार्थम् ।

तस्माद् दृढं यदुत्पन्नं न विसंवादमृच्छति ।
ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम् ॥ इति ।

तदपि न चतुरस्रमिव दृश्यते ।

यादृच्छिकसंवादिनां दुष्टेन्द्रियाणां बाष्पादिविषयधूमादिलिङ्गविभ्रमाणां भ्रान्तविप्रलम्भकवाक्यानां च प्रामाण्यापत्तेः । सकलवेदाप्रामाण्यप्रसङ्गाच्च यत्र क्वचन जन्मनि वेदार्थस्य सर्वैरधिगतत्वेनानधिगतपूर्वकत्वाभावात् । अधिगतत्वसन्देहे ऽपि

अत्र कारिकां संवादयति। यथाहुः तस्मादिति। प्रागुक्तरीत्या प्रामाण्यस्य गुणसंवादार्थक्रियाज्ञानादिपरानपेक्षत्वादित्यर्थः। दृढमवधारणात्मकम् तेन तर्कसंशययोर्व्युदासः। उत्पन्नं प्रथमोत्पन्नमनधिगतार्थगोचरमित्यर्थः। तेन स्मृत्यनुवादयोर्निरासः । अथवा उत्पन्नमित्यनेनानुत्पत्तिलक्षणाप्रामाण्यनिरासः । न विसंवादमृच्छति ज्ञानान्तरेणेति विषयतथाभाव उक्तस्तेन विपर्ययपर्युदासः। विज्ञायतेऽनेनेति विज्ञानमिन्द्रियलिङ्गादि यद्विज्ञानकरणं तत्प्रमाणमिति प्रत्येतव्यमिति कारिकार्थः । तदेतत्सविनयसङ्कोचमिव निराचष्टे । तदपीति । चतस्रोऽस्रयो यस्य(१) तच्चतुरस्रं समीचीनमित्यर्थः। सुप्रातसुश्वेत्यादिना समासान्ते निपातः ।

कुत इत्याशङ्क्यातिव्याप्तेरित्याह । यादृच्छिकसंवादिनामिति । कदाचित् तथाभूतार्थानामित्यर्थः । किंच किं जन्मान्तरे ऽप्यनधिगतत्वमिष्टमेतस्मिन्नेव वा । आद्ये त्वव्याप्तिरित्याह। सकलेति। ननु जन्मान्तराधिगतिः सन्दि-

(१) अस्रयोऽस्य-पा॰ E पु॰ ।

प्रामाण्यानिश्चयात् । एकस्मिन् जन्मन्यनधिगतपूर्वत्वं तत्त्वमिति चेत् । न तत्रैवाधिगतविस्मृतवेदार्थानां पुरुषाणां वेदाप्रामाण्यप्रसङ्गात् । न तत्राधिगतत्व-प्रतिसन्धानमस्तीति चेत् । न अनुवादकवाक्यानां स्मृतिप्रमोषाणां प्रामाण्यापातात् । अधिगतविषयाणां चाप्रामाण्ये नानाशाखागतान्येकार्थगोचराणि वाक्यान्यप्रमाणं भवेयुः । न च तेषां प्रतिपत्तृव्यवस्थयाऽनधिगतत्वं वाच्यम् न चैकं प्रति शिष्यत[१]

ग्येत्याशङ्क्याह । अधिगतेति । द्वितीयं शङ्कते । एकस्मिन्निति । तथाप्यव्याप्तिरस्तीति परिहरति । न तत्रैवेति । तर्हि ज्ञातं सदप्रामाण्यकारणमधिगतत्वं न सत्तामात्रेणेति शङ्कते । न तत्राधिगतत्वेति । तर्ह्यतिव्याप्तिरित्याह । नेति । योऽश्वमेधेन यजत इत्यादीन्यनुवादवाक्यानि जातमात्राणां च जन्मान्तरानुभूतस्तनपानेष्टसाधनतास्मृतयस्त्रांशप्रमोषात् स्मृतिप्रमोषा उच्यन्ते । तेष्वधिगतत्वप्रतिसन्धानाभावात् प्रामाण्यापत्तिरित्यर्थः । किं च एवं प्रतिशाखमाम्नातेषु ज्योतिष्टोमादिवाक्येष्वनधिगतार्थत्वासम्भवादव्याप्तिः स्यादित्याह । अधिगतेति । तत्तच्छाखिनामेव तानि बोधकानीति नियमाङ्गीकारान्नायं दोष इत्याशङ्कामनूद्य निरस्यति । न चेति । कुतो न वाच्यमित्याशङ्क्य शाखान्तराधिकरणसिद्धान्तन्यायविरोधादित्याह । न चैकं प्रतीति । न ह्येकस्यां शाखायामाम्नातमग्निहोत्रादिकं कर्म एकं तच्छाखाध्यायिनं प्रत्येव शिष्यत उपदिश्यते किं तु विशेषाश्रवणात् सर्वानेव शाखिनः प्रतीति सूत्रार्थः । स च

(१) प्रति क्रियत—पा· C पु· ।

इति न्यायात् । सर्वशाखाविहितेतिकर्तव्यताकलापोपसंहारसमर्थनेन सर्वेषां सर्वत्र प्रामाण्याभ्युपगमात् किंनिबन्धनश्चाधिगतविषये प्रद्वेषः । किं तत्राधिगत्यन्तरानुत्पत्तेः उत्पत्तावपि वानपेक्षितत्वात् पूर्वाविशिष्टत्वाद्वा । न प्रथमः । सामग्र्यप्रतिबन्धेन प्रमिते ऽपि प्रमान्तरोत्पत्तिदर्शनात् । न द्वितीयः ।

प्रतिपत्तृव्यवस्थाश्रयणे विरुद्ध्यत इत्यर्थः । तथाप्यनङ्गीकारे ऽभ्युपगमविरोधश्च स्यादित्याह । सर्वशाखागतेति । शाखान्तरे कर्मभेदः स्यादित्यत्र कस्याञ्चिच्छाखायामाम्नातमग्निहोत्रदर्शपूर्णमासादिकं कर्म शाखान्तराम्नाताद्भिन्नमभिन्नं वेति विचार्य्य न्यूनाधिकाङ्गतया श्रवणाद्भिन्नमेवेति प्राप्ते ऽनुक्तमन्यतो ग्राह्यमिति न्यायेन सर्वाङ्गोपसंहारात् सर्वशाखाप्रत्ययमेकं कर्मेति सिद्धान्तकरणादित्यर्थः । तदेवमनधिगतार्थत्वं न प्रामाण्ये प्रयोजकं विरोधादित्युक्तम् । सम्प्रति तद्व्यावर्त्यमधिगतार्थत्वमप्रामाण्ये न प्रयोजकं विरोधादिति वक्तुं पृच्छति । किंनिबन्धनश्चेति । प्रद्वेषः प्रामाण्यासहनमित्यर्थः । ननु दुर्घटार्थे किं पक्षपातेनापीत्याशङ्क्य दौर्घट्यमेव कुत इति त्रेधा विकल्पयति । किं तत्रेति । ध्वस्तस्य पुनर्ध्वंसवत् ज्ञातस्य पुनर्ज्ञानान्तरानुत्पत्तेरप्रामाण्यम् उत उत्पन्नस्यापि भुक्तभोजनवत् अनपेक्षितत्वाद्वा अपेक्षितस्यापि दीपवर्तिदेशे दीपान्तरवत् कार्यतः स्वरूपतो विषयतः प्रमातृतो वा विशेषाभावाद्वेत्यर्थः । आद्यं परिहरति । न प्रथम इति । कुतो नेत्यत आह । सामग्रीति । सामग्रीसद्भावासद्भावनिबन्धने हि ज्ञानोत्पत्त्यनुत्पत्ती न त्वधिगतत्वानाधिगतत्वनिबन्धने इत्यर्थः ।

प्रमात्रपेक्षानधीनत्वात् प्रामाण्यस्य । अन्यथा उपेक्षादिफलानामप्रामाण्यापातात् । न तृतीयः । उत्तराविशिष्टत्वेन पूर्वाप्रामाण्यस्यापि सुवचत्वात् । अविशेषे ऽपि तदनपेक्षत्वेन तस्य प्रामाण्यमिति चेत् । तुल्यमितरत्रापि । अधिगतविषयस्यापि प्रामाण्ये स्मृतिहेतोरपि तथात्वप्रसङ्ग इति चेत् । न स्मृतेरननुभवत्वेनाप्रमाणत्वात् । याथार्थ्यमेव प्रमात्वनिमि-

---

दर्शनादिति । प्रत्यक्षदृष्टस्य दुरपह्नवत्वादित्यर्थः । प्रामाण्यस्य पुरुषाकाङ्क्षानिबन्धनत्वे ऽनिष्टमाह । अन्यथेति । आदिशब्दाद् द्वेषजुगुप्सादिसंग्रहः । अत्र प्रमाणविशेषाणामिति शेषः । यदि पूर्वस्योत्तराविशेषे ऽप्युत्पत्तौ विषयपरिच्छेदे वानुत्पन्नोत्तरानपेक्षत्वात् प्रामाण्यं तर्ह्युत्तरस्यापि पूर्वाविशेषे ऽप्युत्पत्तिविषयपरिच्छेदयोर्नष्टपूर्वानपेक्षितत्वात्[१] प्रामाण्यं दुर्वारमिति समः समाधिरित्याह । तुल्यमितरत्रापीति । ननु यद्येवमधिगतार्थत्वमप्रामाण्ये हेतुर्न स्यात् जितं तर्हि संस्कारेणेति शङ्कते । अधिगतेति[२] । यथार्थानुभवकरणत्वं प्रामाण्ये व्यापकं तदभावादप्रामाण्यं संस्कारस्य न त्वधिगतार्थत्वादिति परिहरति । नेति । अप्रमाणत्वादित्यतः प्राक् तत्साधनसंस्कारस्येति पूरणीयम् । तर्हि यथार्थज्ञानकरणत्वमेव प्रामाण्ये प्रयोजकमस्तु किमनुभवत्वेन । अस्ति च याथार्थ्यं स्मृतेरपि समाम्नातञ्च प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणेति विद्याप्रभेदेषु भाष-

---

(१) नपेक्षत्वात्—पा॰ E पु॰ ।

(२) अधिगतविषयस्य ज्ञातार्थविषयस्य स्मृतिहेतोः संस्कारस्य ।

त्तमस्तीति चेत् । न स्मृतिहेतोः संस्कारस्य महर्षिभिः प्रमाणत्वेनापरिसङ्ख्यानात् । नाप्युक्तेष्वन्तर्भावः । असाक्षात्कारिफलत्वेनाप्रत्यक्षत्वात् । सत्तामा-

---

णादित्याशयेन शङ्कते । याथार्थ्यमेवेति । तर्हि किमस्य प्रत्यक्षादिवत् पृथक् प्रमाणत्वमिष्टमर्थापत्त्यादिवदन्तर्भावो वेति द्वेधा विकल्प्य नाद्यः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्यादौ सूत्रकारैः प्रत्यक्षादिवत् संस्कारस्य पृथगनुद्देशादित्याह । नेति । न च द्वितीय इत्याह । नापीति । कुत इत्याशङ्क्य न तावत् प्रत्यक्षे ऽन्तर्भवति संस्कारः तल्लक्षणरहितत्वादनुमानादिवदित्याह । असाक्षात्कारीति । नाप्यनुमानादौ अज्ञातकरणत्वात् प्रत्यक्षवदित्याह । सत्तामात्रेणेति । न च तल्लक्षण(१)बलादेव संस्कारे ऽपि प्रामाण्यव्यवहारः प्रवर्तयितव्य इति वाच्यम् लोकसिद्धे व्यवहारे निमित्तान्वेषणमात्राधिकारिणां परीक्षकाणां न स्वोत्प्रेक्षाकल्पितलक्षणैर्व्यवहारोऽन्यथाकरणशक्तिविरहात् । तस्माद् यथार्थापि स्मृतिरननुभवत्वादप्रमा न त्वधिगतार्थत्वादिति स्थितम् । ननु कोऽयं नियमो ऽयथार्थाप्यनुभूतिरेव प्रमा न तु स्मृतिरिति सत्यम् । विषयपरिच्छेदे निरपेक्षत्वादनुभूतिरेव प्रमा न तु स्मृतिर्नित्यमनुभवपारतन्त्र्यात् । तदुक्तमाचार्यैः ।

यथार्थानुभवो मानमनपेक्षतयेष्यते । इति ।

अस्तु वा यथार्थज्ञानकरणमित्येव प्रमाणलक्षणं तथाप्ययथार्थत्वादेवाप्रामाण्यं स्मृतेर्नाधिगतार्थत्वादिति वक्तुं

---

(१) यथार्थज्ञानकरणत्वमिति ।

त्रेण बोधकत्वेनानुमानाद्यनन्तर्भावाच्च । न च याथार्थ्यमपि स्मृतेरस्ति । न हि यदा यादृशोऽर्थः स्मर्यते तदा तादृशोऽसौ पूर्वावस्थाया निवृत्तत्वात् । न च निवृत्तपूर्वावस्थतया स्मृतिरालम्बते तयाननुभूतत्वात्। तेन समानविषयत्वे ऽपि स्मृत्यनुभवयोरनुभवकाले ऽर्थस्य तादवस्थ्यात् स्मृतिकाले त्वतादवस्थ्यादेकस्य याथार्थ्यमन्यस्यायथार्थत्वमप्युपपद्यत एव । पूर्वं तदवस्थमित्युक्तरत्रापि याथार्थ्ये पाकरक्ते ऽपि श्यामताप्रत्ययो यथार्थः स्यात् । तेनायथार्थस्यापि यथार्थानु-

---

याथार्थ्यमेव निराचष्टे । न चेति । कुत इत्यत आह । न हीति । यदवस्थोऽनुभूयते तदवस्थ एव स्मर्यते सा चावस्था स्मृतिकाले नास्तीत्यसद्विषयत्वादयथार्था स्मृतिरित्यर्थः । ननु यावदस्ति तावदेव स्मर्यताम् अस्ति च निवृत्तपूर्वावस्थं वस्तु स्मृतिकाले ऽतो यथार्था स्मृतिरित्याशङ्क्याननुभूतार्थस्मरणापत्तेर्नैतद्युक्तमित्याह । न चेति । ननु तयोः समानविषयत्वे कथमनुभवस्य याथार्थ्यं स्मृतेस्त्वयाथार्थ्यं व्याघातादित्याशङ्क्याह । तेन समानेति । ननु स्मृतिकाले ऽपि भूतपूर्वगत्या वस्तुनस्तादवस्थ्याद् याथार्थ्यं स्मृतेरित्याशङ्क्यातिप्रसङ्गान्नेत्याह । पूर्वमिति । पाकरक्ते घटादौ भूतपूर्व्यात् श्यामोऽयमिति प्रत्ययोऽपि यथार्थः स्यादित्यर्थः । कथं तर्हि काणादैर्विद्यात्वेनोक्तिरित्याशङ्क्य कार्ये कारणधर्मोपचारादित्याह । तेनायथेति । फलं तूपचारस्य परोक्षमधिगतार्थत्वप्रयुक्तमविद्यात्वं नास्तीति सूचनमित्यनुसन्धेयम् । अथ तेषामपि मुख्यमेव स्मृतेर्विद्यात्वमित्यभिमानः तर्हि प्रमाणपथातिक्रमे ते ऽपि नः परिहार्या एवेत्यलं सुहृदनु-

भवजनितत्वेन यथार्थत्व[1]व्यपदेश इति याचितकमण्डनकमनीयमेव स्मृतेर्याथार्थ्यम् । किं चास्मिन् पक्षे धारावाहिकद्वितीयादिबुद्धयो न प्रमाणं भवेयुः[2] । न च तत्तत्कालकलाविशेषाकलितवस्तुनिर्भासेना-

रोधेन । ननु काशकुशवदौपचारिकमपि क्वचिदुपयुज्यत इत्याशङ्क्य सत्यमदृष्टार्थेष्वगत्या तथास्तु दृष्टार्थेषु न तथेति दृष्टान्ततो निराचष्टे । याचितकेति । याचितकमण्डनवदस्थिरत्वादप्रयोजकमित्यर्थः । याञ्चया लब्धं याचितकम् अपमित्ययाचिताभ्यां कक्कनाविति कक्प्रत्ययः । ननु स्मृतेरयथार्थत्वे यथार्थानुभवः प्रमेत्यादौ यथार्थपदेनैव स्मृतिव्यवच्छेदादनुभवग्रहणं किमर्थम् सत्यम् अनुभवत्वैकनियतं याथार्थ्यमिति सूचनार्थम् ज्ञानत्वसाधर्म्यात् स्मृतिरप्यनुभूतिरेवेति भ्रान्तिनिवारणार्थं च न च स्मृतिव्यवच्छेदार्थमिति सन्तोष्टव्यम् । कथं तर्हि स्मृतेरननुभवत्वेनाप्रमाणत्वादित्युक्तं प्रागभ्युपगम्यवादेनेति रहस्यम्[3] । एतच्च ग्रन्थकृतैव स्पष्टीकृतं न्यायकुसुमाञ्जलिटीकायामित्यास्तां तावत् । तदेवं प्रामाण्याप्रामाण्ययोरधिगतानधिगतार्थत्वे न प्रयोजके इत्युक्त्वा पुनरुचानधिगतार्थत्वमेवाव्याप्त्यन्तरेण दूषयति । किं चेति । अविच्छिन्नैकार्थगोचरानेकबुद्धिप्रवाहे द्वितीयादिबुद्धिष्वनधिगतार्थत्वासम्भवादव्याप्तिरित्यर्थः । नन्वेकस्यापि घटस्योत्तरोत्तरकालभेदाद् भिन्नतया विशिष्टभेदादनधिगतार्थत्वमस्तीति शङ्कामनूद्य निरस्यति । न चेति । कालकलाः कालैकदेशा औपाधिकाः तद्विशेषाः

(१) यथार्थता–पा॰ D पु॰ । (२) स्युः–पा॰ B. D पु॰ ।
(३) निरस्तं रहस्यम्–पा॰ F पु॰ ।

नधिगतविषयत्वं वाच्यम् । कालाकाशदिशामरूपिद्रव्यत्वेनात्मवदचाक्षुषत्वस्य दिक्कालयोश्च विशेषगुणशून्यद्रव्यत्वेन मनोवदप्रत्यक्षत्वस्य व्यवस्थितत्वात्[१] । इयन्तं कालं घटमहमन्वभूवमित्यनुव्यवसायदर्शनात् कालभेदोऽनुभूयत[२] एवेति चेत् । तर्हीयन्तं कालं

क्षणलवादिभेदास्तदाकलितस्य तद्विशिष्टस्य वस्तुनो निर्भासेनेत्यर्थः । कुतो न वाच्यमित्याशङ्क्य कालविशिष्टार्थग्रहणेऽपि नागृहीतविशेषणेति न्यायेनावश्यग्राह्यस्य कालस्य किं रूपविशिष्टार्थग्रहणे रूपस्येव चाक्षुषत्वं यद्वा गन्धादिविशिष्टार्थग्रहणे गन्धादेरिवेन्द्रियान्तरप्रत्यक्षत्वं चेति विकल्पोभयमप्यनुमानद्वयेन निरस्यति । कालाकाशेत्यादिना । अन्यथाकाशदिशोरपि प्रत्यक्षत्वापत्तिरिति तर्कसूचनाय तयोरुपादानम् हेतुद्वयेऽपि क्रमात् पदद्वयेन घटादौ रूपादौ च व्यभिचारनिरासः । उक्तहेतुद्वयस्य कालग्राहिप्रत्यक्षबाधं हृदि निधाय कालस्य प्रत्यक्षतामाशङ्कते । इयन्तमिति । ज्ञानगोचरज्ञानमनुव्यवसायः तत्रेयन्तं कालमिति कालक्रोडीकारेणैव घटानुभवस्यानुव्यवसानात्[३] घटप्रत्यक्षैर्धारावाहिभिः कालोऽपि तद्विशेषणतया गृहीत इति निश्चीयत इत्यर्थः । परमाणुमहमज्ञासिषमित्यादावप्रत्यक्षार्थेष्वनुव्यवसायदर्शनान्न तद्बलेन कालप्रत्यक्षत्वकल्पना युक्ता अन्यथा स्मृत्यनुव्यवसायबलात् स्मृतिष्वपि कालकलावभासकल्पनासौकर्यात् तास्वेवातिव्याप्तिरनिर्वार्या

(१) स्थितत्वात्–पा॰ B पु॰ ।
(२) वसीयत–पा॰ B. D पु॰ ।
(३) अनुव्यवसानाद् भासनात् ।

घटमहमस्मार्षमित्यत्रापि कालभेदाधिक्येन स्मृतेरपि प्रामाण्यं स्यात् । अप्रत्यक्षत्वे कालस्यासिद्धिरेव स्यादिति चेत् । न दिग्व्यतिरेकेण परापर[1]प्रत्ययौ द्रव्यान्तरसंयोगनिमित्तौ परापरप्रत्ययत्वात् दिक्संयोगनिमित्तपरापरप्रत्ययवदित्यनुमानादेव तत्सिद्धेः । न च सूर्यपरिवृत्तिरेव निमित्तम् अविभुत्वेन तस्याः पदार्थैरसम्बन्धात् । न चात्माकाशौ वा तन्निमित्तम् घटादिवद्विशेषगुणयोगित्वेन तयोस्तन्निमित्तत्वायो-

स्यादित्याह । तर्हीयन्तमिति । ननु कालस्य प्रत्यक्षत्वानङ्गीकारे तत्साधकमानान्तराभावेनासिद्धावुक्तहेत्वोराश्रयासिद्धिरित्याशयेन शङ्कते । अप्रत्यक्षत्व इति । परिशेषानुमानात् तत्सिद्धेर्नैष दोष इत्याह । नेति । दिशा सिद्धसाधनतां[2] परिहरति । दिग्व्यतिरेकेणेति । दिक्कृतपरापरप्रत्ययविपरीतपरापरप्रत्ययावित्यर्थः । ननु सूर्यगतिसाध्ययोस्तयोः किं द्रव्यान्तरेणेत्याशङ्क्यान्यथा तस्याः परापरपिण्डसम्बन्धायोगादित्याह । न चेति । स्वाश्रयद्वारैव तत्सम्बन्धोऽस्त्वित्याशङ्क्याह । अविभुत्वेनेति । स्वाश्रयस्येति शेषः । एतेन क्षित्यादिमूर्तपञ्चकस्य दूरादेव निवृत्तिः । तर्ह्यात्मादिभिरर्थान्तरतेत्याशङ्क्याह । न चेति । न च घटादौ मूर्तत्वमुपाधिः दिशि विपरीतपरापरप्रत्ययनिमित्तत्वाभावे साध्ये सत्यपि मूर्तत्वाभावेन साध्याव्यापकत्वात् तस्या अपि तन्निमित्तत्वे प्राच्यादिव्यवहारवद्वर्तमानव्यवहारस्याप्यसाधारणत्वप्रसङ्गः । एवमष्टद्रव्यप्रतिषेधे गुणा-

(१) परावर–पा॰ B पु॰ ।
(२) सिद्धसाध्यतां–पा॰ E पु॰ ।

गात् । प्रत्यक्षत्वेऽपि कालस्य स्वतो भेदाभावात् । औपाधिकभेदस्य चोपाधीनां सूर्यगत्यादीनामनवभासे ऽवभासा[1]सम्भवान्न तद्विशिष्टवस्तुप्रतीतिः सम्भवति । प्रतिक्षणवर्तिन्यबुभुत्सितग्राह्या जिज्ञासैवोपाधिरिति चेत् । तर्हि जिज्ञासातज्ज्ञानान्तरितत्वेन

दावप्रसङ्गादष्टेतरद्रव्यंपरिशेषात् स एव काल इत्यर्थः । नन्वनुव्यवसाये पूर्वज्ञानोपनीतस्य परमाण्वादेरिव चाक्षुषे स्पार्शने वा चन्दनप्रत्यक्षे घ्राणोपनीतगन्धस्येवानुमानोपनीतस्यापि कालस्य तत्सहकारादेव विशेषणतया विशिष्टधारावाहिप्रत्यक्षेषु विषयत्वसिद्धौ सिद्धं नः समीहितमित्याशङ्क्य किं सत्यं वर्तमानत्वैकाकारेण कालमात्रस्य प्रत्यक्षत्वेऽपि तद्भेदानामतिसूक्ष्मतया दुर्लक्षत्वान्न सिद्धं नः समीहितमित्याह । प्रत्यक्षत्वे ऽपीति । कालमात्रस्येति भावः । ननु तत्प्रत्यक्षत्वे तद्भेदा अपि प्रत्यक्षा एव पृथिव्यादौ तथा दर्शनादित्याशङ्क्य किं ते पृथिव्यादिभेदवदेव स्वाभाविका मताः श्रीमतां दिगादिभेदवदौपाधिका वा । नाद्यः काललिङ्गाविशेषादञ्जसैकत्वसिद्धेस्तेषां खपुष्पकल्पत्वादित्याह । स्वत इति । नापि द्वितीय इत्याह । औपाधिकेति । आदिशब्दाच्चन्द्रगत्यादिसंग्रहः । अथावभासयोग्यं कालोपाधिमाशङ्कते । प्रतिक्षणवर्तिनीति । प्रतिक्षणमन्यान्यैव जायमानेत्यर्थः । अन्यथा तस्या अप्येकत्वे वैयर्थ्यादिति भावः । ननु तस्या अप्यज्ञाताया अनुपाधित्वात् ज्ञानस्य च पुनर्जिज्ञासापूर्वकत्वाज्जिज्ञासानवस्था स्यादित्याशङ्क्याह । अबुभुत्सितेति । परिहरति । तर्हीति । आदौ घटज्ञानं पुनर्घटजिज्ञासा ततस्तज्ज्ञानं ततस्तदुपहितकालज्ञानं ततस्तत्काल-

---

(१) अनवभासेनावभासा—पा॰ D पु॰ ।

घटज्ञानसन्तानविच्छेदः स्यात् स्याच्च तदुपाधिककालभेदाकलनेनैव स्मृतीनामपि प्रामाण्यम् । एतेन ज्ञाततैवोपाधिरिति निरस्तम् । तस्यां च न किञ्चित् प्रमाणं पश्यामः । ज्ञातो घटः प्रकटो घट इति विषयविशेषणत्वेन साध्यक्षमीक्ष्यत एवेति चेत् । न ज्ञान-

विशिष्टघटज्ञानमिति विजातीयव्यवधानाद् घटज्ञानधाराविच्छेदः स्यादित्यर्थः । ननु न हि स्वाङ्गं स्वस्य व्यवधायकमिति न्यायाज्जिज्ञासादीनां तदर्थतया तदङ्गत्वान्न पटादिज्ञानवद् घटज्ञानसन्तानविच्छेदकत्वमित्याशङ्क्य तर्हि तेनैव न्यायेन स्मृतीनामपि धारावाहिनीनां सुस्मूर्षातज्ज्ञानादिक्रमेणानधिगतार्थत्वसम्भवादतिव्याप्तिः स्यादित्याह । स्याच्चेति । इममेव परिहारं कालोपाध्यन्तरेऽप्यतिदिशति । एतेनेति । तत्रापि ज्ञानस्यैवोपाधित्वाद् घटज्ञानानन्तरं ज्ञातता तज्ज्ञानं तद्विशिष्टकालज्ञानं ततस्तत्कालविशिष्टघटज्ञानं चेति क्रमे पूर्ववत् तेषां व्यवधायकत्वे सन्तानविच्छेदः अव्यवधायकत्वे स्मृतावतिव्याप्तिरित्यर्थः । एतेन ज्ञाततयैव विषयाधिक्यमित्यपि निरस्तम् स्मृतावतिव्याप्तेरिति । एतच्च ज्ञाततामङ्गीकृत्योक्तम् । अथास्या मूले कुठारं प्रयुङ्क्ते । तस्यां चेति । अस्ति तत्र प्रत्यक्षमेव प्रमाणमित्याशङ्क्याह[1] । ज्ञात इति । अत्र प्रकट इति साक्षात्कृत इत्यर्थः । तथा च ज्ञात इति सामान्यतः साक्षात्कृत इति विशेषतश्च इत्यर्थ आचार्योक्तः सिद्ध्यति । अध्यक्षमिति क्रियाविशेषणम् । तस्या अन्यथासिद्धिमाह ।

(१) शङ्कते—पा॰ E पु॰ ।

स्यैव तथा प्रतीतेः । कथमात्मसमवेतस्य ज्ञानस्य(१) विषयसामानाधिकरण्येन प्रतीतिरिति चेत् । इष्टो घटो द्विष्टो घटः प्रध्वस्तो घट इति सामानाधिकरण्यव्यवहारानालोच्य सन्तोष्टव्यमायुष्मतेति । ततश्च ज्ञानजन्यफलाश्रयत्वमन्तरेणार्थः कथं कर्मेत्यपि चोद्यं गर्भस्रावेण(२) गलितम् । इच्छादिजन्यफलान्तरस्याभावेऽपि करणव्यापारविषयत्वमात्रेण कर्मत्वोपपत्तेः।

नेति । तथेति विषयविशेषणत्वेनेत्यर्थः । अन्यसमवेतस्यान्यविशेषणत्वं विरुद्धमिति शङ्कते । कथमिति । प्रतिबन्द्या समाधत्ते । इष्ट इति । अन्यथा तत्रापीष्टत्वादयो धर्माः कल्प्येरन्निति भावः । ननु ज्ञाततानङ्गीकारे परसमवेतक्रियाजन्यफलशालि कर्मेति कर्मलक्षणायोगात् कथं घटादेर्ज्ञानकर्मत्वमिति यदिह चोद्यं मीमांसकस्य तदपि खुररवेण गतमित्याह । ततश्चेति । ज्ञानमत्रपरसमवेतक्रिया परस्मिन् घटादौ साक्षात्कृत्यान्यस्मिन्नात्मनि समवेतत्वात् क्रिया चात्र धात्वर्थलक्षणा तज्जन्यफलं ज्ञातता तदाश्रयत्वमन्तरेणेत्यर्थः । इष्टो घट इत्यादौ विशेष्ये क्रियाजन्यफलाश्रयत्वं विनापि यथा कर्मत्वं तद्वदिति परिहारस्य चोद्योच्चारणसमय एव मीमांसकस्य मनसि प्रादुर्भावेनान्तरा विशरणसाम्यात् गर्भस्रावेणेत्युक्तम् । ननु तज्जन्यफलानाधारत्वेऽपि तत्कर्मत्वे घटज्ञाने पटस्यापि कर्मत्वं स्यात् नियामकाभावादित्याशङ्क्य नियामकलक्षणं स्वयमाह । करणेति । अत्र विनाश्यवदिति शेषः । यथा विनाश्यस्य घटादेर्मुद्गरप्रहारादिकरणव्यापारविषयत्वमेव तत्फलविनाश-

(१) संवेदनस्य–पा॰ D पु॰ । (२) स्रावेण–पा॰ C पु॰ ।

ज्ञानं स्वकर्मणि किञ्चित् करोति क्रियात्वात् गमनक्रियावद् इत्यनुमानादेव ज्ञाततासिद्धिरिति चेत्। न कार्यत्वे सति विभुद्रव्यसमवायेन सिद्धगुणभावस्य ज्ञानस्य क्रियात्वासिद्धेः। क्रिया हि धात्वर्थमात्रं स्यादित्यभ्युपगमे ऽपि संयोगादिभिरनैकान्तिकत्वात्। तेषामपि किञ्चित्करत्वाभ्युपगमे ऽनवस्था स्यात्। तथाहुः।

अनैकान्त्यादसिद्धेर्वा न च लिङ्गमिह क्रिया।
तद्वैशिष्ट्यप्रकाशत्वाज्ज्ञाध्यज्ञानुभवोधिके॥ इति।

नक्रियाकर्मत्वं न तु तज्जन्यफलाश्रयत्वम्। एवमिन्द्रियलिङ्गादिज्ञानकरणव्यापारविषयत्वमेव तत्फलज्ञानकर्मत्वमित्यर्थः। माभूत् प्रत्यक्षं लिङ्गं तु भविष्यतीति शङ्कते। ज्ञानमिति। ग्रामादिप्राप्तिर्गमनफलमिति न दृष्टान्ते साध्यवैकल्यम्। किमिदं क्रियात्वं स्पन्दनत्वं धात्वर्थत्वं वा। आद्ये स्वरूपासिद्धिरित्याह। नेति। अक्रियात्वे हेतुमाह। सिद्धगुणभावस्येति। ज्ञानं न क्रिया गुणत्वाद् रूपवदित्यर्थः। गुणत्वे हेतुमाह। कार्यत्वे सतीति। एतेन सत्तादिव्युदासः। शेषं कर्मघटादिव्युदासार्थम्। ज्ञानं गुणः विभुद्रव्यसमवेतकार्यत्वात् सुखवदित्यर्थः। द्वितीये व्यभिचार इत्याह। क्रियेति। अत्रोदयनसम्मतिमाह[1]।

अनैकान्त्यादित्यादि। इह ज्ञाततायां क्रियात्वं न लिङ्गं कुतः क्रियाशब्दस्य धात्वर्थपरत्वे संयोगादिष्वनैकान्त्यात् स्पन्दपरत्वे त्वसिद्धेरिति। वाशब्दो व्यवस्थितविकल्पार्थः। तर्हि ज्ञातो घट इति विषयविशेषणतया स्फुर-

(१) संवादमाह–पा॰ F पु॰।

ज्ञाततानुमेयस्य ज्ञानस्य कथं तदभावे सिद्धिरिति चेत् । न क्षणिकात्मविशेषगुणत्वेन तस्य सुखदुःखादिवन्मानसप्रत्यक्षतासिद्धेः । तर्हि तद्वदेवाबुभुत्सितग्राह्यत्वेन विषयान्तरसञ्चारो न स्यादिति चेत् । न निश्वासप्रश्वासहेतुभूतप्रयत्नेनानैका-

---

णात् प्रत्यक्षैव ज्ञाततेत्याशङ्क्याह । तद्वैशिष्ट्येति । ज्ञानविशिष्टत्वेनैवार्थस्य प्रकाशमानत्वादधिके ज्ञातताख्याधिकार्थे प्रत्यक्षानुभवोऽपि न प्रमाणमित्यर्थः ।

ननु माभूदध्यक्षमनुमानं वा तथापि ज्ञानसिद्ध्यन्यथानुपपत्तिरूपयार्थापत्त्या ज्ञाततासिद्धिरिति शङ्कते । ज्ञाततेति । ज्ञातता क्रियाजन्या फलत्वात् ग्रामप्राप्तिवत् सैव क्रिया ज्ञानमिति ज्ञानसिद्धिः । अन्यथा तदेकसाध्यस्य तदभावे कथं सिद्धिरित्यर्थः । अर्थापत्तिमन्यथोपपत्त्या दूषयति । नेति । ज्ञानं मानसप्रत्यक्षं क्षणिकात्मविशेषगुणत्वात् सुखादिवदिति प्रत्यक्षत्वसिद्धावप्यनुमेयत्वे सुखादेरपि तथात्वप्रसङ्ग इत्यर्थः । क्षणिकात्मविशेषपदैस्त्रिभिः क्रमाद्धर्मादेः शब्दस्यात्मगतद्वित्वादेश्च व्युदासः । गुणग्रहणं स्फुटार्थम् । गुणव्यतिरेकेण क्षणिकविशेषाणामात्मन्यभावात् सामान्यविशेषान्त्यविशेषयोश्च क्षणिकपदेनैव निवृत्तेः । उक्तानुमानस्य प्रतिकूलतर्कपराहतिमाशङ्कते । तर्हीति । तद्वदेवेति । तेनैव हेतुना सुखादिवदेवेत्यर्थः । यदि ज्ञानमुक्तहेतुना सुखादिवन्मानसप्रत्यक्षं स्यात् तर्हि तद्वदेवाबुभुत्सितग्राह्यमपि स्यात् । तथा च ज्ञानैकनियतसत्ताकत्वात् पूर्वपूर्वज्ञानग्राहकोत्तरोत्तरज्ञानसन्तानाविच्छेदे विषयान्तरोपलब्धिर्न स्यादित्यर्थः । नैष दोषः । जीवनपूर्वकप्रयत्ने हेतोर्व्यभिचारादिति परिहरति । नेति । तस्या-

न्तिकत्वात् । तस्याप्यबुभुत्सितग्राह्यत्वेन विषयान्तरसञ्चारानभ्युपगमे सुषुप्तिमरणमूर्च्छाविषयान्तरसञ्चारा न स्युरिति दुस्तरं व्यसनमिति कृतं प्रसक्त्यानुप्रसक्त्येति ॥ ४ ॥ ५ ॥ ऽऽ ॥

पि पक्षकोटिनिविष्टत्वे ऽनिष्टमाह । तस्येति । जीवनपूर्वकप्रयत्नस्याबुभुत्सितग्राह्यत्वे सुषुप्तावपि तत्सद्भावात् तज्ज्ञानानुवृत्तौ सुषुप्तिरेव न स्यात् एवमन्तिमादिश्वासहेतुप्रयत्नज्ञानेन मरणमूर्च्छनयोर्निवृत्तिः स्यात यावज्जीवं सतः प्रयत्नसन्तानस्यैवाजस्रोपलम्भाद् विषयान्तरोपलम्भस्याप्यनवकाश एवेत्यर्थः । दुष्परिहारश्चायमनिष्टप्रसङ्ग इति सोपहासमाह । दुस्तरमिति । ननु माभूद् ज्ञानमबुभुत्सितग्राह्यं तथापि कथं प्रत्यक्षं न तावत् केवलनिर्विकल्पकवेद्यं विकल्पाभावे तदेकोन्नेयनिर्विकल्पकसद्भावे प्रमाणाभावात् न च केवलविकल्पवेद्यं निर्विकल्पकं विना तदनुत्पत्तेः नापि तत्पूर्वकविकल्पवेद्यं पूर्वं निर्विकल्पकगृहीतस्य तस्य तेनैव ग्रस्यमानस्याविकल्पमनवस्थानादित्याशङ्क्यान्त्यपक्ष एव सिद्धान्तः तत्र निर्विकल्पकगृहीतज्ञानव्यक्तिनाशे ऽपि तन्निष्ठज्ञानत्वसामान्यविशिष्टतया तद्ग्राहकनिर्विकल्पकसहकृतेन मनसा तत्समानविषयं व्यक्त्यन्तरं प्रथमत एव विकल्प्यत इत्यादि सर्वमुदयनादिग्रन्थेषु क्षुण्णमेवेत्यलं प्रासङ्गिकप्रमेयोपन्यासव्यसनेनेत्याह । इति कृतमिति । अयमितिशब्दः प्रकारवचनः । प्रमेयव्याप्यमित्यादिसङ्ग्रहोक्तं लक्षणद्वयमेकदेशिमतत्वादनतिप्रसिद्धत्वादनतिभेदाच्चोपेक्ष्य प्रमाणसामान्यलक्षणप्रकरणं समापयति । इतीति ॥ ४ ॥ ६ ॥ ऽऽ ॥

एवं प्रमाणसामान्यं लक्षयित्वा तद्विशेषान् लक्षयिष्यन् विभागेनोद्दिशति ।

प्रत्यक्षमनुमानं स्यादुपमानं[1] तथागमः ॥ ६ ॥
प्रमाणं प्रविभज्यैवमक्षपादेन लक्षितम् ।

एतानीयन्त्येव प्रमाणानि नान्यानि नाधिकानि न न्यूनानि चेति। न्यूनाधिकसङ्ख्यासङ्ख्येयान्तरव्यवच्छेदो विभागोद्देशस्य प्रयोजनम् । वादिप्रसिद्धितारतम्यमनादृत्य सौत्रक्रमानुरोधेनोद्दिष्टानीति[2] । तदुक्तम् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति ॥ ६ ॥ ऽऽ ॥

ननु सामान्यलक्षणानन्तरं विशेषलक्षणप्रस्तावादकाण्डे प्रत्यक्षादिपरिसंख्यानमुत्तरश्लोके न सङ्गच्छत इत्याशङ्क्य सङ्गमयन्नवतारयति । एवमिति । अनुद्दिष्टस्य लक्षणायोगादिदानीं विशेषोद्देशः सङ्गच्छत एवेत्यर्थः ।

अक्षपादग्रहणं मतान्तरेषु नैवमिति सूचनार्थम् तदुद्देशस्य प्रयोजनं वाच्यमित्यपेक्षायामाह ।

एतानीति । परिगणितान्येवेत्यर्थः । इयन्त्येवेति । चत्वार्येवेत्यर्थः । उभयत्र क्रमाद् व्यावर्त्यमाह । नेत्यादि । ननु बह्वादृताच्छब्दादुपमानस्य प्रथमोद्देशे को हेतुरत आह । वादीति । तारतम्यं क्रमः । किं तत् सूत्रं तदाह । प्रत्यक्षेत्यादि । ननु सूत्रे ऽप्येवमुद्देशे को हेतुरिति चेत् । उच्यते । तत्र सर्वप्रमाणोपजीव्यत्वात् प्रत्यक्षस्य प्राथम्यं तदितरप्रमाणोपजीव्यत्वसाम्यात् प्रत्यक्षानन्तर्यमनुमानस्य पृथक् प्रामाण्यदार्ढ्यसूचनार्थमुपमानस्य शब्दात् प्राथम्यं परिशेषाच्छब्दस्यान्ते निवेश इति ॥ ६ ॥ ऽऽ ॥

---

(१) प्रत्यक्षमनुमानाख्यमुपमानं–पा· A D. पु· ।
(२) उद्दिष्टवानिति–पा· B पु· ।

अक्षपादग्रहणेन सूचितं मतान्तरेषु न्यूनाधिकसङ्ख्याकप्रमाणाङ्गीकारं विवृणोति ।

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः ॥ ७ ॥
अनुमानं च तच्चाथ साङ्ख्याः शाब्दं च ते अपि ।
न्यायैकदेशिनोऽप्येवमुपमानं च केचन ॥ ८ ॥
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः ।
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा ॥९॥
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः ।

अर्थापत्त्यादीनामनुमानादावन्तर्भावं(१) वक्ष्याम इति उद्देशक्रमानुरोधेन प्रत्यक्षं लक्षयति ।

नन्वग्रिमश्लोकेषु मतान्तरोपन्यासस्य कः प्रसङ्ग इत्याशङ्क्याक्षपादपदेनाकाङ्क्षोत्थापनादित्याह । अक्षपादेति ।

न्यायैकदेशिनो भूषणीयाः केचन न्यायैकदेशिनः स्वयमित्यर्थः ॥ ७ ॥ ८ ॥ ९ ॥ ऽऽ ॥

नन्वर्थापत्त्यादीनामप्रामाण्यमन्तर्भावो वा वक्तव्यः अन्यथा चतुष्ट्वानिर्वाहात् तदिदानीमपरोक्षेत्यादिना विशेषलक्षणोक्तिरयुक्तेत्याशङ्क्याह । अर्थापत्त्यादीनामिति । प्रमाकरणत्वान्नाप्रामाण्यं तावदेषामन्तर्भावस्तु तल्लक्षणयोगनिबन्धनस्तज्ज्ञानापेक्ष इति विशेषलक्षणानन्तरभावी न तत्प्रवृत्तिं प्रतिबध्नातीत्यर्थः । इतीति मत्वेति शेषः । तत्र प्रत्यक्षलक्षणस्य प्राथम्ये हेतुमाह । उद्देशेति । उद्देशे तु सर्वप्रमाणोपजीव्यत्वं हेतुरित्युक्तम् ।

---

(१) अनुमानाद्यन्तर्भावं-पा॰ पु॰ ।

अपरोक्षप्रमाव्याप्तं प्रत्यक्षम् ।

अपरोक्षत्वं(१) साक्षात्त्वम् तच्च लैङ्गिकादिज्ञानव्यावृत्त ऐन्द्रियकज्ञानानुगतः कश्चिद् ज्ञानत्वावान्तरजातिभेद इत्यग्रे दर्शयिष्यति(२) । अपरोक्षप्रमाव्याप्तं

अपरोक्षेत्यनेन लैङ्गिकादिव्युदासः । गतमन्यत् । अत्राविघ्नमब्राह्मण इतिवन्नञस्तदभावतदन्यवृत्तित्वे प्रमासामानाधिकरण्यायोगादधर्मवत् तद्विरुद्धवृत्तित्वमित्याशयेनाह । अपरोक्षत्वमिति । तच्च न भूतत्वादिवदौपाधिकं सामान्यं किं तु मुख्यमेवेत्याह । तच्चेति । अत्राद्यविशेषणेन ज्ञानत्वानुभवत्वादेर्व्युदासः । द्वितीयेन स्मृतित्वस्य । तत्रापि तद्वृत्तिरित्युक्ते चाक्षुषत्वादिधर्मेष्वतिव्याप्तिः स्यादत उक्तम् अनुगत इति । तद्व्यावृत्तत्वानधिकरणमित्यर्थः । जातिग्रहणाद् व्यञ्जकधर्मस्यैन्द्रियकत्वस्य निवृत्तिः । ज्ञानत्वावान्तरेति स्फुटार्थम् । सत्तागुणत्वयोश्च प्रथमविशेषणेनैव पलायनात् । एतच्च लौकिकप्रत्यक्षाभिप्रायमीश्वरज्ञानाव्याप्तेः तेन लैङ्गिकादिव्यावृत्तमिन्द्रियजन्याजन्यज्ञानव्यावृत्तत्वानधिकरणसामान्यं साक्षात्त्वमिति योज्यम् । अजन्यज्ञानमीश्वरस्येति न तत्राव्याप्तिः । अग्र इति । प्रमेयेष्वक्षलक्षणप्रसङ्गादिन्द्रियं तच्च साक्षात्त्वं जातिभेद इति स्थितिरिति(३) वक्ष्यतीत्यर्थः । प्रसिद्ध्यनुरोधेन प्रमाकरण-

(१) आपरोक्ष्यं—पा॰ B पु॰ ।
(२) निवेदयिष्यति—पा॰ B पु॰ ।
(३) शरीरयोगे सत्येव साक्षात्प्रमितिसाधनम् ।
इन्द्रियं तच्च साक्षात्त्वं जाति भेद इति स्थितिः ॥
इति E पुस्तके टिप्पण्याम् ।

प्रत्यक्षमिति वचनमीश्वरस्यापि यथा प्रत्यक्षता स्यादिति । यथाहुः ।

तन्मे प्रमाणं शिव इति ।

मिति वक्तव्ये प्रमाव्याप्तमित्युक्तेः प्रयोजनमाह । अपरोक्षेति । अलौकिकप्रत्यक्षस्यापि संग्रहार्थमित्यर्थः ।

न चेदमीश्वरप्रामाण्यमसाम्प्रदायिकं न्यायाचार्यैस्तथासमर्थनादित्याह । यथाहुरिति । न्यायकुसुमाञ्जलावीश्वरप्रामाण्यसाधनं चतुर्थस्तवकार्थः । तत्रेश्वरस्य कथं प्रामाण्यं कुत्र वा प्रमाणे ऽन्तर्भाव इत्यपेक्षायामुक्तार्थस्यायमुपसंहारश्लोकः(१) ।

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्तारिवस्तुक्रमः ।
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः ॥ इति ।

अनुभवं तावत् त्रिभिर्विशिनष्टि । साक्षात्कारिणि साक्षात्कारिधर्मिण्यपरोक्ष इत्यर्थः । नित्ययोगिनि ईश्वरेण नित्यसम्बद्ध इत्यर्थः । एतेनेश्वरस्य प्रमाव्याप्तत्वात् प्रामाण्यम् । तत्रापि साक्षात्कारिप्रमायोगात् प्रत्यक्षत्वं चोक्तम् । परद्वारानपेक्षस्थितौ कारणान्तरनिरपेक्षसत्ताके नित्यसिद्ध इति यावत् । एतेनेश्वरानुभवस्य कारणासंस्पर्शित्वेन पूर्वोक्तनित्ययोगित्वमस्मृतिरूपत्वं कारणदोषानवकाशाद् वक्ष्यमाणभूतार्थत्वं सङ्कोचे कारणाभावात् सर्वविषयत्वं च सिद्धम् । भूतार्थो यथार्थः तस्मिन्ननुभवे निविष्टो विषयतया स्थितो निखिलप्रस्तारिणः सार्वत्रिकस्य

(१) मुक्तार्थन्यायोपसंहारश्लोकः–पा· F पु· ।

अन्यथा लौकिकप्रत्यक्षमात्रविवक्षायामिन्द्रियजन्यप्रमासाधकतमं प्रत्यक्षमित्यलक्षयिष्यदिति ।

तद्विभागमाह ।

द्विविधं च तत् ॥ १० ॥

ते एव द्वे विधे विभज्य दर्शयति ।

सविकल्पकमित्येकमपरं निर्विकल्पकम् ।

तयोर्लक्षणमाह ।

वस्तुनो जगज्जालस्य क्रमो विशेषो यस्य स तथोक्तः नित्यसर्वज्ञ इति यावत् । लेशस्याप्यल्पस्याप्यदृष्टिनिमित्तस्याज्ञातकरणस्य दुष्टेर्दोषस्य विगमादभावात् प्रभ्रष्टो निवृत्तः शङ्कातुषोऽनाप्तत्वशङ्कालेशो यस्य स परमाप्त इति यावत् । शिवः सर्वात्मनां दुःखोच्छेदकरः परमात्मा मे मम नैयायिकस्य तत् प्रत्यक्षाख्यं प्रमाणं कारणाधीनज्ञानतया भ्रान्त्यादिशङ्कोत्थानकलङ्किभिरपरैर्योगिभिः किं न किञ्चित् साध्यमस्तीत्यर्थः ।

नन्विदं लक्षणं लौकिकप्रत्यक्षाभिप्रायमेव किं न स्यादित्यत्राह । अन्यथेति ।

द्विविधं च तदितिश्लोकशेषेण एतल्लौकिकालौकिकरूपं द्वैविध्यमेवानूद्यते प्रागुक्तलक्षणविशेषतयेत्याशङ्क्य नेत्याह । तद्विभागमिति ॥ १० ॥

सविकल्पकमित्यादिना द्वैविध्यान्तरोक्तिशङ्कायामाह(१) । ते एवेति ।

---

(१) द्वैविध्यान्तरशङ्कायामाह—पा· E पु· ।

नामादिभिर्विशिष्टार्थविषयं सविकल्पकम् ॥ ११ ॥
अविशिष्टार्थविषयं प्रत्यक्षं निर्विकल्पकम्(१) ।

नामजातिद्रव्यगुणक्रियाभिर्विशिष्टमर्थं विषयीकुर्वत् सविकल्पकं प्रत्यक्षम् । यथा देवदत्तोऽयं ब्राह्मणः शुक्लो दण्डी गच्छतीत्यादि । नामादिविशेषणवैधुर्येण स्वलक्षणमात्रविषयं निर्विकल्पकम् । यथाहुः ।

अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्ध(२)वस्तुजम् ॥ इति ।

निर्विकल्पकमेव प्रत्यक्षमास्थिषत सौगताः । यथाहुः । कल्पनापोढमभ्रान्तं प्रत्यक्षमिति । तदसत् ।

हानादिव्यवहारहेतुत्वात् सविकल्पकस्य प्राथम्यं तदुन्नेयत्वादन्यस्य तदानन्तर्यम् । उद्दिष्टयोः पुनरुद्देशः पुनरुक्तिरत आह । तयोरिति ।

आदिशब्दार्थं दर्शयन्नाद्यं विवृणोति । नामजातीति । उदाहरति । यथेति । द्वितीयं विवृणोति । नामादीति ।

अत्र भट्टपादसम्मतिमाह । यथाहुरिति ।

आलोचनज्ञानं व्यवहारानङ्गमाकलनमात्रमित्यर्थः । आदिशब्दाज्जडमुमूर्ष्वादिसंग्रहः । शुद्धवस्तुजं विशेषणविशेष्यभावानुल्लेखीत्यर्थः ।

अथ सविकल्पकस्य प्रामाण्यपरीक्षार्थं परेषां विप्रतिपत्तिं तावदुपन्यस्यति । निर्विकल्पकमेवेति । आस्थिषत प्रतिज्ञातवन्त इत्यर्थः । आङः स्थः प्रतिज्ञायामित्या-

(१) प्रत्यक्षमितरद्भवेत्–पा॰ A पु॰ । (२) मुग्धेति क्वचित् ।

ग्राह्यांशे कल्पनानां भ्रान्तत्वेनाभ्रान्तपदेनैव(१) व्यावृत्तिसिद्धेः कल्पनापोढविशेषणवैयर्थ्यात् । किं च(२) विवादाध्यासितो विकल्पः स्वगोचरे प्रत्यक्षं प्रमाणत्वे सत्यपरोक्षावभासित्वात् निर्विकल्पकवत् । न चात्र विशेषणासिद्धिः । यतः साधितमधस्ताद् विकल्पानां प्रामाण्यम् । शाब्दिकास्तु सविकल्पकमेव प्रत्यक्षमाहुः । यथाहुः ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥ इति ।

त्मनेपदम् । कल्पनापोढं नामजात्यादियोजनारहितम् । दूषयति । तदसदिति । बाह्यांशे ज्ञानस्यैव नीलाद्याकार इत्यर्थः । सविकल्पकप्रामाण्ये प्रमाणमप्यस्तीत्याह । किं चेति । प्रत्यक्षं प्रत्यक्षप्रमाणमित्यर्थः । अन्यथा प्रत्यक्षाभासेनार्थान्तरता स्यात् । प्रमाणत्वे सतीति अविसंवादित्वे सतीत्यर्थः । अन्यथा साध्यावैशिष्ट्यात् । एतेन प्रत्यक्षाभासव्युदासः । शेषं लैङ्गिकादिनिरासार्थम् । अधस्तात् सौगतोक्तप्रमाणसामान्यलक्षणनिरासावसर इत्यर्थः । प्रामाण्यमविसंवादित्वमित्यर्थः । निर्विकल्पकं च परीक्षितुं तत्रापि विप्रतिपत्तिमुपन्यस्यति । शाब्दिकास्त्विति । सविकल्पकस्यैव प्रत्यक्षत्वे तदुक्तामेव युक्तिं लिखति ।

न सोऽस्तीति । शब्देनानुविद्धमित्यन्वयः । घटः पट इति शब्दविशिष्टविषयघटितमेव सर्वं विज्ञानं गृह्यतेऽनु-

---

(१) अभ्रान्तपदोपादानेन-पा॰ D पु॰ ।
(२) किं तु-पा॰ D पु॰ ।

तदपि न । अगृहीतसम्बन्धानां शब्दानुल्लेखिनः प्रत्ययस्योत्पत्तेः । इतरेषां चेन्द्रियसंयोगानन्तरमविशिष्टविषयापरोक्षानुभवस्य[१] दुरपह्नवत्वात्[२] । अन्यथा विकल्पस्यैवानुदयप्रसङ्गात् वाच्यदर्शनेन हि प्रतिसम्बन्धिवाचकस्मृतिरस्ति । यथाहुः ॥

यत् सञ्ज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् ।
पिण्ड एव हि दृष्टः सन् सञ्ज्ञां स्मारयितुं क्षमः ॥ इति ।

पिण्डदर्शनस्य चेन्द्रियसन्निकर्षव्यतिरेकेण न

व्यवसीयते ऽतः सर्वं प्रत्यक्षं सविकल्पकं विशिष्टार्थग्राहित्वाल्लैङ्गिकवदिति भावः ।

नैतद्युक्तमव्युत्पन्नप्रत्यक्षेषु हेतोर्बाधादित्याह । तदपि नेति । व्युत्पन्नप्रत्यक्षेष्वपि क्वचिद्बाध इत्याह । इतरेषां चेति । अनुभवसिद्धस्यापि तस्यापह्नवे ऽनिष्टमाह । अन्यथेति । कुत इत्याशङ्क्य तस्यैव तत्कारणवाचकस्मृतिबीजो[३]-द्बोधकत्वादित्याह । वाच्येति ।

उक्तमर्थं वृद्धसंवादेन स्पष्टीकरोति । यथाहुरिति । तत्र सञ्ज्ञिविकल्पे कारणमिति शेषः । दृष्टः सन्नालोचितः सन्नित्यर्थः । सञ्ज्ञिनिर्विकल्पकमेव साहचर्यात् संस्कारोद्बोधद्वारा प्रतियोगिसञ्ज्ञास्मृतिहेतुरित्यर्थः ।

तर्हि पिण्डज्ञानं प्रमाणान्तरकार्यत्वात्[४] न प्रत्यक्षमित्याशङ्क्येन्द्रियान्वयव्यतिरेकानुविधानादिन्द्रियकार्यमे-

---

(१) परोक्षावभासस्य–पा॰ B. D. पु॰ ।
(२) अपनेतुमशक्यत्वादित्यर्थः ।
(३) स्मृतिबीजं संस्कारः ।
(४) इन्द्रियकार्यत्वात् ।

कारणान्तरमुपलभ्यते[१] तस्मात् तदुभयमपि प्रत्यक्षमिति नैयायिकाः । यदसूत्रयदिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति। तत्र हि अव्यपदेश्यं व्यवसायात्मकमिति च निर्विकल्पकसविकल्पकयोर्ग्रहणम् । व्यपदिश्यते व्यवच्छिद्यते ऽनेनेति व्यपदेशो विशेषणमुपलक्षणं वा नामजात्यादि तत्कर्म व्यपदेश्यं व्यवच्छेद्यमिति यावत् । अत्र सदसद्वा समानाधिकरणं व्यवच्छेदकं विशेषणं व्यधिकरणं तूपलक्षणम् । यथा दण्डी देवदत्तो

वेत्याह । पिण्डेति । उपसंहरति । तस्मादिति । नैयायिका न्यायविदः स्वयमित्यर्थः । अन्ये तु न्याये ऽनभिज्ञा इति भावः । उभयं प्रत्यक्षमित्यत्र सूत्रकारसंवाद[२]माह । यदसूत्रयदिति । नन्वत्र सूत्रे तयोर्नामापि न श्रूयत इत्याशङ्क्याह । तत्रेति । कथमाभ्यामनयोरभिधानमित्याशङ्क्य तत्राद्यमाद्यपरत्वेन व्याख्यातुं व्यपदेश्यशब्दे तावद्यत्प्रत्ययान्ते प्रकृत्यर्थमाह । व्यपदिश्यत इति । अस्य निर्देशार्थत्वं वारयति । व्यवच्छिद्यत इति । प्रत्ययार्थमाह । तत्कर्मेति । तदर्हमित्यर्थः । अर्हार्थे यत्प्रत्ययः । विशेषणोपलक्षणयोर्भेदमाह । अत्रेति । सदसद्वेति । भावरूपमभावरूपं वेत्यर्थः । समानाधिकरणं समानविभक्तिकं व्यधिकरणं भिन्नविभक्तिकं क्रमेणोदाहरति । यथेति । अव्यपदे-

---

(१) लक्ष्यते—पा॰ B पु॰ ।

(२) सम्मति—पा॰ E पु॰ ।

जटाभिस्तापस इति । अविद्यमानं व्यपदेश्यं यस्मिन् तदव्यपदेश्यं जात्यादिस्वरूपमात्रावगाहि । न तु तेषां मिथो विशेषणविशेष्यभावावगाहीति यावत् । व्यवसायो विनिश्चयो विकल्प इति यावत् । स एवात्मा स्वरूपं यस्य तद्व्यवसायात्मकमिति ॥ ११ ॥ ऽऽ ॥

अथानुमानं लक्षयति ।

व्याप्तिग्रहणसापेक्षं प्रमितेः साधनं विदुः ॥ १२ ॥
अनुमानमिति ।

व्याप्तेर्वक्ष्यमाणलक्षणाया ग्रहणमपेक्ष्य प्रमितेः

श्यशब्देन नञो बहुव्रीहिसमासमाह । अविद्यमानमिति । फलितमाह । जात्यादीति । नन्वेतत्सविकल्पकेऽपि समानमत आह । न त्विति । अथ द्वितीयं द्वितीयपरत्वेन व्याचष्टे । व्यवसाय इति । आत्मशब्दस्येह चेतनपर्यायत्वेऽनन्वयादन्वययोग्यार्थमाह । आत्मा स्वरूपमिति । सूत्रेऽव्यभिचारिपदं प्रत्यक्षाभासव्युदासार्थम् । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति सामान्यलक्षणम् ॥ ११ ॥ ऽऽ ॥

उद्देशक्रमप्राप्तमनुमानलक्षणमवतारयति । अथेति । प्रथमविशेषणेन प्रत्यक्षादेः प्रमितिपदेनाभासानां साधनपदेन फलस्य च व्युदासः । अनुमीयतेऽनेनेत्यनुमानं करणे ल्युट् ।

तदेतद्विवृणोति । व्याप्तेरिति । केयं व्याप्तिरित्यत आह । वक्ष्यमाणेति । ननु प्रत्यक्षादेरपि विना प्रमेयादिक-(१)मप्रवृत्तेः प्रमेयादिव्याप्तिसापेक्षत्वादतिव्याप्तिरित्याश-

(१) प्रमेयमालोकादिकम् ।

साधनमनुमानम् । प्रत्यक्षादीनां तु प्रमेयव्याप्तिसद्भावेऽपि तद्ग्रहणापेक्षा नास्तीति ग्रहणविशेषणेन तेषां निरासः । लिङ्गपरामर्शोऽनुमानमित्याचार्याः । तत्र लिङ्गलक्षणमुत्तरत्र भविष्यति । परामर्श इति च प्रतिसन्धानात्मकं तृतीयलिङ्गज्ञानमभिमतमिति ॥ १२ ॥

व्याप्तिलक्षणमाह ।

व्याप्तिः सम्बन्धो निरुपाधिकः ।

सोपाधिकसम्बन्धवतां मैत्रीतनयत्वादीनां व्याप्तिर्माभूदिति निरुपाधिक इत्युक्तम् । स्वाभाविकः सम्बन्धो व्याप्तिरिति यावत् ।

ज्ञाह । प्रत्यक्षादीनामिति । प्रमेयादीत्यादिशब्देन सहकार्यादिसंग्रहः । तत्र (१) व्याप्तेः प्रायेण सत्त्वेवापेक्षिता न तु तज्ज्ञान (२) मित्यदोष इत्यर्थः । उदयनाचार्यैरपीदमेव लक्षणं भङ्ग्यन्तरेणोक्तमित्याह । लिङ्गेति । तस्यार्थं वर्णयन् लिङ्गलक्षणाकाङ्क्षायामाह । तत्रेति । उत्तरत्रेति हेतुलक्षणावसर इत्यर्थः । द्वितीयलिङ्गपरामर्शस्य कारणत्वं केचिदिच्छन्ति तन्निरासार्थमाह । परामर्श इति । किं तत् तृतीयलिङ्गज्ञानं तदाह । प्रतिसन्धानात्मकमिति । तथा चायं धूमवानिति व्याप्तस्य लिङ्गस्य पक्षधर्मतानुसन्धानं प्रतिसन्धानं तदात्मकमित्यर्थः ॥ १२ ॥

ननु श्लोकशेषेण प्रकृतानुपयुक्तं किमप्युच्यत इत्याशङ्क्य नेत्याह । व्याप्तिरिति । व्याप्तीति ।

विशेषणफलमाह । सोपाधिकेति । निरुपाधिकशब्दार्थमाह । स्वाभाविक इति । अनन्यप्रयुक्त इत्यर्थः ।

---

(१) प्रत्यक्षादौ । (२) ज्ञानं–पा० D पु० ।

कोऽसावुपाधिर्नाम यद्विधुरः सम्बन्धो व्याप्तिरित्यत्राह ।

साधनाव्यापकाः साध्यसमव्याप्ता उपाधयः[(१)] ॥ १३ ॥

यावत्साधनदेशमवर्तमानो यावत्साध्यदेशवृत्तिरुपाधिः । यथा वैधहिंसायां हिंसात्वेनाधर्मत्वे साध्ये निषिद्धत्वमुपाधिः । तद्धि साध्यमधर्मत्वं व्याप्नोति न व्याप्नोति च साधनाभिमतं हिंसात्वम् पक्ष एव वैधहिंसायां सत्यपि हिंसात्वे तस्याभावात् । साधनाव्यापक इत्येतावदुच्यमाने ऽनित्यत्वसाधने कृतकत्वे सावयवत्वमुपाधिः स्यात् । अमूर्ते क्रियादौ कृतकत्वे सत्यपि सावयवत्वाभावेन साधनाव्यापकत्वात् ततश्च साध्यव्यापक इत्युक्तम् । न हि सावय-

ननूत्तरश्लोके उपाधिलक्षणस्य का सङ्गतिरत आह । कोऽसाविति ।

लक्षणं विवृणोति । यावदित्यादि । यावान् साधनदेशो यावत्साधनदेशं यावदवधारण इत्यव्ययीभावः । तत्रावर्तमानः साधनाव्यापक इत्यर्थः । यावत्साध्यदेशं वृत्तिर्यस्येत्यव्ययपूर्वपदो बहुव्रीहिः समपदेन व्याप्यत्वेन व्यापकत्वेन च साध्यसम्बन्ध उक्तः । उदाहरति । यथेति । लक्ष्ये लक्षणं पातयति । तद्धीति । व्याप्नोति व्याप्यते चेति शेषः । लक्षणाक्षरव्यावर्त्यमाह । साधनाव्यापक इत्यादिना । तस्मात् प्रयोजनवदेव विशेषणद्वयोपादा-

(१) ह्युपाधयः-पा· A पु· ।

वत्वं साध्यमनित्यत्वं व्याप्नोति अनित्येष्वेव क्रियादिष्वभावात् । अथ साध्यव्यापक इत्येवाभिधीयेत तत-श्चानित्यत्वसाधने सावयवत्वे कृतकत्वमुपाधिः स्यात् । तस्य साध्यानित्यत्वव्याप्तेः । साधनाव्यापक इत्युक्ते पुनस्तस्य सावयवत्वव्यापकत्वादनुपाधित्वं निरुपाधिकसाध्यसम्बन्धं चोभयम् । यथाहुः । कृतकत्वसावयवत्वादिप्रयुक्ता च विनाशितेति । तस्मात् प्रयोजनवदेव विशेषणद्वयोपादानम् । यथाहुः ।

एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः ।
साध्याभावाविनाभावी स उपाधिर्यदत्ययः ॥ इति ।

नमित्यन्तेन सन्दर्भेण । अनित्यत्वसाधने कृतकत्व इति । अनित्यः शब्दः कृतकत्वाद् घटवदित्यत्र साधनाव्यापकत्वाद् घटे सावयवत्वमुपाधिः स्यादित्यर्थः । अनित्यत्वसाधने सावयवत्व इति । क्षित्यादिकमनित्यं सावयवत्वाद् घटवदित्यत्र साध्यव्यापकत्वात् कृतकत्वमुपाधिः स्यादित्यर्थः । ननु कृतकत्वसावयवत्वयोरेकस्य सोपाधिकत्वमस्तु तथा च साधनाव्यापकत्वसाध्यव्यापकत्वयोरन्यतरेणैव लक्षणसिद्धौ लाघवादित्याशङ्क्याह । निरुपाधिकेति । अनित्यत्वसाधने द्वयोरपि दृष्टशक्तिकत्वान्नान्यतरपरित्यागो न्याय्य इति भावः । द्वयोरप्यनित्यतासाधकत्वे वृद्धसम्मतिमाह । यथाहुरिति । प्रकृतमुपसंहरति । तस्मादिति । समपदं तु पक्षेतरत्वनिरासार्थमिति शेषः ।

उपाधिलक्षणमुदयनवाचा संवादयति । एकसाध्ये-

अन्यत्राप्युक्तम् । कः पुनरुपाधिः । साध्यप्रयोजकं निमित्तान्तरमिति । किमस्य लक्षणम् । साधनाव्यापकत्वे सति साध्यव्यापकत्वमिति[१] । स्फटिकग-

ति । मिथः सम्बन्धशून्ययोरन्यत्र परस्परपरिहारवृत्त्योर्द्वयोर्हेत्वोः क्वचिदेकेन साध्येन सहाविनाभावे दृष्टे सति तत्र यदत्ययो यदभावः प्रकृतसाध्याभावेनाविनाभावी यन्निवृत्त्या साध्यं निवर्तेत इत्यर्थः । स उपाधिः स एव प्रयोजकः इतरस्त्वप्रयोजकः । यथा हिंसात्वनिषिद्धत्वयोः क्रतुहिंसायां कलञ्जभक्षणे च पृथग्वृत्त्योः क्रतुहिंसायामधर्मत्वे साध्ये तेन सह बाह्यहिंसायां द्वयो[२]रविनाभावे दृष्टे ऽपि कदलीफलभक्षणादौ निषिद्धत्वनिवृत्त्या अधर्मत्वनिवृत्तिदर्शनान्निषिद्धत्वमुपाधिस्तद्वदित्यर्थः ।

अत्रापि साधनाव्यापकत्वे सति साध्यसमव्यापकत्वमेव भङ्ग्यन्तरेणोक्तं तदेतदात्मतत्त्वविवेके ऽप्युक्तमित्याह । अन्यत्रापीति । तद्ग्रन्थं लिखति । कः पुनरित्यादि । निमित्तान्तरं हेत्वन्तरमित्यर्थः । अयं किरणावलीग्रन्थ इति कैश्चिदुक्तं तदाकरदर्शनाशक्ति[३]विलसितमित्यास्ताम्[४] । तत् न्यायकुसुमाञ्जलौ त्वेतल्लक्षणोक्त्यनन्तरमुपाधिशब्दप्रवृत्तिनिमित्तं चोक्तम् । तद्धर्मभूता हि व्याप्तिर्जपाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्तीत्यसावुपाधिरुच्यत इति । तदर्थतो दर्शयति । स्फटिकेत्यादि ।

(१) साध्यसमव्याप्तिरुपाधिरिति—पा॰ C पु॰ ।

(२) हिंसात्वनिषिद्धत्वयोः ।

(३) तदपरिचयप्रदर्शनाशक्ति—पा॰ E पु॰ ।

(४) तदास्ताम्—पा॰ E पु॰ ।

तत्वेन रक्तताप्रतीतौ जपाकुसुमवत् साधनाभिमतगतत्वेन स्वधर्मभूताया व्याप्तेः प्रतिभासनिमित्तत्वेनास्योपाधित्वव्यपदेश इति ॥ १३ ॥

उपाधिद्वैविध्यमाह ।

भवन्ति ते च द्विविधा निश्चिताः शङ्किता इति(१)

निर्णीतोभयविशेषणवान् निश्चित उपाधिः । यथोदाहृतमेव निषिद्धत्वम् । उक्तयोर्विशेषणयोरन्यतरसदसद्भावशङ्कायां तु शङ्कित उपाधिः स्यात् । यथा मैत्रीगर्भत्वेन सप्तमगर्भस्य श्यामत्वे साध्ये शाकाद्याहारपरिणतिः । पक्षभूते हि सप्तमगर्भे श्यामत्वोपाधेः

उप समीपस्थे स्वधर्माधानादुपाधिरुच्यत इत्यर्थः ॥ १३ ॥

ननु सम्प्रति प्रकृतानुमानविभागप्रस्तावादुत्तरश्लोके बहुवचननिर्देशः कथमत आह । उपाधीति ।

शङ्किताः सन्दिग्धा इत्यर्थः ।

तत्र निश्चितोपाधेर्लक्षणमुदाहरणं चाह । निर्णीतेति । शङ्कितोपाधेरप्याह । उक्तयोरिति । साधनाव्यापकत्वसाध्यव्यापकत्वयोरित्यर्थः । गर्भस्य श्यामत्व इत्यनेन प्राणिश्यामत्व एवायमुपाधिर्न सर्वत्रेति सूचितम् । तेनेन्द्रनीलादिश्यामत्वे साध्यव्याप्तिभङ्ग इति चोद्यं गर्भश्रावेण गलितम् । अस्य शङ्कितोपाधित्वं कथमत आह । पक्षभूते हीति । ननु साधनाव्यापकत्वं सन्दिग्धं चेत् तस्या-

---

(१) अपि-पा· A पु· ।

शाकाद्याहारपरिणामस्याभावानिश्चयात् साधनाव्यापकत्वं सन्दिग्धमिति भवति शङ्कितोपाधित्वम्। साधनाव्यापक इत्यनिश्चितपक्षवृत्तित्वस्य विवक्षितत्वात् न लक्षणासंग्रहः। तदेतदुभयविधोपाधिविधुरः सम्बन्धो व्याप्तिरिति।

अनुमानस्यावान्तरभेदमाह।

अनुमानं त्रिधा भिन्नम्।

अवान्तरभेदानामानन्त्ये ऽपि राशित्रयेणैव क्रोडीचकार इत्यर्थः। ता एव विधा विभजते।

सत्समत्वाल्लक्षणमसम्भवि स्यादित्याशङ्क्याह। साधनाव्यापक इति। अनिश्चितपक्षवृत्तित्वस्येति। निश्चितपक्षवृत्तित्वाभावस्येत्यर्थः। निश्चितपक्षवृत्तिरहितत्वस्येति पाठे निश्चितायाः पक्षवृत्ते राहित्यमभावस्तस्येत्यर्थः। उभयथापि पक्षवृत्तिनिश्चयाभावस्य लक्षणत्वात् तस्य च पक्षवृत्तित्वाभावनिश्चये तत्सन्देहे च सम्भवान्नासम्भवदोष(१) इत्यर्थः। प्रकृतव्याप्तिलक्षणमुपसंहरति। तदेतदिति।

ननु लक्षितमनुमानमथोपमाने लक्षयितव्ये किमर्थं पुनरनुमानोत्कीर्तनमुत्तरश्लोक इत्याशङ्क्य तद्विभागार्थमित्याह। अनुमानस्येति।

ननु स्वार्थाद्यनेकभेदसम्भवे कथं त्रैविध्यमत आह। अवान्तरेति। अथान्वयीत्यादिना पुनस्त्रैविध्यान्तरमुच्यत इति भ्रमं निरस्यति। ता एवेति। अत्रोभयव्याप्तिकादन्व-

(१) नासम्भवाद्दोष—पा· E पु·।

अन्वयि व्यतिरेकि च ॥ १४ ॥

अन्वयव्यतिरेकीति ।

तदुक्तम् । तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं चेति । तत्र तदिति व्याप्तिज्ञानं (पक्षधर्मताज्ञानं) लिङ्गदर्शनं च परामृश्यते। ते पूर्वं यस्य लिङ्गप्रतिसन्धानस्य(१) तत् तत्पूर्वकं ततश्च तत्पूर्वकमित्येतावता सामान्यलक्षणमुच्यते । शेषेण सामान्यतो विशेषतश्च विभागोद्देश इति ।

यव्यतिरेकिणः पूर्वमेकैकव्याप्तिकयोरितरयोरुद्देशः तत्रापि व्यतिरेकस्यान्वयपूर्वकत्वादन्वयिनः प्राथम्ये ऽर्थाद्यतिरेकिणो माध्यस्थ्यमिति क्रमः ।

अत्र सूत्रसंवाद(२)माह । तदुक्तमिति । सूत्रार्थमाह । तत्रेति । तच्छब्दस्य बुद्धिस्थार्थविशेषपरत्वमाह । तदितीति। लिङ्गदर्शनं द्वितीयलिङ्गज्ञानमित्यर्थः । लिङ्गप्रतिसन्धानस्येति । तृतीयलिङ्गपरामर्शस्येत्यर्थः । तथा च तत्पूर्वकशब्देन लिङ्गपरामर्शोऽनुमानमिति सामान्यलक्षणमुक्तमित्याह । ततश्चेति । शेषेणेति । त्रिविधमिति सामान्यतो विभागः पूर्ववदित्यादि विशेषतः । व्यतिरेकापेक्षया पूर्वभावित्वात् पूर्वशब्देनान्वय उच्यते तद्वदन्वयीत्यर्थः। शेषशब्देन पश्चाद्भावित्वाद् व्यतिरेकस्तद्वद् व्यतिरेकीत्यर्थः । सामान्यतः कैवल्यपरिहारेणोभयविशिष्टतया दृष्टत्वात् सामान्यतो दृष्टमित्यन्वयव्यतिरेक्युच्यते। केचित् तु पूर्वव-

(१) परामर्शस्य–पा॰ D पु॰ ।
(२) सूत्रसम्मति–पा॰ E पु॰ ।

तेषां त्रयाणां विशेषलक्षणाभिधानं प्रतिजानाति तावत् ।

तेषां लक्षणमुच्यते ।

तत्र केवलान्वयिनो लक्षणमाह ।

सर्वेषु केषुचिद्वापि सपक्षेषु समन्वयि(१) ॥ १५ ॥
विपक्षशून्यं पक्षस्य व्यापकं केवलान्वयि ॥

वक्ष्यमाणलक्षणाः पक्षादयः । तत्र पक्षीकृतेषु सर्वेषु व्याप्या वर्तमानं सर्वेषु सपक्षेषु कतिपयेषु वा वर्तमानमविद्यमानविपक्षं केवलान्वयि । यथा सर्वा-

दिति कारणलिङ्गकं शेषवदिति कार्यलिङ्गकं ततोऽन्यत् सामान्यतो दृष्टमिति व्याचक्षते तत्प्रकृतविसंवादाच्चिन्त्यम् ।

ननु तेषां लक्षणमुच्यत इति प्रतिज्ञा न युज्यते व्याप्तिग्रहणसापेक्षमित्यत्रैवोक्तत्वादित्याशङ्क्य सत्यं सामान्यलक्षणमुक्तं विशेषलक्षणं तु प्रतिज्ञायत इत्याह । तेषां त्रयाणामिति । प्रतिजानातीति परस्मैपदं चिन्त्यम् । सम्प्रतिभ्यामनाध्यान इत्यात्मनेपदस्मरणात् ।

तच्चोद्देशक्रमादेवोच्यत इत्याशयेनाह । तत्रेति । अत्र विपक्षशून्यमित्यनेनास्य इतराभ्यां भेद उक्तः ।

पक्षादीनां किं लक्षणमत आह । वक्ष्यमाणेति । यत् प्रथमार्द्धे सपक्षेषु कृत्स्नैकदेशवृत्तिभेदाद्धेतोर्द्वैविध्यमुक्तं तत् क्रमेणोदाहरति । यथेत्यादि । हेतोरसाधारण्य-

(१) कृतान्वयम्–पा· A पु· ।

नित्यत्ववादी कश्चिदनित्यत्वेन सम्प्रतिपन्नान् घटादीन् सपक्षीकृत्य प्रयुङ्क्ते विप्रतिपन्नं सर्वमनित्यं प्रमेयत्वाद् घटवदिति । तदिदं सकलसपक्षवर्तिन उदाहरणम् । सपक्षैकदेशवर्तिनस्तु धर्मादयः कस्यचित् प्रत्यक्षाः मीमांसकानामप्रत्यक्षत्वादस्मत्सुखादिवदिति । मीमांसकानामप्रत्यक्षत्वं हि घटादिषु[1] न वर्तते वर्तते चास्मत्सुखादिष्विति भवति सपक्षैकदेशवृत्तिः । अत्र चोभयत्रापि विश्वस्यापि पक्षसपक्षकोटिद्वयान्तर्भावात् विपक्षाभाव इति ॥ १५ ॥ ऽऽ ॥

केवलव्यतिरेकिणं लक्षयति ।

असपक्षं विपक्षेभ्यो व्यावृत्तं पक्षभूमिषु ॥ १६ ॥
सर्वासु वर्तमानं यत् केवलव्यतिरेकि तत् ॥

अत्र विपक्षव्यावृत्त्यभिधानेन[2] विपक्षसत्ता

परिहारार्थमुक्तं मीमांसकानामिति । लक्ष्ये लक्षणं योजयति । अत्र चेति ॥ १५ ॥ ऽऽ ॥

कस्येदं लक्षणमिति मन्दानामसन्देहार्थमाह । केवलव्यतिरेकिणमिति ।

असपक्षमित्यनेन इतरभेदाभ्यामसाधारणाच्च भेदः विपक्षव्यावृत्तिकथनाद्विरुद्धभेदः । तथापि सर्वमनित्यं सत्त्वादित्यादिकालातीतभेदात् को भेद इत्यत आह । अत्रेति । सति विपक्षे ततो व्यावृत्तिर्लक्षणं न तु निर्वि-

(१) सपक्षेषु घटादिषु–पा· C पु· ।
(२) व्यावृत्तिकथनेन–पा· B पु· ।

दर्शिता । असतो व्यावृत्तेरशक्याभिधानत्वात् । यथा सर्वज्ञप्रणीता वेदा वेदत्वात् । यः सर्वज्ञप्रणीतो न भवति नासौ वेदः । यथा कुमारसम्भवादिरिति । यथा वा सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वात् । यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति यथा गगनमिति । अत्र हि सर्वस्यापि कार्यजातस्य पक्षत्वेन कक्षीकरणात्[(१)] । अकार्यस्य तु विपक्षत्वाद् भवति सपक्षाभाव इति ॥ १६ ॥ ८८ ॥

शिष्यव्युत्पादनार्थं[(२)] प्रासङ्गिकं किञ्चिदाह ।

पक्षत्वमेवातो नोक्तदोष इत्यर्थः । तर्हि

तस्माद्वैधर्म्यदृष्टान्तेनेष्टोवश्यमिहाश्रयः ।
तदभावे च तन्नेति वचनादपि तद्गतेः ॥

इति ब्रुवतो बौद्धस्य किमुत्तरमत आह । असत इति । अन्यथा तद्वत् साधर्म्यदृष्टान्तस्यापि निवृत्तावनुमानस्यैव निवृत्तिरिति भावः । उदाहरति । यथेति । विषयव्याप्त्यर्थमुदाहरणान्तरमाह । यथा वेति । अत्र पूर्वानुमाने वेदनित्यत्ववादिनं प्रति वेदानां सर्वज्ञप्रणीतत्वे साध्ये तन्नान्तरीयकतया कार्यत्वमपि साध्यम् उत्तरानुमाने तु सिद्धकार्यभावस्य जगतः सर्ववित्कर्तृकत्वमेव साध्यमिति विशेषः ॥ १६ ॥ ८८ ॥

ननूत्तरार्द्धे लक्षणस्य व्यतिरेकित्वसाधनं प्रकृतासङ्ग-

---

(१) स्वीकारात्-पा· B पु· ।
(२) व्युत्पादनाय-पा· B पु· ।

असाधारणधर्मत्वाद् व्यतिरेक्येव लक्षणम् ॥ १७ ॥

लक्षणं नाम यदुच्यते तदपि केवलव्यतिरेकिरूपमनुमानमेव । कुतः लक्ष्यस्य ह्यसाधारणधर्मो लक्षणं भवति केवलव्यतिरेकि च सपक्षस्यैवाभावात् सत्यपि विपक्षे तत्रावर्तमानत्वाच्च पक्षस्यैवासाधारणं यतः । तर्हि सास्नादिमत्त्वं गोर्लक्षणमित्युक्ते

तमित्याशङ्क्याह । शिष्येति । प्रासङ्गिकमिति । व्यतिरेकिप्रसङ्गादागतमित्यर्थः(१) ।

नन्विह व्यतिरेकित्वलक्षणत्वयोः किमनूद्य किं विधीयत इत्याशङ्क्यैवकारलिङ्गादप्राप्तत्वाच्च व्यतिरेकित्वमेव विधेयमिति व्याचष्टे । लक्षणं नामेति । ननु व्यतिरेकित्वं नाम व्यावृत्तत्वं तदपि लक्षणस्य प्राप्तमेवेति कथं विधीयत इत्याशङ्क्य सत्यम् अप्राप्तमनुमितिकरणविशेषत्वं विधीयत इत्याह । केवलव्यतिरेकिरूपमिति । अत्र प्रयोगः । लक्षणं केवलव्यतिरेक्यनुमानमसाधारणधर्मत्वात् सम्प्रतिपन्नव्यतिरेक्यनुमानवदिति । नन्वसिद्धो हेतुः साधनविकलश्च दृष्टान्त इत्याशयेनाह । कुत इति । असिद्धिं तावत् परिहरति । लक्ष्यस्य हीति । अन्यथा लक्षणत्वव्याघातः तस्य तल्लक्षणत्वादिति भावः । साधनवैकल्यं च निरस्यति । केवलव्यतिरेकि चेति । यत इति । अतोऽनुमानमेवेति पूर्वेणान्वयः । अत्र चोदयति । तर्हीति । सास्नादिमत्त्वलक्षणस्यानुमानत्वे किं लक्ष्यस्य गवादेः स्वरूपमेव साध्यमुत तत्सम्बन्धिधर्मान्तरम् । नाद्यः सिद्ध-

---

(१) प्रसङ्गाद्गमित्यर्थः - पा· E पु· ।

कथमस्य व्यतिरेकितेति चेत्[१]। श्रूयतामवधानेन अयं गौरिति व्यवहर्तव्यः सास्नादिमत्त्वात् न यदेवं न तदेवं यथा महिषादिरिति। तयोरेव हेतुदृष्टान्तयोः गौरितरेभ्यो भिद्यत[२] इति प्रतिज्ञा द्रष्टव्या। न चैतदसाम्प्रदायिकम्। अथ किंलक्षणः कोसाविति प्रश्नार्थः तदा केवलव्यतिरेकिपरं स्यात्। लक्षणस्य

साधनात्। नेतरः सन्दिग्धस्य तस्य कस्यचिदभावात् कथमनुमानत्वमिति भावः। तर्ह्यश्रुतचरं लक्षणार्थरहस्यमाकर्ण्यतामायुष्मतेत्याह। श्रूयतामिति। व्यावृत्तिव्यवहारयोरन्यतरस्य साध्यत्वान्नोक्तदोषावकाश इत्याह। अयं गौरित्यादि। एवं च प्रमाणलक्षणाभ्यां वस्तुनः सिद्धिरित्यस्यापि स्वरूपसाधकप्रमाणेन व्यावृत्तिसाधकप्रमाणेन लक्षणापरनाम्ना स्वरूपतो व्यावृत्तितश्च वस्तुसिद्धिरिति प्रशस्तपादभाष्यनिष्कण्टकाया[३]मस्माभिर्व्याख्यातार्थो द्रष्टव्यः। नन्वेतत् स्वकपोलकल्पितमित्याह। न चैतदिति। कुत इत्याशङ्क्य न्यायकुसुमाञ्जलावुपमानाधिकारे नागरिकवनेचरप्रश्नोत्तरवाक्यार्थविचारग्रन्थं लिखति। अथेत्यादि। प्रश्नार्थ इति। कोसौ गवय इति[४] प्रश्नवाक्यार्थ इत्यर्थः। तदा केवलव्यतिरेकिपरं स्यादिति। गोसदृशो गवय इत्युत्तरवाक्यमिति शेषः। अयमसौ गवय इति व्यवहर्तव्यः

---

(१) व्यतिरेकिरूपतेति चेत्—पा॰ B पु॰।

(२) व्यावर्तते—पा॰ B पु॰।

(३) निःकण्टकायाम्—पा॰ E पु। प्रशस्तपादभाष्यनिकण्टकायाम्—पा॰ F पु॰।

(४) कीदृग्गवय इति—पा॰ E पु॰।

तथाभावादित्यादिषु बहुषु प्रदेशेषु न्यायाचार्यैरेव लक्षणस्य केवलव्यतिरेकित्वेन व्यवहारादिति ॥ १७ ॥

यद्यसाधारणो धर्मो लक्षणादिपदपर्यायवाच्यो व्यतिरेकी तर्ह्यसाधारणानैकान्तिकरूपो हेत्वाभास एवायं भवेदित्याशङ्क्याह ।

सपक्षे सति चाभासः स्यादसाधारणस्त्वसौ ।

सति सपक्षे तत्रावर्तमानः पक्षमात्रवर्ती हेतुरसाधारणानैकान्तिको नामाभासः स्यात् । यथा भूर्नित्या(१)

गोसदृशत्वाद् यस्तथा न व्यवह्रियते नासौ गोसदृशः यथा हस्तीत्येवं परं स्यादित्यर्थः । लक्षणस्य तथाभावादिति । केवलव्यतिरेकित्वादित्यर्थः । अयमप्येकः किरणावलीग्रन्थ आत्मप्रकरणस्थ इति कैश्चिदुत्तुण्डतुण्डैराख्यातं तथैव व्याख्यातं च तदप्याकरापरिज्ञानवञ्चनासाहसविलास एवेत्यास्ताम् । आदिशब्देन यत् किरणावल्यां पृथिवीप्रकरणे केवलव्यतिरेकिविशेष एव लक्षणमित्यादि तथा चाचार्यवाचस्पतिटीकायां समानासमानजातीयव्यवच्छेदो लक्षणार्थ इति च तत्सर्वं सङ्गृह्यते । आचार्यैरुदयनवाचस्पतिप्रभृतिभिः ॥ १७ ॥

ननूत्तरार्द्धमसङ्गतं प्रमाणपदार्थे हेत्वाभासलक्षणायोगादित्याशङ्क्य शङ्कोत्तरत्वेनावतारयति । यदीति ।

ननूभयोः पक्षमात्रवृत्तित्वाविशेषात् को भेद उक्त इत्याशङ्क्य सपक्षसत्त्वासत्त्वाभ्यां भेद उक्त इति व्याचष्टे ।

---

(१) नित्या भूमिः—पा॰ B पु॰ ।

गन्धवत्त्वादिति। अत्र हि गगनादिषु सपक्षेषु सत्स्वपि तत्रावर्तमानं पक्षभूतभूमिमात्रवर्ति गन्धवत्त्वमाभासो भवति अविद्यमानसपक्षः केवलव्यतिरेकीत्युक्तमेवेति भावः।

अन्वयव्यतिरेकिणं लक्षयति।

व्यावृत्तं यद् विपक्षेभ्यः सपक्षेषु कृतान्वयम् ॥१८॥
व्याप्त्या पक्षे वर्तमानमन्वयव्यतिरेकि तत्।

विपक्षेभ्य इति बहुवचनेन सकलविपक्षव्यावृत्तिर्दर्शिता। कृतान्वयमिति च सपक्षान्वयमात्रं विवक्षितम् न तु व्याप्तिरिति पक्षीकृतसर्वधर्मिव्याप्तिः पूर्वयोरिवात्रापि विवक्षितेति दर्शितम् व्याप्त्या पक्षे

सतीत्यादि। व्यतिरेकी तु नैवमित्याह। अविद्यमानेति। उदाहरणं चोक्तमेवेति भावः।

उत्तरश्लोकेऽपि पूर्ववत् प्रासङ्गिकाभासनिरूपणभ्रमं वारयति। अन्वयेति।

ननु विपक्षादित्येकवचनोपादाने लाघवाद् बहुवचनं वृथेत्याशङ्क्याह। विपक्षेभ्य इति। नन्विह विवक्षितस्य सपक्षसत्त्वस्य लाघवाद् वृत्त्यादिशब्दैरपि सुवचत्वात् किमित्यन्वयशब्देन तत्रापि बहुव्रीहिद्वाराभिधानमत आह। कृतेति। अन्यथा सपक्षेष्विति बहुवचनसामर्थ्यात् पूर्ववत् व्याप्तिप्रतीतौ सपक्षव्यापकस्यैव संग्रहो भवेन्न त्वेकदेशवर्तिन इति भावः। व्याप्त्येति विशेषणस्य प्रयोजनमाह। पक्षीकृतेति। पूर्वयोरिवेति। केवलयोरिवेत्यर्थः। व्या-

वर्तमानमिति । यथा अनित्यः शब्दः कृतकत्वाद् घटवदिति सपक्षव्यापकः कृतकत्वस्य सर्वेष्वनित्येषु वृत्तेः । तयोरेव साध्यदृष्टान्तयोः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादिति सपक्षैकदेशवृत्तिः । अनित्येषु द्व्यणुकादिष्ववृत्तेः घटादिषु च वृत्तेरिति ॥ १८ ॥ ऽऽ ॥

पक्षादिलक्षणमाह ।

पक्षः साध्यान्वितो धर्मी
साध्यजातीयधर्मवान् ॥ १९ ॥
सपक्षोऽथ विपक्षस्तु
साध्यधर्मनिवृत्तिमान् ।

पक्षमुदाहरति । यथेति । व्यापकत्वं व्यनक्ति कृतकत्वस्येति । एकदेशवर्तिनमप्युदाहरति । तयोरेवेति । अत्र सामान्यवत्त्वे सतीत्यनेन सामान्यसमवाययोर्व्युदासः । अस्मदादिबाह्येन्द्रियपदैः क्रमाद्योगिबाह्येन्द्रियग्राह्यपरमाण्वादीनामस्मदाद्यन्तरिन्द्रियग्राह्यात्मादीनां शब्दलिङ्गैकग्राह्येश्वरपरमाण्वादीनां च निरासः । ग्राह्यपदेनासिद्धिपरिहारः । अस्य सपक्षैकदेशवृत्तित्वं व्यनक्ति । अनित्येष्विति ॥ १८ ॥ ऽऽ ॥

उत्तरश्लोकस्योक्तवक्ष्यमाणानुमानसामान्यविशेषलक्षणानन्तर्भावादसाङ्गत्यमाशङ्क्योक्तलक्षणाकाङ्क्षितपक्षादिलक्षणपरत्वात् सङ्गतिरित्याशयेनाह । पक्षादीति ।

साध्यधर्मवत्त्वेन सपक्षत्वे पक्षोऽपि सपक्षः स्यादित्युक्तं साध्यजातीयधर्मवानिति । एवं साध्यधर्मनिवृत्तिमानित्यत्रापि साध्यधर्मविशेषस्य तज्जातीयधर्मस्य च निवृत्तिमान् विपक्ष इति विवक्षितम् । अन्यथा साध्यधर्मविशेषनिवृत्तिमात्रेण विपक्षत्वे सपक्षस्यापि तथाभावाद् विपक्षत्वप्रसङ्ग इति ॥ १९ ॥ ऽऽ ॥

प्रकारान्तरेणानुमानद्वैविध्यमाह ।

अत्र सपक्षलक्षणे जातीयरः प्रयोजनमाह । साध्यधर्मवत्त्वेति । सपक्षलक्षणस्य पक्षे ऽतिव्याप्तिनिरासार्थोऽयं प्रत्यय[1] इत्यर्थः । विपक्षलक्षणे तु जातीयरः प्रत्ययार्थोऽपि विवक्षितव्य इत्याह । एवमिति । अन्यथा सपक्षेऽतिव्याप्तिः स्यादित्याह । अन्यथेति । साध्यधर्मविशेषवान्[2] धर्मी पक्षः । तज्जातीयधर्मवान् सपक्षः । तदुभयविरही विपक्ष इति लक्षणार्थः ॥ १९ ॥ ऽऽ ॥

दृष्टमित्याद्यनन्तरश्लोके ऽस्येति सर्वनाम्ना सन्निहितपक्षादित्रयपरामर्शात् तस्य च दृष्टादिद्वैविध्यायोगादसाङ्गत्यमित्याशङ्क्य प्रकरणात् सन्निधेर्दुर्बलत्वादनेकेषुपशुसोमात्मकराजसूयगतानामभिषेचनीयाख्यसोमयागसन्निधिबाधेन विदेवनादिधर्माणां सर्वात्मकप्रकृतराजसूयसम्बन्धवत् सन्निहितपक्षादिसम्बन्धबाधेन तदाश्रितप्रकृतानुमानविषयत्वेनावतारयति । अनुमानद्वैविध्यमिति । तर्हि पूर्वोक्तत्रैविध्यविरोध इत्यत आह । प्रकारान्तरेणेति ।

---

(१) प्रयाम–पा॰ E पु॰ ।

(२) विशिष्टवानिति क्वचित् ।

दृष्टं सामान्यतो दृष्ट-
मिति चास्य विधाद्वयम् ॥ २० ॥
पूर्वं प्रत्यक्षयोग्यार्थं
तदयोग्यार्थमुत्तरम् ।

विशेषतो दृष्टं सामान्यतो दृष्टमिति च द्विविधमनुमानं भवति । तत्र प्रत्यक्षयोग्यार्थानुमापकं विशेषतो दृष्टं यथा धूमादिरिति । नित्यातीन्द्रियार्था-

---

ननु सामान्यतो दृष्टस्य प्रतिकोटित्वेन विशेषतो दृष्टमिति निर्देष्टुं युक्तं न तु दृष्टमिति अन्यथा नीलोत्पलस्य रक्तोत्पलवदुत्पलमात्रस्यापि प्रतिकोटित्वापत्तेरित्याशङ्क्य सत्यं श्लोके वृत्तसङ्कोचात् कण्ठतो नोक्तं सामान्यशब्दसामर्थ्यलभ्यत्वादित्याशयेनाह । विशेषतो दृष्टमिति । ननु सर्वस्याप्यनुमानस्य प्रथमं व्याप्त्या सामान्य एव प्रवृत्तेः पश्चात् पक्षधर्मतावशेन विशेषपर्यवसानाच्च सामान्यतो दृष्टं विशेषतो दृष्टं चेति कुतो भेदसिद्धिरित्याशङ्क्यान्यथा लक्षणोदाहरणाभ्यामुभयं विविञ्चन्नुत्तरार्धं व्याचष्टे । तत्रेत्यादि । पूर्वं व्यवधानादिना अप्रत्यक्षत्वे ऽपि पश्चात् तदपाये विशेषतो व्यक्तितः प्रत्यक्षदृश्यार्थत्वाद्धूमाद्यनुमानं विशेषतो दृष्टमित्यर्थः । विशेषतो दृष्टे ऽतिव्याप्तिपरिहारार्थं विशिनष्टि । नित्येति । रूपादिज्ञानं करणसाध्यं क्रियात्वात् छिदिक्रियावत् ज्ञानत्वाद्वा लैङ्गिकवदित्यत्र नित्यानुमेयस्य चक्षुरादेः कुठारादिषु करणत्वसामान्येन दृष्टस्य विषयत्वादिदं सामान्यतो दृष्टमित्यर्थः । यदुक्तं प्राक् निरूपा-

नुमापकं सामान्यतो दृष्टमिति। यथा चक्षुरादानुमापकं रूपादिज्ञानम्। सौगतास्तु तादात्म्यतदुत्पत्तिभ्यामेवाविनाभावः। ततश्च कार्यात्मानौ कारणमात्मानं चानुमापयतः। यथा धूमवत्त्वाद्धूमध्वजानुमानम्। शिंशपात्वाद् वृक्षत्वानुमानं चेति प्रतिपन्नाः। यथाहुः।

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्न नदर्शनात्॥ इति।

तदयुक्तम्। अकार्यानात्मनो रसादेरकारणानात्मभूतरूपाद्यनुमानस्य लोके बहुलमुपलब्धेः। किं

धिकः सम्बन्धो व्याप्तिरिति तत्र व्याप्तिरविनाभावः स चान्वयव्यतिरेकाभ्यामेव नियम्यते नान्यथेति विवक्षितम्। अन्यथैवेति शाक्याः अतस्तन्मतं निराकर्तुमुत्कीर्तयति। सौगतास्त्विति। तदुत्पत्तिः कार्यकारणभावः। एवकारोऽन्वयव्यतिरेकपक्षनिराकरणार्थः[१]। स्वभावाद् वेति। तादात्म्याद् वेत्यर्थः। दर्शनादन्वयात् नदर्शनाद् व्यतिरेकाच्च न नञर्थस्य नशब्दस्य सुप्सुपेति समासः। केचित्त्वदर्शनादिति छित्वा अदर्शनाद्व्यतिरेकान्न तथा न दर्शनान्नान्वयाच्चेति व्याचक्षते।

तदेतद्दूषयति तदयुक्तमिति। तादात्म्यतदुत्पत्ती विनाप्यविनाभावदर्शनादव्यापकमिदं लक्षणमित्याह। अकार्येति। अन्धस्य रसाद्रूपानुमानम् आदिशब्दाद्रूपादिभिरपि यथायथमन्यतमदर्शनादितरानुमानमूह्यम्। एवमुभयपक्षसाधारणं दूषणमभिधायाधुना तादात्म्यपक्ष एव

---

(१) निवारणार्थः—पा॰ E पु॰।

च व्याप्तिर्नाम सम्बन्धविशेषः । स च भेदसमानाधिकरण इति कथं तत्प्रतिपत्तौ तादात्म्ये जागरूके ऽविनाभावो जीवितमासादयेत् । किं च लिङ्गलिङ्गिनोश्च तादात्म्ये लिङ्गज्ञान एव लिङ्गिनोऽपि प्रतीतिप्रसङ्गादनुमेयं नावशिष्येत । लिङ्गलिङ्गिनोश्च व्यतिकरश्चात्र प्रसज्येत । न हि तादात्म्ये सत्यप्येकं व्यभिचरति नान्यदिति सञ्ज्ञाघटीति । सामान्यविशेषात्मना भेदाङ्गीकारे ऽप्यनुमेयाभावः । न ह्यस्ति

दोषत्रयं विवक्षुर्व्याप्त्यभावस्तावदाद्यो दोष इत्याह । किं च व्याप्तिरिति । द्वयोः सम्बन्धो नैकस्येति भावः । अथानुमेयाभावो द्वीतीय इत्याह । किं च लिङ्गेति । अन्यथा तदेव ज्ञातमज्ञातं चेति व्याघात इति भावः । लिङ्गलिङ्गिव्यतिकरस्तृतीय इत्याह । लिङ्गलिङ्गिनोश्चेति । वृक्षत्वं लिङ्गं शिंशपात्वं(१) लिङ्गीति व्यत्ययः स्यादित्यर्थः । वृक्षत्वं शिंशपात्वव्यभिचारान्न लिङ्गं शिंशपात्वमेव तु तदव्यभिचाराल्लिङ्गमित्याशङ्क्याह । न हीति । तथात्वे वा तादात्म्यमेव न स्यादिति भावः । ननु नात्यन्तमभेदस्तादात्म्यं येनोक्तदोषः स्यात् किं तु सामान्यविशेषात्मना भेदस्यापि सम्भवान्न कश्चिद्दोष इत्याशङ्क्याह । सामान्येति । कुत इत्यत आह । न ह्यस्तीति । वृक्षोऽयं शिंशपात्वाद् व्यतिरेकेण घटवदित्यत्र विशेषज्ञानस्य सामान्यज्ञानपूर्वकत्वनियमाल्लिङ्गज्ञानात् प्रागेव लिङ्गिनो ज्ञातत्वादनुमेयाभावः । अज्ञातत्वे वा लिङ्गस्याप्यज्ञातत्वादज्ञातासिद्धो

(१) शिंशुपात्वं पा· F पु· ।

सम्भवः सामान्यमनिश्चितं निश्चितस्तु विशेष इति। न च तस्मिन् सति भावमात्रं तत्कार्यमपि तु तस्मिन् सत्येव भावः। स चाविनाभाव एवेति तत्कार्यत्वात् तदविनाभावं वदत आत्माश्रयदोषापत्तिरिति कृतं विस्तरेण ॥ २० ॥ ८८ ॥

एवं सप्रकार(१)मनुमानं लक्षयित्वा उपमानं लक्षयति।

हेतुः स्यादित्यर्थः। अथ तदुत्पत्तावप्यसाधारणं दोषं वक्तुं तदुत्पत्तिं तावद् विविनक्ति। न चेति। अन्यथैवं प्रलपतो बौद्धस्य स्वनिषेककाले यदृच्छासन्निहितरासभकार्यत्वं केन वार्यत इति भावः। ततः किमत आह। स चेति। इतिशब्दो हेत्वर्थे तत्कार्यत्वात् तदविनाभाव इत्युक्ते तयोर्घटकलशादिशब्दवत् पर्यायत्वात् तदविनाभावात् तदविनाभाव इत्युक्तं भवेत् तथा च स्वसिद्धौ स्वापेक्षणादात्माश्रय इत्यर्थः। तर्हि भवतामपि कार्यलिङ्गकानुमानेषु व्याप्तिज्ञाने का गतिरित्याशङ्क्येदानीं सर्वेषामपि भवतामेवान्वयव्यतिरेकावन्तरेण कान्या गतिरस्तीत्याशयेनाह इति कृतमिति। इत्यनुमानम्(२) ॥ २० ॥ ८८ ॥

नन्वद्यापि स्वार्थपरार्थभेदानुक्तेरसमाप्त एवानुमाने कथमिदानीमुपमानोक्तिरुत्तरश्लोक इत्याशङ्क्याह। एवं सप्रकारमिति। स्वार्थादिभेदस्तु उत्तरत्र यः परार्थानुमा-

---

(१) सप्रपञ्च–पा॰ D पु॰।

(२) इत्यनुमानम्–इति नास्ति F पु॰।

अव्युत्पन्नपदोपेतवाक्यार्थस्य च सञ्ज्ञिनि ॥ २१ ॥
प्रत्यक्षप्रत्यभिज्ञानमुपमानमिहोच्यते ।

अव्युत्पन्नेनागृहीतसङ्गतिना पदेनोपेतं यद्वाक्यम् अतिदेशवाक्यमिति यावत् । तस्य योऽर्थः साधर्म्यादिस्तस्य पूर्वं वाक्येनानुभूतस्य पश्चात् सञ्ज्ञिनि गवयादौ यत् प्रत्यक्षेण प्रत्यभिज्ञानं तदुपमानम् । अकृ-

---

नस्येत्याद्यवयवलक्षणादेवार्थात् प्रतीतौ न कण्ठोक्तिमपेक्षत इति भावः । सङ्गतिस्तूद्देश एवोक्ता ।

अव्युत्पन्नेतिपदमव्युत्पन्नपदमिति स्वरूपपरत्व(१)शङ्कानिरासार्थमाह । अव्युत्पन्नेनेति ।

अव्युत्पन्नशब्दार्थमाह । अगृहीतेति । प्रभिन्नकमलोदरादिवाक्याद्भिनत्ति । अतिदेशेति । स चार्थो नियत एवेत्याह । साधर्म्यादिति । आदिशब्दाद् वक्ष्यमाणवैधर्म्यधर्ममात्रयोर्ग्रहणम् । नन्वपूर्वदर्शनस्य कथं प्रत्यभिज्ञानमत आह । पूर्वमिति । प्रत्यक्षेण प्रत्यक्षप्रमाणेनेत्यर्थः । तदुपमानमिति । प्रत्यक्षफलं यत्प्रत्यभिज्ञाप्रत्यक्षं तदुपमीयते ऽनेनेत्युपमानम् उपमितिकरणमित्यर्थः । उपमितिश्च सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिरिति भावः । उक्तार्थे च आचार्य(२)सम्मतिमाह । अकृतेति । अत्र सञ्ज्ञायाः स्मर्यमाणतयैवोपयोगकथनात् तदतिरिक्तातिदेशवाक्यार्थप्रत्यभिज्ञैवोपमानमिति केचिद्व्याचक्षते ते प्रष्टव्याः गोसद-

---

(१) स्वरूपलक्षणत्व–पा· E पु· ।
(२) न्यायाचार्य–इति क्वचित् ।

तत्समयसङ्गतास्मरणसहायं तत्समभिव्याहृतवाक्यार्थ-प्रत्यभिज्ञाप्रत्यक्षमुपमानमित्याचार्याः ॥ २१ ॥ ८८ ॥

उपमानत्रैविध्याय वाक्यार्थत्रैविध्यमाह(१) ।

शो गवय इत्यत्र गवयपदत्यागे तत्र वाक्यं नाम किमस्तीति यदर्थप्रत्यभिज्ञानमुपमानं भवेत् । न चैकपदं वाक्यमस्ति न चावाक्यमुपदेशाय कल्पते किं चात्रैव तत्समभिव्याहृतविशेषणं सङ्ग्रहे ऽप्यव्युत्पन्नपदोपेतविशेषणं च तत्साहित्यमुद्घोषवदुन्मत्तगीतं स्यात् । नन्वभिहितपदार्थसंसर्गो वाक्यार्थः न चाव्युत्पन्नं पदं किञ्चिदभिधातुमीष्टे तत्किमर्थं तत्साहित्यमिति चेत् तर्हि श्रूयतामुपमानरहस्यमवहितैः कीदृग्गवय इति गवयशब्दप्रवृत्तिनिमित्तविशेषं पृष्टस्तस्य गवयत्वरूपस्य रूपतो निर्देष्टुमशक्यत्वात् तदुपलक्षणं गोसादृश्यमाचष्टे गोसदृशो गवय इति । तथा च वाक्यादेव गवयशब्दो गोसदृशस्यार्थस्य वाचक इति सामान्यतो व्युत्पन्नमेव विशेषतो व्युत्पत्त्यर्थं तूपमानमपेक्षत इति । तदुक्तमाचार्यैः वाक्यादेव निश्चिते ऽपि सामान्ये विशेषतो बोधकत्वे ऽस्य मानान्तरमनुसरणीयमिति । तस्मात् सामान्ये व्युत्पन्नमव्युत्पन्नं च विशेषे यत् तदव्युत्पन्नपदं तद्युक्तवाक्यार्थप्रत्यभिज्ञानमेव तत्स्मृतिसहकृतमुपमानमिति लक्षणार्थ इत्यश्रद्धेयमेवापरिशीलिताचार्यवचसामपव्याख्यानमिति ॥ २१ ॥ ८८ ॥

ननूपमानविभागप्रस्तावे वाक्यार्थविभागः प्रक्रान्तवाजपेयस्य शरद्वर्णनप्राय इत्याशङ्क्याह । उपमानेति ।

(१) वाक्यार्थभेदमाह-पा· B पु· ।

अत्रातिदेशवाक्यार्थस्त्रिविधः परिगृह्यते[१] ॥२२॥
साधर्म्यं धर्ममात्रं च वैधर्म्यं चेति भेदतः ।

साधर्म्यादिभेदेनातिदेशवाक्यार्थस्त्रिविधो[२] भवति । तद्भेदात् तत्प्रतिसन्धानात्मकमुपमानमपि त्रिधा भिद्यत इति भावः । तत्र यथा गौस्तथा गवय इति श्रुतातिदेशवाक्यस्य पश्चाद् वनं गतस्य नागरिकस्य वाक्यानुभूतस्य गोसादृश्यस्य गवये यत् प्रतिसन्धानमयमसौ गोसदृश इति तत्साधर्म्योपमानम् । वैधर्म्योपमानं तु कीदृगश्व इति प्रश्ने गवादिवद् द्विशफो न भवत्यश्व इत्यतिदेशवाक्याद्गवादिवैसादृश्यमधिगतवतः पश्चादेकशफत्वादिरूपस्य वैसादृश्यस्य तुरङ्गमे प्रत्यभिज्ञानम् । धर्ममात्रोपमानं तु उदीच्येनोदीरितं दीर्घग्रीवः प्रलम्बोष्ठः कठोरतीक्ष्णक-

द्वितीयार्द्धे त्रैविध्यान्तरोक्तिशङ्कां निरस्यन् श्लोकं व्याचष्टे । साधर्म्यादीति । वाक्यार्थत्रैविध्यस्योपमानत्रैविध्यप्रयोजकत्वं व्यनक्ति । तद्भेदादिति । प्रतिसन्धेयभेदात् प्रतिसन्धानभेद इत्यर्थः । प्रतिसन्धानं प्रत्यभिज्ञानम् । त्रिविधमप्युदाहरति । तत्रेत्यादि । अत्रान्वयरूपत्वात् पूर्वं साधर्म्यं ततो व्यतिरेकरूपत्वाद्वैधर्म्यं ततः परिशेषाद्धर्ममात्रमिति न्याय्यः क्रमः । श्लोके तु वृत्तानुसाराद्व्यत्ययः ।

(१) परिकल्प्यते–पा॰ A पु॰ ।
(२) त्रिप्रकारो–पा॰ B पु॰ ।

एटकाशी पशुः क्रमेलक इति वाक्यं श्रुतवतो दाक्षिणात्यस्य उत्तरापथे करभदर्शनानन्तरमयमसौ तादृशः पशुरिति प्रत्यभिज्ञानम्। ततश्च प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमितिसूत्रगतं साधर्म्यपदं च वैधर्म्यस्य धर्ममात्रस्य चोपलक्षणं बोद्धव्यम्। अत एव

क्रमेलकः करभ उष्ट्र इत्यनर्थान्तरम्। अत्र कैश्चिद्धर्ममात्रविषयस्येतरभेदवदुपमानोपमेयकोटिद्वयाभावान्नोपमानत्वं किं त्वसाधारणधर्मत्वाद् गन्धवत्त्वादिवल्लक्षणमात्रं तच्च केवलव्यतिरेक्येवेति चोद्यमुत्पाद्य सत्यम् यदत्र वाक्येनानुभूतं दीर्घग्रीवत्वादिकं यच्च पश्चात् सञ्ज्ञिनि दृश्यमानं तयोर्धर्मयोरेवोपमानोपमेयभावादुपमानत्वमिति पर्यहारि। तदसत् लोके समानधर्मसम्बन्धाद्धर्मिणोरुपमानोपमेयभावः प्रसिद्धो न धर्मयोः अस्तु वा तथापि भवदुक्तयोर्धर्मयोर्भेदोऽस्ति वा न वा अस्ति चेत् कथं तदेवेदमिति प्रत्यभिज्ञासिद्धिः न चेत् कथमुपमानोपमेयभावः तर्हि कथमुपमानत्वमिति चेद्व्युत्पन्नेत्यादिलक्षणयोगादिति ब्रूमः। तथापि कथमवयवार्थविरहिण्युपमानशब्दे प्रवृत्तिरिति चेत् रूपिन्यायादिति सन्तोष्टव्यम्। केवलव्यतिरेकित्वं तु व्यावृत्तिविषयेऽङ्गीकुर्मः सञ्ज्ञासञ्ज्ञिसम्बन्धस्तु न लक्षणार्थ इति तत्रोपमानमेव विजयत इति समाधेयम्। उक्तत्रैविध्यस्य सूत्रविरोधं परिहरति। ततश्चेति। प्रसिद्धसाधर्म्यात् प्रसिद्धेन गवादिना गवयादेः साधर्म्यात् साधर्म्यप्रत्यभिज्ञानात् साध्यस्य सञ्ज्ञासञ्ज्ञिसम्बन्धबोधस्य साधनमुपमानमिति सूत्रार्थः। उपलक्षणत्वे

साधर्म्योपमानोदाहरणानि बहूनि दर्शयित्वा अन्यान्यप्याहस्म भगवान् भाष्यकारः । एवमन्योऽप्युपमानस्य विषयो बुभुत्सितव्य इति ॥ २२ ॥ ऽऽ ॥

वादिविप्रतिपत्तेरुपमानस्य प्रमेयं फलं च दर्शयति ।

प्रमेयं तस्य सम्बन्धः सञ्ज्ञायाः सञ्ज्ञिना सह ॥२३॥
तत्प्रतीतिः फलं चास्य नासौ मानान्तराद्भवेत् ।

सञ्ज्ञासञ्ज्ञिसम्बन्ध उपमानस्य प्रमेयम् फलं च तत्सम्बन्धप्रतीतिः(१) । यथाहुः ।

सम्बन्धस्य परिच्छेदः सञ्ज्ञायाः सञ्ज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ इति ।

प्रमाणमाह । अत एवेति । तस्य प्रामाण्यसूचनार्थमुक्तं भगवानिति । भाष्योक्तेः साधर्म्योदाहरणान्तरत्वशङ्कां निरस्यति । बहूनीति । तत्र निराकाङ्क्षत्वाद्वैधर्म्यादिविषये वेत्यर्थः ॥ २२ ॥ ऽऽ ॥

नन्वस्योत्तरश्लोके प्रमेयफलकथनं प्रक्रमविरुद्धं प्रत्यक्षादेस्तदनुक्तेरत आह । वादिविप्रतिपत्तेरिति । पार्थक्ये लक्षणे चेति शेषः ।

श्लोकाक्षराणि योजयति । सञ्ज्ञेति ।

अत्रोदयनसम्मतिमाह । यथाहुरिति । नासौ मानान्तरादित्युक्तम् ।

अतिदेशवाक्यादनुमानाद्वा तत्प्रतीतेरित्याशङ्क्य न

---

(१) प्रतिपत्तिः—पा॰ B पु॰ ।

न ह्ययं सम्बन्धोऽतिदेशवाक्यादेव प्रतीयते वाक्यश्रवणसमये गवयपदप्रवृत्तिनिमित्तस्य गवयत्वस्याप्रतीतेः सम्बन्धिनोऽनवगमे सम्बन्धस्य दुरवगमत्वात्। गवयपदादेव तदवगमे परस्पराश्रयतापत्तिः। न च गोसादृश्येनोपलक्षयितुं शक्यते अदृष्टचरेण गवयत्वेन गोसादृश्यस्य सम्बन्धादर्शनात्। न हि पुरुषेणादृष्टसम्बन्धो दण्डः पुरुषमुपलक्षयति। प्रतीतमेव गोसादृश्यं गवयपदप्रवृत्तिनिमित्तमस्त्विति चेत्। न

तावदाद्य इत्याह। न हीत्यादिना प्रसङ्गाच्चेत्यन्तेन। अप्रतीतेरिति। केनापि प्रमाणेनेति शेषः। मास्त्वप्रतीत्यत आह। सम्बन्धिन इति। सम्बन्धज्ञानस्य सम्बन्धिज्ञानपूर्वकत्वमित्यर्थः। नन्विन्द्रियलिङ्गाविषयत्वेऽप्यतिदेशवाक्यगतगवयपदादेव गवयत्वं प्रत्येष्यत इत्यत आह। गवयपदादेवेति। तर्हि तेन तद्ग्रहे सम्बन्धग्रहः सम्बन्धग्रहे च तद्ग्रह इत्यन्योन्याश्रय इत्यर्थः। तर्हि तद्गतगोसदृशपदात् तत्सादृश्योपलक्षितं सत् प्रतीयतामित्याशङ्क्योपलक्षणस्यैवासम्भवान्नेत्याह। न चेति। अशक्यत्वे हेतुमाह। अदृष्टचरेणेति। न ह्यगृहीतसम्बन्धयोरुपलक्ष्योपलक्षकभावः। अत्र दृष्टान्तमाह। न हीति। तथा च सादृश्यस्योपलक्षकत्वे सिद्धे गवयत्वप्रतीतिसिद्धिः तत्सिद्धौ च तत्सम्बन्धज्ञानमपेक्ष्योपलक्षणसिद्धिरित्यन्योन्याश्रयप्रसङ्ग इति भावः। तर्ह्यप्रतीतगवयत्वं गवयपदप्रवृत्तिनिमित्तं माभूत् प्रतीतं तु सादृश्यमेव तथा भविष्यतीति शङ्कते।

तस्य प्रतियोगिनिरूप्यत्वेन प्रतियोगिनमनभिधायाभिधानानुपपत्तेः प्रतियोगिनो गोरप्यभिधाने गौरवप्रसङ्गात् अप्रतीतगूनामारण्यकानां तत्सादृश्यानवगमेन गवयपदव्यवहाराभावप्रसङ्गाच्च । ननु गवयशब्दो गवयत्वस्य वाचकोऽसति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुक्तत्वात् योऽसति वृत्त्यन्तरे यत्र प्रयुज्यते स तस्य वाचकः यथा गोशब्दो गोत्वस्येत्यनुमानादेव तत्सम्बन्धप्रतीतिरिति चेत् । न तद्वाचकत्वज्ञानमन्तरेण लिङ्गविशेषणासिद्धेः । उपचारेणापि तत्र प्रयोगोपपत्तेः । यथाहुः ।

प्रतीतमिति । परिहरति । नेति । तस्येति । सादृश्यस्येत्यर्थः । तस्याप्यभिधाने दोषमाह । प्रतियोगिन इति । गौरवादप्यवीक्षतोऽनिष्टमाह । अप्रतीतगूनामिति । अप्रतीता गावो यैरिति विग्रहः । गोस्त्रियोरुपसर्जनस्येति ह्रस्वः । अथानुमानात् सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतीतिरिति द्वितीयं पक्षमाशङ्कते । नन्विति । गौणलाक्षणिकप्रयोगेषु व्यभिचारवारणाय हेतुं विशिनष्टि । असति वृत्त्यन्तर इति । सम्बन्धज्ञानात् प्रागस्यैव सन्दिग्धत्वात् सन्दिग्धविशेषणासिद्धो हेतुरिति परिहरति । नेति । अथ प्रयोगान्यथानुपपत्त्या तत्सिद्धिरत आह । उपचारेणापीति ।

अत्राप्युदयनसम्मतिमाह । यथाहुरिति । उक्तरीत्या सादृश्यस्य निमित्तत्वायोगान्निमित्तस्य सतो गवयत्वस्य

सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः ।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयापि च[1] ॥ इति ।

मीमांसकास्तु गृह्यमाणपदार्थगतसादृश्यविज्ञानात् तत्प्रतियोगिकस्मर्यमाणपदार्थगतसादृश्यविज्ञानमुपमानमिति वर्णयन्ति । यथा गामनुभूतवतो वनं गतस्य गवये गृह्यमाणाद्गोसादृश्यात् स्मर्यमाणे नग-

---

केनापि प्रमाणेनाप्रतीतेः पूर्वं प्रत्यभिज्ञानात् प्राक् शब्देनातिदेशवाक्येन समयः सङ्केतो दुर्ग्रहः अनुमयानुमानेनापि तथा त्वदुक्तलिङ्गविशेषणासिद्धेरित्यर्थः । अतः सम्बन्धपरिच्छेदार्थं प्रामाणान्तरमास्थेयमित्युपमानसिद्धिरिति ॥

अथ शाबरमुपमानलक्षणं दूषयितुमनुभाषते मीमांसकास्त्विति । अत्र गृह्यमाणपदार्थगतसादृश्यज्ञानस्य पञ्चमीनिर्देशात् करणतयेतरत् प्रथमानिर्दिष्टं फलम् तत्सामानाधिकरण्यनिर्देशादुपमानशब्दोऽप्युपमितिवचनस्तदेतदुदाहरणेन स्पष्टीकरोति । यथेत्यादि । तदुक्तं शालिकायाम् । सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयमुपमानमिति । अत्र सादृश्यदर्शनं गृह्यमाणपदार्थगतसादृश्यज्ञानं तदत्र करणं तदुत्थं ज्ञानं सादृश्यविषयं स्मर्यमाणपदार्थगतसादृश्याख्यप्रमेयादिविषयं यत् तदुपमानमुपमितिस्तदेव प्रमाणमिति शालिकार्थः । कारिकायां तु सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयमुपमानमित्यत्र विशिष्टं स्मर्यमाणं वस्तु तद्विशिष्टं वा सादृश्यं प्रमेयमित्युक्तम् ।

---

(१) बा–पा· C पु· ।

रण्ये गवि गवयप्रतियोगिकसादृश्यज्ञानमेतत्सदृशः स गौरिति । तदिदमनुमानान्नातिरिच्यते । तथाहि । गौर्गवयसदृशः गवयस्थसादृश्यप्रतियोगित्वात् यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः यथा यमो यमान्तरेणेत्यनुमानादेव तत्सिद्धेः[१]। न च व्याप्तिग्रहणविधुराणामपि प्रतीतिदर्शनादननुमानत्वमिति वाच्यम् सर्वेषामेवान्ततः करतलयोरिव गृहीतव्याप्तिकत्वात् । किं च सदृशदर्शनात् स्मर्यमाणपदार्थगतसादृश्यज्ञानस्य प्रमाणान्तरत्वाभ्युपगमे विसदृशदर्शनात्[२]

तस्माद्यत् स्मर्यते वस्तु सादृश्येन विशेषितम् ।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥ इति ।

तदेतद्दूषयति । तदिदमिति । अनुमानान्तर्भावमभिव्यक्तुं प्रयोगमारचयति । तथाहीत्यादि । अत्र गोर्गवयसदृशत्वं नाम तत्प्रतियोगिकसादृश्याधिकरणत्वं तत्प्रतियोगिकत्वं तु तत्प्रति सम्बन्धित्वमिति न साध्याविशिष्टता । ननु यमदृष्टान्तादगृहीतव्याप्तिकानामपि सादृश्यप्रतीतेर्नानुमानान्तर्भाव इति शङ्कामनूद्य निरस्यति । न चेति । माभूदविशिष्टे यमदृष्टान्ते व्याप्त्यनुसन्धानं तथापि सर्वस्यापि नित्यनिर्दिष्टयोर्निजकरतलयोरिव यद्येन सदृशं तदपि तेन सदृशमिति व्याप्तिग्रहणसम्भवादनुमानमेवेत्यर्थः । अथास्मिन् पक्षे प्रमाणातिरेकलक्षणम-

---

(१) यथा गौर्गवयान्तरेणेत्यनुमानवृत्तेः–पा· C पु· । अनुमानप्रवृत्तेः–पा· B पु· ।

(२) विसदृशज्ञानात्–पा· C पु· ।

तत्प्रतियोगिकस्मर्यमाणवस्तुगतवैसादृश्यज्ञानस्यापि प्रमाणान्तरत्वमास्थेयं तुल्यन्यायत्वात् । यथाहुः ।

साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ[1] व्यक्तमिति चेत् प्रकृते न किम् ॥

इति ॥ २३ ॥ ऽऽ ॥

अथागमं लक्षयति ॥

यथार्थदर्शिनः पुंसो यथादृष्टार्थवादिनः ॥ २४ ॥
उपदेशः परार्थो यः स इहागम उच्यते ।

तिप्रसङ्गं चाह । किं चेति । न्याय उपपत्तिः ।

अत्रोदयनसंवाद[2]माह । यथाहुरिति । साधर्म्यं सादृश्यं वैधर्म्यं वैसादृश्यं मानं मानान्तरं तथा च सादृश्यदर्शनोत्थायाः सादृश्यबुद्धेः प्रमाणान्तरत्वे वैसादृश्यदर्शनोत्थायास्तद्बुद्धेरपि तथात्वापत्तिरित्यर्थः । अथ गृह्यमाणस्य गोः स्मर्यमाणमहिषवैसादृश्यान्यथानुपपत्त्या तस्याप्येतद्वैसादृश्यकल्पनादियमर्थापत्तिरित्यभिमानस्तर्हि गवयगतगोसादृश्यान्यथानुपपत्त्या गोरप्येतत्सादृश्यकल्पनमर्थापत्तिरेवेति कष्ट[3]मुपमानस्वरूपमेव नष्टमित्याहार्थापत्तिरिति । इत्युपमानम्[4] ॥ २३ ॥ ऽऽ ॥

उद्देशक्रमादुपमानानन्तर्यमागमस्येत्याशयेनाह । अथेति ।

(१) अर्थापत्तेरसौ—पा॰ C पु॰ ।
(२) सम्मति—पा॰ E पु॰ ।
(३) क्लिष्ट—पा॰ E पु॰ ।
(४) इत्युपमानम्—इति नास्ति E पु॰ ।

यथावस्थितार्थदर्शी यथादृष्टार्थवादी चाप्तः । तस्य श्रोतृप्रवृत्तिनिवृत्त्युपयोगिवचनमागमः । यथार्थदर्शिनोऽप्ययथार्थवादिनो वचनमप्रमाणं यथा विप्रलम्भकस्य वाक्यम् । यथार्थवादिनो[१]ऽयथार्थदर्शिनोऽपि वचनं तथा यथा भ्रान्तस्यायथार्थदर्शिनो यथार्थवादिनोऽप्यष्टौ काकदन्ता इति । श्रोतृप्रवृत्तिनिवृत्त्यनुपयोगिवचनमनुपादेयमिति तन्निवृत्त्यर्थमुक्तं परार्थ इति । तदुक्तम् । आप्तोपदेशः शब्द इति । उपदिश्यते ऽनेनेति उपदेशो वाक्यं तदर्थज्ञानं वा । पूर्वत्र वाक्यार्थज्ञानं फलमुत्तरत्र हानादिबुद्धिरिति ॥

नन्वाप्तोपदेश आगम इति प्रसिद्धं लक्षणं किं नेष्यत इत्याशङ्क्य तदेवेदमित्याह । यथावस्थितेति । एवं च सति पुनराप्तलक्षणोक्तिगौरवं नास्तीति भावः । परार्थशब्दार्थमाह । श्रोतृइति । उपदेशशब्दार्थमाह । वचनमिति । वाक्यमित्यर्थः । क्रमाद् विशेषणत्रयस्यापि व्यावर्त्यमाह । यथार्थेत्यादि । शास्त्रं हि तच्छासनादित्युक्तत्वादपरार्थस्य प्रामाण्यमेव नास्तीत्यर्थः । अत्र सूत्रसम्मतिमाह । तदुक्तमिति । ननूपदिष्टिरुपदेशः भावे घञः स्मरणात् तत्कथमस्य शब्दशब्देन करणवृत्तेन सामानाधिकरण्यमित्याशङ्क्य अकर्तरि च कारके सञ्ज्ञायामिति करणार्थत्वमाह । उपदिश्यते ऽनेनेति । पक्षद्वये ऽपि फलभेदं दर्शयति । पूर्वत्रेति । इत्यागमः ॥

---

(१) यथादर्शनवचने ऽपि–पा· B पु· ।

एवमेतानि चत्वार्येव प्रमाणानि[1] एतेष्वेवेतरेषां यथासम्भवमन्तर्भावः । अर्थापत्तिसम्भवयोरनुमानान्तर्भावात् ऐतिह्यस्य च शब्दानतिरेकात् अभावस्य च प्रत्यक्षादव्यतिरेकात् । तदेतत्सूत्रकारैरेव न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यादिति[2] परिचोदनापूर्वकं शब्द एतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावादभावस्य प्रत्य-

---

इत्थं प्रमाणचतुष्टयं निरूप्य तत्रैवेतराण्यन्तर्भावयितुमुपोद्घातयति । एवमिति । नन्वर्थापत्त्यादिषु जाग्रत्सु कथं चत्वार्येवेत्यवधारणमत आह । एतेष्वेवेति । कुत्र कस्यान्तर्भाव इत्यत आह । अर्थापत्तीत्यादि । न चैतच्चतुष्ट्वमसाम्प्रदायिकं सूत्रकारेणैवाक्षेपपूर्वकं सर्थितत्वादित्याह । तदेतदिति । चतुष्ट्वमित्यर्थः । अनर्थान्तरभावात् प्रमाणान्तरत्वाभावादित्यर्थः । अप्रतिषेध इति सूत्रशेषः चतुष्ट्वस्याप्रतिषेध इत्यर्थः । आदिशब्दादर्थापत्तिरप्रमाणमनैकान्तिकत्वान्नानैकान्तिकत्वमर्थापत्तेरनर्थापत्तावर्थापत्त्यभिमानात् तथा नाभावः प्रमाणम् प्रमेयासिद्धेरित्याद्यन्तर्भावोपयोगिप्रमाणपरीक्षासूत्राणां संग्रहः । एवं चादिशब्दाद्भाष्यवचनादिपरामर्श इति केषाञ्चिद्व्याख्यानं प्रत्याख्यातं सम्भवति सूत्रपरामर्शित्वे तस्यान्याय्यत्वादिति । अथ सङ्ग्रहे प्रमाणचतुष्टयमात्रलक्षणा-

---

(१) एतेभ्य एवदेवमनुष्यतिरश्चां व्यवहाराः प्रवर्तन्ते–इत्यधिकं C पु- ।

(२) सम्भवाभावानामिति क्वचित् ।

कादनर्थान्तरभावादित्यादि समर्थितम् । तथाहि । अनुपपद्यमानार्थदर्शनात् तदुपपादकभूतार्थान्तरकल्पनमर्थापत्तिः । यथा जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्य गृहभावदर्शनेन वा बहिरभावस्य कल्पनम् । तत्र तावद्बहिर्भावमन्तरेण गृहाभावस्य कानुपपत्तिरिति वाच्यम् । तमन्तरेणासौ न भवतीति चेत् । न भवतीत्यस्य कोऽर्थः । किं न जायत इति किं वा नावतिष्ठत इति । न प्रथमः । बहिर्भावाकार्यत्वाद् गृहाभावस्य । न द्वितीयः । शब्दान्तरेणाविनाभावस्यैवाङ्गीकारात् । गम्येन हि विना

दर्थसिद्धमितरान्तर्भावं स्वयं समर्थयितुमारभते । तथाहीति । तत्रादावर्थापत्तेरन्तर्भावं वक्तुं तत्स्वरूपं तावदाह । अनुपपद्यमानेति । उदाहरति । यथेति । उक्तवैपरीत्येनाप्यर्थापत्तिमुदाहरति । गृहभावेति । अथैनामनुमानेऽन्तर्भावयितुमनुपपत्तिशब्दार्थं तावत् पृच्छति । तत्रेति । तं विना तस्या भवनमेवानुपपत्तिरिति परः शङ्कते । तमिति । तर्हीयमेवानुमानजीवातुर्व्याप्तिरिति वक्तुं प्रश्नपूर्वकमभवनं द्वेधा विकल्पयति । न भवतीत्यस्येति । बहिर्भावमन्तरेण गृहाभावस्याभवनं नामानुत्पत्तिरनवस्थानं वेत्यर्थः । बहिर्भावाकार्यत्वादिति । देवदत्तस्य गृहाभावो नाम गृहसंसर्गाभावस्तस्य प्रागभावत्वे ऽकार्यत्वात् प्रध्वंसत्वे प्रागेव देवदत्तनिष्ठक्रियाजन्यविभागजनितत्वादित्यर्थः । शब्दान्तरेणेति । अनुपपत्तिशब्देनेत्यर्थः । तं विनानवस्थानस्याविनाभावत्वमभिव्यक्तुमविनाभावस्वरूपमाह ।

गमकस्यानवस्थानमेवाविनाभावः। कीदृशं च बहिर्भावस्योपपादकत्वम्। न तावत् तज्जनकत्वं तदकार्यत्वात् तस्येत्युक्तत्वात्। स्वसद्भाव एव गृहाभावस्यावस्थानमिति चेत्। तर्हि व्यापकत्वमेवाभिहितं(१) स्यात्। प्रमाणद्वयविरोध एवानुपपत्तिरिति चेत्। मैवं व्याहतं भाषिष्ठाः। प्रमाणयोः सतोर्विरोध एवानुपपन्नः(२) शुक्लोऽयं घटोऽयमितिवत्सहभा-

गम्येनेति। यथाग्निं विना धूमानवस्थानं तयोर्व्यतिरेकव्याप्तिरेव तद्वदनयोरपीत्यर्थः। एवमनुपपद्यमानार्थस्य गमकस्य व्याप्यत्वमुक्त्वा तदुपपादकस्यापि तद्गम्यस्य व्यापकत्वं वक्तुं तत्स्वरूपं च पृच्छति। कीदृशं चेति। तच्च तज्जनकत्वं वा तदवस्थानप्रयोजकस्वावस्थानकत्वं वा। नाद्यः उक्तोत्तरत्वादित्याह। न तावदिति। द्वितीयमाशङ्कते। स्वेति। तर्हि सिद्धं नः समीहितं नामान्तरेणान्वयव्याप्तेरेवाभिधानादित्याह। तर्हीति। व्याप्यव्यापकभाव एवाविनाभाव इत्यर्थः। तर्हि गृहाभावजीवनग्राहिणोः प्रमाणयोर्विरोध एवानुपपत्तिरिति गुरुः शङ्कते। प्रमाणेति। गोत्वाश्वत्वयोरिव नित्यसहानवस्थायिनोः(३) प्रमाणत्वविरुद्धत्वयोः सामानाधिकरण्यं व्याहतमिति परिहरति। मैवमिति। व्याहतिं व्यनक्ति। प्रमाणयोरित्यादिनाभावादित्यन्तेन। सति प्रामाण्ये विरोधाभावमुदाहरति। शुक्लोऽयमिति। एकस्मिन्नेव पटे पट-

(१) अभिमतं–पा· B पु·।

(२) एव न सम्भवति–पा· B पु·।

(३) नित्ययोः सहानवस्थायिनोः–पा· F पु·।

वात्[१] । विरुद्धयोश्च न प्रामाण्यं वस्तुनो द्वैरूप्यासम्भवेन रज्जुरियं सर्पोऽयमितिवदन्यतरस्य प्रामाण्याभावात्[२] । न चात्र जीवनगृहाभावयोर्विरोधोऽस्ति । जीवत एव स्वात्मनो गृहाभावदर्शनेन जीवनगृहाभावयोः सहसम्भवात् । जीवनप्रमाणेन जीविते प्रमिते[३] जीवता क्वचित् स्यातव्यमिति देशसामान्यसम्बन्धे चावगते तच्च जीवनं गृहे वा बहिर्वेति विषये[४] सन्देहमात्रं जायते न प्रमाणमेव प्रव-

त्वशुक्लत्वग्राहिणोः प्रमाणत्वमस्ति न तु विरुद्धत्वमित्यर्थः । विरुद्धत्वे प्रामाण्याभावं चोदाहरति । रज्जुरिति । एकस्मिन्नेव पुरोवर्तिनि रज्जुत्वसर्पत्वग्राहिणोस्तु विरुद्धयोर्न प्रामाण्यमन्यतरबाधावश्यम्भावादित्यर्थः । बाधे हेतुमाह । वस्तुन इति । प्रकृते तु द्वयोः प्रामाण्यमेव न च विरोधः स्वानुभवस्यैव तत्र साक्षित्वादित्याह । न चात्रेति । ननु गृहाभावग्राहिणः प्रत्यक्षस्य गणिताप्तवाक्यादिना जीवनग्राहिप्रमाणेन गृहावस्थानव्याप्तिविषयेण विरोधः सम्भविष्यतीत्याशङ्क्याह । जीवनप्रमाणेनेति । अयमर्थः । न हि जीवनं गृहावस्थानेन व्याप्तं येन तद्ग्राहिप्रमाणेन विरोधः स्यात् किं तु देशसामान्येन व्याप्तं न च तावता विरोधः बहिःसद्भावेनापि तदुपपत्तेरिति तर्हि येन

(१) सह सम्भवात्—पा॰ B C पु॰ ।
(२) अन्यतराप्रामाण्यावश्यम्भावात्—पा॰ C पु॰ ।
(३) जीवने प्रमिते—पा॰ B पु॰ ।
(४) विशेष—पा॰ B पु॰ ।

र्तत(१) इति नास्ति गृहाभावस्य प्रमाणविरोधः। अत एव जीवनविशिष्टेन गृहाभावलिङ्गेन बहिर्भावानुमानं सुकरम्। जीवनस्य विशेषानिश्चये(२) ऽपि सामान्यनिश्चयेन तद्विशिष्टस्य गृहाभावस्य लिङ्गत्वात्। यथा स्थाणुत्वपुरुषत्वविशेषानिश्चये ऽपि ऊर्ध्वद्रव्यमात्रनिश्चयेन तद्विशिष्टदेशादिकमवधार्य व्यवहारप्रवृत्तिः। प्रयोगश्च देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहे ऽसत्त्वात्। यो विद्यमानो यत्र नास्ति स ततोऽन्यत्रास्ति यथाहमिति। तथैव देवदत्तो बहि-

---

विशेषो गृह्यते तेनैव विरोधो भविष्यतीत्याशङ्क्य न केनापि गृह्यते किं तु सन्दिह्यत इत्याह। तच्चेति। फलितमाह। अत एवेति। विरोधाभावादेवेत्यर्थः। ननु जीवनस्य देशविशेषानिश्चये सन्दिग्धविशेषणासिद्धो हेतुः स्यादित्याशङ्क्याह। जीवनस्येति। सामान्यतो निश्चितस्यैव व्यवहारहेतुत्वमुदाहरति। यथेति। यथा यदेतदूर्ध्वद्रव्यमग्रे दृश्यते स्थाणुर्वा पुरुषो वा ततोऽन्यद्वा अतः समीपे तिष्ठ त्वमदागमनपर्यंत(?) मित्यादावनिश्चितविशेषस्य द्रव्यमात्रस्य व्यवहारहेतुत्वं तद्वदत्रापि जीवनमात्रस्यैव हेतुत्वमित्यर्थः। प्रतिपादितमर्थं प्रयोगारूढं करोति। प्रयोगश्चेति। तत्राद्यविशेषणेन मृतेषु जनिष्यमाणेषु च व्यभिचारनिरासः द्वितीयेन गेहस्थेष्वेवेति। द्वितीयोदाहरणे ऽपि

---

(१) न प्रमाणं किमपि प्रवर्तत—पा· B पु·।

(२) जीवनस्य देशविशेषानिश्चये—पा· B पु· देशविशेषनिश्चयाभावे—पा· C पु·।

र्नास्ति मूर्तत्वे सति गृहे सत्त्वात् यथाहमिति । तस्मात् सिद्धमेव अनुपपद्यमानदर्शनात् तदुपपादकार्थान्तरकल्पन(१)मनुमानमिति । अन्यथानुमानतया प्रसिद्धे धूमोदाहरणे ऽपि धूमः स्वकारणं दहनमाक्षिपति प्रतिक्षिपति चानुपलब्धिरिति प्रमाणद्वयविरोधात् पर्वतार्वाग्भागे दहनाभावः परभागे च दहनावस्थानमित्यर्थापत्तितापत्तिः । यथाहुः ॥

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ।
न मानयोर्विरोधोऽस्ति प्रसिद्धे वाप्यसौ समः ॥ इति ।

प्रयोगमाह । तथैवेति । क्रमात् पदद्वयेनाकाशादौ वहिर्षुषु च व्यभिचारनिरासः । परमप्रकृतमुपसंहरति । तस्मादिति । अनुपपद्यमानोपपादकयोर्व्याप्यव्यापकभावादविरोधाच्चेत्यर्थः । तथाप्यनुमानत्वानङ्गीकारे धूमाद्यनुमानस्याप्यर्थापत्तित्वापत्तेर्जगत्यनुमानकथैवास्तमियादित्याह । अन्यथेति । तत्रापि प्रमाणद्वयविरोधं सम्पादयति । धूम इति । कार्यानुपलब्ध्योर्दहनभावाभावग्राहिणोर्विरोधादित्यर्थः ।

अत्रोदयनसम्मतिमाह । यथाहुरिति । अनियम्यस्याव्याप्यस्यायुक्तिरनुपपत्तिः न अनियन्ता अव्यापक उपपादको न भवति तथा मानयोर्भावाभावग्राहिप्रमाणयोः पूर्वोक्तरीत्या विरोधश्च नास्ति अतोऽर्थापत्तिरनुमानान्न भिद्यत इति भावः । अन्यथा प्रसिद्धे धूमाद्यनुमाने चासौ विरोधः समः तस्याप्यर्थापत्तित्वापत्तिरित्यर्थः । इत्यर्थापत्त्यन्तर्भावः ॥

(१) तदुपपादककल्पन-पा· B पु· ।

अथाभावस्य च प्रत्यक्षादिषु यथासम्भवमन्तर्भावः। तत्र तावदिह भूतले घटो नास्तीति प्रतीतिरिन्द्रियजन्या अनन्यत्रोपक्षीणेन्द्रियव्यापारान्वयव्यतिरेकानुविधायित्वात् रूपादिबुद्धिवत्। अधिकरणग्रहणोपक्षीणमिन्द्रियमिति चेत् न त्वगिन्द्रियेण घटादिग्रहणे प्रतियोगिस्मृतिमतोऽन्धस्य शुक्लाद्यभावप्रतीतिप्रसङ्गात्। प्रतियोगिग्राहकेन्द्रियेणाधिकरणप्रतीतिरपेक्षणी-

---

इत्थमर्थापत्तिमनुमानेऽन्तर्भाव्य सम्प्रत्यभावं प्रत्यक्षादिषु यथायथमन्तर्भावयितुमाह। अथेति। अधिकरणग्रहणप्रतियोगिस्मरणसहकृतयानुपलब्ध्या षष्ठप्रमाणेनाभावो गृह्यते नेन्द्रियादिनेति मीमांसकाः। यथाहुः।

गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया॥ इति।

तान् प्रति कश्चिदभावस्य प्रत्यक्षत्वं साधयति। तत्र तावदिति। अत्र प्रतिपत्तेरापरोक्ष्यादित्याद्युदयनेनोक्तहेत्वपृकस्येष्टत्वात् प्रथमं हेतुमुपेक्ष्य द्वितीयं प्रयोगतो दर्शयति। इहेत्यादि। अनयोरेव प्रतिज्ञादृष्टान्तयोः साक्षात्कारिप्रतीतित्वादिति हेतुप्रयोगे प्रथमहेतुव्याख्यानं चेति द्रष्टव्यम्। न च प्रतिवाद्यसिद्धो हेतुः तस्यापरोक्षत्वे लैङ्गिकादिवदक्षातकरणत्वानुपपत्तेरिति लिङ्गग्रहणोपक्षीणेन्द्रियव्यापारानुविधायिनि लैङ्गिकज्ञाने व्यभिचारनिरासार्थमुक्तम् अनन्यत्रोपक्षीणेति। विशेषणासिद्धिमाशङ्कते। अधिकरणेति। किं येन केनचिदिन्द्रियेणाधिकरणग्रहणमिष्टं प्रतियोगिग्राहकेन्द्रियेण वा। नाद्यः अतिप्रसङ्गादि-

येति चेत् न त्वगिन्द्रियग्राह्ये वायौ चाक्षुषरूपाभावानवगमप्रसङ्गात् । अभावप्रतीतौ चाधिकरणप्रतीतेरनुपयोगान्न तत्रेन्द्रियमुपक्षीयते । उपयोगे वा तन्तुनाशोत्तरकालं पटप्रध्वंसानिरूपणप्रसङ्गात् । तस्य हि प्रतियोग्यधिकरणाधारत्वेन तन्त्वाश्रयत्वात् तेषां च विनष्टत्वात् । भवतु वाधिकरणग्रहणावश्यम्भावः । तथापि न तत्रेन्द्रियमुपक्षीयते तदवान्तरव्यापारत्वात् तस्य । न चैवं लिङ्गज्ञानस्यापि इन्द्रियावान्त-

---

त्याह । नेति । द्वितीयमाशङ्कते । प्रतियोगीति । तत्राप्यनिष्टमाह । नेति । किं चाधिकरणग्रहणस्यानुपयोगाच्च न तत्रेन्द्रियस्योपक्षय इत्याह । अभावप्रतीताविति । उपयोगित्वोक्तौ यत्राधिकरणमेव न सम्भवति तत्राभावोपलम्भो न स्यादित्याह । उपयोगे वेति । अधिकरणाभावं सूचयति । तन्तुनाशोत्तरकालमिति । अभावस्य तन्त्वाश्रयत्वे युक्तिमाह । तस्येति । तर्ह्यधिकरणाभावः कथमत आह । तेषामिति । कारणविभागात् कारणनाशाद्वा कार्यद्रव्यनाशः । तत्र द्वितीयप्रक्रियायामधिकरणं न सम्भवतीति भावः । ननु तन्तुनाशे ऽपि तदवयवपरम्परायामापरमाणोरस्त्येवाधिकरणं यत्किञ्चिद्दृष्टमनुमितं वा अन्यथा निराश्रयस्येन्द्रियेणापि दुर्ग्रहत्वादित्याशङ्क्याह । भवतु वेति । अनुपक्षये मण्डूकप्लुत्या व्यापाराव्यवधानत इति हेतुमुपादत्ते । तदवान्तरेति । न हि स्वाङ्गं स्वस्य व्यवधायकमिति भावः । तर्हि लिङ्गज्ञानस्याप्यवान्तरव्यापारत्वे लैङ्गिकस्याप्यैन्द्रियकत्वापत्तिरित्याशङ्क्याह । न चैव-

रव्यापारत्वप्रसङ्गः । यद्धि यज्जनयित्वैव यज्जनयति तत्र तस्य तदवान्तरव्यापारत्वात् । इन्द्रियस्य च लिङ्गज्ञानमन्तरेणापि लिङ्गिज्ञाने सामर्थ्योपलम्भात् । न च तुच्छत्वादिन्द्रियसन्निकर्षाभावो ऽभावस्य यथा ज्ञानेन विषयत्वेन सन्निकृष्यते तथेन्द्रियेणापि सन्निकर्षोपपत्तेः। न च तुच्छत्वमप्यभावस्य अभावप्रतियो-

मिति । कुत इत्याशङ्क्य तल्लक्षणाभावादित्याशयेन तल्लक्षणमाह । यद्धीति। यस्य कारकस्य स्वकार्यकरणे यदवश्यापेक्षितमवान्तरकार्यं स तस्यावान्तरव्यापारो यथेन्द्रियस्यार्थसन्निकर्षो यागस्यापूर्वं कुठारस्योद्यमनादिकं चेत्यर्थः । प्रकृते नैवमिन्द्रियस्य लिङ्गिग्रहणे लिङ्गनैरपेक्ष्यदर्शनादित्याह । इन्द्रियस्येति । नन्विन्द्रियस्य सन्निकृष्टार्थग्राहित्वादभावस्य च तुच्छत्वेन[1] सन्निकर्षायोगादनैन्द्रियकत्वमिति बाधः प्रतिरोधो वेत्याशङ्क्य किमिदं तुच्छत्वं निषेधात्मकत्वं वा निरूपाख्यत्वं वा तत्राद्ये परस्परसन्निकृष्टत्वहेतोरसिद्धिरित्याह । न चेति । कुत इत्यत आह । यथेति । इन्द्रियसन्निकर्षः संयुक्तादिविशेषणविशेष्यभावः द्वितीये तु तदेव नास्तीत्याह । न चेति । तुच्छत्वाभावे ऽभावत्वमेव न स्यादित्याशङ्क्योभयं विविनक्ति । अभावेति । विधिर्भावः । तन्निषेधो ह्यभावः । तद्वर्तमानदशायां तत्प्रतियोगिनो विधित्वेन निषेधत्वेन च दुर्निरूपत्वान्निरूपाख्यत्वलक्षणं तुच्छत्वम् अभावत्वं तु निषेधबुद्धिविषयत्वम् अतोऽस्य प्रामाणिकत्वात् प्रमासम्बन्धवदप्रतिबन्धः प्रमाकरणसम्बन्ध इति भावः । अथा-

(१) अभावोऽसन्निकृष्टः तुच्छत्वात् । अभावः ऐन्द्रियको न भवति असन्निकृष्टत्वात् तुच्छत्वाद्वा ।

गित्वं हि तुच्छत्वं नाभावत्वम् । किं च षष्ठप्रमाणवादिनाऽप्यनुपलब्धेरज्ञाताया एव ज्ञानजनकत्व(१)मास्थेयम् । अन्यथा तस्या अप्यभावरूपत्वेनानुपलब्ध्यन्तरापेक्षायामनवस्थाप्रसङ्गात् । ततश्चाज्ञातकरणत्वाद् रूपादिज्ञानवदेवाभावज्ञानस्येन्द्रियजन्यत्वं स्वध्यवसानम् । सर्वत्र च बाह्यार्थेषु भावप्रमाणावष्टम्भेनैव मनसोऽपि ज्ञानहेतुत्वं दृष्टमित्यभावज्ञानेऽपि तथात्वमुपगम्यत इति अनुपलब्धिसहायत्वं(२) नोपपद्यते । किं च भावज्ञानजननसमर्थस्य लिङ्गशब्दादेस्तदभावज्ञानजननेऽपि सामर्थ्यमुपलब्धमिति इन्द्रिय-

---

ज्ञातकरणत्वादिति यद्धेत्वन्तरं तदाह । किं चेति । अस्य प्रतिवाद्यसिद्धिं परिहरति । षष्ठेति । तदनिष्टावनिष्टमाह । अन्यथेति । अभावरूपत्वेनेति । उपलब्ध्यभावत्वेनेत्यर्थः । फलितमाह । ततश्चेति । स्वध्यवसानं सुनिश्चयम् आतो युजितिस्यतेः खलर्थे युच्प्रत्ययः । अथ भावावेशाच्च चेतस इति यद्धेत्वन्तरं तदाह । सर्वत्रेति । विमतमभावज्ञानं भावप्रमाणाकृष्टमनोजन्यं बाह्यार्थज्ञानत्वाद्रूपादिज्ञानवदिति प्रयोगः । बाह्यपदेनात्मतद्धर्मज्ञानव्युदासः । अथ प्रतियोगिनि सामर्थ्यादिति यद्धेत्वन्तरं तदाह । किं चेति । इन्द्रियमभावग्राहि भावग्राहित्वाच्छब्दलिङ्गादिवदिति प्रयोगः । अस्य व्याप्तिमाह । भावज्ञानेति । उपनया-

---

(१) अभावज्ञानकारणत्व–पा· C पु· ।
(२) सहकारित्वं–पा· B पु· ।

स्याप्यभावप्रतियोगिनि घटादौ समर्थस्य तदभावज्ञानजनने ऽपि सामर्थ्यमनुमीयते । किं च इन्द्रियदोषेण दूष्यमाणमभावज्ञानं तदेवात्मनः करणीकरोति कारणदोषादेव हि कार्यदोषाः प्रादुर्भवन्ति[1] । अन्यथातिप्रसङ्गात् । किं चाघटं भूतलमिति विशिष्टज्ञानस्येन्द्रियजन्यत्वावश्यम्भावाद् विशेष्यांश इव विशेषणांशे ऽपि तज्जन्यत्वमकामेनापि स्वीकरणीयम्

दिकमाह । इन्द्रियस्येति । अक्षाश्रयत्वाद्दोषाणामित्येतद्व्याचष्टे । किं चेन्द्रियेति । यत्र सत्त्वे वस्तुनि नास्तीति भ्रमो जायते सोऽभावभ्रमः स इन्द्रियजन्यः तद्दोषदुष्टत्वात् पीतशङ्खभ्रमवदित्यर्थः । हेत्वसिद्धिं परिहरति । कारणदोषादिति । विपक्षे बाधकमाह । अन्यथेति । ज्ञानस्य स्वतो दोषाभावादधिकरणग्रहणप्रतियोगिस्मरणानुपलब्धीनां दुष्टत्वायोगाद्विन्द्रियदोषदुष्टत्वानङ्गीकारे नूनमाकस्मिकत्वप्रसङ्ग इत्यर्थः । आचार्यस्तु इन्द्रियमभावप्रमाकरणं तद्विपर्ययकरणत्वाद् यद्यद्विपर्ययकरणं तत् तत्प्रमाकरणं यथा रूपप्रमायां चक्षुरिति प्रायुङ्क्त । विकल्पनादिति यद्धेत्वन्तरमवशिष्टं तद्व्याचष्टे । किं चाघटमिति । हेत्वसिद्धिं परिहरति । इन्द्रियजन्यत्वावश्यम्भावादिति । अनन्यत्रोपक्षीणेन्द्रियव्यापारानुविधानादिति भावः । विमतं विशिष्टज्ञानं विशेषणांशे ऽपीन्द्रियजन्य ऐन्द्रियकविशिष्टज्ञानत्वाद् दण्डीतिज्ञानवदिति प्रयोगः । लैङ्गिकादिव्यभिचारनिरासार्थमैन्द्रियकविशेषणमुपसंहरति । तस्मादिति । अभावमात्रस्य प्रत्यक्षत्वसाधने

(१) प्रादुःषन्ति–पा० C पु० ।

तस्मात् प्रत्यक्षयोग्यार्थानुपलब्धौ तदभावोऽपि प्रत्यक्षः नन्वेवमनुपलब्धिः कारणं स्यादिति चेत् हन्तैवमभावानुपलब्धिरपि भावग्रहणकारणमापन्नमायुष्मताम् । भावोपलम्भे ऽप्यभावानुपलम्भस्य नित्यं सन्निधानादिति । तदेतत्सर्वं न्यायकुसुमाञ्जलौ प्रपञ्चितमाचार्यैः । यथा ।

परमाण्वाद्यभावेषु बाधः स्यादित्यत उक्तं प्रत्यक्षयोग्येति । नन्वेवमनुपलब्धेरप्यावश्यकत्वादुभयवादिसिद्धा सैव प्रमाणमस्त्वित्याशयेन शङ्कते । नन्वेवमिति । आवश्यकत्वे कारणत्वं स्यात् न तु प्रमाणत्वम् अन्यथाभावोपलम्भे ऽप्यभावानुपलब्धिरेव प्रमाणं स्यात् नेन्द्रियमिति सोपहासं परिहरति । हन्तैवमिति । अत्र कारणशब्दः प्रमाणवचनः । सैव कुत इत्यत आह । भावोपलम्भे ऽपीति । अपिशब्दादभावोपलम्भे भावानुपलम्भवदिति दृष्टान्तः सूचितः । नन्वघटं भूतलमिति विशिष्टबुद्धाविन्द्रियग्राह्यत्वे ऽप्यभावस्य केवलस्यातत्त्वान्नास्ति अस्तित्वे वा केवलसौरभस्य चाक्षुषत्वप्रसङ्गः तस्मात् पूर्वं केवलग्रहणायानुपलब्धिराश्रयणीया अन्यथा नागृहीतविशेषणेतिन्यायाद् विशिष्टधीरेव न स्यात् किं च यदिह भूतले घटो नास्तीत्यभाव इन्द्रियेण विकल्प्यते तदा प्रथमं निर्विकल्पकेनापि ग्राह्यः अन्यथा विकल्पानुदयात् न च प्रतियोगिनिरूप्यस्यास्य तद्युज्यते प्रमाणान्तरे तु नेयमनुपपत्तिरित्याशङ्क्याह । तदेतत्सर्वमिति ॥

प्रतिपत्तेरापरोक्ष्यादिन्द्रियस्यानुपक्षयात् ।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥

तथा

प्रतियोगिनि सामर्थ्याद् व्यापाराव्यवधानतः ।
अत्राश्रयत्वाद्दोषाणामिन्द्रियाणि विकल्पनात् ॥ इति ।

तत्रैव तदुभयमप्येवं समाहितम् अनन्यनिरूप्यस्वभावानां दण्डकुण्डलादीनामेव विशेषणीभविष्यतां पूर्वं कैवल्येन ग्रहणं तादृशामेव च विकल्पानां घटादीनां विकल्पनीयानां पूर्वं निर्विकल्पकग्राह्यत्वं विषयसम्बन्धिप्रतियोगिनिरूप्याणां तु ज्ञानसमवायाभावानां नित्यसनिरूप्यस्वभावतया विशेषणत्वे वा विशेष्यत्वे वा विकल्पसामग्रीसमवधानवत एवेन्द्रियस्य सामर्थ्यावधारणान्न कैवल्ये निर्विकल्पकग्रहणापेक्षेति न कुत्राप्यनुपलब्धिपैशाच्याः प्रवेशावकाश इति । अथ तत्रापि कुत्र प्रपञ्चितं तदाह । यथा प्रतिपत्तेरापरोक्ष्यादित्यादि । अभावप्रतिपत्तिरिन्द्रियजन्या अपरोक्षत्वाद् रूपादिप्रतिपत्तिवत् । परोक्षत्वे वा लैङ्गिकादिवदज्ञातकरणत्वानुपपत्तिः । एवमन्ये ऽपि हेतवः पूर्वोक्तरीत्या योजनीयाः । भावावेशाद्भावप्रमाणपरतन्त्रत्वादित्यर्थः । प्रतियोगिनिषेधोभाव इत्यर्थः । व्यापारेति । द्वितीयहेतुविशेषणासिद्धिपरिहारार्थोऽयं हेतुः सा च पूर्वमभावग्रहणे ऽधिकरणग्रहणस्यानुपयोगादिति पर्यहारि इदानीं तूपयोगमङ्गीकृत्य परिह्रियते अधिकरणग्रहणस्यावान्तरव्यापारत्वेनाव्यवधायकत्वादिति । अक्षेति । अभावविपर्ययस्येन्द्रियदोषोत्थत्वादैन्द्रियकत्वमित्यर्थः । विकल्पनादिति । अघटं भूतलमित्यभावविकल्प-

ननु गृहादिमात्रमनुभूयान्यत्र गतवतः प्रतियोगिस्मरणे सति इन्द्रियव्यापारमन्तरेणाप्यभावो ऽनुमीयते[१] । यथाहुः ।

स्वरूपमात्रं दृष्ट्वापि पश्चात् किञ्चित् स्मरन्नपि ।
तत्रान्यनास्तितां पृष्टस्तदैव[२] प्रतिपद्यते ॥ इति ।

सत्यम् । न तत्राभावः प्रत्यक्षः किं तु स्मरण-

स्यैन्द्रियकत्वाद् विशेषणस्याभावस्याप्यैन्द्रियकत्वमित्यर्थः । इन्द्रियाणीति पक्षनिर्देशः अभावज्ञानकरणमिति साध्याध्याहारः ।

इदानीं परः प्रकारान्तरेणाभावप्रतीतेरनैन्द्रियकत्वमाशङ्कते । नन्विति ।

अत्र भट्टकारिकां संवादयति । स्वरूपमात्रमिति । गृहादिस्वरूपमेव । न तु देवदत्तभावाभावावित्यर्थः । किञ्चिदिति प्रतियोगीत्यर्थः । तत्र गृहादावन्यनास्तितां देवदत्ताद्यभावमित्यर्थः । तदैव प्रश्नसमय एवातीन्द्रियलिङ्गादेरनवकाश उक्तः तस्मादनुपलब्धेरेवेयं वाह्यालीत्यर्थः ।

नूनमत्राभावस्याप्रत्यक्षत्वे ऽप्यनुमेयत्वान्न षष्ठप्रमाणावकाश इति परिहरति । सत्यमिति । अनुमापकलिङ्गमाह । किं त्विति । देवदत्तस्तदा तत्र नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वाद् गण्डशैलवत् नोपलब्धश्च स्मृतियोग्यत्वे सत्यस्मर्यमाणत्वात् तद्वदेवेति प्रयोगः । नन्वनुमानस्य ज्ञातकरणत्वेन स्मृत्यभावस्याप्यनुपलब्ध्यन्तरगम्यत्वे

(१) अनुभूयते-पा॰ C पु॰ ।
(२) तथैव-पा॰ C पु॰ ।

योग्यस्य स्मरणाभावादनुमीयते । स्मरणाभावश्च मानसप्रत्यक्ष इति नानवस्था । अनयैव दिशा प्रातर्गजाभावविज्ञाने ऽपि ज्ञेयम्[1] । कथमन्यथा प्रमाणान्तरवादिनः सायन्तनसमये ऽनुभूयमानस्य गजादेः प्रातःकालीनाभावविषयो ऽनुभवो जायेत । न हि तदानीं तस्यानुपलब्धिरस्ति । प्रातःकालीनैवानुवर्तत इति चेत् न तत्रापि दृश्यत्वाभावेन योग्यानुपलब्धेरभावात् । स्मर्तव्यस्य स्मरणाभावस्तत्राभावज्ञाने का-

पुनस्तस्य तस्याप्येवमनवस्था स्यादित्यत आह । स्मरणाभावश्चेति । अभावस्य प्रतियोगिग्राहककरणग्राह्यत्वाच्चास्य मानसत्वं स्मरणानुपलब्धिस्तु यथा वः सत्त्वैव करणं तथा नः सत्त्वैव मनःसहकारिणीति नानवस्थेति सर्वं सुस्थम् । उक्तं न्यायमन्यत्राप्यतिदिशति । अनयैवेति । तदपि स्मरणाभावलिङ्गानुमेयमित्यर्थः । तदनङ्गीकारे बाधकमाह । कथमन्यथेति । ननु तस्यानुपलब्धिरेव प्रमाणमस्तीत्याशङ्क्य किं सायंतनगजानुपलब्धिः प्रातस्तनगजानुपलब्धिर्वा नाद्यः तदानीं तस्योपलभ्यमानत्वादित्याह । न हीति । द्वितीयमाशङ्कते । प्रातःकालीनेति । प्रातःकालीनगजसम्बन्धिनीत्यर्थः । तत्रापीति । तदानींतनगजस्येदानींकालविप्रकृष्टतया दर्शनयोग्यत्वाभावेनायोग्यत्वानुपलब्धिः सती न कालान्तराभावमवगमयितुमीष्ट इत्यर्थः । तर्हि स्मृतियोग्यस्यास्मर्यमाणत्वात् स्मरणाभावलक्षणायोग्यानुपलब्धिरेवास्तीति शङ्कते । स्मर्तव्यस्येति । तर्हि प्रमित्यभावलक्षणाया एवा-

(१) विज्ञानमपि ज्ञेयम्–पा· B पु· ।

दर्शनमिति चेत् न तर्ह्यभावोऽपि प्रमाणाभावो नास्तीत्यस्यार्थस्येतिभाष्यमुन्मत्तप्रलपितमेव स्यात् ॥

अत्र केचिदभावप्रमेयमपलपन्तः प्रमाणविशेषचिन्तामेव न सहन्ते । तेषामिह भूतले घटो नास्तीति प्रतीतिर्निर्विषया भवेत् । नास्तीति व्यव-

---

नुपलब्धेरभावप्रमाणत्वं प्रतिपादयता भवदीयभाष्यकारवचसैव विरोधः स्यादित्याह । तर्हीति । तदेव भाष्यं पठति । अभावोऽपीति । अभाव इति लक्ष्यनिर्देशः अभावाख्यं प्रमाणमित्यर्थः । प्रमाणाभाव इति लक्षणं प्रमित्यभावरूप इत्यर्थः । तस्य प्रमेयमाह । नास्तीत्यस्यार्थस्येति । प्रमेयाभावरूपस्यार्थस्येत्यर्थः । प्रमापक इति शेषः । उपलक्षणं चैतत् ।

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥ इति ।

वार्तिकविरोधश्चेति द्रष्टव्यम् ।

ननु सति कुड्ये चित्रकर्म लोके तावदभावपदार्थ एव नास्ति तत्कुत्र कस्य प्रामाण्यमन्तर्भावो वेति स्वरूपापलापवादिनः प्राभाकरान्निराकर्तुं तन्मतं तावदाह । अत्र केचिदिति । प्रमाणं हि प्रमेयव्याप्तं न चाभावप्रमाणस्य किञ्चित्प्रमेयमुपलभ्यते अतो व्यापकनिवृत्त्या व्याप्यनिवृत्तिरिति भावः । संविदेव हि भगवती विषयसत्त्वोपगमे शरणमित्याशयेन परिहरति । तेषामिति । नास्तीतिप्रतीतौ यत् स्फुरति तदेव तस्य प्रमेयमिति भावः । परस्तु सा प्रतीतिरेव नास्तीति शङ्कते । नास्तीति । व्यवहारमात्रमभिवदनव्यापार एवेत्यर्थः । प्रतीत्यपह्नव एको दोषः अङ्गीकृतस्य

हारमात्रमेवात्रास्ति न संविदिति चेत् । तर्हि संविदपलापदोषस्तावदापद्येत । व्यवहारालम्बनं च न किञ्चित् पश्यामः । भूतलमात्रमिति चेत् न पटवति भूतले भूतलमात्रत्वाभावेन घटाभावव्यवहारो न स्यात् । तन्मात्रशब्दस्य भूतलादर्थान्तरव्यावृत्तिपरत्वे[1] त्वभावस्वीकरणात् । अन्यथा घटवत्यपि प्रसङ्गः। यादृशस्य भूतलस्य विज्ञानमभावज्ञान[2]कारणं भवद्भिरुपगम्यते तादृशमेवास्माकम् व्यवहारालम्बन-

व्यवहारमात्रस्यापि निरालम्बनत्वं द्वितीयो दोष इति दूषयति । तर्हीति । आलम्बनमाशङ्कते । भूतलमात्रमिति। कोऽर्थः किं मात्रशब्दस्यावधारणार्थत्वमाश्रित्य सर्वभावान्तरविविक्तं भूतलमुच्यते उत मीयते परिच्छिद्यते ऽनेनेति व्युत्पत्त्या तद्गतं किञ्चिद्धर्मान्तरमुच्यते उतायोगव्यवच्छेदेन भूतलस्वरूपमुच्यत इति त्रेधा विकल्प्याद्यं दूषयति । पटवतीति। अघटे ऽपीति शेषः । द्वितीये सिद्धं नः समीहितमित्याह । तन्मात्रेति । अर्थान्तरत्वे धर्मान्तरत्व इत्यर्थः । तृतीयं निरस्यति । अन्यथेति । अनर्थान्तरत्व इत्यर्थः । तर्ह्यधिकरणग्रहणस्य यादृगालम्बनं वस्तन्नो व्यवहारालम्बनमिति शङ्कते । यादृशस्येति । तत्राधिकरणग्रहणस्यावश्यम्भावादिति शङ्कितुराशयः । आश्रयनाशहेतुकद्रव्यनाशज्ञाने तद्व्यभिचारात् किं तेने त्युक्तमस्माभिस्तद्विस्मृतमायुष्मतेत्याह । न आश्रयज्ञानस्ये-

(१) अर्थान्तरत्वे -पा· B पु· । परत्वेन घटाभावस्वीकारात्- पा· C पु· ।

(२) ग्रहण-पा· B पु· ।

मिति चेत् न आश्रयज्ञानस्य कारणत्वानभ्युपगमात् । भूतलज्ञानस्य कारणत्वाभ्युपगमे चास्माकं न काचन क्षतिः । न हि घटवति प्रसङ्गः दृश्यादर्शनसहकृतस्यैव हेतुत्वाङ्गीकारात् । तस्य च तत्राभावात्[1] । भवदभिमताभावाश्रय एवास्माकं व्यवहारविषय इति चेत् तर्हि शौक्ल्यादेरप्याश्रय एव व्यवहारालम्बनं भवे-

---

ति । अङ्गीकृत्याप्याह । भूतलज्ञानस्येति । कथं न क्षतिः तस्याश्रयत्वेन ज्ञाने आत्माश्रयादिदोषप्रसङ्गाद् भूतलत्वेन ज्ञाने घटवत्यपि नास्तीतिधी[2]प्रसङ्गादित्याशङ्काद्यमनङ्गीकारेणैव पराहत्य द्वितीयं प्रसज्यप्रतिषेधति । न हीति । कुत इत्यत आह । दृश्येति । दृश्यादर्शनं योग्यानुपलब्धिः । कथमेतावतोक्तातिप्रसङ्गनिवृत्तिरित्यत आह । तस्येति । दृश्यादर्शनस्येत्यर्थः । तत्रेति । घटवतीत्यर्थः । भवतां तु दृश्यादर्शनस्वीकारे सिद्धान्तक्षतिरिति भावः । अथाभावाश्रयप्रतिवन्द्या शङ्कते । भवदिति । अभावविशिष्टस्याभावाश्रयत्वे आत्माश्रयादिदोषः । तदविशिष्टस्याश्रयत्वे घटवत्यपि प्रसङ्गः तस्मादुदासीनं वस्तुस्वरूपमात्रमाश्रय इत्याश्रयणीयम् तदेवास्माकमभावव्यवहारालम्बनमित्यर्थः । तर्हि शुक्लः पट इत्यादिव्यवहारा अपि तन्मात्रालम्बना इति तदपह्नवोऽपि सुकर इति प्रतिवन्द्या परिहरति । तर्हीति । ननु भावान्तरसंवित्तिरभावः तदुक्तं शालिकायाम् ।

---

(१) तस्य चासम्भवात्-पा० D पु० ।

(२) नास्तिनाधी-पा० F पु० ।

दिति गुणादिपदार्थोऽपि दत्तजलाञ्जलिः स्यात्। न च बुद्धिभेद एवाभावः। सुषुप्त्यादौ तदभावेनातीतानागतानामत्यन्तासतां च गगनकुसुमादीनामभावाभावेन भाव एव भवेदिति सुषुप्तिसुलभा एव सर्वे पदार्थास्तत्रभवतां भवेयुः। नन्वयमभावः किं भूतले

येयं दृश्येषु प्रतियोगिषु तदेकविषया बुद्धिः। सैव तेषां प्रतियोगिनामभाव उच्यत इति।

तथा च सैव व्यवहारालम्बनमिति शङ्कामनूद्य निरस्यति। न चेति। बुद्धिभेदस्तदेकविषया बुद्धिर्भूतलादिभावान्तरसंवित्तिरिति यावत्। अभावस्य बुद्धिरूपत्वे सुषुप्तौ सर्वबुद्ध्युपरमाद् भावोन्मज्जनप्रसङ्ग इत्यर्थः। वृत्तिविरोधेनाभावो नास्तीति(१) शङ्कामनूद्य प्रतिवन्द्या समाधत्ते। नन्विति। भूतलविशेषणं कैवल्यं स्वयमेव चेदयमभावः तदा स्वस्य स्ववृत्तावात्माश्रयः कैवल्यान्तरं चेत् तस्यापि कैवल्यान्तरापेक्षायामनवस्था(२) स्यादित्यभावस्याश्रयवृत्तिविरोधेनापह्नवे शुक्लादेरपि तथा स्यात्। तथाहि किमिदं शौक्ल्यं पटे वर्तते शुक्लपटे वा। नाद्यः नीलपटेऽपि वृत्तिप्रसङ्गात्। द्वितीये तद्विशेषणं शौक्ल्यं स्वयं चेदात्माश्रयः अन्यचेत् तस्याप्यन्यापेक्षायामनवस्थाने(३) मूलोच्छेदः

(१) विरोधादप्यभावो नास्तीति–पा· E पु·।

(२) यत् कैवल्यं वर्तते भूतले न स्वविशिष्टे किं तु कैवल्यान्तरविशिष्टे तदपि कैवल्यान्तरविशिष्टे ऽनवस्था इत्यर्थः।

(३) एतच्छौक्ल्यं विशेषणीभूतं शौक्ल्यान्तरविशिष्टे वर्तते तथा चानवस्था भवति।

वर्तते केवले भूतले वा । नाद्यः घटघटिते ऽपि प्रसङ्गात् । नाप्युत्तरः । कैवल्यस्याभावपर्यायत्वेनात्माश्रयाऽनवस्थयोरन्यतरस्य प्रसङ्गात् । अनुपपद्यमानाश्रयत्वेनाभावमपह्नुवानस्तुल्यन्यायतया शुक्लादिधर्मजातमप्यपह्नुवीत । स्वतोऽवान्तरविशेषविरहिणस्तुच्छस्य कथं तस्य प्रमेयतेति चेत् । न ज्ञानादिवदुपपत्तेः । निःस्वभाव एवायमिति चेत् । न सद्भा-

(१) स्यात् । अथ शौक्ल्यस्य पटमात्रमाश्रयः न च नीले ऽपि प्रसङ्गः तस्यैव प्रतिबन्धकत्वादिति चेदभावस्यापि तन्मात्र(२)माश्रयः न च घटवत्यपि प्रसङ्गस्तस्यैव(३) प्रतिबन्धकत्वादिति तुल्यम् तर्हि प्रतियोग्येकनिरूप्यस्य स्वतो निर्धर्मकस्य खपुष्पकल्पस्य तस्य कथं प्रमाविषयत्वमिति शङ्कते । स्वत इति । ज्ञानादिप्रतिबन्द्या समाधत्ते । नेति । ज्ञानं सर्वत्रैकं नित्यं च एवं शुक्लमधुरादिरूपरसादिभेदाश्चेति प्राभाकाराः । तथा च यथा तेषामवान्तरविशेषविरहे ऽपि प्रमेयत्वं तद्वदभावस्यापीति भावः । ननु तेषां भावस्वभावत्वात् प्रमेयत्वं युक्तम् अभावस्तु निःस्वभावः कथं प्रमीयत इति शङ्कते । निःस्वभाव इति । अभावोऽपि भावविलक्षणस्वभावो न तु गगनकुसुमादिवत् निःस्वभाव इति परिहरति । नेति । अत्र वृद्धसम्मतिमाह ।

(१) मूलभूतं यच्छौक्ल्यं तस्योच्छेदः स्यात् ।

(२) भूतलमात्रम् ।

(३) घटस्यैव ।

वृत्तिरूपस्य स्वभावस्य विद्यमानत्वात् । यथाहुः । असदसदिति गृह्यमाणं यथाभूतं सद्विपरीतं च तत्त्वमिति । तस्मान्न किञ्चिदेतत् ॥

सम्भवो नाम सहस्रादेः शतादिविज्ञानम् । तदप्यविनाभावप्रतिसन्धानेन जायत इत्यनुमानमेवेति ॥

इतिहोचुर्वृद्धा इत्यनिर्दिष्टप्रवक्तृकं प्रवादपा-

यथाहुरिति । असदसदिति । गृह्यमाणमिति प्रमाणोक्तिः । अभावोभाव इति भावनिषेधात्मकतया सर्वजनसंवेदनसिद्धमित्यर्थः । अत एव यथाभूतं पारमार्थिकं न तु तुच्छमित्यर्थः । सद्विपरीतं भावविलक्षणस्वभावं न तु भावान्तरस्वभावमिति लक्षणोक्तिः । चकारः पूर्वोक्तप्रमाणसमुच्चयार्थः । तत्त्वमेतदभावस्वरूपमित्यर्थः । पूर्वपक्षनिरासमुपसंहरति । तस्मादिति । प्रमाणविरुद्धत्वादित्यर्थः । एतदभावनिराकरणं न किञ्चिन्निरासार्हमपि न भवतीत्यर्थः । इत्यभावान्तर्भावः ॥

अथ सम्भवस्य स्वरूपमन्तर्भावं चाह । सम्भवो नामेति । अनुमानत्वे प्रयोजकमाह । अविनाभावेति । प्रयोगस्तु शतं सहस्रे सम्भवति न्यूनसंख्यात्वात् द्वयोरेकत्ववत् अन्यथा कारणाभावात् सहस्रसंख्यैव न स्यात् एवं खार्यां द्रोण इत्याद्युन्नेयम् । इति सम्भवान्तर्भावः ॥

अथैतिह्यमप्यन्तर्भावयितुं तत्स्वरूपं तावदाह । इतिहेति । इतिहेति निपातसमुदायः प्रवादवाची इतिहैवैतिह्यं प्रवादः अनन्तावसथेतिहभेषजाञ्ञ्य इति स्वार्थे ञ्यः ।

रम्पर्यमैतिह्यम् । यथा ।

वटेवटे वैश्रवणश्चत्वरेचत्वरे शिवः ।
पर्वतेपर्वते रामः सर्वत्र मधुसूदनः ॥ इत्यादि ।

तत् प्रायशोऽप्रमाणमेव । प्रमाणत्वे च सति शब्द एवान्तर्भाव इति । यथाहुः ॥

इह भवति शतादौ सम्भवाद् या सहस्रा-
न्मतिरवियुतिभावात् सानुमानादभिन्ना ।
जगति न बहु तथ्यं नित्यमैतिह्यमुक्तं
भवति तदपि सत्यं(१) नागमाद्भिद्यते तत् ॥ इति ।

स्पष्टमस्पष्टमिति च द्विविधं प्रमाणमिति जैनजनाः । तैरप्येतान्येव परोक्षापरोक्षतया लक्षितानि ।

अस्यानिर्दिष्टेत्यादि लक्षणम् इतिहोचुरिति स्वरूपप्रदर्शनम् । उदाहरति । यथेति । एतदप्रमाणस्योदाहरणं कर्मारम्भे मङ्गलाचरणाद्विघ्नोपशान्तिरिति तु प्रमाणस्योदाहरणम् । अनयोर्यथायथं शब्दतदाभासयोरन्तर्भाव इत्यभिप्रेत्याह । तत्प्रायेत्यादि । अत्र भट्टकारिकां संवादयति । यथाहुरिति । शतादौ विषये सहस्रादिरूपात् सम्भवात् सम्भवाख्यप्रमाणाद्या मतिरस्त्यन्वयार्था वियुतिरविनाभावस्तस्य भावात् सद्भावादित्यर्थः । शेषं सुगमम् । नन्वार्हतैः स्पष्टमस्पष्टं चेति प्रमाणद्वयमुच्यते तेन प्रमाणषट्कमायातमिति शङ्कते । स्पष्टमिति । एतेषामेव शब्दान्तरेण व्यपदेशान्नातिरेक इति परिहरति । तैरपीति ।

---

(१) भवति तु यदि सत्यं—पा· B पु· ।

तस्मात् सिद्धं चत्वार्येव प्रमाणानीति ॥ २४ ॥ ८८ ॥

इति प्रमाणपदार्थः ॥

अथ प्रमेयं सामान्यलक्षणपुरःसरं विभागेनो-द्दिशति ।

प्रमेयमपवर्गार्थं ज्ञेयं द्वादशधा च तत् ॥ २५ ॥
आत्मा देहोक्षमर्था धीर्मनोदोषाः प्रवृत्तयः ।
प्रेत्यभावः फलं दुःखं मोक्षश्चेद्धा प्रकीर्तिताः॥२६॥

साक्षादेवापवर्गोपयोगिज्ञानविषयत्वेन मोक्षा-

स्पष्टं प्रत्यक्षमस्पष्टमप्रत्यक्षमित्यर्थः । परमप्रकृतमुपसंहरति । तस्मादिति । अनतिरेकादित्यर्थः ॥ २४ ॥ ८८ ॥

इति प्रमाणपदार्थः समाप्तः ॥

निरूप्यैवं प्रमाणानि चत्वार्यपि सविस्तरम् ।
यदर्थस्तु प्रयासोऽयं तत्प्रमेयं निरूप्यते ॥

ननु प्रमाणनिरूपणानन्तरं प्रमेयनिरूपणे कर्तव्ये प्रमेयमपवर्गार्थं ज्ञेयमित्यपवर्गार्थिनः प्रमेयज्ञानविधानं तथा द्वादशधेति संख्याविशेषानुवादः आत्मादिपरिगणनं चेति सर्वं दशदाडिमादिवाक्यवदसङ्गतमित्याशङ्क्याह । अथेति । न ज्ञानविधिरयं किं त्वपवर्गार्थं यद् ज्ञेयं तत्प्रमेयमिति प्रमेयसामान्यलक्षणं शेषे तस्यैव विभागोद्देशाविति सर्वं सङ्गतमित्यर्थः ।

ननु प्रमाणादिसूत्रे षोडशपदार्थतत्त्वज्ञानस्याप्यपवर्गोपयोगित्वोक्तेः प्रमाणसंशयादाविदं लक्षणमतिव्याप्तमित्याशङ्क्य व्याचष्टे । साक्षादिति । प्रमाणादिज्ञानस्यैवं साक्षादनुपयोगान्न तेष्वतिव्याप्तिरित्यर्थः । अत एव प्रमा-

र्थिभिः प्रकर्षेण मेयं प्रमेयम् । एतदुक्तं भवति । यद्विषयं मिथ्याज्ञानं संसारमातनोति यद्विषयं च तत्त्वज्ञानं तन्निवर्तयति तत् प्रमेयमिति तच्चात्मादिमोक्षान्तं द्वादशविधम् । तदुक्तम् । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति ॥ २५ ॥ २६ ॥

तत्रात्मानं लक्षयति ।

आत्मात्र चेतनोऽयं तु सुखदुःखादिलिङ्गकः ।

णविषयः[१] प्रमेयमिति स्थिते ऽपि विशेषव्युत्पत्तिमेषां दर्शयति । प्रकर्षेणेति । कथमेषां साक्षादपवर्गोपयोगिज्ञानत्वमित्यत्राह । एतदुक्तमिति । अनात्मनि देहेन्द्रियादावात्मबुद्ध्याहिते रागद्वेषादौ हितबुद्ध्या चात्मा बध्यते तद्विवेकज्ञानाच्च मुच्यत इत्यात्मादिज्ञानं साक्षादपवर्गोपयोगि प्रमाणादिज्ञानं तु तज्जननद्वारा परम्परयोपयुज्यत इति भेदः । सूत्रं तूपयोगित्वमात्राभिप्रायमित्यविरोध इत्यर्थः । द्वादशधेत्यादिकं तु किं तत् प्रमेयं कतिविधं चेत्याकाङ्क्षापूरकं चकारस्य चोत्तरेण सम्बन्धः अतो न दशदाडिमादिवाक्यतुल्यमित्याह । तच्चेति । अत्र सूत्रसम्मतिमाह । तदुक्तमिति ॥ २५ ॥ २६ ॥

ननूद्देशश्लोकान्ते आत्मनः पुनरुपादानं चेतन इति पर्यायोपादानं च न सङ्गच्छते इत्याशङ्क्याह । तत्रेति ।

---

(१) प्रमाविषयः—पा० E पु० ।

यावत् । अन्त्येति पूर्ववदवयवव्यावृत्तिः । अवयवीति मनसः । अन्त्यावयवीन्द्रियाश्रय इति तृतीयं लक्षणम् । अन्त्यावयवीतीन्द्रियारम्भकपरमाण्वादेश्च निरासः । तदुक्तम् । चेष्टेन्द्रियार्थाश्रयः शरीरमिति । न च मृतशरीरैरव्याप्तिः । कादाचित्कस्येन्द्रियाश्रयत्वादेरेव लक्षणत्वात् तेषामपि तथाभावादिति ॥ २७ ॥

इन्द्रियलक्षणमाह ।

आह । यदाश्रित्येति । शरीरावच्छेदेनैवात्मनो भोगाश्रयत्वात् तदवच्छेद्यधर्मावच्छेदके शरीर उपचर्यत इत्यर्थः । एवंविधभोगाश्रयस्य हस्तादेर्मनसश्च क्रमादन्त्यावयविपदाभ्यां व्युदास इत्याह । अन्त्येतीत्यादि । ननु तृतीयलक्षणे शरीरस्य कुण्डवदरवत्संयोगवृत्त्येन्द्रियाश्रयत्वे तावतैवेन्द्रियारम्भकपरमाण्वादेर्निरासादन्त्यावयविपदवैयर्थ्यम् तन्तुपटवत्समवायवृत्त्या चैतल्लक्षणमसम्भवि स्यात् सत्यम् किं तु विशेषानादरेण सम्बन्धमात्रविवक्षयोच्यत इति ग्रन्थगतिः । परमार्थतस्तु संयोगवृत्त्यैव न च विशेषणवैयर्थ्यं शरीरवच्छरीरावयवानामपि इन्द्रियसंयोगाश्रयत्वेन तन्निरासार्थत्वादिति द्रष्टव्यम् । यदनुसारेण लक्षणत्रयमुक्तं तत्सूत्रं दर्शयति । तदुक्तमिति । अर्ध्यत इत्यर्थो भोगः लक्षणत्रयस्याप्यव्याप्तिमाशङ्क्याह । न चेति । कुत इत्याशङ्क्य चेष्टादिसम्बन्धात्यन्ताभावानधिकरणत्वस्य लक्षणत्वात् तस्य तेष्वपि सम्भवादित्याह । कादाचित्कस्येति ॥ २७ ॥

शरीरयोगे सत्येव साक्षात्प्रमितिसाधनम् ।
इन्द्रियं तत्र(१)साक्षात्त्वं जातिभेद इति स्थितिः ॥ २८ ॥

शरीरयोग इति इन्द्रियसन्निकर्षो व्युदस्यते एवकारेण कादाचित्कशरीरयोगिन आलोकादयः साक्षादिति च शरीरयोगीनि चेष्टादीनि लिङ्गानि प्रमितीत्यप्रमाहेतवो दोषाः साधनमिति चेन्द्रियसंस्काराः तेषां साधनानुग्राहकत्वेन स्वयमसाधनत्वात् ।

उत्तरश्लोके साक्षात्त्वस्यापि लक्ष्यमाणत्वादसन्देहार्थमाह । इन्द्रियेति ।

शरीरयोगस्तत्संयोगः तेन सन्निकर्षव्युदासः । ननु प्रमितिपदोपादानादप्रमाजनकस्येन्द्रियत्वं न स्यादिति चेन्न प्रमासाधनत्वात्यन्ताभावानधिकरणत्वस्य विवक्षितत्वादिति । यदा फले ऽतिव्याप्तिभिया हेत्वादिपदोपादानं तदाञ्जनादिसंस्कारद्रव्येष्वतिव्याप्तिः स्यात् तदर्थं साधनग्रहणमित्याह । [illegible]मिति । कथं तेन तन्निवृत्तिरत आह । ते[illegible]त्वे ऽपि करणत्वाभावादित्यर्थः [illegible]ननूक्तरीत्या शरीरेन्द्रियलक्षणयोरन्योन्यसापेक्षत्वादन्योन्याश्रय इति चेन्नैष दोषः यदेन्द्रियाश्रयः शरीरमितीन्द्रियज्ञानसापेक्षत्वं शरीरस्य लक्षणमुच्यते तदेन्द्रियस्य रूपाद्युपलब्धिलिङ्गत्वादिकं शरीरज्ञाननिरपेक्षं लक्षणान्तरमाश्रयणीयम् एवमिन्द्रियस्यापि पूर्वोक्तशरीरज्ञानसापेक्षलक्षणाभिधाने शरीरस्य चेष्टाश्रयत्वादिन्द्रियज्ञाननिरपेक्षं लक्षणमाश्रयणीयमिति व्यवस्थानात् । श्लो-

(१) तच्च साक्षात्त्वं–पा· C पु· ।

साक्षात्त्वं तु ज्ञानत्वावान्तरजातिभेद इत्युक्तम् ॥ २८ ॥

अर्थबुद्धिमनसां लक्षणमाह ।

अर्थाः स्युरिन्द्रियग्राह्या बुद्धिरर्थप्रकाशनम् ।
सुखादेरापरोक्ष्यस्य साधनं मन इन्द्रियम् ॥ २९ ॥

अत्रेन्द्रियग्राह्या एवार्थत्वेन विवक्षिताः । ते च द्रव्येषु पृथिव्यादयश्चत्वारः आत्मा च । गुरुत्वधर्माधर्मसंस्कारव्यतिरिक्ता विंशतिर्गुणाः । पञ्चापि कर्माणि । सामान्यं समवायोऽभावश्च । अत्र बुद्धिजन्यस्यार्थगतस्य प्राकट्यादिपदवेदनीयस्य प्रकाशान्तरस्या-

---

कशेषं व्याचष्टे । साक्षात्त्वमिति । उक्तमिति । एतदेव प्रत्यक्षलक्षणे स्वयं व्याख्यातमित्यर्थः । संग्रहकाराभिप्रायेण तु तत्र वक्ष्यमाणोक्तिरित्यविरोधः ॥ २८ ॥

स्फुटार्थमाह । अर्थेति ।

नन्विन्द्रियग्राह्याणामे[illegible] कथमन्यत्रापि प्रयोगदर्शनादित्यत आह । अत्रेन्द्रियेति [illegible]न्येषां मोक्षानुपयोगिज्ञानत्वादेष्वेव सङ्कोचित इत्यर्थः । स्वमते वायोः स्पार्शनत्वाच्चत्वार इत्युक्तम् । आत्मा मानसप्रत्यक्षस्य[illegible] बुद्ध्यादयश्च षट् समवायस्य सम्बन्धिप्रत्यक्षत्वे प्रत्यक्षत्वम् अभावप्रत्यक्षत्वं तूक्तम् । बुद्धिलक्षणस्य ज्ञाततायामतिव्याप्तिमाशङ्क्याह । अत्रेति । ज्ञानातिरिक्तस्यार्थप्रकाशस्य मीमांसकाभिमतस्य प्रागेव परास्तत्वान्न कुत्राप्यतिव्याप्तिरिति भावः । नन्वापरोक्ष्यं साक्षात्त्वं तच्च जातिभेद इत्युक्तम् तस्य च नित्यतया तत्साधनं

नभ्युपगमादर्थप्रकाशो बुद्धिरित्युक्तम् । सुखादिविषयापरोक्षज्ञानसाधनमिन्द्रियं मनः । साधनमिति कर्तुरात्मनो निरासः । इन्द्रियमिति मनसः सन्निकर्षस्य । आदिशब्देन बुद्धिदुःखेच्छाद्वेषप्रयत्ना गृह्यन्ते । सुखाद्यन्यतमग्रहणसाधनत्वमेव लक्षणम् । सूत्रकारस्तु विभुनैवात्मनाधिष्ठितेन्द्रियेषु नानार्थसम्बद्धेष्वपि यत् संयोगक्रमवशात् ज्ञानोत्पत्तिक्रमः प्रक्रमते तन्मन इति युगपद्ज्ञाना(१)नुत्पत्तिलिङ्गत्वं मनसो लक्षणमाह ।

मन इति लक्षणमसङ्गतमत आह । सुखादीति । ननु फलाद्भेदज्ञानार्थं हेतुपदं प्रयुज्यतां किं साधनपदेनेत्यत आह । साधनमितीति । तर्हि युगपत्सुखादिज्ञानासम्भवाल्लक्षणमसम्भवीत्यत आह । सुखाद्यन्यतमेति । एवं चैकैकविषयज्ञानसाधनत्वस्यैव लक्षणत्वात् सुखसाक्षात्कारसाधनं दुःखसाक्षात्कारसाधनमित्यादीनि षल्लक्षणानि भविष्यन्तीत्यर्थः । एवं संग्रहोक्तं लक्षणं व्याख्याय सूत्रकारोक्तंव्याख्यानपूर्वकमाह । सूत्रकारस्त्विवति । ननु इन्द्रियाणामात्मसम्बन्धक्रमाद् विषयसम्बन्धक्रमाद्वा ज्ञानक्रम इत्याशङ्क्याह । विभुनेति । प्रक्रमते प्रवर्तते व्यासङ्गेति शेषः । विमतो ज्ञानक्रमः आत्मेन्द्रियार्थसम्बन्धातिरिक्तकरणसम्बन्धक्रमनिबन्धनस्तदभावे ऽपि भाविक्रमत्वात् शब्दकर्मसन्तानक्रमवदिति मनसस्तल्लिङ्गत्वमित्यर्थः । ननु सर्वदा स्पर्शरहितद्रव्यत्वादिसाधनैर्मनसोऽपि विभुत्वसिद्धावात्मक्रमकरणासम्भवाल्लक्षणमसम्भवीत्या-

(१) युगपद्ज्ञानानुत्पत्ति—पा॰ D पु॰ ।

युगपद्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । एवं चाणुतयैव मनसः सिद्धिः । अन्यथा युगपदनेकेन्द्रियाधिष्ठानाद्युगपद्ज्ञानोदयप्रसङ्गात् । तथा च विभुत्वहेतवः सर्वे सर्वदा स्पर्शरहितद्रव्यत्वादित्यादयो धर्मिग्राहकप्रमाणेन बाधिता भवन्तीति ॥ २९ ॥

प्रवृत्तिलक्षणमाह ।

प्रवृत्तिरत्र वागादेः पुण्यापुण्यमयी क्रिया ।

वाङ्मनःशरीराणां पुण्यापुण्यमयो[1] व्यापारः प्रवृत्तिः । तदुक्तम् । प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ

शङ्काह । एवं चेति । जगत्कर्तुः सर्वज्ञत्वादिवन्मनसोऽणुत्वमधिकरणसिद्धान्तन्यायाद् धर्मिग्राहकादेव सिद्धमित्यर्थः । अनङ्गीकारे दण्डमाह । अन्यथेति । तर्हि विभुत्वहेतूनां का गतिरत आह । तथा चेति । ज्ञानमात्रे पृथिव्यादिषु गुणादिषु च क्रमात् पदत्रयेण व्यभिचारनिरासः । आदिशब्दाद् विशेषगुणद्रव्यत्वज्ञानासमवायिकारणाधारत्वादिसङ्ग्रहः । न च दीर्घशष्कुलीभक्षणादौ ज्ञानयौगपद्यसम्भवादसम्भवि लक्षणमिति वाच्यम् । शतपत्त्रशातनवदाशुभावनिबन्धनो यौगपद्याभिमानो यत इति सर्वमवदातम् ॥ २९ ॥

संग्रहे वृत्तानुसारात् पश्चादुद्दिष्टापि प्रवृत्तिः सूत्रानुसारात् प्रथमं लक्ष्यत इत्याह । प्रवृत्तीति ।

अविहिताप्रसिद्धक्रियानिरासार्थमुक्तं पुण्यापुण्यमयीति । आरम्भो व्यापारः । ननु मनोबुद्ध्योरत्यन्तभे-

(१) पुण्यापुण्यरूपो–पा॰ C पु॰ ।

इति । अत्र बुद्धिशब्देन बुध्यते ऽनेनेति मनो विवक्षितमिति ।

दोषलक्षणमाह ।

प्रवर्तनालक्षणाः स्युर्दोषा रागादयश्च ते ॥ ३० ॥

प्रवर्तयन्तीति प्रवर्तनाः प्रवृत्तिहेतवो दोषा इत्यर्थः । ते च रागद्वेषमोहाः । तत्र रागद्वेषौ वक्ष्यमाणलक्षणौ । मिथ्याप्रत्ययो मोहः । मोहस्य प्रवृत्तिहेतुत्वं न स्वातन्त्र्येण किं तु रागद्वेषानुग्राहकत्वेन । मूढमेव हि रागद्वेषौ प्रवर्तयत इति । तदुक्तम् । प्रवर्तनालक्षणा दोषा इति ॥ ३० ॥

प्रेत्यभावं लक्षयति(१) ।

मृत्वोत्पत्तिः प्रेत्यभाव उत्पत्तिर्देहसङ्गतिः ।

दात् संग्रहसूत्रयोर्विसंवाद इत्यत आह । अत्र बुद्धिशब्देनेति ।

स्व-सूत्रानुसारादवेदानों दोषो लक्ष्यत इत्याह । दोषलक्षणमिति ।

प्रवर्तना प्रेरणा सैव लक्षणं येषां ते तथोक्ताः प्रवर्तका इत्यर्थः । तदेतदर्थतो व्याचष्टे । प्रवर्तयन्तीति । उपलक्षणं चैतत् । निवृत्तिहेतवश्चेति द्रष्टव्यम् । वक्ष्यमाणलक्षणाविति वैशेषिकगुणाधिकरण इत्यर्थः । मूढस्यापि रागद्वेषमन्तरेणावैषम्यमाह । मोहस्येति ॥ ३० ॥

---

(१) प्रेत्यभावस्य लक्षणमाह—पा॰ C पु॰ ।

नित्यस्यात्मनो जननमरणासम्भवात् पूर्वोत्तरदेहविश्लेषसंश्लेषौ मरणोत्पत्ती इति। तदुक्तम्। पुनरुत्पत्तिः प्रेत्यभाव इति।

फलं लक्षयति।

फलं प्रवृत्तिसाध्यं स्यात् तच्च देहसुखादिकम्॥३१॥

प्रवृत्तिः पुण्यापुण्यरूपेत्युक्तम्। तदुक्तम्। प्रवृत्तिदोषजनितोऽर्थः फलमिति॥ ३१॥

दुःखं लक्षयति।

प्रतिकूलतया वेद्यं दुःखं देहेन्द्रियादिकम्।

प्रतिकूलतया वेद्यं(१) दुःखम्। तच्च देहः षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेत्येकविंशतिधम्। तत्र दुःखं स्वत एव निरुपाधिकम्। इत-

उत्पत्तिर्देहसङ्गतिरित्यत्र तद्विशेष एव मरणमिति शेषः। ननु प्रागसतः सत्त्वमुत्पत्तिः सतोऽसत्त्वं विनाश...एव च मरणमिति न्यायः तत्कथमन्यथोच्यत इत्याशङ्क्याह। नित्यस्येति। स्वकर्मार्जितस्य मनसः पूर्वदेहान्निष्क्रमणं विश्लेषः उत्तरदेहप्रवेशः संश्लेषः ते एव मरणोत्पत्ती इत्यर्थः॥

देहसुखादिकमित्यादिशब्दादिन्द्रियदुःखादिसङ्ग्रहः। प्रवृत्तिदोषजनित इति दोषमूलप्रवृत्तिजनित इत्यर्थः॥३१॥

एतत्कर्मफलमेव अनेकधात्मोपघातकत्वाद् दुःखमित्याह। प्रतिकूलतयेति।

(१) वेदनीयं—पा॰ C पु॰।

राणि तु सुखस्पर्शे ऽपि दुःखानुषङ्गाद् विषसम्पृक्तान्नवदौपाधिकदुःखानीति । तदुक्तम् । बाधनालक्षणं दुःखमिति ।

एतस्योक्तप्रकारस्य दुःखस्यात्यन्तिकनिवृत्तिः(१)रपवर्ग इत्याह ।

दुःखात्यन्तसमुच्छेदमपवर्गं प्रचक्षते ॥ ३२ ॥

तदुक्तम् । तदत्यन्तविमोक्षोऽपवर्ग इति । दुःखनिवृत्तेरात्यन्तिकत्वं नाम सजातीयस्य(२) तत्रैवात्मनि पुनरनुत्पाद इति ॥ ३२ ॥

ननु निःश्रेयसोपयोगीनि द्रव्यादीनि प्रमेयान्तराणि सन्ति तानि कुतः सूत्रकारैर्न लक्षितानि

ननु नष्टस्य दुःखस्य पुनरनुत्थानादात्यन्तिकदुःखनिवृत्तेरमुक्तात्मस्वतिव्याप्तिरित्यत्यन्तशब्दार्थं निर्वक्ति । दुःखनिवृत्तेरिति । दुःखान्तरप्रागभावासहचरितदुःखध्वंसो मोक्ष इत्यर्थः । इदमप्यात्मान्तरापेक्षयास्मदादिदुःखध्वंसे ऽतिव्याप्तिमाशङ्क्याह । तत्रैवात्मनीति । तथा चैकात्मनिष्ठनिखिलदुःखध्वंससाकल्यं मोक्षः मुमुक्षूणां च भ्येकमेकत्वान्नाव्याप्तिश्चेति विलासकारोक्तलक्षणमुक्तन्यवत्त्नुसन्धेयम् ॥ ३२ ॥

वानां थ मोक्षे साक्षादित्यादिश्लोकस्यानुपयोगमाश-

---

(१) स्यात्यन्तिकी निवृत्ति–पा॰ C पु॰ ।

(२) अन्योन्यसजातीयस्य–पा॰ C पु॰ ।

तत्राह ।

मोक्षे साक्षादनङ्गत्वादक्षपादैर्न लक्षितम् ।
तन्त्रान्तरानुसारेण षट्कं द्रव्यादि लक्ष्यते ॥ ३३ ॥

सत्यम् । द्रव्यादीन्यपि निःश्रेयसोपयोगीनि विद्यन्ते तानि त्वाहत्य निःश्रेयसानङ्गत्वादक्षपादा न लक्षयाञ्चक्रुः । वयं तु तेषामपि परम्परया तदुपयोगोऽस्तीति काणादतन्त्रमनुसृत्य लक्षणमाचक्ष्महे इति । तानिदानीं पदार्थानुद्दिशति ॥ ३३ ॥

द्रव्यं गुणास्तथा कर्म जातिश्चैतत्त्रयाश्रया ।
विशेषः समवायश्च पदार्थाः षडिमे मताः ॥ ३४ ॥

द्रव्यगुणकर्मणामेव जातिमत्त्वं न सामान्यादीनां त्रयाणामित्युक्तमेतत्त्रयाश्रयेति । तेषामपि जातिमत्त्वे जात्यनवस्थितिः । विशेषस्य स्वरूपव्याघातः ।

क्ष्याह । ननु निःश्रेयसेति । अन्यत् प्रतिज्ञायान्यदुद्दिश्यत इति शङ्कां निरस्यति । तानिति ॥ ३३ ॥

इह सर्वाश्रयत्वेन प्राधान्यात् सामान्यवदुपक्रमा-
न्निःसामान्येषु बह्वाश्रयत्वात् समवाय्युपक्रमात् त
षत्वाच्च द्रव्याद्युद्देशक्रमः । उद्देशमध्ये प्रक्रमभेदेन(॥
रेव विशेषणोपादानं किमर्थमत आह । द्रव्यत्वमि-
ननु सामान्यादीनामपि सामान्यवत्त्वे किं
आह । तेषामपीति । प्रादुष्यादित्यत्रे।

समवायस्य संयोगसमवाययोरन्यतराभावेना(१)सम्बन्धश्च प्रादुःष्यात् । यथाहुः ।

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥ इति ।
अन्योन्यपरिहारेण भिन्नव्यक्तिनिवेशिनोः ।
सामान्ययोः समावेशो जातिसङ्कर उच्यते(२) ॥
इति ॥ ३४ ॥

स्तिर्य्यच्पर इति षत्वम् ।

अत्रोदयनसम्मतिमाह । व्यक्तेरित्यादि । तत्राकाशकालदिशामेकैकत्वेनानेकवृत्तित्वासम्भवान्नाकाशत्वादिजातिसम्भवः सम्भवे वा व्यक्तिभेदः स्यात् स च धर्मिग्राहकप्रमाणबाधित इति भावः । तुल्यत्वं पर्यायत्वम् तत्र व्यञ्जकभेदाभावात् परापरभावाभावाच्च न घटत्वकलशत्वयोर्भेदः भेदे वा पर्यायत्वहानिः सा च व्यवहारविरुद्धेति भावः । अन्यत्र परस्परपरिहारवतो एकत्र समावेशः यथा नभसि मनसि च परस्परपरिहारिणोर्भूतत्वमूर्तत्वयोः पृथिव्यादिचतुष्टये तयोरपि जातित्वे परस्परपरिहारः स्यात् परापरभावश्च स्यात् तदुभयमपि बाधितमिति भावः । सामान्यस्यापि सामान्यवत्त्वे ऽनवस्थानात् । विशेषाणां च व्यावृत्तैकस्वभावानां सामान्यवत्त्वे स्वभावहानिः स्यात् । संयोगस्य

(१) समवाये संयोगसमवाययोरसम्भवेना—पा॰ C पु॰ ।
(२) अन्योन्येतिकारिका नास्ति B पु॰ ।

द्रव्यलक्षणमाह ।

गुणानामाश्रयो द्रव्यं कारणं समवायि वा ।

गुणाश्रयो द्रव्यमित्येकं लक्षणम् समवायिकारणमित्यपरम् । तदुक्तम् । क्रियावद्गुणवत्समवायिकारणं द्रव्यमिति ।

द्रव्याणि परिसङ्ख्यष्टे ।

भूरापो ज्योतिरनिलो नभः कालस्तथा दिशा ॥ ३५ ॥
आत्मा मन इति प्राहुर्द्रव्याणि नव तद्विदः ।

तद्विद इत्यनेन पदार्थविदामेष सिद्धान्तः ।

धर्मत्वात् समवायस्य चानवस्थानादसम्बन्ध एव समवायस्य सामान्यवत्त्वे बाधकमिति संग्रहार्थः ॥ ३४ ॥

इतः परं कणादसूत्राण्येव संवादयिष्यति तत्र द्रव्यलक्षणे तत्संवादमाह । तदुक्तमिति । गुणवत्त्वात्यन्ताभावानधिकरणत्वं गुणवत्त्वं क्रियावत्त्वं तु द्रव्यस्यैवेति प्रतिपादनार्थं विभुष्वव्याप्तेः प्रयोजनं तु मनःप्रभृतौ द्रव्यत्वसाधनम् ॥

ननु द्रव्यत्वसामान्यलक्षणानन्तरं तद्विशेषलक्षणे वक्तव्ये किमुत्तरश्लोके कथ्यत इत्याशङ्क्य सत्यं तदर्थमेतान्युद्दिशतीत्याह । द्रव्याणीति ।

टाबन्तत्वं हलन्तानामिति वचनात् दिशाशब्दः साधुः । पृथिव्याद्युद्देशक्रमस्तु भोग्यगुणाश्रयत्वेन भूतपञ्चके प्राप्ते भोग्यगुणभूयस्त्वानुसारेण चतुर्णां क्रमः । भूतोपक्रमादाकाशम् । एकैकद्रव्योपक्रमाद् दिक्कालौ तयोस्तु लोपनेयक्रियासंयोगक्रमात् क्रमः । विभुक्रमादात्मा । परि-

अन्ये तु तमःशब्दयोरपि द्रव्यत्वमिच्छन्तीति सूचयति ।

यथाहुः ।

वर्णात्मकाश्च ये शब्दा नित्याः सर्वगतास्तथा ।
पृथग्द्रव्यतया ते तु न गुणाः कस्यचिन्मताः ॥ इति ।

तथा ।

तमः खलु चलं नीलं परापरविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥ इति ।

केचित्तु वियति विततानां सूक्ष्माणां पृथिव्यवयवानां कृष्णो गुणस्तम इति वर्णयन्ति[१] । मनोव्यतिरिक्तत्वे सत्यस्पर्शवत्त्वेन क्रियावत्त्वरूपवत्त्वासि-

---

शेषात् तदुपकरणत्वाद्वा मन इति । अतद्विदां विप्रतिपत्तिमाह । अन्ये त्विति ।

सर्वगता इत्यनेन वर्णानां परममहत्त्वमुक्तगुणवत्त्वाद् द्रव्यत्वम् । अमूर्तत्वे सति बाह्येन्द्रियग्राह्यद्रव्यत्वात् पृथक्द्रव्यत्वं च । ततश्च कस्यचित् कस्यापि द्रव्यस्य गुणा न मता इत्यर्थः । तम इत्यादि । चलमित्यनेन क्रियावत्त्वान्नीलमित्यादिना गुणवत्त्वाच्च द्रव्यत्वं तमसः रूपित्वे सत्यस्पर्शवत्त्वात् प्रसिद्धद्रव्यवैधर्म्यं चेति नवैवेत्यनवधारणसिद्धिरिति भावः । तमसो गुणान्तर्भावात् न द्रव्यातिरेक इति केषांचिद्वैशेषिकैकदेशिनां समाधानमुपन्यस्यति । केचित्त्विति । तदेतत् प्राभाकरमतमिति कैश्चिद् व्याख्यातं तदपि तन्मतापरिशीलनविलसितमेव भावाभावस्तम इत्येव तेषां मतं तदुक्तं शालिकायाम् । आभावस्तम

(१) वदन्ति-पा॰ B पु॰ ।

द्रव्यत्वानुपपत्तेः नैल्यान्तरवत्तेजस्येवोपलम्भप्रसङ्गेन पृथिवीगुणत्वानुपपत्तेश्चालोकाभावस्तम इति काणादाः। शब्दस्य तु गुणत्वमुत्तरत्र वक्ष्यामः। तस्मान्नवैव द्रव्याणीति सिद्धम्। तदुक्तम्। पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मन इति द्रव्याणीति ॥ ३५ ॥ ऽऽ ॥

तत्र गन्धवती भूमिरापः सांसिद्धिकद्रवाः ॥ ३६ ॥
उष्णस्पर्शगुणं तेजो नीरूपस्पर्शवान् मरुत्।

भूमिभेदाश्च मणिवज्रादयः पाषाणाः। सांसि-

यत्र तेषामसंयोगः स महानन्धकार इति।

तेषामल्पसोऽपि तेजोवयवानामित्यर्थः। इयांस्तु विशेषः स च भावान्तरमेव न तु निषेधात्मेति। तदप्युक्तं तत्रैव अपवारितालोकभूभागादिकमेव छायेति। तस्मादेकदेशिमतमेवैतत्। अथैतन्मतद्वयनिरासपूर्वकं अभावमेव सिद्धान्तमाह। अस्पर्शवत्त्वेनेति। तमो निष्क्रियं प्रत्यक्षत्वे सत्यस्पर्शवत्त्वादात्मवत् क्रमात् पदद्वयेन मनोघटयोर्व्यभिचारनिरासः नीरूपं चास्पर्शवत्त्वादाकाशवदिति त्वदुक्तयोः क्रियावत्त्वगुणवत्त्वयोरसिद्धौ द्रव्यत्वमेव नास्ति कुतो वातिरेक इति भावः। एवं यदि तमः पार्थिवरूपं स्यात् आलोकासहकृतचक्षुर्ग्राह्यं न स्यात् घटनैल्यवत् न चैवं तस्मान्न तथा गुणान्तरभावस्याप्यसिद्धेरभाव एव तम इत्याह। नैल्यान्तरवदित्यादि ॥ ३५ ॥ ऽऽ ॥

मणिवज्रपाषाणेषु गन्धवत्त्वस्याव्याप्तिमाशङ्क्याह।

द्धिकत्वं द्रवत्वस्याजानसिद्धत्वं तेन द्रव्यान्तरसंश्लेषोपाधिकद्रवत्वानां पार्थिवानां सर्पिःप्रभृतीनां तैजसानां सीसादीनां च व्यवच्छेदः । यथोक्तम् । सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यमिति । तथा त्रपुसीसलोहरजतसुवर्णानां तैजसानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यमिति । अपां विकारः करकादिः । उष्णस्पर्श इति शीतस्पर्शानामनुष्णाशीतस्पर्शानां च सलिलपवनादीनां निरासः(१) । न चैवं चान्द्रमसेन महसा भवत्यव्याप्तिः । उष्ण-

---

भूमिभेदाश्चेति । तेषामपि भूविकारत्वात् गन्धवत्त्वमनुमेयम् । भूविकारत्वं च पाकजरूपवत्त्वात् अनुपलम्भो गन्धस्यानुद्भूतत्वात् सितभास्वरत्वं तूपष्टम्भकतेजोवयवगतमिति भावः । आदिशब्दात् स्फटिकादिसंग्रहः । अब्लक्षणे सांसिद्धिकविशेषणस्यार्थकथनपूर्वकं व्यावर्त्यमाह । सांसिद्धिकत्वमिति । आजानसिद्धत्वमुत्पत्तिशिष्टत्वमित्यर्थः । सांसिद्धिकं प्रकृतित आगतं तत् तथोक्तम् । संसिद्धिप्रकृती समे इत्यमरः । द्रव्यान्तरे संश्लेषोऽग्निसंयोगः । अत्र पूर्वेषां पार्थिवत्वं भौमानलेन्धनत्वात् उत्तरेषां तैजसत्वम् अत्यन्ताग्निसंयोगेऽप्येकरूप्यादवगन्तव्यम् । गुरुत्वादिकं तूपष्टम्भकपार्थिवावयवगतमित्याद्यूह्यम्(२) । अथैषां द्वयानामपि तथात्वे सूत्रसम्मतिमाह । यथेत्यादि । अप्लक्षणस्य करकादावव्याप्तिमाशङ्क्याह । अपां विकार इति । आप्यत्वात् तत्रापि सांसिद्धिकद्रवत्वमनुमेयम् । किं च प्रतिबद्धमित्यवसेयम् आदिशब्देन हिममथनफेनादिसंग्रहः । तेजोलक्षणे विशेषणफलमाह । उष्णेति । अव्याप्तिमाशङ्क्य

(१) व्युदासः–पा· B पु· ।
(२) इत्याद्यूह्यमूहनीयम्–पा· E पु· ।

स्पर्शस्यापि तस्यानुद्भूतस्पर्शत्वेन हिमानीगतशैत्य-मात्रोपलम्भात् । चतुर्विधं तेजः । भौमं दिव्यमौदर्य-माकरजं चेति । नीरूपस्पर्शवत्त्वाभ्यां पृथिव्यादी-नामाकाशादीनां च व्यवच्छेदः । अप्रत्यक्षस्यापि

निरस्यति । न चैवमिति । अथ प्रसिद्धत्वाद्विषयतेजसो विभागं लक्षणं चाह । चतुर्विधेति । भौमं काष्ठेन्धनं दिव्य-मम्बुजमशितेन्धनमुदर्यमाकरोत्थं स्वर्णादिकमनिन्धनमिति चतुर्णां लक्षणसंग्रहः । स्वमते वायोः स्पार्शनत्वे ऽपि वैशेषिको भूत्वाह । अप्रत्यक्षस्येति । अरूपित्वादप्रत्य-क्षस्यापीत्यर्थः । विमतः स्पर्शः गुणत्वाद् रूपवत् कचिदा-श्रितः सन्ननुष्णाशीतापाकजत्वेन रूपिद्रव्यास्पर्शी व्योमा-दिषु च धर्मिग्राहकप्रमाणबाधादष्टेतरद्रव्याश्रितः तदा-श्रयणे बाधकाक्रान्तगुणत्वाद् व्यतिरेकेण रूपवदिति स्पर्श-लिङ्गाद् वायुसिद्धिः । तथा जीर्णपर्णादिषु शुकशुकादि-शब्दः शब्दविभागजन्यः शब्दत्वाद् भेरीदण्डसंयोगोत्थ-शब्दवत् स्पर्शवद्वेगवद्द्रव्याभिघातजः सत्परिशेषादष्टा-न्तराभिघातोत्थ इति शब्दाद् वायुसिद्धिः । तथा नभसि तृणतूलादीनां धृतिः पतनप्रतिबन्धलक्षणा या सास्मदाद्य-नधिष्ठितलिङ्गद्रव्यधृतित्वात् नौकाधृतिवत् स्पर्शवद्द्रव्य-संयोगजा सती परिशेषादष्टोत्तरद्रव्यसंयोगजेति धृतेरपि वायुसिद्धिः । तथा शाखादिकम्पः प्रयत्नादिकारणान्तरा-जन्यः कम्पत्वात् नदीपूराहतकाशकाण्डकम्पवत् स्पर्शवे-द्वेगवद्द्रव्यसंयोगजः सत्परिशेषादष्टोत्तरद्रव्यसंयोगोत्थ इति कम्पादपि तत्सिद्धिः । अथास्य स्पर्शवत्त्वादेव पृथि-व्यादिवन्नानात्वसिद्धेरपि व्युत्पत्त्यर्थं साधनान्तरमाह ।

वायोः स्पर्शशब्दधृतिकम्पलिङ्गैः सिद्धिः । तन्नानात्वस्य च तृणोर्द्ध्वगमनानुमेयेन सम्मूर्च्छनलिङ्गेनावगतिरिति ॥ ३६ ॥ ८८ ॥

नभः शब्दगुणं कालश्चिरादिव्यवहारकृत् ॥ ३७ ॥
दिशा पूर्वादिधीहेतुः शेषं प्रागेव लक्षितम् ।

शब्दगुणत्वं नभसो लक्षणम् । तच्चानुमेयम् । तदुक्तम् । निष्क्रमणं प्रवेशनमित्याकाशलिङ्गमिति ।

तन्नानात्वस्य चेति । तृणोर्द्ध्वगमनानुमेयेनेति । तृणोर्द्ध्वगमनानुमितोर्द्ध्वगमनानुमेयेनेत्यर्थः । सम्मूर्च्छनं नाम समानजवयोर्वाय्वोर्विरुद्धदिक्क्रिययोः सन्निपातः स च मिथः प्रतिघातात्मा नानात्वव्याप्त इति तदेवानुमीयते स च वायूर्द्ध्वगमनेन तच्च तृणोर्ध्वगमनेनेत्यर्थः । प्रयोगस्तु प्रतिहन्ता वायुः प्रतिहन्यमानाद्वायोरन्यः तत्प्रतिहन्तृत्वात् देवदत्ताद्यज्ञदत्तवत् । प्रतिहन्यते चायं वायुः अनूर्द्ध्वगमनशीलत्वे सति पत्राद्यन्योन्योर्ध्वगमनत्वात् परस्पराहतनदीपूरवत् वायुः ऊर्ध्वगतिमाँश्चायं तृणाद्यूर्द्ध्वगमनासमवायिकारणसंयोगाधारत्वात् तादृगुज्वलदनलन्नवदिति ॥ ३६ ॥ ८८ ॥

आकाशादीनां लक्षणान्याह । नभ इत्यादि । तत्र नभोलक्षणं सन्निकृष्याह । शब्दगुणत्वमिति । तस्य तद्गुणत्वे किं प्रमाणमत आह । तच्चेति । शब्दो गुणः गुणत्वात् रूपवत् क्वचिदाश्रितः सन् भाष्योक्तरीत्या परिशेषात् अष्टेतरद्रव्याश्रित इत्यनुमानादाकाशे शब्दगुणवत्त्वं सिद्धमित्यर्थः । अत्र सूत्रसम्मतिमाह । तदुक्तमिति । निष्क्रमणप्रवेशयोरवकाशकार्यत्वात् तस्यैवाकाशत्वात् तस्य लिङ्गत्वमिति सूत्रार्थः । नन्वत्र शब्दगुणकत्ववार्तापि नास्तीति

चिरमचिरं युगपदित्यादिप्रत्ययव्यवहारयोर्निमित्तं कालः। परापरव्यतिकरानुमेयः काल इति काललक्षणम्[१]। तदुक्तम्। अपरस्मिन् परं युगपच्चिरं क्षिप्रमिति च काललिङ्गानीति। तत्रापरस्मिन् परमिति दिङ्निमित्तं न प्रतिषेधार्थमुक्तम्। एकस्मिन् देशे एकस्य भावाभावव्यवहारस्थापकः काल इति केचित्। एकस्यापि कालस्योपाधिभेदात् क्षणलवादिभेदव्यपदेशः। पूर्वापरादिदेशप्रतीतिव्यवहारयोर्निमित्तं दिक्। तदुक्तम्। इत इदमिति यतस्तद्दिश्यं लिङ्गमिति। इत

चेत् सत्यम् इदं सर्वपक्षलिङ्गमाकाशस्य परिशेषात् शब्द इति सिद्धान्तसूत्रं वक्ष्यति तस्येदमुपलक्षणमित्यदोषः॥

कालक्षणं विवृणोति। चिरमिति। चिरादिव्यवहारासाधारणकारणद्रव्यं काल इत्यर्थः। लक्षणान्तरमाह। परापरेति। व्यतिकरो वैपरीत्यम्। एतस्य सूत्रोक्तषड्लिङ्गोपलक्षणत्वाद् विपरीतपरत्वानुमेयः काल इत्यादीनि षल्लक्षणानि भविष्यन्तीति भावः। तदेव सूत्रं पठति। अपरस्मिन्नित्यादि। मतान्तरेण लक्षणान्तरमाह। एकस्मिन्निति। एकस्यैकत्र भावाभावौ यद्भेदादुपपद्येते स काल इत्यर्थः। ननु काललिङ्गाविशेषात् एकस्य तस्य कुतो भेद इत्याशङ्क्याह। एकस्यापीति॥

दिग्लक्षणं विवृणोति। पूर्वापरेति। पूर्वापरादिप्रत्ययलिङ्गा दिगिति लक्षणमित्यर्थः। यत इति प्रथमार्थे सार्व-

---

(१) इत्यादि च लक्षणम्—पा॰ B पु॰।

इदं पूर्वेण इत इदं परेणेत्यादिज्ञानं यत् तद्दिशो लिङ्गमिति सूत्रार्थः । सा च कालवदेका विभ्वी नित्यैव तत्तदुपाधिभेदात् प्राच्यादिव्यवहारहेतुर्भवतीति दर्शयितुं दिशेत्येकवचनम् । तदुक्तम्[१] । कार्यविशेषेण नानात्वमिति । आदित्यसंयोगः कार्यविशेषो विवक्षितः । शेषमात्मा मनश्च प्रागेव प्रमेयवर्गे लक्षितमिति ॥ ३७ ॥ ८८ ॥

अथ गुणलक्षणमाह ।

कर्मणो व्यतिरिक्तत्वे जातिमात्राश्रयो गुणः ॥ ३८ ॥

जात्याश्रय इति सामान्यादित्रयव्युदासः । मात्रेति गुणादेरप्याश्रयो द्रव्यं व्युदस्यते । कर्मापि जातिमात्राश्रय इति तद्व्यावृत्त्यर्थं व्यतिरिक्तत्वे[२] सतीत्युक्तम् । तदुक्तम् । द्रव्याश्रयोऽगुणवान् संयोगवि-

---

विभक्तिकस्तसिः । ज्ञानं यत् तद्दिशो लिङ्गमित्यर्थः । औपाधिकनानात्वे सूत्रसम्मतिमाह । तदुक्तमिति । प्रथमचरमादित्यसंयोगोपाधिकः प्राचीप्रतीच्यादिभेद इत्यर्थः । दिक्कालसाधनप्रपञ्चस्त्वस्मत्प्रणीतप्रशस्तपादभाष्यनिष्कण्टिकायां द्रष्टव्यः । शेषं सुगमम् ॥ ३७ ॥ ८८ ॥

गुणलक्षणे कर्मव्यतिरिक्तत्वं नाम संयोगविभागयोरनपेक्षकारणत्वाभावः अन्यथापेक्षितव्यावृत्तेरतिप्रसङ्गित्वादिति । एतच्च सौत्रे लक्षणे व्यक्तमित्याह । तदु-

---

(१) तच्चोक्तम्-पा० B पु० ।
(२) कर्मान्यत्वे-पा० B पु० ।

भागयोरकारणमनपेक्ष इति गुणलक्षणमिति । ननु गुणोऽपि गुणत्वसमवायस्य रसाद्यभावस्य चाश्रय इति कथं जातिमात्राश्रय इत्युच्यते । अनवस्थादुःस्थतया समवायस्य समवायान्तराभावात् अद्रव्यत्वेन च संयोगाभावात् संयोगसमवाययोर्भावधर्मत्वेनाभावाश्रयत्वासंभवाच्च केवलं विशेषणविशेष्यभाव एव तयोः स चाश्रयाश्रयिभावमन्तरेणापि भवतीत्यौपचारिकी

क्तमिति । अत्र द्रव्याश्रयशब्देन सामान्य वत्त्वं लक्ष्यते । अगुण इति च समवायिकारणत्वराहित्यमिति वृत्तिकारः । तथा च गुणसिद्धौ निर्गुणत्वसिद्धिर्नान्योन्याश्रय इति भावः । स्वोक्तलक्षणे जातिमात्राश्रयत्वं गुणस्यासिद्धं समवायाभावयोरप्याश्रयत्वादिति शङ्कते । नन्विति । मुख्यसम्बन्धपूर्वकस्यैवाश्रयत्वस्येह लक्षणत्वात् समवायाभावयोश्च तदसम्भवान्नातिव्याप्तिरिति । कथं मुख्यसम्बन्धाभावस्तयोरित्याशङ्क्य समवाये तावत् समवायाभावं दर्शयति । अनवस्थेति । संयोगाभावं च दर्शयति । अद्रव्यत्वेनेति । अभावेऽपि तदुभयाभावं दर्शयति । संयोगेति । कथं तर्हि रूपसमवायवान् घटः पटध्वंसवन्तस्तन्तव इति च तयोः सम्बन्धताव्यवहार इत्यत्राह । केवलमिति । ननु विशेषणविशेष्यभावोऽपि रूपवान् दण्डीत्यादौ मुख्यसम्बन्धपूर्वक एव दृष्ट इत्याशङ्क्य नायं नियमः पशुमानित्यादौ अन्यथापि दर्शनादित्याह । स चेति । आश्रयाश्रयिभावमिति । मुख्यसम्बन्धमित्यर्थः । सम्बन्धव्यवहारस्तूभयनि-

तत्र सम्बन्धवाचो युक्तिरिति ॥ ३८ ॥

आद्यन्तग्रहणेन गुणान् परिसङ्ख्याय तेषां विशेषलक्षणाभिधानं प्रतिजानीते ।

चतुर्विंशतिरुद्दिष्टा गुणाः कणभुजा स्वयम् ।
रूपाद्याः शब्दपर्यन्तास्तेषां लक्षणमुच्यते ॥ ३९ ॥

रूपोपक्रमाः शब्दावसानाश्चतुर्विंशतिर्गुणाः । सूत्रक्रमानुरोधेनाद्यन्तग्रहणम् । तदुक्तम् । रूपरसग-

---

रूप्यत्वसाम्यादौपचारिक इत्याह । औपचारिकीति ॥ ३८ ॥

ननूत्तरश्लोके गुणानां लक्षणप्रतिज्ञा न युक्ता सामान्यलक्षणस्योक्तत्वात् विशेषलक्षणस्योद्देशं विनानुपपत्तेः तथा संख्याविशेषकथनमाद्यन्तनिर्देशश्च किमर्थमित्याशङ्क्य सामान्यलक्षणानन्तरं के गुणाः कियन्तः किं च तेषां विशेषलक्षणमित्याकाङ्क्षायां सर्वत्रेदमुत्तरमुपतिष्ठत इत्यवतारयति । आद्यन्तेति । के गुणा इत्यत्रोत्तरं रूपाद्या इति । कियन्त इत्यत्र चतुर्विंशतिरिति । अस्यैवोद्देशत्वाद् विशेषलक्षणप्रतिज्ञा च युक्तेत्यर्थः । ननु शब्दो द्रव्यमिति भाट्टाः संख्या तु पृथक् पदार्थ इति प्राभाकराः कर्मापि गुण इति भूषणः एवं न्यूनाधिकसंख्याविप्रतिपत्तेः कथं चतुर्विंशतिरित्यत्रोत्तरं कणभुजेति । कणादोक्तस्यैव युक्तियुक्तत्वात् तत्सिद्धिरिति भावः ।

तृतीयपादस्य पूर्वार्द्धेनैकवाक्यतामाह । रूपेति । किमपेक्षया रूपशब्दयोराद्यन्तत्वमत आह । सूत्रेति । तानि सूत्राणि दर्शयति । रूपरसेत्यादि । रूपाद्युद्देशक्रमस्तु

न्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणा इति । चशब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सङ्गृहीताः । ततश्च कण्ठोक्ताः सप्तदश चशब्दसमुच्चिताः सप्तेति गुणाश्चतुर्विंशतिः । तेषां विशेषलक्षणं वक्ष्याम इति ॥ ३९ ॥

नेत्राद्येकाक्षगम्यत्वमर्थत्वे सति लक्षणम् ।
रूपस्य च रसस्यापि गन्धस्य स्पर्शशब्दयोः ॥ ४० ॥

चक्षुर्ग्राह्यत्वेन घटादिद्रव्यस्य तद्गतस्य च सत्तादिसामान्यस्य च संख्यापरिमाणादिगुणस्य च रूपत्वमाप्रसाङ्क्षीदिति एकत्वं विशेषणम् तेषां त्वगिन्द्रियस्यापि विषयत्वात् । एवं स्पर्शनैकेन्द्रियग्राह्य इत्यत्रापि विशेषणफलं वाच्यम् । गन्धरसशब्दानां तु घ्राणरसनश्रोत्रग्राह्यत्वमेव लक्षणम् । एकत्वविशेषणस्य व्यवच्छेद्याभावेनाविवक्षितत्वात् । लक्षणसौकर्येण क्रम-

निकषे द्रष्टव्यः ॥ ३९ ॥

अथ प्रतिज्ञातानि विशेषलक्षणान्याह । नेत्रेति । चक्षुरेकग्राह्योऽर्थो रूपमिति रूपलक्षणम् ।

तत्रैकविशेषणं द्वीन्द्रियग्राह्यनिरासार्थमित्याह । चक्षुरिति । तदेतत्स्पर्शलक्षणेऽप्यतिदिशति । एवमिति । गन्धादित्रयलक्षणे त्वेकशब्दत्यागे घ्राणग्राह्योऽर्थो गन्ध इत्यादि योज्यमित्याह । गन्धेति । पश्चादुद्दिष्टस्य शब्दस्यादौ लक्षणे कारणमाह । लक्षणसौकर्येणेति । ननु शब्दो द्रव्यं कथं

मुल्लङ्घ्य शब्दोऽत्र लक्षितः । ननु साक्षादिन्द्रिय(१)सम्बन्धेन साक्षात्कार्यत्वात् घटादिवदेव शब्दो द्रव्यं न गुण इति चेत् न शब्दो गुणः बहिरिन्द्रियव्यवस्थाहेतुत्वात् रूपवत् श्रोत्रं स्वगुणसजातीयगुणग्राहकम् बाह्येन्द्रियत्वात् घ्राणवदित्यादिभिर्गुणत्वस्यैव सिद्धेः ॥ ४० ॥

अर्थशब्दस्य विवक्षितमर्थं प्रयोजनं चाह ।

गुणेषु लक्ष्यत इति चोदयति । नन्विति । साक्षादित्यादिना पदत्रयेण क्रमात् घटरूपादौ समवायाभावयोरिन्द्रियरूपादौ च व्यभिचारनिरासः । असिद्धिं परिहरति । नेति । शब्दस्य स्वोपलब्धिकारणत्वेन श्रोत्रव्यवस्थापकत्वात् न हेत्वसिद्धिरिति भावः । अन्तरिन्द्रियव्यवस्थाहेतोः सुखादिज्ञानस्य गुणत्वे ऽपि युगपद्ज्ञानानुत्पत्तिलिङ्गे तद्धेतौ व्यभिचारनिरासाय बहिरित्युक्तम् । शब्दस्य गुणत्वे प्रमाणान्तरमाह । श्रोत्रमिति । सजातीयपदं दृष्टान्ते साध्यवैकल्यनिरासार्थम् । तच्च पक्षे ऽपि सम्भवतीत्यविरोधः । आदिशब्दात् सामान्यवत्त्वे सति बाह्येन्द्रियग्राह्यत्वादित्यादिसंग्रहः । द्रव्यत्वे तु शब्दस्य नित्यविभुत्वेन सर्वोपलब्धिरनुपलब्धिरेव वा स्यान्न तु कदाचिदुपलब्धिरिति प्रतितर्कपराहतेः गुणत्वमेव सिद्ध्यतीति भावः । यदुक्तं शब्दस्य गुणत्वमुत्तरत्र वक्ष्याम इति तदेतदिति बोध्यम् ॥ ४० ॥

ननूत्तरश्लोके अर्थशब्दार्थकथनं प्रकृतासङ्गतमित्याशङ्क्याह । अर्थशब्दस्येति । रूपादिलक्षणस्थस्येति शेषः ।

---

(१) साक्षादक्ष—पा· B पु· ।

द्रव्यादित्रयमेवार्थ इति काश्यपनिर्णयः ।
अतो रूपादिसामान्यैर्नातिव्याप्तिर्भविष्यति ॥४१॥

द्रव्यगुणकर्माण्यर्थ इति वैशेषिकपरिभाषा । अतो रूपत्वादिसामान्यपञ्चकस्य चक्षुराद्येकेन्द्रियग्राह्यत्वे ऽपि अर्थत्वाभावान्न तैरतिव्याप्तिः ॥ ४१ ॥

संख्यायाः परिमाणस्य पृथक्त्वस्य च(१) लक्षणम् ।
गुणत्वे सति हेतुत्वं तत्तद्धीव्यवहारयोः ॥ ४२ ॥

एकादिज्ञानव्यवहारयोर्निमित्तं गुणः संख्या । दीर्घादिज्ञानव्यवहारयोर्निमित्तं गुणः परिमाणम् । तच्चतुर्विधम् । महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वं चेति । पृथगिति ज्ञानव्यवहारयोर्निमित्तं गुणः पृथक्त्वमिति ॥ ४२ ॥

संयोगस्तु विरोधी स्याद् गुणत्वे सति कर्मणः ।
यस्मात् संयोगविध्वंसो विभागः स गुणो भवेत् ॥ ४३ ॥

अत इति । पारिभाषिकार्थत्वादित्यर्थः । अन्यथातिव्याप्तिः स्यादेवेति भावः ॥ ४१ ॥

संख्यादिलक्षणेषु निमित्तमित्यसाधारणकारणमित्यर्थः । तत्समवायिकारणव्युदासार्थं गुणत्वे सतीत्युक्तम् ॥ ४२ ॥

---

(१) पृथक्त्वस्यापि—पा॰ A पु॰ ।

कर्मविरोधी गुणः संयोगः युतसिद्धयोः संश्लेषः संयोगः युतसिद्धिश्चासम्बद्धयोर्विद्यमानतेति केचित् । संयोगविरोधी गुणो विभाग इति ॥ ४३ ॥

परापरधियोर्हेतू दिक्कालापेक्षयैव यौ ।
परत्वमपरत्वं च क्रमादेतौ गुणौ मतौ ॥ ४४ ॥

दिगपेक्षया कालापेक्षया वा परत्वबुद्धिनिमित्तं गुणः परत्वम् । तयोरेवापेक्षाया अपरत्वबुद्धिनिमित्तं गुणोऽपरत्वमिति ॥ ४४ ॥

लक्षिता बुद्धिराह्लादः सुखं दुःखं च लक्षितम् ।
इच्छानुरागो द्वेषः स्यादसहिष्णुत्वलक्षणः ॥ ४५ ॥

निगदव्याख्यातमेतत् ॥ ४५ ॥

प्रयत्नस्त्वात्मधर्मः स्यादुत्साहो भावना च सः ।

आत्मधर्मः कृत्यादिपदवाच्य उत्साहः प्रयत्नः ।

संयोगलक्षणे गुणग्रहणं दिक्कालादिव्युदासार्थम् । संयोगस्य लक्षणान्तरमाह । युतसिद्धयोरिति । संयोग इति केचिदित्यन्वयः । युतसिद्धिलक्षणं चाह । युतसिद्धिश्चेति ॥ ४३ ॥

दिक्कृतकालकृतत्वभेदेन द्विविधे परत्वापरत्वे इत्याह । दिक्कालापेक्षयेति ॥ ४४ ॥

निगदः पाठः स एव व्याख्यानं यस्य तत्तथोक्तम् पाठादेव गम्यमानार्थमित्यर्थः ॥ ४५ ॥

प्रयत्नलक्षणमाह । प्रयत्नस्त्विति । लक्षणांशं निष्कृ-

स एव भावनेति व्यपदिश्यते । यथाहुः ।

भावनैव प्रयत्नात्मा सर्वत्राख्यातगोचरः । इति ।

गुरुत्वं तु गुणो हेतुराद्ये पतनकर्मणि ॥ ४६ ॥
द्रवत्वं तु गुणो हेतुराद्ये स्यन्दनकर्मणि[1] ।

द्वितीयादिपतनस्य स्यन्दनस्य च वेगहेतुत्वादाद्य इत्युक्तम् । पतनस्यन्दनयोराश्रयद्रव्यस्यापि समवायिकारणत्वेन हेतुत्वाद् गुण इत्युक्तम् ॥४६॥८८॥

च्याह । आत्मेत्यादि । अत्रोत्साह इति लक्षणम् उत्साहपदार्थः प्रयत्नः क्वचिल्लोके हर्षेऽप्युत्साहपदप्रयोगदर्शनात् तथा न भ्रमितव्यमित्याह । कृत्यादीति । आदिशब्दादुपयोगादि[2]-शब्दसंग्रहः । तथा च कृत्यादिपर्यायपदार्थ उत्साहः प्रयत्नो न हर्षपदार्थस्तस्य गौणत्वादित्यर्थः । न च कायिकव्यापारविशेषे ऽपि प्रयत्नभ्रमः कार्य इत्याशयेनाह । आत्मधर्म इति । ननु कृत्यादिपदवाच्यः प्रयत्न इत्युक्तं कृतितत्साध्यमध्यस्थ इत्यादि भावनायास्तद्वाच्यत्वदर्शनादित्याशङ्क्याह । स एवेति । योऽयमुत्साहापरनामा लोके प्रसिद्धः प्रयत्नः स एव वेदे पुरुषप्रवर्तनात्मशब्दभावनाविषयभूतपुरुषप्रवृत्तिरूपा भावनेति व्यपदिश्यत इत्यर्थः । अत्राचार्यसंमतिमाह । यथाहुरिति । किं करोति पचति किं करोति गच्छतीत्येवं सर्वत्र करोतिसामानाधिकरण्यदर्शनात् सर्वधात्वर्थवर्तिसामान्यरूपं करोत्यर्थभूता भावना पूर्वोक्तप्रयत्नलिङाद्याख्यातप्रत्ययवाच्यतया प्रतीयत इति वार्तिकार्थः ॥ ४६ ॥ ८८ ॥

---

(१) स्यन्दनकर्मणि—पा· A पु· ।
(२) उत्पन्नादि—पा· E पु· ।

स्निग्धधीर्यद्विशिष्टे ऽर्थे स्नेहश्चिक्कणता च[1]
सः ॥ ४७ ॥

चिक्कणत्वं स्नेह इति लक्षणान्तरमिति ॥ ४७ ॥

यज्जातीयसमुत्पाद्यस्तज्जातीयस्य कारणम् ।
स्वयं यस्तद्विजातीयः संस्कारः स गुणो मतः ॥४८॥

स्वोत्पादकसजातीयस्योत्पादकः स्वयं च तद्विजातीयो गुणः संस्कार इति । यथा स्मृतिहेतुः संस्कारः स ह्यनुभवज्ञानजन्यः स्मृतिज्ञानहेतुः स्वयं न ज्ञानजातीयः[2] । यथा वा वेगः कर्मजः[3] कर्महेतुः स्वयं

स्निग्धेति । स्निग्धव्यवहारासाधारणं कारणं गुणः स्नेह इत्यर्थः ।

चिक्कणविशेषणवैयर्थ्यमाशङ्क्याह । चिक्कणत्वमिति ॥ ४७ ॥

संस्कारलक्षणे संस्कारः स गुणो मत इति संस्कारानुवादेन गुणत्वं विधीयत इति तच्चायुक्तमित्याशयेन वैपरीत्येन योजयन् लक्षणार्थं निष्कृष्याह । स्वोत्पादकेति । अत्र गुणग्रहणं संयोगापेक्षया तादृक्कर्मव्युदासार्थम् । तथापि कर्मापेक्षया तादृक्संयोगव्युदासार्थमद्विष्ठत्वे सतीति विशेषणीयम् । तथापि विहितनिषिद्धक्रियापेक्षया तादृग्धर्माधर्मव्यवच्छेदाय सर्वोत्पत्तिमतां निमित्तत्वरहित इति विशेषणीयम् । लक्ष्ये लक्षणं योजयति । यथेत्यादि । वेग-

---

(१) स स्नेहश्चिक्कणश्च—पा॰ B पु॰ ।

(२) स्वयं ज्ञानविजातीयः—पा॰ C पु॰ ।

(३) कर्मजन्यः—पा॰ B पु॰ ।

कर्म न भवति । (यथा स्थितिस्थापकः वेष्टनादिकर्मजन्यः वेष्टनादिकर्मकारणं स्वयं च न कर्मरूपः[१] ।) वेगो भावना स्थितिस्थापकश्चेति त्रिविधः संस्कार इति ॥४८॥

विहितक्रियया साध्यो धर्मः पुंसो गुणो मतः ।
प्रतिषिद्धक्रियासाध्यः पुङ्गुणोऽधर्म उच्यते[२] ॥४९॥

श्रुत्यादिविहितानुष्ठानसाध्यः पुङ्गुणो धर्मः । श्रुत्यादिप्रतिषिद्धानुष्ठानसाध्यः पुङ्गुणस्त्वधर्म इति ॥ ४९ ॥

अत्र पृथिव्या रूपरसगन्धस्पर्शसंख्यापरिमाण-

ग्रहणं स्थितिस्थापकस्याप्युपलक्षणम् । ननु संस्कारलक्षणं वेगादिषु कथं युज्यते अन्यलक्षणस्यान्यत्रासम्भवादित्याशङ्क्य नैष दोषः तेषां तद्विशेषत्वादित्याशयेन संस्कारं विभजते वेग इत्यादिना । एषां च त्रयाणां पूर्वोक्तैकलक्षणव्यवस्थापितसंस्कारत्वाख्यैकसामान्ययोगादेकगुणत्वं धर्माधर्मयोस्तु तादृग्व्यवस्थापकाभावान्नादृष्टत्वाकारेणैकगुणत्वमिति निकषे निरटङ्कि ॥ ४८ ॥

विहितनिषिद्धैकक्रियासाध्यावात्मगुणौ धर्माधर्मावित्याह । विहितेत्यादि । अतिरोहितमन्यत् ॥ ४९ ॥

निरूप्यैवं गुणान् सर्वान् कस्य द्रव्यस्य के ग[...]रण्यद-
कियन्त इत्यपेक्षायां विभज्य प्राह स[...]भूगुणाः ।
अत्रेत्यादिना विभाग इत्यन्तेन प्र[...]प्रति ॥
[...] । तत्र पृथिव्या

---

(१) कर्म न भवति[...]पा॰ A [...]—पा॰ B पु॰ । ( ) एतन्मध्यस्थः पाठो नास्ति D पु॰ ।
(२) प्रतिषिद्धक्रियत[...]साध्योऽधर्मः पुंसो गुणो मतः—पा॰ A पु॰ ।

पृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारा-श्चतुर्दश गुणाः। तत्र रूपं शुक्लाद्यनेकविधम् अग्नि-संयोगविरोधि । रसस्तु षड्विधो मधुरादिः । द्विविधो गन्धः सुरभिरसुरभिश्च। स्पर्शोऽनुष्णाशीतः पाकजश्च। अपामपि स्नेहगन्धयोः प्रक्षेपप्रतिक्षेपमात्रविशेषि-तास्त एव गुणाः । अप्सु रूपरसस्पर्शाः शुक्लम-धुरशीताः। रसस्नेहगुरुत्वव्यतिरिक्तास्त एव तेजसः। अत्र रूपं शुक्लं भास्वरं च उष्ण एव स्पर्शः। वायोस्तु रूपद्रवत्वव्यतिरिक्तास्त एव गुणाः। स्पर्शोऽनुष्णाशी-तोऽपाकजश्च। स्पर्शव्यतिरिक्तास्त एव मनसः। त एव परत्वापरत्वसंस्कारव्यतिरिक्ताः[१] शब्दसहाया विहा-यसः। दिक्कालयोश्च शब्दपरिहारेण[२] त एव भव-न्ति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारस-

---

विशेषगुणानाह । तत्र रूपमित्यादि । तत्र रूपरसस्पर्शाः स्वाश्रयव्यवच्छेदसमर्थावान्तरसामान्यवत्त्वेन विशेषगु-णाः गन्धस्तु तदेकनियतत्वात् स्वरूपत एव। एवमेवा-बादिष्वपि रूपादीनां विशेषगुणत्वं स्नेहसांसिद्धिकद्रव-त्वशब्दबुद्ध्यादीनां तु स्वरूपत एवेति बोद्धव्यम् । तत्र क्षित्युदकात्मानश्चतुर्दशगुणाः एकादशगुणं तेजः नवगुणो वायुः अष्टगुणं मनः षड्गुणं नभः पञ्चगुणौ दिक्कालाविति विवेक्तव्यम् ।

---

(१) विधुराः–पा॰ B पु॰ ।
(२) प्रहाणेन–पा॰ B पु॰ ।

ध्रीचीनास्त एवात्मन इति गुणविभागः ॥

ततश्च रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगाः दश मूर्तैकगुणाः । बुद्ध्यादय आत्मविशेषगुणाः शब्दश्चेति दशामूर्तैकगुणाः । इतरे तूभयगुणाः । रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्ध्यादयः शब्दश्चेति षोडश वैशेषिकगुणाः । इतरे सामान्यगुणाः । संयोगविभागौ द्वित्वद्विपृथक्त्वादयश्चानेकाश्रिताः । अन्ये त्वेकैकवृत्तयः । केचन गुणा बाह्यैकैकेन्द्रियग्राह्याः यथा पञ्चापि रूपादयः । केचित्तु बाह्येन्द्रि-

---

अथैषां मिथः केषाञ्चित्साधर्म्यं केभ्यश्च वैधर्म्यं चाह । ततश्चेति । वेगग्रहणं स्थितिस्थापकोपलक्षणम् । तयोः संस्कारात्मनैकत्वाद् दशत्वाविरोधः । एकशब्देन मूर्तामूर्तगुणव्युदासः । मूर्तत्वव्याप्यगुणत्वं वा मूर्तगुणत्वम् । एवं बुद्ध्यादीनाममूर्तगुणत्वं नामामूर्तैकगुणत्वममूर्तत्वव्याप्यगुणत्वं वा व्यावर्त्यं तु पूर्वकथितमेव । इतरे संख्यादय उभयगुणाः मूर्तामूर्तगुणाः द्रव्यत्वव्यापकगुणा इत्यर्थः । विशेषगुणा एव वैशेषिकगुणाः नवान्यतममात्रनिष्ठत्वोचितावान्तरसामान्यवन्तः स्वाश्रयव्यवच्छेदसमर्था अवान्तरसामान्यवन्तो वेत्यर्थः । तद्रहिताः सामान्यगुणा इत्याशयेनाह । इतर इति । अनेकत्र व्यासज्यवृत्त्येकव्यक्तिका इत्यर्थः । आदिशब्दात् त्रित्वत्रिपृथक्त्वादिसंग्रहः । एकैकवृत्तय इति । गुणत्वे सत्यव्यासज्यवृत्तय इत्यर्थः । बाह्यैकैकेन्द्रियग्राह्या इति ।

यद्द्वयग्राह्याः यथा संख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वद्रवत्वस्नेहवेगाः । केचिदन्तःकरणग्राह्याः । यथा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः । धर्माधर्मभावनागुरुत्वानि नित्यातीन्द्रियाणि । अत्र एकादश गुणाः कारणगुणपूर्वकाः । यथाऽपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगाः । दश त्वनेवंविधाः बुद्ध्यादय आत्मविशेषगुणाः शब्दश्चेति । तूलपरिमा-

---

मनोऽव्यवच्छेदार्थं बाह्यपदम् । अन्यथैकेन्द्रियग्राह्यत्वासम्भवात् । एकपदं द्वीन्द्रियग्राह्यनिरासार्थम् । तथापि परमाणुरूपादावव्याप्तेः तन्निष्ठगुणत्वावान्तरजातिमत्त्वेन निर्व्रूयात् । एवं द्वीन्द्रियग्राह्यत्वमपि निर्वक्तव्यम् अन्यथा परमाणुगतेष्वव्याप्तेः । अन्तःकरणग्राह्या इति । गुणत्वे सति तन्मात्रग्राह्या इत्यर्थः । तेन सुखत्वादेर्बाह्येन्द्रियग्राह्याणां च निरासः । नित्यातीन्द्रियाणीति । अस्मदादीन्द्रियग्रहणयोग्यतारहितानीत्यर्थः । भावनेति स्थितिस्थापकस्याप्युपलक्षणम् । कारणगुणपूर्वका इति । स्वसमवायिसमवायिकारणगुणासमवायिकारणका इत्यर्थः । अपाकजपदेन द्रवत्वमपि विशेषणीयम् पार्थिवपरमाणुगतरूपादिवत् पार्थिवतैजसपरमाणुगतनैमित्तिकद्रवत्वस्यापि व्यावर्तनीयत्वात् । वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः तयोरप्यक्रियाजन्यत्वेन परिमाणस्य संख्याप्रचयाजन्यत्वेन च विशेषणात् तज्जन्येषु लक्ष्यबहिष्कारान्नाव्याप्तिदोषः । दश त्वनेवंविधा इति । अकारणगुणपूर्वका इत्यर्थः । एतच्च पाकजपरत्वापरत्वादीनामप्युपलक्षणम् । अन्यथा तेष्वेवातिव्याप्तेः ।

गोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्वापाकजाश्च संयोगजाः। संयोगविभागवेगाः कर्मजाः। शब्दोत्तरविभागौ विभागजौ। परत्वापरत्वद्वित्वद्विपृथक्त्वादयश्च बुद्ध्यपेक्षाः[1] तद्विनाशात् तद्विनाश[2] इति। रूपादयः पञ्चापि भूतगुणाः। रूपरसगन्धस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाश्च समानजात्यारम्भकाः। सुखदुःखेच्छाद्वेषप्रयत्ना असमान-

---

दशग्रहणं तु भाष्यकारीयकण्ठोक्त्यभिप्रायमिति। संयोगजा इति। गुणत्वे सति संयोगासमवायिकारणका इत्यर्थः। कर्मजा इति। वेगेन स्थितिस्थापकोऽप्युपलक्ष्यते तावप्यकारणगुणपूर्वकौ संयोगविभागावप्याद्यौ ग्राह्यौ। एवं विभागजत्वं च विभागासमवायिकारणत्वम्। शब्दोऽत्र शब्दसंयोगजन्यो विवक्षितः। बुद्धिरसाधारणनिमित्तत्वेनापेक्ष्यत इति बुद्ध्यपेक्षाः अपेक्षाबुद्धिजन्या इत्यर्थः। रूपादयः पञ्चापीति। अपिशब्दाद् गुरुत्वद्रवत्वस्नेहकालकृतपरत्वापरत्वकारणगुणपूर्वकवेगस्थितिस्थापकानां संग्रहः। भूतगुणाः भूतैकगुणा इत्यर्थः। एतेनात्मविशेषगुणा नवाप्यभूतगुणाः शेषास्तु भूताभूतगुणा इत्यर्थात् सिद्धमिति बोद्धव्यम्। रूपादयः स्नेहान्ताः समानजात्यारम्भका इति। सजातीयमात्रारम्भका इत्यर्थः। अन्यथोभयारम्भकेष्वतिव्याप्तेः। आरम्भकत्वं

---

(१) अपेक्षाबुद्धिजन्याः-पा॰ D पु॰।
(२) तद्विनाशविनाशिनः-पा॰ B पु॰।

जात्यारम्भकाः । संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शस्नेहज्ञानधर्माधर्मसंस्काराः समानासमानजात्यारम्भकाः । बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेतारम्भकाः । रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भकाः । संयोगविभागसंख्यैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगधर्माधर्मास्तूभयत्रारम्भकाः । गुरुत्वद्र-

---

चात्रोपादानेतरकारणत्वमसमवायिकारणत्वं चेति द्वयमपि विवक्षितम् । तत्राद्ये स्नेहोष्णस्पर्शवर्जितानामेवेदं साधर्म्यम् तयोः संग्रहरूपादेर्विजातीयस्याप्यारम्भकत्वात् । अत्रानुष्णेति निषेधः स्नेहस्याप्युपलक्षणम्(?) । एतच्चात्मधर्मेतरकार्यविषयमिति ज्ञेयम् । द्वितीये तु तयोरप्यवर्जनमिति विवेकः । सुखादयो विजातीयमात्रारम्भकाः संयोगादयस्तूभयारम्भकाः तत्र स्नेहोऽपि ग्राह्यः । आरम्भकत्वं चात्र सर्वत्राप्युपादानेतरकारणत्वमेव । स्वाश्रयसमवेतारम्भका इति । स्वाश्रयमात्रसमवेतबुद्ध्यपेक्षेतरकार्यारम्भकनिष्ठगुणत्वव्याप्यजातिमन्त इत्यर्थः । एवं चापेक्षाबुद्धावन्त्यशब्दे च नाव्याप्तिः । परत्रारम्भका इति । परत्रैवारम्भका इत्यर्थः । ते च संग्रहज्ञानादृष्टेतरस्वाश्रयसमवेतानारम्भकत्वे सत्यारम्भका इति निर्वाच्याः । तेन स्नेहवैधप्रयत्नादौ नाव्याप्तिः । परिमाणस्या-
नष भ्रकत्वेन विशेषणाज्ज्ञानारम्भकेष्वव्याप्तिरिति । उभय-
त्रार...का इति । एकत्रैवारम्भकत्वे सत्यारम्भका इत्यर्थः ।
त्रारम्भक... त्र स्थितिस्थापकोऽपि ग्राह्यः स्नेहस्य संग्रहा-
अत्र वेग... र्मापेक्षया पूर्वं परत्रारम्भकेषु संग्रहः इदानीं तद-
तिरिक्तका... म्भकेषु ग्रहणमित्यविरोधः । गुरुत्वेत्यादि ।
पेक्षयोभयत्रारम्भ...

त्ववेगप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहेतवः । रूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वस्नेहशब्दा असमवायिकारणानि । नवात्मविशेषगुणा निमित्तकारणानि । संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगास्तूभयकारणानि । परत्वापरत्वद्वित्वद्विपृथक्त्वादीनि अकारणानि । संयोगविभागशब्दाः आत्मविशेषगुणाश्च प्रदेशवृत्तयः । शेषाः स्वाश्रयव्यापिनः । अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वस्नेहसांसिद्धिकद्रवत्वानि यावद्द्रव्यभावीनि । शेषास्त्वयावद्द्र-

वेगेन स्थितिस्थापको ग्राह्यः । संयोगविशेषो नोदनाभिघाताख्यः । क्रियाहेतव इति । उपादानेतरत्वे सति क्रियां प्रत्यसाधारणकारणानीत्यर्थः । रूपेत्यादि । उष्णस्पर्शस्य पाकजोत्पत्तौ निमित्तत्वात् तद्व्यवच्छेदार्थमुक्तमनुष्णेति । परिमाणं चात्र द्रव्यारम्भकद्रव्यनिष्ठमहत्त्वं विवक्षितं तेनाण्वाकाशान्त्यावयविपरिमाणबहिष्कारः एतेषामसमवायिकारणत्वमेवेत्यर्थः । तच्च निमित्तोपादानत्वासहचरितकारणत्वं स्नेहादीनां च संग्रहादिनिमित्तत्वे ऽपि तद्व्यतिरिक्तकार्यापेक्षया चेदमवधारणमित्यदोषः । नवेति। निमित्तत्वमेवेत्यर्थः तत्र समवाय्यसमवायित्वासहचरितकारणत्वम् । उभयथाकारणत्वं च निमित्तासमवायिव्यतिरिक्तत्वानधिकरणत्वम् । ज्ञानेतरकार्याजनकत्वमकारणत्वम् । स्वात्यन्ताभावसमानाधिकरणत्वं प्रदेशवृत्तित्वम् । तद्वैपरीत्यमेव स्वाश्रयव्यापित्वम् । यावद्द्रव्यभावीन्याश्रयविनाशैकविनाश्यानीत्यर्थः । स्वाश्रये सत्येव विनाशि-

व्यभाविन इति ।

कथं पार्थिवद्रव्ये पाकजगुणोत्पत्तिप्रकार इति चेदित्थम् । श्यामस्य घटाद्यामद्रव्यस्य दहनसम्बन्धे तदभिघातान्नोदनाद्वा तदारम्भकेषु परमाणुषु कर्मोत्पत्तौ तेषां विभागेन संयोगनाशे सति कार्यद्रव्यं विनश्यति । ततस्तत्परमाणुषु चौष्ण्यापेक्षाद्दहनसम्बन्धाच्छ्यामत्वादिविनाशे सति अन्यस्मादग्निसंयोगात्(१) पाकजाः परमाणुषु रक्तादयो जायन्ते । तदनन्तरमदृष्टवदात्मसंयोगात् तेषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद् द्व्यणुकादिप्रक्रमेणोत्पत्तौ कार्ये कार्यत्वमयावद्द्रव्यभावित्वमिति ॥ इति साधर्म्यम् ॥

अथायावद्द्रव्यभाविप्रसङ्गात् पाकजोत्पत्तिप्रकारं वक्तुं पृच्छति । कथमिति । अवस्थित एव कार्यद्रव्ये तत्रैवाग्निसंयोगात् श्यामादयो नश्यन्ति रक्तादय उत्पद्यन्ते इति मीमांसकादयः । प्राभाकरास्तु रूपादीनां सामान्यवन्नित्यतया तत्सम्बन्धानामेवाग्निसंयोगाद् विनाशोत्पादाविति वर्णयन्ति । तदुभयमप्यसहमानः पीलुपाकवाद्याह । इत्थमिति । नोदनाभिघातौ संयोगविशेषौ निगदव्याख्यातमन्यत् । नन्वस्मिन् पक्षे पूर्वपरिमाणावरणावधारणरेखोपरेखादिविन्यासादितादवस्थ्यं नोपपद्यते इत्याशङ्क्य क्रमात् कतीनामेवावयवानामनतिदूरविश्लिष्टानां पुनर्झटिति घटनादेव किञ्चिदनुपपन्नमित्यादि सर्वमन्यत्र द्रष्टव्य-

---

(१) दहनसम्बन्धात्—पा॰ B पु॰ ।

रणगुणप्रक्रमेण रक्तादिगुणोत्पत्तिरिति कृतं विस्तरेण ॥

अथ कर्मलक्षणमाह ।

कर्म चासमवायि स्याद्यत्संयोगविभागयोः ।

समुच्चितयोः संयोगविभागयोरसमवायिकारणं कर्म तेनैकत्र कारणयोः संयोगविभागयोर्नातिव्याप्तिः । असमवायिकारणं च समवायिकारणप्रत्यासन्नम्[1] । द्विविधा च प्रत्यासत्तिः । समवायिकारणसमवेत-

---

मित्याशयेनाह । इति कृतमिति । प्रक्रिया तु विस्तरभयान्न लिख्यते । प्रमाणं तु पीलुपाके विमताः पिठरे रूपादयः कारणगुणपूर्वका अवयविरूपादित्वात् पटरूपादिवदित्याद्युन्नेयम् । इति पाकजोत्पत्तिः ॥

सामान्यवत्सु शिष्टत्वात् सामान्यादेः प्राक्कर्मलक्षणमाह । अथेति । ननु संयोगविभागयोरसमवाय्यसमवेतमित्यर्थश्चेत् सामान्यादावतिव्याप्तिः असमवायिकारणमित्यर्थश्चेत् संयोगविभागयोरपि तथात्वात् तयोरेवातिव्याप्तिरित्याशङ्क्य व्याचष्टे । समुच्चितयोरिति । समुच्चयफलमाह । तेनेति । संयोगस्य विभागाजनकत्वे सति संयोगजनकत्वं विभागस्यापि संयोगाजनकत्वे सति विभागजनकत्वं कर्मणां तूभयजनकत्वमिति भेद इति भावः । एवं कर्मलक्षणस्यासमवायिकारणज्ञानसापेक्षत्वात् तल्लक्षणं चाह । असमवायिकारणं चेति । कथञ्चित् प्रत्यासन्नेषु अदृष्टादिष्वतिव्याप्तिपरिहारार्थं विशेषमाह । द्विविधेति । समवा-

---

(१) अवधृतसामर्थ्यं—इत्यधिकं B पु. ।

त्वं तत्कारणसमवेतत्वं च । तत्राद्यं यथा पटस्य तन्तुद्वयसंयोगः । द्वितीयं तु पटगतशौक्ल्यस्य तन्तुगतं शौक्ल्यमिति । तदुक्तम् । एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम् ।

कानि कर्माणि कियन्ति चेत्याह ।

उत्क्षेपणमपक्षेप आकुञ्चनमथापरम् ॥ ५० ॥
प्रसारणं गतिश्चेति भिद्यते कर्म पञ्चधा ।

तदुक्तम् । उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि कर्माणीति ॥ ५० ॥ ८८ ॥

यिकारणसमवेतत्वमिति । कार्यस्य यत् समवायिकारणं तत्रैव समवेतत्वं कार्यैकार्थप्रत्यासत्तिरिति यावत् । तत्कारणसमवेतत्वमिति । तस्य कार्यसमवायिकारणस्य यत्कारणं समवायिकारणं तत्समवेतत्वं कारणैकार्थप्रत्यासत्तिरिति यावत् । क्रमेणोदाहरति । यथेत्यादि । एवमपि तन्तुरूपस्य पटं प्रत्यसमवायिकारणत्वं स्यात् कार्यैकार्थप्रत्यासत्तिभावात् तन्निवारणार्थमवधृतसामर्थ्यमिति विशेषणीयम् । अथ कर्मलक्षणे सूत्रसम्मतिमाह । तदुक्तमिति । एकद्रव्यमुपादानतया यस्येत्येकद्रव्यमिति गुणान्यतो व्यवच्छेदः गुणो न भवतीत्यगुणमिति गुणाच्च व्यवच्छेदः । आर्षं नपुंसकत्वम् । एतावदेकं लक्षणं शेषमन्यत् । तदेव स्वोक्तलक्षणसमानार्थं चेति भावः । अनपेक्षत्वं चास्य पश्चाद्भाविभावरूपकारणानपेक्षत्वम् ।

ननु कर्मप्रस्तावे का सङ्गतिरुत्क्षेपणादिनिरूपणस्येत्याशङ्क्याह । कानीति ॥ ५० ॥ ८८ ॥

तेषां विशेषलक्षणमाह ।

ऊर्ध्वं चाधश्चाभिमुखं तिर्यग्विष्वगिति क्रमात् ॥ ५१ ॥

तानि पञ्चापि कर्माणि देशसंयोगहेतवः ।

ऊर्ध्वादिदेशसंयोगासमवायिकारणत्वं(१) यथासंख्यमुत्क्षेपणादिलक्षणम् । विष्वगित्यनियतदेशविशेषमित्यर्थः । अत्र गमनग्रहणेन भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यक्पवननमनोन्नमनानि सङ्गृह्यन्ते ॥ ५१ ॥ ऽऽ ॥

अथ जातिः(२) ॥

कर्मलक्षणस्योक्तत्वात् पौनरुक्त्यमाशङ्क्याह । तेषां विशेषेति ।

ननूर्ध्वादिदेशसंयोगहेतुत्वं समवायिनिमित्तयोरतिव्याप्तमित्याशङ्क्य हेतुशब्देनासमवायिकारणत्वस्य विवक्षितत्वान्नैष दोष इति व्याचष्टे । उर्ध्वादीति । ऊर्ध्वदेशसंयोगासमवायिकारणमुत्क्षेपणम् । अधोदेशसंयोगासमवायिकारणमपक्षेपणमित्यादि योज्यमित्यर्थः । ननु भ्रमणादिभिरतिरेकात् कथं पञ्चैवेत्यवधारणमित्याशङ्क्याह । अत्र गमनेति । तेषामप्यनियतदिग्देशविशेषसंयोगहेतुत्वविशेषाद्गमनान्तर्भावान्नातिरेक इति भावः ॥ ५१ ॥ ऽऽ ॥

अथ निःसामान्येषु बह्वाश्रयत्वात् तावज्जातिर्लक्ष्यत इत्याशयेनाह । अथेति । अत्र मध्ये तिङन्तप्रयो-

---

(१) उर्ध्वादिदेशैर्द्रव्यसंयोगस्यासमवायिकारणत्वं–पा॰ B पु॰ ।
(२) अथ सामान्यमाह–पा॰ B पु॰ ।

सामान्यं नित्यमेकं स्याद[1]नेकसमवायि च ॥ ५२ ॥

नित्यमेकमनेकसमवायि सामान्यमित्यर्थः । नित्यमित्युक्ते गगनादेरपि सामान्यत्वप्रसङ्गादनेकसमवायीत्युक्तम् । अनेकसमवायीत्युक्ते संयोगस्यावयविनश्च प्रसङ्गान्नित्यमित्युक्तम् । नित्यमनेकसमवायीत्युक्ते सलिलाद्यनेकपरमाणुगतरूपादीनामपि प्रसङ्गादेकं स्यादित्युक्तम् ॥ ५२ ॥

विशेषं लक्षयति ।

अजातिरेकवृत्तिश्च विशेष इति शिष्यते[2] ।

जातिसमवाययोरपि जातिशून्यत्वात् तद्व्यवच्छेदायोक्तमेकवृत्तिरिति । अनेकवृत्तित्वात् तयोः । रूपादीनामप्येकवृत्तित्वादजातिरित्युक्तम् । तेषां जातिमत्त्वात् । एकद्रव्याः स्वरूपसन्तो विशेषा इत्याचार्याः । तत्राप्येकद्रव्या इति सामान्यसमवाययोर्व्यु-

गादन्ते चकाराच्च लक्षणद्वयं माशङ्कीरित्येकलक्षणतया व्याचष्टे । नित्यमिति ॥ ५२ ॥

अथ समवायिप्रस्तावाद् विशेषो लक्ष्यत इत्याशयेनाह । विशेषमिति ।

रूपादीनामिति कर्मणामप्युपलक्षणम् । द्रव्यस्य तूभयमपि व्यावर्तकमिति भावः । अथ व्युत्पत्त्यतिशयार्थं किरणावलीकारोक्तलक्षणं पदप्रयोजनं चाह ।

(१) नित्यमेकं सद–पा· B पु· ।

(२) कथ्यते–पा· C पु· ।

दासः[१] । स्वरूपसन्त इति सत्तासमवायेन सतां द्रव्यगुणकर्मणामिति । समानजातीयाः समानगुणकाः परमाणवो मुक्तात्मानश्च परस्परव्यावर्तकधर्मसमवायिनः द्रव्यत्वाद् घटवदित्यनुमानाद् विशेषसिद्धिरिति ॥

समवायलक्षणमाह ।

समवायस्तु सम्बन्धो नित्यः स्यादेक एव सः[२] ॥ ५३ ॥

नित्य इति संयोगादेर्व्युदासः । सम्बन्ध इति नित्याकाशादेः । न च नित्यविभूनां संयोगैरतिव्याप्तिः संयोगहेतूनामन्यतरकर्मोभयकर्मणामसम्भवेन तेषां

एकद्रव्या इत्यादि । विप्रतिपन्नत्वाद् विशेषसद्भावे प्रमाणं चाह । समानजातीया इत्यादिना । अत्र पक्षविशेषणैः जात्यादिना अर्थान्तरत्वनिरासः । एतेन व्यावर्तकधर्ममात्रसिद्धौ ते च सम्प्रतिपन्नजात्यादिव्यतिरिक्ताः तदात्मकत्वे बाधकोपपन्नधर्मत्वाद् व्यतिरेकेण जात्यादिधर्मवदिति परिशेषाद् विशेषसिद्धिरित्यर्थः ॥

अथ परिशेषात्[३] समवायो लक्ष्यत इत्याह । समवायस्त्विति । विभवो नित्यसंयुक्ताः । कदाचिन्न विभज्यन्ते चेति केचित् । तथा च तेष्वतिव्याप्तिरित्याशङ्क्य तेषामेवाभावान्नैष दोष इत्याह । न चेति । संयोगाभावे कारणमाह । संयोगहेतूनामिति । तदसम्भवश्च तेषां

---

(१) व्यवच्छेदः—पा॰ B पु॰ ।

(२) एव तु—पा॰ A पु॰ ।

(३) अथार्थान्तरत्वपरिशेषात्—पा॰ F पु॰ ।

संयोगस्यैवाभावात् । एक एवायं समवायः । सत्तासामान्यवत् तत्सम्बन्धिभेदाद्भेदेन व्यपदिश्यत इति । सूत्रं तु इहेति यतः कार्यकारणयोः स समवाय इति । अत्र कार्यकारणयोरित्ययुतसिद्धयोरुपलक्षणम् । तेनायुतसिद्धयोरवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषतद्वतोश्च योऽयमिह तन्तुषु पट इत्यादिरिहप्रत्ययो भवति स समवाय इति सूत्रार्थः । अयुतसिद्धयोरिति युतसिद्धकुण्डबदरादिसंयोग-

---

निष्क्रियत्वान्निरवयवत्वाच्चेति शेषः । जन्यसम्बन्ध एव संयोगव्यवहारदर्शनान्नाजः संयोगोऽस्तीति भावः । ननु विभवो मिथः संयुज्यन्ते द्रव्यत्वात् सम्मतवदिति तत्सिद्धिरिति चेन्न युतसिद्धेस्तत्रोपाधित्वात् प्रकृते तदभावादिति सङ्क्षेपः । विस्तरस्तु निकषे द्रष्टव्यः । श्लोकशेषं व्याचष्टे । एक एवेति । ननु घटसमवायः पटसमवाय इति भेदव्यवहारदर्शनात् समवायो नानेति प्राभाकरास्तान् प्रत्याह । सत्तेति । घटसत्ता पटसत्तेत्यादिवदौपाधिक इत्यर्थः । अत्र सौत्रं लक्षणं(१) चाह । सूत्रं त्विति । ननु कार्यकारणयोरेव समवायश्चेत् कथमस्य पञ्चपदार्थवृत्तित्वमित्याशङ्क्य व्याचष्टे । अत्रेति । उपलक्षणफलाभिधानपूर्वकं लक्षणं निष्कृष्याह । तेनेत्यादि । अयुतसिद्धयोरिहप्रत्ययहेतुः सम्बन्धः समवाय इत्यर्थः । अत्र सम्बन्धपदेन अदृष्टादिहेत्वन्तरव्युदासः । तथा कार्यकारणभावादीना-

---

(१) सूत्रोक्तं लक्षणं—पा· E पु· ।

व्युदासः। इहेति चायुतसिद्धयोरेव कार्यकारणभावादिसम्बन्धो व्युदस्यते। युतसिद्धिः पृथक्सिद्धिः सा चासम्बद्धयोर्विद्यमानतेत्युक्तम्। तदभावोऽयुतसिद्धिः। सत्तावदेक एवायं समवायः सर्वत्रेत्यत्रापि सूत्रम्। तत्त्वम्भावेनेति। तत्त्वमेकत्वं भावेन सत्तया व्याख्यातमित्यर्थः। इह गवि गोत्वमिति प्रत्ययोऽधिकरणाधिकर्तव्यसम्बन्धनिबन्धनः अबाधितेहप्रत्ययत्वादिह कुण्डे बदरणीतिप्रत्ययवदित्यनुमानात् समवायसिद्धिरिति ॥ ५३ ॥

एवं लक्षिता षट्पदार्थी एतस्यामेव भावात्मकं

मपि मुख्यार्थवृत्तिना तेनैव व्युदासादिहेत्यादिविशेषणं व्यर्थमेव तथापि स्पष्टार्थमुक्तमिति द्रष्टव्यम्। युतसिद्धिपदार्थाभिधानपूर्वकमयुतसिद्धिपदार्थमाह। अयुतसिद्धिरित्यादि। मिथ आश्रयाश्रयिभावनियमानपेक्षसत्ताकत्वं युतसिद्धिः तत्सापेक्षसत्ताकत्वमयुतसिद्धिरिति पीडार्थः(१)। सूत्रे तत्त्वशब्देन बुद्धिस्थमेकत्वं परामृश्यत इत्याह। तत्त्वमेकत्वमिति। सत्तया व्याख्यातमिति। यथैकापि सत्ता सम्बन्धिभेदाद्भेदेन व्यपदिश्यते तद्वत् समवायोऽपीत्यर्थः। अनुपदमेवोक्तं चैतदिति भावः। अथेहप्रत्ययं प्रमाणपरत्वेनापि व्याचष्टे। इह गवि गोत्वमित्यादि। भ्रान्तेहप्रत्ययव्यभिचारनिवारणार्थमबाधितेत्युक्तम्। घटादिप्रत्ययव्युदासार्थमिहेति विशेषणम् ॥ ५३ ॥

प्रासङ्गिकं निगमयति। एवमिति। ननु षडेवेति-

(१) पदार्थ इति क्वचित्।

विश्वमन्तर्भवति[1] । भावव्यतिरिक्तोऽभाव इति तेन सह सप्तैव पदार्था इति नियमः[2] । कौमारिलास्तु सामान्यान्तानेव चतुरः पदार्थानुररीकृत्य विशेषं समवायं चापलपन्तीत्याह ।

विशेषसमवायौ द्वौ नाङ्गीचक्रुः कुमारिलाः ।

प्राभाकरास्तु विशेषमवजानते प्रतिजानते च शक्तिसंख्यासादृश्यादयः पृथक् पदार्था इत्याह ।

पञ्चार्थान् गुरवः प्राहुर्विशेषेण विवर्जितान् ॥५४॥

नियमः कथमित्याशङ्क्य किं न्यूनत्वादनियमः आधिक्याद्वा । नाद्यः षण्णां साधितत्वादित्यर्थः । न द्वितीयः भावस्याधिक्यासम्भवादित्याह । एतस्यामेवेति । अभावाधिक्यं चेदिष्टमेवेत्याह । भावव्यतिरिक्त इति । अभावस्तु भावव्यतिरिक्त इति हेतोस्तेनैव पदार्थातिरेको न तु भावान्तरेण स चेष्ट एवेति षडेव पदार्था इति नियमसिद्धिरित्यन्वयार्थाभिप्रायः । षडेवेत्यवधारणं न्यूनाधिकसंख्याव्यवच्छेदार्थमित्युक्तम् ॥

तत्र न्यूनसंख्यायाः कुतः प्रसक्तिरित्यत उक्तं संग्रहे विशेषेत्यादि । तच्च गुरुमतवत् केषाञ्चिदावापोऽपि स्यादित्याह । अनादिकारणेषु घटपटादिकार्यजननानुकूलाः शक्तयोऽतीन्द्रियाः नित्याः सर्वत्रैकजातिवत् प्रत्येकपरिसमाप्ताश्च संख्या चैकत्वद्वित्वाद्यनेकरूपा सर्वत्रैकैका

---

(१) विश्वमपि जगदन्तर्भवति–पा· B पु· ।

(२) इति स्थितिः–पा· B पु· ।

तदेतद्द्वयं वार्तम्[1]। विशेषसमवाययोः समर्थनात्[2]। स्वरूपसहकारिव्यतिरेकेण शक्तेरभावात्। संख्याया गुणगणनायामन्तर्भावात् सामान्य एव सादृश्यस्यान्तर्भावाच्च। यथाहुः।

नित्या च जातिवत् प्रत्येकपरिसमाप्तिशक्तिवत् स्वातिरिक्तसप्तपदार्थवृत्तिरपेक्षाबुद्धिव्यङ्ग्या उत्पादविनाशौ तु शक्तिवदेव तत्समवायानामेव न सङ्ख्याया इति। सादृश्यं तु सदृशबुद्धिवेद्यं द्रव्यगुणकर्मवृत्तित्वात् ततोन्यदनुवृत्तिबुद्ध्यविषयत्वादसम्बन्धरूपत्वाच्च समवायातिरिक्तं पृथगेवेति तेषां मतम्। अत्र सादृश्यादय इत्यादिशब्दः प्रामादिकः अष्टपदार्थवादिभिस्तैः शक्त्यादित्रयादन्यस्यादिशब्दग्राह्यस्यानभिधानात् यथोक्तं प्रमेयपरायणे द्रव्यगुणकर्मसामान्यशक्तिसङ्ख्यासादृश्यसमवाया अष्टौ पदार्था इति। तथाग्रेतरग्रन्थे तावत एव पार्थक्यनिरासाच्चेत्यास्तां तावत्॥ ग्रेतनग्रन्थे

तदिदं मतद्वयमयुक्तमित्याह। तदेतदिति। वार्त्तं फल्गु निःसारमयुक्तमिति यावत्। वार्त्तं फल्गुन्यरोगे चेत्यमरः। तत्र न्यूनत्वशङ्का दत्तोत्तरेत्याह। विशेषेति। आधिक्यशङ्कां च सङ्कोचयति। स्वरूपेति। मृदादिकारणस्वरूपसहकारिसाकल्यातिरिक्तशक्तिपदार्थसद्भावे प्रमाणाभाव इत्यर्थः। सङ्ख्याया इति द्रव्यगतायाया इति शेषः। ता त्वा गुणादिगतत्वारोपितेति भावः।

---

(१) अयुक्तम्—पा॰ B पु॰।
(२) समर्थितत्वात्—पा॰ B पु॰।

सामान्यान्येव भूयांसि गुणावयवकर्मणाम् ।
भिन्नप्रधानसामान्यवर्ति सादृश्यमुच्यते ॥ इति ॥ ५४ ॥

एवं प्रमेयप्रसङ्गात् पदार्थषट्कं लक्षयित्वा प्रकृतमेवानुक्रम्य[1] संशयलक्षणमाह ।

संशयः कथितो ज्ञानमवधारणवर्जितम् ।

अनवधारणात्मकः प्रत्ययः संशय इति ।

सामग्रीभेदेन संशयत्रैविध्यमाह ।

समानानेकधर्माभ्यां विमतेश्च तदुद्भवः ॥ ५५ ॥

समानधर्माणामनेकेषां साधारणो धर्मः एकः

सामान्यानीति । गोसदृशो गवय इत्यत्र यानि गवि गुणावयवकर्मसामान्यानि तान्येव भूयांसि गवये दृश्यमानानि गोसादृश्यमित्युक्तमित्यर्थः । नन्वेतद्भवान्तरेऽपि समानमत आह । भिन्नेति । भिन्नं गोत्वादन्यत् प्रधानसामान्यं गवयत्वरूपं यस्य पिण्डस्य तस्मिन् वर्तमानमित्यर्थः । इति प्रमेयपदार्थः ॥ ५४ ॥

ननु षट्पदार्थनिरूपणानन्तर्यं कथं संशयस्य प्रमेयानन्तरोद्दिष्टस्येत्याशङ्क्याह । एवं प्रमेयेति ।

अवधारणवर्जितमित्यस्यार्थमाह । अनवधारणात्मक इति ।

ननूत्तरार्द्धे कारणभेदकथनस्य किं प्रयोजनमत आह । सामग्रीतीति ।

धेन सङ्

द्वन्द्वान्ते श्रुतस्य धर्मशब्दस्य प्रत्येकसम्बन्धेनासङ्ग्रहं व्याचष्टे । समानधर्म इति । अनेकधर्म इत्यत्रानेकेषां धर्म

---

(१) मेवोपसङ्क्रम्य-पा॰ B पु॰ ।

साधारणः अनेकोऽसाधारणः । अनेको धर्मः एकस्यैवासाधारणो धर्म इति यावत् । विमतिर्वादिविप्रतिपत्तिः । एतस्मात् कारणत्रयात् परस्परविरुद्धारोप्यविशेषस्मरणसापेक्षादन्यतरकोटिनिर्णायकप्रमाणवैधुर्ये सति यथायथं संशयो भवति । तत्राद्यो यथा स्थाणुपुरुषसाधारणोर्ध्वतादिदर्शनेन स्थाणुरयं पुरुषो वेति । द्वितीयस्तु गन्धवत्त्वात् पृथिवी नित्यानित्या वेति । तृतीयस्तु भौतिकाहङ्कारिकत्वेन सांख्यवैशेषिकविप्रतिपत्तेः किंप्रकृतीनीन्द्रिया[1]णीति । के-

इति षष्ठीसमासे पूर्वाभेदेन पौनरुक्त्यादश्रुतसम्बन्धलक्षणाद्दोषाच्च निषादस्थपतिवत् कर्मधारय एवेति व्याचष्टे । अनेकोऽसाधारण इति । सामर्थ्यलभ्यं धर्मिणमाह । एकस्यैवेति । एवं पदार्थमुक्त्वा कारणान्तराणि समुच्चिन्वन् वाक्यार्थमाह । एतस्मादिति । विरुद्धारोप्यविशेषः स्थाणुत्वपुरुषत्वनित्यत्वानित्यत्वादयः तेषां स्मरणमित्यग्रहणस्याप्युपलक्षणम् । निर्णायकप्रमाणं वक्रकोटरादि शिरःपाण्यादि बन्धवत्त्वादिति अनित्यव्यावृत्तनिरवयवत्वादिधर्मकस्याकाशादेर्नित्यत्वं दृष्टं तथा नित्यव्यावृत्तसावयवत्वादिधर्मकस्य द्व्यणुकादेरनित्यत्वं च दृष्टम् गन्धस्तूभयव्यावृत्तधर्मत्वादुभयरूपतां पृथिव्याः सम्पादयन् नित्यानित्या वेत्यनवधारणज्ञानं कोटीत्यर्थः । भौतिकानीति वैशेषिकाः । आहङ्कारिकाणीति सांख्याः । ननु यथासंख्यं पाठक्रमादर्थक्रमस्य बलीयस्त्वादिति विप्रतिपत्ते-

(१) किंप्रकृतिकानीन्द्रिया–पा· B पु· ।

चित्तूपलब्ध्यनुपलब्ध्योरपि पृथक् संशयकारणत्वमिच्छन्ति । यथा कूपखननानन्तरमुदकमुपलभ्य किं पूर्वं सदेवोदकमिदानीमभिव्यक्तमुपलभ्यते किं वा पूर्वमसदेव खननव्यापारजनितमुपलभ्यत इत्युपलब्धेः संशयः । अनुपलब्धेस्तु किं सन्नेव पिशाचो नोपलभ्यते किं वासन्निति । अनयोः समानधर्मान्तर्भावमाचक्षते वार्त्तिककाराः । तथाहि पूर्वं सदेव किञ्चित्केनचिद्व्यापारेणाभिव्यक्तमुपलभ्यते । यथा प्रदीपारोपेण न घटः[1] किञ्चासदेव जातमुपलभ्यते । यथा कुलालादिव्यापारानन्तरं स एवेति सदसतोः साधारणेनोपलब्धिलक्षणेन धर्मेण संशयः । अनुपलब्धिश्च सतामपि परमाण्वादीनामसतां च शशविषाणादीनां च दृश्यत इत्यत्रापि समानधर्मादेव संशयः । अत्र सूत्रम् । समानानेकधर्मोपपत्तेर्विप्रति-

रिति संशयः स्यात् तटस्थस्येति शेषः । किंप्रकृतिकानीति भूतप्रकृतिकान्यहङ्कारप्रकृतिकानि वेत्यर्थः । अथ भातिसर्वज्ञाय संशयपाञ्चविध्यं कर्तुमनुवदति । केचित्त्विति । क्रमाद्भेदद्वयं चोदाहरति । यथेत्यादि । तदेतद्वृद्धैरेव प्रत्याख्यातमित्याह । अनयोरिति । अन्तर्भावप्रकारं प्रपञ्चयति । तथाहीत्यादि । उपलब्ध्यनुपलब्ध्योः सदसत्साधारणधर्मत्वात् समानधर्मान्तर्भाव इत्यर्थः । अत्र स्वोक्तत्रैविध्ये सूत्रसम्मतिमाह । अत्र सूत्रमिति । हन्त सूत्रे पाञ्च-

(१) प्रदीपारोपयोरघटः— पा० C पु० ।

पत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्षः संशय इति । अत्रोपलब्ध्यनुपलब्धिशब्दाभ्यां साधकबाधकप्रमाणयोर्ग्रहणं(१) तयोरव्यवस्था अभावः तस्मिन् सति विशेषस्मरणापेक्षः समानानेकधर्मविप्रतिपत्तिभ्यः संशयो भवतीति सूत्रार्थः ॥ ५५ ॥

प्रयोजनलक्षणमाह ।

यदुद्दिश्य प्रवर्तन्ते पुरुषास्तत् प्रयोजनम् ।

उद्देश्यं प्रयोजनम् । तदुक्तम् यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनमिति ।

दृष्टान्तलक्षणमाह ।

व्याप्तिसंवेदनस्थानं दृष्टान्त इति गीयते ॥ ५६ ॥

स च साधर्म्यवैधर्म्यभेदेन द्विविधो भवेत् ।

व्याप्तिग्रहणभूमिर्दृष्टान्त इति । स च द्विविधः ।

विध्यं प्रतीयत इत्याशङ्क्य त्रैविध्यपरतया व्याचष्टे । अत्रेति । साधकबाधकप्रमाणाभावसहकृताद् विशेषाग्रहणं तत्स्मरणसव्यपेक्षात् समानधर्मादिकारणत्रयादेव संशयो जायते एतत्त्रैविध्यपरमेव सूत्रमित्यर्थः । इति संशयपदार्थः ॥ ५५ ॥

यदुद्दिश्येति । प्रेक्षावत्प्रवृत्तिफलं प्रयोजनम् । यागादिप्रवृत्तेः स्वर्गादि कृष्यादिप्रवृत्तेः प्रसवादिकं चेत्यर्थः । अधिकृत्य विषयीकृत्योद्दिश्येति यावत् । उद्देशोऽभिसन्धिः । इति प्रयोजनपदार्थः ॥

---

(१) रुपादानम्–पा॰ B पु॰ ।

साधर्म्यवैधर्म्यभेदात् । तत्र साधनधर्मप्रयुक्तसाध्यधर्मवान् साधर्म्यदृष्टान्तः । यथा कृतकत्वेन शब्दानित्यत्वसाधने घटः । साध्यधर्मनिवृत्तिप्रयुक्तसाधनधर्मनिवृत्तिमान् वैधर्म्यदृष्टान्तः । यथा तत्रैवाकाशः । तदुक्तम् । लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति । अत्र लौकिका वैदिकबुद्धिविरहिणः प्रमाणतर्काभ्यामर्थपरीक्षणक्षमाः परीक्षकाः तेषामुभयेषामपि बुद्धिसम्प्रतिपत्तिर्यत्रास्ति स दृष्टान्तः । सर्वेषां सम्प्रतिपत्तिविषय इति यावत् । अत्र वादिप्रविवादिनोः सम्प्रतिपत्तौ तात्पर्यमिति ॥ ५६ ॥ ८८ ॥

साधर्म्यदृष्टान्तस्य विवक्षितं लक्षणमुदाहरणं चाह । तत्रेति । वैधर्म्यदृष्टान्तस्याप्याह । साध्यधर्मनिवृत्तीति । ननु लौकिकपरीक्षकाणां को विशेषः उभयेषां लौकिकसिद्धत्वाविशेषादित्याशङ्क्य भेदमाह । लौकिका इति । वैदिकबुद्धिविरहिण इति किं तु लौकिकव्यवहारमात्रकुशला इत्यर्थः । बुद्धिसाम्यं[1] बुद्धित्वजातिरिति शङ्कां वारयति । बुद्धिसम्प्रतिपत्तिरिति । एतत्कोटिद्वयोपादानं सर्वोपलक्षणं कोट्यन्तरपर्युदासपरं तदसम्भवादित्याह । सर्वेषामिति । तर्हि कुत्रापि सर्वसम्प्रतिपत्त्यसम्भवाद् दृष्टान्तासिद्धिरित्याशङ्क्याह । वादिप्रतिवादिनोरिति । तत्सम्प्रतिपत्तौ सर्वसम्प्रतिपत्तिः स्यादेवेति भावः । इति दृष्टान्तपदार्थः ॥ ५६ ॥ ८८ ॥

---

(१) बुद्धिसामान्यं–पा॰ E पु॰ ।

सिद्धान्तलक्षणं तदवान्तरविधाश्च दर्शयति ।

अभ्युपेतः प्रमाणैः स्यादाभिमानिकसिद्धिभिः॥५७॥
सिद्धान्तः सर्वतन्त्रादिभेदात् सोऽपि चतुर्विधः ।

अनित्यः शब्द इति केषाञ्चिन्मतम्(१) । अन्येषां तु नित्य इति । तत्र प्रमाणैरभ्युपगतः सिद्धान्त इत्युक्तेऽन्यतरस्य सिद्धान्तता न स्यात् । वस्तुनो द्वैरूप्यासम्भवेनोभयोरपि प्रमाणमूलत्वासम्भवादत उक्तम् । आभिमानिकसिद्धिभिरिति । तत्तद्वादिनां प्रमाणमूलत्वाभिमानमत्र विवक्षितम् न तु तत्त्वतः प्रमाणमूलत्वमित्यर्थः । तदुक्तम् । तन्त्राधिकरणाभ्युपगमसंस्थि-

---

उत्तरश्लोके सर्वतन्त्रेत्यादिश्लोकशेषस्य लक्षणानुपयोगादानर्थक्यमाशङ्क्याह । सिद्धान्तेति । आभिमानिकसिद्धिभिरिति । अभिमानमात्रसिद्धप्रमाणभावैरित्यर्थः ।

एतद्विशेषणप्रयोजनमाह । अनित्य इत्यादि । अन्यतरस्य सिद्धान्तता न स्यादिति । सिद्धान्तलक्षणाभावादव्याप्तिः स्यादित्यर्थः । तत्र हेतुमाह । तदुक्तमिति । तन्त्राधिकरणाभ्युपगमसंस्थितिरिति । तन्त्रं शास्त्रमधिकरणमाश्रयो येषामर्थानां ते तन्त्राधिकरणाः तेषामभ्युपगमसंस्थितिरित्थंभावव्यवस्थाधर्मनियम इति यावत् सिद्धान्तः तथा च शास्त्रसिद्धार्थस्यैवाभ्युपगमः सिद्धान्तो नान्यस्येत्यर्थः । तथा च वार्त्तिकम् योऽर्थो न शास्त्रितस्तस्याभ्युपगमो न

---

(१) केषाञ्चित् सिद्धान्तः—पा० B पु० ।

तिः[1] सिद्धान्त इति । स च सिद्धान्तः सर्वतन्त्रादिभेदाच्चतुर्विधो भवति । तत्रापि सूत्रम् । स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावादिति ॥ ५७ ॥ ऽऽ ॥

तत्र सर्वतन्त्रसिद्धान्तमुदाहरणं च दर्शयति ।

सर्वतन्त्राविरुद्धोऽर्थः स्वतन्त्रेऽधिकृतश्च यः ॥ ५८ ॥
स सर्वतन्त्रसिद्धान्तो यथामानेन मेयधीः ।

प्रमाणात् प्रमेयसिद्धिरित्येवं सर्वशास्त्रानुमतं स्वशास्त्रे चाभ्युपगतमिति सर्वतन्त्रसिद्धान्तो भवतीति ॥ ५८ ॥ ऽऽ ॥

स्वतन्त्र एव सिद्धोऽर्थः परतन्त्रैर्निवारितः ॥ ५९ ॥
प्रतितन्त्रो यथान्याये सर्वज्ञस्य प्रमाणता ।

ईश्वरः प्रमाणमिति योऽर्थः[2] तन्त्रान्तरैर्निषिद्धः स्वशास्त्रे चाभ्युपगतो नैयायिकस्य प्रतितन्त्रसिद्धान्त इति ॥ ५९ ॥ ऽऽ ॥

अनुमेयस्य सिद्धयर्थो योऽनुषङ्गेण सिद्धयति ॥ ६० ॥

सिद्धान्त इति । तत्रापीति । चातुर्विध्ये ऽपीत्यर्थः । सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावाद् भिन्नार्थत्वाच्चातुर्विध्यं सिद्धमिति सूत्रार्थः ॥ ५७ ॥ ऽऽ ॥

लक्ष्ये लक्षणं योजयति । प्रमाणादिति । अत्र सर्वतन्त्रशब्दः शास्त्रवचन इत्याह । सर्वशास्त्रेति ॥ ५८ ॥ ऽऽ ॥

प्रतितन्त्रो निगदव्याख्यातः ॥ ५९ ॥ ऽऽ ॥

---

(१) प्रमाणाभ्युपगमसंसिद्धः—पा॰ B पु॰ ।
(२) मित्येषोऽर्थः—पा॰ B पु॰ ।

स स्यादाधार[1]सिद्धान्तो जगत्कर्ता यथेश्वरः ।

अनुमेयानुषक्तसिद्धिरधिकरणसिद्धान्तः । यथा महीमहीधरमहोदधिप्रभृतीनां कर्तृमत्त्वस्य कार्यत्वानुमानेन सिद्धौ ईश्वरसिद्धिः । उपादानादिगोचरापरोक्षज्ञानचिकीर्षाप्रयत्नादिमतः कर्तृत्वात् पक्षीकृतविषयस्य ज्ञानादेरीश्वरव्यतिरेकेणान्यत्रासम्भवात् । अन्ये तु हेतुसिद्ध्यनुषङ्गिसिद्धिरप्यधिकरणसिद्धान्त इत्याहुः । यथेन्द्रियव्यतिरिक्तचेतनसाधनस्य दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति हेतोः सिद्धावनुषङ्गि-

---

अधिक्रियत इत्यधिकरणमनुमेयार्थः तत्सिद्धौ सामर्थ्यादर्थान्तरसिद्धिरधिकरणसिद्धान्त इत्याशयेनाह । अनुमेयस्येति । उदाहरति । यथेति । मह्यादिकं सकर्तृपूर्वकं कार्यत्वादिति कर्तृसिद्धावपीश्वरसिद्धिरित्यर्थः । नन्वदृष्टद्वारा जीवानामेव कर्तृत्वे कथमीश्वरसिद्धिरित्याशङ्क्य सामर्थ्यादिति मन्वानस्तदेवाह । उपादानादीति । आदिशब्दात् कारणान्तरसंग्रहः । प्रयत्नादित्यादीशब्देन साकल्योपनीतकार्यानुकूलकायव्यापारादिसंग्रहः । तथापि कथमीश्वरसिद्धिरत आह । पक्षीकृतेति । अथास्यैव मतान्तरेण लक्षणान्तरमाह । अन्ये त्विति । उदाहरति । यथेति । दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति दर्शनगृहीतस्यार्थस्य स्पर्शनेन प्रत्यभिज्ञानादित्यर्थः । तथा चेन्द्रियचैतन्यपक्षे अन्यस्यान्यानुभूतार्थप्रत्यभिज्ञानापत्तेस्तत्करणकस्तदन्य एव प्रत्यभिज्ञाने त्वीन्द्रियातिरिक्तात्मसिद्धिरिति भावः । तत्रोक्तहेतुसिद्धेस्तन्नान्तरीयकतयेन्द्रियनानात्वादिसिद्धि-

---

(१) स एवाधार पा॰ A पु॰ ।

णामिन्द्रियनानात्वादीनां सिद्धिरिति ॥ ६० ॥ ऽऽ ॥

अभ्युपगमसिद्धान्तमुदाहरणं च दर्शयति ।

साधितः परतन्त्रे यः स्वतन्त्रे च समाश्रितः॥ ६१ ॥
स ह्यभ्युपगमो न्याये मनसोऽनुमतिर्यथा ।

काणादतन्त्रसाधितस्य मनसः समाश्रयणं नैयायिकानामभ्युपगमसिद्धान्त इति ॥ ६१ ॥ ऽऽ ॥

तस्यैव लक्षणान्तरमाह ।

तद्विशेषपरीक्षा वा सद्भावे ऽन्यत्र साधिते ॥ ६२ ॥
यथान्यत्र मनःसिद्धौ तस्याक्षत्वपरीक्षणम् ।

तन्त्रान्तरेण साधितसद्भावस्य कस्यचिदर्थस्य किञ्चिद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः । यथा तस्यैव मनसो न्याये सूत्रकारैरेवात्मप्रतिपत्तिहेतूनां मनसि सद्भावादिति चोद्यपूर्वकं ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रमित्यादिभिरिन्द्रियत्वपरीक्षणमिति ।

रित्याह । इति हेतोरिति । आदिशब्दान्नियतविषयत्वैककर्तृप्रेर्यत्वादिसंग्रहः ॥ ६० ॥ ऽऽ ॥

विधान्तरभ्रमं वारयति । तस्यैव लक्षणान्तरमिति ।

यथान्यत्रेत्येतद्विवृणोति । यथा तस्यैवेति । आत्मप्रतिपत्तिहेतूनामात्मसाधकलिङ्गानामिच्छादीनां मनसि सम्भवान्मनोधर्मत्वोपपत्तेरात्मेदं मनःपदार्थो नेन्द्रियमिति चोद्य सूत्रार्थः । अस्तु तस्य ज्ञातुः सुखाद्युपलम्भे कस्यचित्कारणस्यावश्यम्भावात् तस्य सञ्ज्ञामात्रे विवादो नेन्द्रियत्वे इति समाधानं सूत्रार्थः । आदिशब्दान्नियमश्च निरनुमान इत्याद्युत्तरसूत्रसंग्रहः । प्रथमलक्षणे वृद्धसम्मति-

परतन्त्रोक्तः स्वतन्त्रे चानिषिद्धार्थोऽभ्युपगमसिद्धान्त इत्याचार्याः ॥ ६२ ॥ ऽऽ ॥

अवयवलक्षणमाह ।

यः परार्थानुमानस्य प्रयोगो वाक्यलक्षणः ॥ ६३ ॥
तस्या[१]वान्तरवाक्यानि कथ्यन्ते ऽवयवा इति ।

महावाक्यात्मके परार्थानुमानप्रयोगे ऽवान्तरवाक्यान्यवयवा इति । स्वार्थानुमाने वाक्यप्रयोगाभावात् परार्थेत्युक्तम् ॥ ६३ ॥ ऽऽ ॥

ते चावयवाः प्रतिज्ञादयः पञ्चेत्याह ।

ते प्रतिज्ञादिरूपेण पञ्चेति न्यायविस्तरः ॥ ६४ ॥

तदुक्तम् । प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति । न्यायविस्तर इति वदता मतान्तरेषु[२] यो विशेषः सूचितस्तमेव दर्शयति[३] ।

माह । परतन्त्रोक्त इति । इति सिद्धान्तपदार्थः ॥ ६२ ॥ ऽऽ ॥

पूर्ववदिदमपि सिद्धान्तभेदस्यैव लक्षणान्तरमिति मन्दभ्रमवारणार्थमाह । अवयवेति । ननु वाक्यस्यावयवाः पदान्येव तत्र कुतोऽवान्तरवाक्यानीत्यत आह । महावाक्यात्मक इति । दर्शपूर्णमासादिप्रकरणपठिताङ्गवाक्येष्वतिव्याप्तिपरिहारार्थमाह । अनुमानप्रयोग इति । परार्थविशेषणस्य प्रयोजनमाह । स्वार्थेति । अन्यथा तस्यापि लक्षणकोटिनिवेशादतिव्याप्तिः स्यादिति भावः ॥ ६३ ॥ ऽऽ ॥

---

(१) तत्रा–पा॰ B पु॰ । (२) तन्त्रान्तरीयो-पा॰ C पु॰ ।
(३) स्फुटयति–पा॰ B पु॰ ।

त्रीनुदाहरणान्तान् वा यद्वोदाहरणादिकान् ।
मीमांसकाः सौगतास्तु सोपनीतिमुदाहृतिं ॥ ६५ ॥

मीमांसकाः प्रतिज्ञाहेतूदाहरणान्युदाहरणोपनयनिगमनानि वा त्रय एवावयवा इति सङ्गिरन्ते । सुगतमतानुवर्त्तिनस्तूदाहरणोपनयौ द्वावेवावयवा इत्यातिष्ठन्ते[1] तत्रोपनयनिगमनयोः प्रतिज्ञाहेत्वोश्च प्रयोजनान्तरसद्भावोऽन्यत्र साधित इति नेह प्रतन्यत इति भावः ॥ ६४ ॥ ६५ ॥

अथ त्रीनित्याद्युत्तरश्लोके मतान्तरोपन्यासस्य प्रसङ्गकमाह । न्यायविस्तर इति। वदतेति । सङ्गिरन्ते । आतिष्ठन्त इति च प्रतिज्ञातवन्त इत्यर्थः । समः प्रतिज्ञाने आङः स्थः प्रतिज्ञायामिति चोभयत्रापि क्रमादात्मनेपदम् । तावतैव व्याप्तिपक्षधर्मतालाभादतिरिक्तावयवाङ्गीकारे प्रतिज्ञाहेत्वोर्निगमनोपनयाभ्यां पुनरुक्तिरित्यन्येषामभिसन्धिः तर्ह्यनयोः प्रयोजनं किमिति नोक्तं संग्रहकारेणेत्यत आह । प्रतिज्ञाहेत्वोश्चेति । अन्यत्रेति । उदयनग्रन्थेष्वित्यर्थः । अत्र प्रतिज्ञायास्तावद्वक्ष्यमाणसाधनस्याश्रयविषयप्रत्यायनं प्रयोजनम् अन्यथानिराश्रयस्य निर्विषयस्य तस्य प्रयोगायोगाद्धेतोस्तु साधनस्वरूपप्रत्यायनं प्रयोजनमन्यथा साध्यस्य साधनाकाङ्क्षानिवृत्तेर्व्याप्तिपक्षधर्मतयोश्च सम्बन्धिधर्मिनिरूप्ययोस्तदप्रतीतावप्रतीतेश्चेत्यनुसन्धेयम् । उदाहरणे तु न कस्यचिद् विवादः अन्यथा व्याप्त्यप्रतीतेः उपनयनिगमनयोस्तु प्रयोजनं स्वयमेव वक्ष्यतीति न किञ्चिदवशिष्यते ॥ ६४ ॥ ६८ ॥

(१) इत्याचक्षत-पा· D पु· ।

तेषु चावयवेषु प्रतिज्ञा नाम परप्रतिपादनार्थं पक्षवचनमित्याह ।

तत्र प्रतिज्ञा पक्षोक्तिः प्रतिपादयितुं परम् ।

तदुक्तम् । साध्यनिर्देशः प्रतिज्ञेति । अत्र साध्यशब्दः पक्षवचनः । पक्षः साध्यान्वितो धर्मीत्युक्तमेव । धर्मिनिर्देशपूर्वकं साध्यनिर्देशः कार्यः शब्दोऽनित्य इति । यथाहुः ।

सिद्धं धर्मिणमुद्दिश्य साध्यधर्मो विधीयते ।
तथा ।
यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।
तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणम् ॥ इति ।

ननु संग्रहे पक्षोक्तिः प्रतिज्ञेत्युक्तं सूत्रे तु साध्योक्तिरिति विरोधमाशङ्क्याह । अत्र साध्यशब्द इति । तर्हि धर्मिमात्रनिर्देशः प्रतिज्ञेत्यर्थः स्यादित्याशङ्क्याह । पक्ष इति । ननु साध्यधर्मनिर्देश एव क्रियतां किं तद्विशिष्टधर्मिनिर्देशगौरवेणेत्यत आह । धर्मिनिर्देशेति ।

कोऽयं नियम इत्याशङ्क्य भित्तिकचित्रकर्मवन्निराश्रयधर्मविधानायोगादित्याशयेनाह । सिद्धमिति । उद्देश्यविधेयलक्षणपर्यालोचनयापि सिद्धसाध्यविधानं गम्यते इत्याह । तथा यद्वृत्तेति । यद्वृत्तं यच्छब्दः एवं तद्वृत्तमपि तच्छब्दः । प्राथम्यं विधेयात् प्रागुच्चार्यत्वम् । आदिशब्दात् प्राधान्यादिसंग्रहः । चकाराद्विधेयस्य गुणत्वादिसंग्रहः । उपादेयेति विधेयोपलक्षणम् । यथा ग्रहं समार्ष्टीत्यत्र यो ग्रहस्तं संमृज्यादिति वचनव्यक्तग्रहस्योद्देश्यत्वं संमार्गस्य विधेय-

हेतुलक्षणमाह ॥

लिङ्गस्य वचनं हेतुः साधकत्वप्रकाशकम्[1] ॥ ६६ ॥
व्याप्यं लिङ्गं तच्च रूपैश्चतुःपञ्चसमन्वितम्[2] ।

साधनत्वाभिव्यञ्जकविभक्त्यन्तं लिङ्गवचनं हेतुः यथा कृतकत्वादिति। साधकत्वप्रकाशकमित्यनेन तकत्वमिकृत्यादिलिङ्गमात्रवचनस्य हेतुत्वनिरासः। लिङ्गेत्यनेन[3]

त्वम् । एवं ब्राह्मणो न हन्तव्य इत्यादिनिषेधोऽपि यो ब्राह्मणस्तन्न हन्यादिति ब्राह्मणोद्देशेन हनननिषेधविधिः । एवं प्रकृतेऽपि शब्दोऽनित्य इत्यत्र यः शब्दः सोऽनित्य इति शब्दस्योद्देश्यत्वमनित्यत्वस्य विधेयत्वं तस्मात् सिद्धे धर्मिणि साध्यधर्मविधाननियमात् धर्मिणि निर्देशपूर्वकमेव साध्यनिर्देशः कार्य इति सिद्धमिति तात्पर्यम् ॥

मन्दानामसन्देहार्थमाह । हेतुलक्षणमाहेति ।

कृतकत्वमत्र साधनमित्यादावतिव्याप्तिपरिहारार्थं साधनत्वादिविशेषणं विवक्षितार्थपरत्वेन व्याचष्टे। साधनत्वाभिव्यञ्जकेति। व्याख्यातविशेषणस्य विवक्षितं व्यावर्त्यं व्यनक्ति। साधनत्वप्रकाशकमित्यनेनेति। तादृग्विभक्त्यन्तमित्यनेनेत्यर्थः । लिङ्गमात्रमतथानिर्दिष्टलिङ्गे तद्व्युदास इत्यर्थः। अथ लिङ्गपदव्यावर्त्यमाह । लिङ्गेत्यनेनेति । यत् कृतकं तदनित्यमिति व्याप्तिवचनं तस्य व्याप्तिप्रकाशनद्वारा साधनत्वप्रकाशकत्वे ऽप्यलिङ्गवचनत्वान्न तत्रातिव्याप्तिरित्यर्थः ।

---

(१) प्रकाशकम्-पा॰ D पु॰ ।

(२) पञ्चभिरन्वितम्-पा॰ A पु॰ । (३) लिङ्गमित्यनेन-पा॰ D पु॰ ।

व्याप्तिवचनस्य हेतुत्वव्युदासः। व्याप्तिमल्लिङ्गं तच्चतु-
र्भिःपञ्चभिर्वा रूपैरुपेतं रूपाणि च पक्षधर्मत्वं सपक्षे
सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्ष-
त्वं चेति। तत्रान्वयव्यतिरेकिणः पञ्च रूपाणि इत-
रयोस्तु पक्षसपक्षयोरभावाच्चत्वारीति व्यवस्थितो

ननु लिङ्गतामपि तत्रोच्यत इति चेत् सत्यम् नान्तरीयक-
तया न तु व्याप्तिवत् प्राधान्यादिदोषः तर्हि मूले कुठारः
तादृग्विभक्त्यन्तत्वाभावादेव तद्व्यावृत्तेर्विशेषणवैयर्थ्या-
दिति सूक्ष्ममिति चेत् सत्यम् तथापि हेत्वाभासादिव्युदा-
सः फलमिति सूक्ष्मम् विहितेति(१) तादृग्विभक्त्यन्ता अपि
लिङ्गाभासवचना न लिङ्गवचना इति तेन तेषां व्युदासः
ग्रन्थस्तु स्थूलदृष्ट्योक्त इति गतिः। लिङ्गवचनं हेतुरित्युक्तम्
अथ किं तल्लिङ्गमित्याकाङ्क्षायां लक्षणद्वयमुक्तं संग्रहे व्या-
प्यं लिङ्गमित्यादिना तत्र तच्च लिङ्गं व्याप्यमित्येकं लक्षणं
शेषमेकं तत्राद्यं व्याचष्टे। व्याप्तिमदिति। निरुपाधिकसम्ब-
न्धशालीत्यर्थः। द्वितीयेऽपि चतुःपञ्चैरिति समासस्य समु-
च्चयार्थत्वे विरोधाद् विकल्पार्थतया निगृह्णाति। तच्चतुर्भि-
रिति। संख्याव्ययेत्यादिना बहुव्रीहिः। बहुव्रीहौ संख्येय
इत्यादिना डस्समासान्तः। नन्वेवमपि कदाचिदन्वयव्य-
तिरेकेण चातुरूप्यमितरयोः पाञ्चरूप्यं च स्यात् तच्चासङ्गत-
मित्याशङ्क्य व्रीहियवादिवद्वैच्छिकत्वेन तथा उदितानुदित-
होमवद्व्यवस्थितत्वान्नायं दोष इत्याह। तत्रेति। तथा चतुःप-
ञ्चव्यतिरिक्तसंख्याकत्वानधिकरणरूपोपेतं लिङ्गमिति नि-
र्वाच्यम्। अन्यथैकैकस्या व्याप्तेर्मिलितस्यासम्भवाच्चान्य-
था वा रूपैर्व्याप्तिपक्षधर्मतोपाधिकरूपैरुपेतं लिङ्गमिति लक्ष-

(१) मभिहितमित्यनुमीयते।

विकल्पः । निरुपाधिकसाध्यसम्बन्धशालिलिङ्गमिति लक्षणमालायाम् । व्याप्तिपक्षधर्मतोपेतरूपपञ्चकोपेतं लिङ्गमित्यात्मतत्त्वविवेकः । रूपाणि च दूषणपञ्चकव्यावृत्तये ऽभिमतानीति नाव्याप्तिः । हेतुश्च साधर्म्यवैधर्म्याभ्यां द्विविधो भवति । तदुक्तम् । उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः । तथा वैधर्म्यादिति ॥६६॥८८॥

णम् । चतुःपञ्चैरिति तु तानि रूपाणि यथायोगं क्वचित् चत्वारि क्वचित् पञ्च च भवन्तीति सिद्धार्थानुवादोऽयमसन्देहार्थ इति व्याख्येयम् । तत्र प्रथमलक्षणे उदयनसम्मतिमाह । निरुपाधिकेति । द्वितीये ऽपि तामाह । व्याप्तेति । ननु किमिदं विशेषलक्षणं सामान्यलक्षणं वा । नाद्यः तस्याप्रस्तुतत्वात् न द्वितीयः केवलभेदयो[1]रव्याप्तेरित्याशङ्क्य सामान्यलक्षणमेव । न चाव्याप्तिरिति परिहरति । रूपाणि चेति । तथाहि यथासंख्यमसिद्ध्यादिदोषपञ्चकव्यावृत्तये पक्षधर्मत्वादिपञ्चकरूपपरिग्रहः तस्य च व्याप्तिपक्षधर्मतालाभः फलम् । स च यावद्व्यावृत्त्यरूपपरिग्रहस्य न्याय्यत्वात् क्वचिद्रूपचतुष्टयादेव भवति क्वचिद्रूपपञ्चकादिति स्थिते व्याप्तिपक्षधर्मतोपाधिरूपोपेतमित्येव लिङ्गलक्षणमिति सिद्धम् । पञ्चग्रहणं तु चतुष्टयस्याप्युपलक्षणम् । सचतुःपञ्चैरितिवत् सिद्धार्थानुवाद इति व्याख्येयम् । साधर्म्यवैधर्म्याभ्यामन्वयव्यतिरेकव्याप्तिभ्यामित्यर्थः । उदाहरणसाधर्म्यादन्वयदृष्टान्तवृत्तित्वात् यत् साध्यसा-

(१) केवलोऽन्वयी । भेदो व्यतिरेकी ।

सावान्तरभेदमुदाहरणमुदाहरति[१] ।

द्विधोदाहरणं सम्यग् व्याप्तिनिर्देशपूर्वकम् ॥६७॥
दृष्टान्तवचनं तत् स्यादन्वयव्यतिरेकतः ।

व्याप्तिनिर्देशपूर्वकं[२] सम्यग्दृष्टान्तवचनमुदाहरणम् । तच्च दृष्टान्तभेदेनान्वयोदाहरणं व्यतिरेकोदाहरणमिति च द्विधा भिद्यते । तत्राद्यं साधनान्वये साध्यान्वयप्रदर्शनेन दृष्टान्तवचनम् यत् कृतकं तदनित्यं यथा घट इति । द्वितीयं तु साध्याभावेन साधनाभावप्रदर्शकदृष्टान्तवचनं[३] यदनित्यं न भवति तत्कृतकमपि न भवति । यथाकाश इति । व्याप्तिनिर्देशपूर्वकमित्यनेनापि अनुपदर्शितव्याप्तिकस्य घटपटाका-

धनं स हेतुः । तथा तद्वैधर्म्याद्व्यतिरेकदृष्टान्तव्यावृत्तत्वात् यत् साध्यसाधनं सोऽपि हेतुरित्यर्थः । उपलक्षणं चैतत् उभयव्याप्तिमानुभाभ्यां समाधाय हेतुरिति लभ्यते ॥ ६६ ॥ ऽऽ ॥

कृत्स्नस्यापि श्लोकस्य लक्षणपरत्वभ्रमं वारयति । सावान्तरेति । उदाहरति । व्याहरतीत्यर्थः ।

दृष्टान्तभेदेनेति । अन्वयव्यतिरेकभेदेनेत्यर्थः । तथा च वाच्यभेदाद्वचनभेदो न्याय्य इति भावः । क्रमाद्भेदद्वयमुदाहरति । तत्रेत्यादि । अन्वयः सद्भावः । उदाहर-

(१) मुदाहरणमाह–पा॰ D पु॰ ।

(२) व्याप्तिप्रदर्शनपुरःसरं–पा॰ B पु॰ ।

(३) साधनाभावं प्रदर्श्य दृष्टान्तवचनं–पा॰ B D पु॰ ।

शब्ददिति च दृष्टान्तमात्रवचनस्य निरासः । सम्यगिति वैपरीत्योपदर्शितव्याप्तिकस्य यथा यदनित्यं तत्कृतकं यथा घटः । यत् कृतकं न भवति तदनित्यमपि न भवति यथाकाशमिति च । तदुक्तम् । साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति तद्विपर्ययाद्वा विपरीतमिति च ॥ ६७ ॥ ऽऽ ॥

उपनयमाह ।

दृष्टान्तापेक्षया पक्षे हेतोर्व्याप्तिप्रदर्शकम् ॥ ६८ ॥
वचनं स्यादुपनयस्तथेति न तथेति वा ।

उदाहरणोपदर्शिताविनाभावस्य हेतोर्धर्मिण्युपसंहार उपनयः । स चोदाहरणद्वैविध्येन द्विविधो

णद्वैविध्ये सूत्रसम्मतिमाह । तदुक्तमिति । साध्यः पक्षः तत्साधर्म्यात् तन्निष्ठसाधनजातीयधर्मकत्वात् तद्धर्मभावी तन्निष्ठसाध्यजातीयधर्मसद्भाववान् दृष्टान्तः तद्वचनमिति शेषः । उदाहरणमन्वयोदाहरणमिति पूर्वसूत्राक्षरार्थः । तद्विपर्ययेन तद्वैपरीत्येन[1] साध्याभावात् साधनाभाववतो दृष्टान्तस्य वचनं विपरीतं व्यतिरेकोदाहरणमित्युत्तरसूत्रार्थः । तात्पर्यार्थस्तु ग्रन्थोक्त एव ग्राह्यः ॥ ६७ ॥ ऽऽ ॥

स्फुटार्थमाह । उपनयेति ।

दृष्टान्तापेक्षयेत्येतत् विवृण्वन् निष्कृष्य लक्षणमाह । उदाहरणेति । उपसंह्रियते ऽनेनेत्युपसंहार उपसंहारवचनमित्यर्थः । चतुर्थपादं व्याचष्टे । स चेति । सूत्रे

---

(१) तद्विपर्ययेन उक्तवैपरीत्येन–पा॰ E पु॰ ।

भवति । तथा चायं कृतकः शब्द इति साधर्म्योपनयः । न तथा चायं कृतकः शब्द इति वैधर्म्योपनयः । तदुक्तम् । उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपसंहार उपनय इति ॥ ६८ ॥ ऽऽ ॥

हेतुपूर्वं पुनः पक्षवचो निगमनं मतम् ॥ ६९ ॥

व्याप्तिपक्षधर्मतावद्धेतुपुरःसरं धर्मिणि साध्यस्योपसंहारो निगमनम् । पुनरित्युपसंहाररूपत्वमस्य प्रदर्शितम् । तस्मादनित्यः शब्द इति । तदुक्तम् । हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति । उपनयनिगमनयोः कृतकार्यत्वादानर्थक्यमिति चेत् न व्याप्तिमत्तया प्रतिसन्धीयमानस्य लिङ्गस्यानुमानत्वा-

---

उदाहरणापेक्षः साधनस्योपसंहार उपनय इति लक्षणम् । तथेत्यादिस्तु भेदोक्तिः ॥ ६८ ॥ ऽऽ ॥

निगमनलक्षणं व्याख्यातुं पठति । हेत्विति । पक्षवचः प्रतिज्ञावचनमित्यर्थः । प्राचीनहेतूक्तितो विशेषमाह । व्याप्तीति । पक्षवच इत्येतद्याचष्टे । धर्मिणीति । ननूपसंहाररूपत्वं संग्रहे न प्रतीयत इत्यत आह । पुनरितीति । हेत्वपदेशात् हेतूक्तिपूर्वकमित्यर्थः । प्रतिज्ञाद्यवयवत्रयपक्षावलम्बेन मीमांसकः प्रत्यवतिष्ठते । उपनयेति । कृतकार्यदिति हेतुप्रतिज्ञाभ्यामेव गतार्थत्वादित्यर्थः । परिहरति । नेति । कुतो नेत्याशङ्क्य उपनयस्य तावदर्थवत्तामाह । व्याप्तिमत्तयेति । प्रतिसन्धानं पक्षधर्मतानुसन्धा-

दुपनयाधीनत्वाच्च तत्प्रतिसन्धानस्य प्रसिद्धाविनाभावस्य साधनस्य पक्षधर्मताप्रतिपादनेन स्वरूपासिद्ध्यन्यथासिद्धिनिरासेनापि प्रयोजनवत्त्वादुपनयस्य निगमनेऽपि हेत्वनुवादांशस्य तस्मादेवानित्यो नान्यस्मादिति सिद्धसाधनतोपाधिनिरासप्रयोजनत्वात् । पक्षानुवादस्यानित्य एवायं न नित्य इति नियमेन बाधप्रतिरोधयोर्निरसनेन सप्रयोजनत्वात् । केचन जर-

---

नम् । ततः किमत आह । उपनयेति । हेतुना तु स्वरूपमात्रस्य पक्षधर्मतोक्ता न तु व्याप्तस्येति विशेषः । न चैतावता हेतोर्वैयर्थ्यं तस्य प्रागेवोक्तार्थत्वादिति । व्याप्तस्य पक्षधर्मताप्रतिसन्धानमुपनयप्रयोजनमित्युक्तम् । अथ तद्द्वारा स्वरूपासिद्धिव्याप्यत्वासिद्धिनिरासो वा प्रयोजनमित्याह । प्रसिद्धेति । अन्यथासिद्धिः सोपाधिकत्वं व्याप्यत्वासिद्धिरिति यावत् । व्याप्त्यनुसन्धानात् तन्निरासः पक्षधर्मताप्रत्यभिज्ञानात् स्वरूपासिद्धिनिरास इति विवेकः । अथ निगमनप्रयोजनं चाह । निगमनेऽपीति । तत्र सर्वाणि वाक्यानि सावधारणानीति न्यायेन तस्मादेवेति हेत्ववधारणस्य प्रमाणान्तरसिद्धिशङ्कानिरासः फलमित्याह । हेत्विति । न चेदं हेतुकृत्यं व्याप्तिपक्षधर्मतानुसन्धानात् प्राक् तस्य तदवधारणाशक्तेरिति भावः । अनेनैव न्यायेन साध्यावधारणात् । प्रबलस्य समबलस्य वा तद्विपर्ययादेकस्य व्यवच्छेदात् पक्षांशोऽपि सफल इत्याह । पक्षेति । न चैतत्प्रतिज्ञाकृत्यं विशिष्टलिङ्गानुसन्धानात् प्राक् तस्यास्तदवधारणाशक्तेरिति ।

नैयायिकास्तु जिज्ञासासंशयशक्यप्राप्तिप्रयोजनसंश-यव्युदासैः सह दशावयवा इत्याचक्षते। तदसत्। पर-प्रतिपादकस्य वाक्यस्यार्थे यान्यवान्तरवाक्यानि संह-त्य निष्पादयन्ति तानि ह्यवयवाः। जिज्ञासादयस्तु परप्रतिपादनानङ्गत्वात् साधनवाक्यैकदेशतयावयवत्वं न लभन्ते। तस्मात् सुष्ठूक्तं पञ्चावयवा इति। अत एवाह भगवान् भारते व्यासः। पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवदिति ॥ ६९ ॥

अथ जरन्नैयायिकमतं निराकर्तुमाह। केचनेति। तत्र सा-ध्यार्थज्ञानेच्छा जिज्ञासा साध्यतद्विपर्ययगोचरो विमर्शः संशयः साधनयोग्यता शक्यप्राप्तिः तत्साध्यपुरुषार्थः प्रयो-जनम् निगमनवाक्यश्रवणानन्तरमेव साध्यावधारणात् पूर्वोक्तसंशयोत्थितिः संशयव्युदासः। तत्राद्याश्चत्वारः प्रमाणप्रवृत्तिहेतुत्वात् पौरस्त्यावयवाः। पञ्चमस्तु प्रमाण-फलरूपत्वात् पाश्चात्य इति निश्चयः। अथैतेषामवयवल-क्षणाभावादवयवत्वं नास्तीति परिहरति। तदसदिति। किं तल्लक्षणमित्याकाङ्क्षायां प्रागुक्तमेव दर्शयति। पर-प्रतिपादकस्येति। प्रकृते तदभावान्नावयवत्वमित्याह। जि-ज्ञासादयस्त्विति। एतेषामशब्दात्मकानामर्थित्वादिवत् अधिकारविशेषणतया पुरुषप्रवृत्तिमात्रोपयोगिनां न श-ब्दात्मकवाक्यावयवत्वं युक्तं गुण इव कनकभूषणैकदेश-त्वमित्यर्थः। व्यासवाक्यं चात्र प्रमाणयति। अत एवेति। जिज्ञासादीनामवयवार्थत्वायोगादेवेत्यर्थः। इत्यवयवप-दार्थः ॥ ६९ ॥

तर्कलक्षणमाह ।

तर्कोऽनिष्टप्रसङ्गः स्यादनिष्टं द्विविधं मतम्(१) ।
प्रामाणिकपरित्यागस्तथेतरपरिग्रहः ॥ १० ॥

प्रामाणिकप्रहाणम्(२) अप्रामाणिकस्वीकार इति द्विविधमनिष्टम् । तयोरन्यतरस्य प्रसञ्जनं तर्कः । यथा यद्युदकं पीतं पिपासां न शमयेत् तर्हि पिपासुना न पीयेत इति प्रामाणिकपरित्यागप्रसङ्गः । यद्यु-

---

उद्देशक्रमात् तर्को लक्ष्यत इत्याह । तर्केति ।

अनिष्टप्रसङ्ग इति । अनिष्टव्यापकप्रसङ्ग इत्यर्थः । अन्यथा यद्यग्निर्दाहको न स्यात् रूपवानपि न स्यादित्यादेर्व्याप्तिविकलस्यापि तर्कत्वप्रसङ्गः । अत एवोक्तमात्मतत्त्वविवेके तर्कमधिकृत्य सोऽपि व्याप्तिबलमालम्ब्य अनिष्टप्रसङ्गरूप इति । तथा च व्याप्यारोपे ऽनिष्टव्यापकप्रसञ्जनं तर्क इति लक्षणं द्रष्टव्यम् । एतच्च हेतुरारोपितं लिङ्गमित्यत्र व्यक्तीभविष्यति ।

प्रामाणिकेत्याद्युत्तरार्द्धमनिष्टस्येत्यनिष्टविभागवाक्येनैकवाक्यतया योजयति । प्रामाणिकप्रहाणमित्यादि । द्वयोरप्यनिष्टयोः समुच्चयेन प्रसञ्जनं तर्क इति मातर्कीरित्याह । तयोरन्यतरस्येति । अनयोरात्मतत्त्वविवेकोक्ते एवोदाहरणे क्रमेण दर्शयति । यथेत्यादि । तत्र विमतमुदकं पिपासाशामकं विशिष्टोदकत्वात्(३) मत्पीतोदकवदिति प्रयोगे साध्यानङ्गीकारे प्रथमस्तर्कः तत्र प्रत्यक्षसिद्धपाननिषेधात् प्रामाणिकार्थत्यागः विमतमुदकं परस्या-

---

(१) अनिष्टस्य द्वयी विधा—पा· B पु· ।

(२) प्रामाणिकपरित्यागो—पा· D पु·

(३) 'वा शीतोदकत्वा' दिति E पुस्तके टिप्पण्याम् ।

दकं पीतं परमन्तरधक्ष्यत् तदविशिष्टं मामपि दहे-
दित्यप्रामाणिकस्वीकारः । यथाहुः तर्कमधिकृत्य
तात्पर्यपरिशुद्धिकाराः । तस्य च स्वरूपमनिष्टप्र-
सङ्ग इति ॥ ७० ॥

आत्माश्रयादिभेदेन तर्कः पञ्चविधः स्मृतः ।
अङ्गपञ्चकसम्पन्नस्तत्त्वज्ञानाय कल्पते ॥ ७१ ॥

यथाहुः। स चात्माश्रयेतरेतराश्रयचक्रकाश्रया-
नवस्थानिष्टप्रसङ्गभेदेन पञ्चविध इति ॥ ७१ ॥

तर्काङ्गानि दर्शयति ।

न्तर्दाहकं न भवति तत एव तद्वदेवेति प्रयोगे साध्यान-
ङ्गीकारे द्वितीयस्तर्कः । तत्रोदकस्यात्यन्ताप्रसिद्धान्तर्दा-
हकत्वविधानादप्रामाणिकार्थस्वीकार इति विवेकः । अथ
स्वोक्तं तर्कलक्षणमुदयनोक्तलक्षणेन संवादयति । यथाहु-
रिति । तात्पर्यपरिशुद्धिर्नामोदयनविरचिता वाचस्पति-
कृतवार्त्तिकतात्पर्यटीकाव्याख्या । अत्राप्यनिष्टप्रसङ्गोऽ-
निष्टव्यापकप्रसञ्जनमित्यर्थः । नन्वत्र लक्ष्यपदलाभः कथ-
मित्याशङ्क्य प्रकरणादित्याह । तर्कमधिकृत्येति ॥ ७० ॥

अथ तर्कविभागश्लोकं स्फुटार्थत्वान्निगदेन व्याचष्टे ।
आत्माश्रयेत्यादि । अथात्मतत्त्वविवेकसम्मतिव्याजेना-
दिशब्दार्थमाह । यथाहुः स चेत्यादि । तत्र ज्ञानघटादेरुत्प
त्तिज्ञप्तिस्थित्यादिष्वव्यवधानेन स्वापेक्षणमात्माश्रयः ।
द्वयोरन्योन्यापेक्षणमितरेतराश्रयः । पूर्वस्य स्वापेक्षितम-
ध्यमापेक्षितोत्तरापेक्षितत्वं चक्रकाश्रयः । पूर्वस्योत्तरापेक्षा
अनवस्था अनिष्टप्रसङ्गस्तु व्याख्यात एव ॥ ७१ ॥

व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये ।
अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम् ॥ १२ ॥

प्रसञ्जकस्याहार्यलिङ्गस्य प्रसञ्जनीयेन व्याप्तिर्व्याप्तिः प्रतितर्कैरप्रतिघातः तर्काप्रतिहतिः प्रसञ्जनीयस्य विपर्यये पर्यवसानम्। एवं चेदेवं स्यान्नैवमिति प्रसञ्जनीयस्यानिष्टत्वमुक्तं द्विविधमधस्तात् । अननु-

---

ननु यदुक्तं तर्कोऽनिष्टप्रसङ्ग इति तत् किं तर्कस्य सामान्यलक्षणं विशेषलक्षणं वा । आद्ये कथमनिष्टप्रसङ्गस्येह तर्कावान्तरभेदोक्तिः द्वितीये सामान्यलक्षणमन्यद्वाच्यम् । अत्रोच्यते पूर्वश्लोके यत्सम्पत्त्या तर्कस्य तत्त्वज्ञानसमर्थनमुक्तं कानि तान्यङ्गानीत्याकाङ्क्षायामाहेत्याशयेनाह । तर्काङ्गानीति ।

तत्र व्याप्तिं व्याचष्टे । प्रसञ्जकस्येति । आपादकस्यापाद्येन सहाविनाभावो व्याप्तिरित्यर्थः । यथा मूर्तत्वाभावे मनसः क्रियावत्त्वं न स्यात् इत्यत्रामूर्तत्वस्य निष्क्रियत्वेनेति। तर्काप्रतिहतिरित्यत्र तर्कशब्देन प्रतितर्को विवक्षितः अन्यथा अप्रसक्तप्रतिषेधादित्याशयेन व्याचष्टे। प्रतितर्कैरिति । यथोदाहृतस्यैव मनसः मूर्तत्वे स्पर्शवत्त्वापत्तिः पृथिव्यादिवत्त्वेन प्रतितर्केणाप्रतिघातो धर्मिग्राहकविरुद्धत्वादस्येति । आपाद्यवैपरीत्यनिष्ठत्वं तर्कस्य विपर्यये पर्यवसानं यथोदाहृत एव न च निष्क्रियं मन इत्याशयेनाह । प्रसञ्जनीयस्येत्यादि । द्विविधमिति । प्रामाणिकप्रहाणाप्रामाणिकस्वीकरणरूपेणेत्यर्थः । अथाननुकूलत्वस्यानिष्टाङ्गेदं व्यतिरेकदृष्टान्तेन व्याचष्टे। अन-

कूलत्वं प्रसङ्गस्य विरुद्धहेत्वाभासवत् प्रतिपक्षासाधकत्वमित्येतानि पञ्चाङ्गानीति ॥ ७२ ॥

अन्यतमाङ्गानङ्गीकारे को दोषस्तत्राह ।

अङ्गान्यतमवैकल्ये तर्कस्याभासता भवेत् ।

उक्तेष्वङ्गेष्वन्यतमस्याभावे तर्क आभासो भवति । यथा यदिदं पानीयं पिपासोदुःखं नाशमयिष्यत्

नुकूलत्वमिति । यथा नित्यः शब्दः कार्यत्वादित्यस्य विरुद्धहेत्वाभासस्य साध्यविरुद्धानित्यत्वसाधकतया प्रतिवाद्यनुकूलत्वात् तदुक्ततर्कस्य मूर्तत्वविपरीतामूर्तत्वसाधकत्वाभावादननुकूलत्वं प्रतिवाद्यनुकूलत्वाभावः तच्च पूर्वोक्तानिष्टादन्यदेवेत्यर्थः । उपसंहरति । इत्येतानीति । इतिशब्दोऽयं प्रकारवचनः अन्यतमाङ्गसमाप्तौ ॥ ७२ ॥

उत्तरार्द्धे आभासत्वाभिधानस्य शङ्कोत्तरत्वान्न वैयर्थ्यमित्याह । अन्यतमेति ।

तत्र प्रागुक्तव्याप्त्याद्येकैकाङ्गवैकल्यात् क्रमेण व्याप्तिविकलादयः पञ्चाभासाः भवन्तीत्याशयेन व्याचष्टे । उक्तेष्विति । तत्राद्यस्योदाहरणद्वयमाह । यथेत्यादि । अत्रोभयत्रापि व्याप्तिवैकल्यं व्यक्तमेवादिशब्दादुदाहरणान्तरसंग्रहः । द्वितीयस्तु मूर्तत्वे मनसः स्पर्शवत्त्वापत्तिरिति । अस्यामूर्तत्वे धर्मिग्राहकप्रमाणबाध इति अनेन प्रतिहतत्वादिति । तथा तृतीयतुरीययोरपि नित्यः शब्दः प्रत्यभिज्ञायमानत्वादिति प्रयोगे यदि नित्यो न स्यात् न प्रत्यभिज्ञायेत प्रत्यभिज्ञायते चेति मीमांसकोक्तस्तर्कः उदाहर्तव्यः । तस्य ज्वालाप्रत्यभिज्ञावत्

तर्हि रूपवदपि नाभविष्यद् गगनादिवत् । यदि परमन्तरधत्स्यन्मामपि सुरभिमकरिष्यदित्यादिस्तर्काभासः । विस्तरस्त्वात्मतत्त्वविवेकपरिश्रमशालिनां सुगम एव। तत्र हि मिथो विरोध मूलशैथिल्येष्टापादनानुकूलत्वविपर्ययापर्यवसानैस्तर्काभासत्वादुपक्रम्य स्थूलद्रव्यमपलपतो बौद्धस्य नेदं स्थूलं द्रव्यं विरुद्धधर्मसंसर्गप्रसङ्गादित्यादयः प्रलापास्तर्काभासाः प्रदर्शिताः। प्र-

---

स एवायं गकार इत्यादिप्रत्यभिज्ञायाः सादृश्यमूलभ्रान्तित्वेन विपर्ययपर्यवसानानिष्टत्वयोरभावादिति । पञ्चमस्तु यदि नित्यः शब्दो न स्यात् कृतको न स्यात् कृतकश्चायमिति । अत्र प्रसङ्गस्य विपक्षसाधकत्वेन परानुकूलत्वादाभासत्वम् । नन्वेते भेदाः किमिति नोदाह्रियन्ते ऽत आह। तर्काभास इति। शालिनामिति शेषे षष्ठी न लोकेत्यादिना कृद्योगषष्ठ्या एव निषेधादिति । अथाकृतपरिश्रमाणां च तत्राप्रवेशार्थं तदुक्तिप्रदेशं दर्शयति। तत्रेत्युपक्रम्य दर्शिता इत्यन्वयः । यथा नायं पर्वतो निरग्निरित्यादिना सन्दर्भेणेति शेषः । इत्यादयो बौद्धस्य प्रलापा इत्यन्वयः। तदुक्ततर्काणामनर्थकत्वात् प्रलापत्वोक्तिः। नेदं स्थूलमित्यादिबौद्धोक्तस्थूलद्रव्यनिरासे तर्काणां मिथो विरोधेत्यादिग्रन्थो पूर्वोक्ताङ्गवैकल्यप्रयुक्तमाभासत्वं प्रतिज्ञाय पश्चाद्यथा नायं पर्वत इत्यादिना प्रपञ्चितमित्यन्वयार्थौ तत्र मिथो विरोधेत्यनेन प्रतितर्कप्रतिघात उक्तः । तथाहि नेदं स्थूलं विरुद्धधर्मसंसर्गप्रसङ्गात् नास्थूलं तथा प्रतिभासप्रसङ्गादित्यनयोस्ता-

बोधसिद्धावपि नित्यसमोत्थानप्रकाराणा[1]मङ्गवैकल्येन तर्काभासत्वमुक्तम् । यथायथं तर्काङ्गपञ्चकान्यतमहानिरत्रोहनीयेति ।

तर्कस्य विषयकारणप्रयोजनानि दर्शयति ।

अस्याविज्ञाततत्त्वोऽर्थः सन्दिग्धो विषयो मतः १३
हेतुरारोपितं लिङ्गं फलं तत्त्वार्थनिर्णयः ।

अविज्ञाततत्त्वः[2] संशयविषयोऽर्थस्तर्कस्य वि-

वत् परस्परार्थप्रतिक्षेपकत्वादुभयोरनाभासत्वानुपपत्तेरवश्यमेकस्यैकेन प्रतिघात इति मूलशैथिल्यं व्याप्तिवैकल्यम् । शेषं सुगमम् । यदुक्तमङ्गान्यतमवैकल्ये तर्कस्याभासतेति तत्परिशिष्टे ऽपि स्पष्टमित्याह । प्रबोधसिद्धावपीति । नित्यसमोत्थानप्रकाराणामिति । अनित्यः शब्द इति वादिना प्रतिज्ञाते जातिवादिना किमिदमनित्यत्वं नित्यमनित्यं वा भिन्नमभिन्नं वा कार्यमकार्यं वेत्याद्यनेकधाविकल्पोक्तानामनिष्टप्रसङ्गभेदानामित्यर्थः । एतत्सर्वं जातिपरिच्छेदे स्फुटीभविष्यति । परिशिष्टग्रन्थं पठति । यथायथमिति । अत्राङ्गहान्या तर्काणामाभासत्वं विवक्षितमिति भावः ।

तर्कलक्षणस्य वृत्तत्वादुत्तरश्लोकस्य कैमर्थक्यशङ्कायामाह । तर्कस्येति ।

नन्वप्रतीते धर्मिणि प्रमाणाप्रवृत्तेः प्रतीते सन्दे-

---

(१) नित्यसमादिजातिप्रकाराणा–पा॰ D पु॰ ।
(२) अविज्ञायमानतत्त्वः–पा॰ D पु॰ ।

षयः । सन्दिग्धे न्यायः प्रवर्तत इति न्यायात् । कारणं त्वाहार्यलिङ्गम् सतामेवाग्न्यादीनामारोप्यमाणस्यासत्त्वस्य लिङ्गत्वात् । अनग्निश्चेन्निर्धूमः स्यादिति व्याप्याङ्गीकारेणानिष्टव्यापकप्रसञ्जनं तर्क इति लक्षणमालायाम् । आरोपितावेव व्याप्यव्यापकावभिमतौ प्रमाणाङ्गस्य चास्य तत्त्वनिर्णय एव फलम् । अङ्गानां

हायोगात् कथं सन्दिग्धत्वं विषयस्येत्याशङ्क्य साध्यविशेषणसन्देहादित्याशयेन विशिनष्टि । अविज्ञातेति । हेतुरारोपितं लिङ्गमित्यत्रोदयनसम्मतिमाह । व्याप्येत्यादि । ननु फलं तत्त्वार्थनिर्णय इत्यसङ्गतं तस्य प्रमाणफलत्वादित्याशङ्क्याह । प्रमाणाङ्गस्येति । अङ्गानामङ्गिफलेनैव फलवत्तेति मीमांसान्यायं सूचयति । अङ्गानामिति । फलोपकार्यङ्गानां प्रयाजादीनां पृथक्फलवत्त्वे कथं तदुपकारकत्वं कथंतरां च तदङ्गत्वमिति भावः । चतुर्थे द्रव्यसंस्कारकर्मसु परार्थत्वात् तत्फलश्रुतिरर्थवादः स्यादित्यत्र चिन्तितम् । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत् प्रयाजानुयाजा इज्यन्ते वर्मैव तद्यज्ञस्य क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्या इति । अत्र पर्णं द्रव्यम् अञ्जनं संस्कारः प्रयाजादिकं कर्म एतत्त्रितयं पुरुषार्थक्रत्वर्थत्वेत्यादि विचार्य पुरुषार्थमेवेदमपापश्लोकश्रवणादिफलसम्बन्धादिति प्राप्ते सिद्धान्तितं शृणोत्यादिषु सर्वत्र वर्तमानापदेशतः श्रूयमाणफलस्यापि न साध्यत्वं प्रतीयते ।

---

(१) प्रयोजनमात्र-पा॰ E पु॰ ।

प्रधानफलेनैव फलवत्त्वस्य दर्शपूर्णमासाद्यङ्गेषु प्रयाजादिषु स्थितत्वात्। तदुक्तम्। अविज्ञाततत्त्वे ऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इति। अत्राविज्ञाततत्त्वे ऽर्थे इति विषयो दर्शितः। उत्तरेण पञ्चम्यन्तेन कारणम्। कारणस्याहार्यलिङ्गस्योपपत्तिः सद्भावस्तस्मादिति। इत्थम्भावलक्षणे तृतीयान्तत्वमङ्गीकृत्य तर्कव्यापारनिर्देश इति केचित्। कारणस्योपपत्तिः सम्भावना प्रमाणविषयाभ्यनुज्ञानमिति यावत्। तदुपलक्षित इति तत्त्वज्ञानार्थमिति प्रयोज-

---

नासाध्ये साधनत्वं च द्रव्यसंस्कारकर्मणाम्।
तस्मात् क्रत्वर्थतैवैषामर्थवादः फलश्रुतिरिति॥

तस्मात् सुष्ठूक्तम् अङ्गानां प्रधानफलेनैव फलवत्त्वमिति। अथ स्वोक्तेषु तर्कस्य विषयकारणप्रयोजनलक्षणेषु सूत्रं संवादयति। तदुक्तमिति। अत्र सूत्रे केन भागेन कस्योक्तिः कथं वेत्याकाङ्क्षायां क्रमाद् विविच्य दर्शयति। अत्रेत्यादि। योऽर्थः सामान्यतो विज्ञातस्तत्त्वतो न विज्ञातः स सन्दिग्धोऽर्थो विषय इत्यर्थः। पञ्चम्यन्तेनेति। पञ्चम्यर्थे तसिलन्तेनेत्यर्थः। सार्वविभक्तिकं तसिमाश्रित्य तृतीयार्थत्वेन केषाञ्चिद् व्याख्यानं तदाह। इत्थम्भावे तृतीयान्तत्वमिति। तृतीयार्थे तसिप्रत्ययार्थत्वमित्यर्थः। अस्मिन् पक्षे कारणोपपत्तिशब्दयोरन्यमर्थमाचक्षमाणस्तमेव तर्कव्यापारं दर्शयति। कारणस्येति। ननु केयं प्रमाणस्य सम्भावना नाम तत्राह। प्रमाणेति। प्रमाणस्य विषयः साध्यधर्मः तस्याभ्यनुज्ञानं कोट्यन्तरनिराकरणं न च तस्यैव साधनार्हत्व-

नम् । ऊह इति लक्षणम् । ऊहशब्देन प्रसङ्गाभिधानात् । यथाहुः किरणावलीकाराः ऊहापरनामा प्रसङ्गात्मा तर्क इति ॥ ७३ ॥ ८८ ॥

किमयं तर्कः स्वयमेव तत्त्वनिर्णयाय न प्रभवति वाढमित्याह ।

प्रत्यक्षादेः प्रमाणस्य तर्कोनुग्राहको भवेत् ॥ ७४ ॥

तत्त्वनिर्णयहेतूनां प्रमाणानामनुग्राहकतया तत्त्वाध्यवसायः फलं न तु स्वतः(१) अनिष्टप्रस-

बोधनमित्यर्थः । इत्थम्भावशब्दार्थं व्यनक्ति । तदुपलक्षित इतीति । एतेन प्रमाणप्रवृत्त्युपयोगिव्यापारवत्त्वात् प्रमाणाङ्गं तर्क इत्युक्तं भवति । नन्वनिष्टप्रसङ्गस्तर्क इत्युक्तम् तत्कथं मूहस्तर्क इत्युच्यत इत्याशङ्क्याह । ऊहशब्देनेति । ऊहप्रसङ्गयोः पर्यायत्वादित्यर्थः । तदेव कुत इत्यत आह । यथाहुरिति । शब्दार्थनिर्णये वृद्धव्यवहार एव प्रमाणमिति भावः ॥ ७३ ॥ ८८ ॥

ननूत्तरार्द्धे तर्कस्य प्रमाणानुग्राहकत्वं किमर्थमुच्यत इत्याशङ्क्य शङ्कोत्तरत्वमाह । किमयमिति । न प्रभवति किमित्यन्वयः । काकुस्त्रानुसन्धेयाङ्गलक्षणाभावादनङ्गस्य तर्कस्य पूर्वोक्तमङ्गिफलेनैव फलवत्त्वं न युक्तमिति शङ्कितुराशयः । शेषः परार्थत्वादिति न्यायेनाङ्गत्वान्न पृथक् फलत्वमिति परिहर्तुराशयः ।

तर्हि तर्कं विना प्रमाणस्यापि तत्त्वाध्यवसायहेतुत्वाभावात् तर्कस्यैव स्वातन्त्र्यं किं न स्यादित्याशङ्क्याह ।

(१) तत्त्वाध्यवसायफलकत्वं–पा० B पु० ।

ङ्गमात्ररूपत्वान्न केवलमनुमानस्यैवानुग्राहकः । किं तु सर्वस्यापि प्रमाणस्येत्युक्तं प्रत्यक्षादेरिति । सर्वस्यापि प्रमां प्रति करणत्वात् करणानां चेतिकर्तव्यतापेक्षितत्वात् । यथाहुः ।

न हि तत्करणं लोके वेदे वा किञ्चिदीदृशम् ।
इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता ॥ इति ।

सर्वप्रमाणानुग्राहकत्वमात्मतत्त्वविवेके दर्शितम् । इतरदपि प्रमाणमनुमानच्छाययैव विचाराङ्ग

अनिष्टप्रसङ्गमात्ररूपत्वादिति । अनिष्टप्रसञ्जनमुखेन तत्सहकारिमात्ररूपत्वादित्यर्थः । कार्यान्यथानुत्पत्तिस्तु कारणत्वमात्रं प्रयोजयति न तु स्वातन्त्र्यमिति भावः । श्लोके प्रत्यक्षादेरिति विशेषणस्य फलमाह । न केवलमिति । सर्वस्यापि तर्कापेक्षत्वे हेतुमाह । प्रमां प्रतीति । ततः किमत आह । कारणानां चेति । तर्कस्यापीतिकर्तव्यतारूपत्वादिति भावः ।

इत्थमित्थं कर्तव्यमित्युपदिष्टाङ्गकलाप इतिकर्तव्यता-करणमात्रस्येतिकर्तव्यतासापेक्षत्वे सम्मतिमाह । न हीति । लोके करणं कुठारादि वेदे दर्शपूर्णमासादि तयोरनुद्यमनादिति प्रयाजादिश्चेतिकर्तव्यता तत्साध्यानुग्रह उपकारः ।

इतरदपीति । अत्रानुमानस्य सतर्कस्यैव विचाराङ्गत्वं पूर्वोक्तं प्रमाणान्तरेऽप्यतिदिशति । तेन तर्कस्य सर्वप्रमाणानुग्राहकत्वं गम्यत इत्यर्थः । अनन्यथासिद्धिमनन्यप्रयुक्तत्वमित्यर्थः ।

भवतीति तत्र तर्कमनन्यथासिद्धिं च पुरस्कृत्य प्रवर्तत[1] इति । तर्कस्य शब्दप्रमाणानुग्राहकत्वं मीमांसाचार्यै[2]रप्युक्तम् ।

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥ इति ।

भगवता मनुनापि ।

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ इति ॥ ७४ ॥

कोऽयं तर्कसाध्यः प्रमाणानुग्रहो यत्करणेना-

धर्म इत्यादि । धर्मप्रतीतौ वेदः कारणं चोदनालक्षणोऽर्थो धर्म इत्युक्तत्वात् । तस्य च कृत्यं मीमांसाशास्त्रमितिकर्तव्यतानुग्राहकतर्कतया तत्प्रामाण्यनिर्वाहकमित्यर्थः ।

मनुनापीति । शब्दप्रमाणानुग्राहकत्वमुक्तमित्यनुषङ्गः । आर्षं ऋषिप्रोक्तम् धर्मोपदेशं मानवादिधर्मशास्त्रं च यस्तर्केणेत्यादि योज्यम् । चकारः

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मशास्त्रमभीप्सता ॥ इति ।

पूर्वश्लोकोक्तप्रत्यक्षादित्रयसमुच्चयार्थः ॥ ७४ ॥

नन्वनुग्रह उपकार इत्यसन्दिग्धमेव तत् किमर्थमुत्तरार्द्धो व्याख्यायत इत्याशङ्क्य तद्विशेषजिज्ञासायामित्याह । कोऽयमिति । निष्प्रयोजनस्यापि अजिज्ञास्यत्वात्

---

(१) सिद्धं च पुरस्कृत्य प्रवृत्तेरिति—पा॰ C पु॰ ।

(२) मीमांसकै—पा॰ C पु॰ । मीमांसकाचार्यै—पा॰ D पु॰ ।

यमङ्गं भवति तत्राह ।

पक्षे विपक्षजिज्ञासाविच्छेदस्तदनुग्रहः ।

उपलक्षणमेतत् । प्रमाणविषये तद्विपर्ययाशङ्काविघटनं तर्कसाध्योऽनुग्रह इत्यर्थः । अनुमाने तावच्छतशः प्रवृत्तेनापि भूयोदर्शनेन गृहीतेऽपि साहचर्ये कुत्रचिदुपाधिनिबन्धनत्वेन व्यभिचारदर्शनादन्यत्राप्युपाधिमाशङ्क्य तदायत्तव्यभिचारशङ्कया प्रतिबन्धानिश्चयेन पक्ष एव विपक्षत्वेन जिज्ञासा जायते धूमवानपि पर्वतः किमनग्निर्न स्यादिति तत्र तर्कप्रवृत्तेरवसरः । स ह्युपाधिकोटौ तदायत्तव्यभिचारकोटौ वाऽनिष्टमुपजनयन्[१] विपक्षजिज्ञासां निवर्तयति । अनग्निश्चेन्निर्धूमः प्रसज्येत इति । ततश्च तर्कसनाथेन भूयोदर्शनेन प्रतिबन्धनिश्चय इति । तद्-

प्रयोजनमाह । यत्करणेनेति ।

नन्वेवंविधानुग्रहस्यानुमानमात्रगामित्वात् पूर्वोक्तं सर्वप्रमाणानुग्राहकत्वं तर्कस्य न स्यादित्याशङ्क्याह । उपलक्षणमेतदिति । अनुमानविषये तावद् विपर्ययशङ्कोत्थानप्रकारं तर्केण तन्निवृत्तिप्रकारं च प्रपञ्चयति । अनुमाने तावदिति । यावत् प्रत्यक्षादौ च वक्ष्यत इति तावच्छब्दार्थः । कुत्रचिदिति । हिंसात्वादावित्यर्थः । अन्यत्रापीति । धूमादावपीत्यर्थः । विपक्षजिज्ञासा साध्यराहित्यशङ्केत्यर्थः । शङ्कास्वरूपं निरूपयति । धूमवानपीति । तर्ककृ-

(१) उपजननात्—पा॰ C पु॰ ।

द्वारेणानुग्राहकत्वं तर्कस्य । ननु यदि तर्कादेव प्रतिबन्धनिश्चयः सोऽपि तर्हि प्रतिबन्धापेक्ष इत्यनवस्थया भवितव्यम् । न भवितव्यम् कियन्तमप्यध्वानं गत्वा शङ्कास्वरूपस्यापि व्याघातापातेनानुत्थानात्[1] न ह्यनग्निरपि धूमवान् भवेदित्याशङ्कायामकारणककार्योत्पत्तिप्रसङ्गे ऽभिहिते तथा नाम भवेदितीयमपि शङ्कापिशाची सावकाशमासादयति । यथाहुः ।

त्यमाह । स हीति । तद्द्वारेणेति । प्रतिबन्धनिश्चयद्वारेणेत्यर्थः । एतदुक्तं भवति । धूमवत्त्वे ऽप्यनग्निमान् भवतु हिंसात्वादिवदस्यापि कदाचित् कस्यचिदुपाधेस्तदायत्तव्यभिचारस्य वा सम्भावितत्वादिति शङ्कायामनग्निमत्त्वे धूम एव न स्यादिति प्रामाणिकपरित्यागरूपानिष्टापादनमुखेन शङ्कामुच्छिन्दता तर्केण सहकृताद्भूयोदर्शनात् पूर्वपूर्वदर्शनजसंस्कारसध्रीचीनान्त्यदर्शनरूपाद् व्याप्त्यवधारणे निःशङ्कमनुमानप्रवृत्तेः सिद्धं तदङ्गत्वं तत्फलेनैव फलवत्त्वं च तर्कस्येति सर्वमवदातमिति । ननु तर्कादेव प्रतिबन्धावधारणे तस्यापि तदेकजीवितत्वात् तर्कान्तरापेक्षायामनवस्थापिशाच्याः को वारयितेत्याशङ्कते । नन्विति । नन्वस्या वराक्या महानयमुच्चाटनमन्त्रो व्याघात एवाचिन्त्यप्रभावो जागर्तीत्याह । न भवितव्यमित्यादि । व्याघातस्वरूपं व्यनक्ति । अकारणकेति ।

अत्रोदयनाचार्यसम्मतिमाह । यथाहुरिति । यत्-

---

(१) अननुभवात्—पा· B पु· ।

शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥ इति ।

उपाधिविधूनने ऽप्येवं तर्कः प्रवर्तते । सर्वथा प्रमाणपथमनवतीर्णा एव केचिदुपाधित्वेन शङ्कनीयास्तमवतीर्णा वा । तत्रापि प्रत्यक्षयोग्याः प्रमाणान्तरविषया वा । तत्रापि[1] व्यापका अव्यापका वा । अव्यापकत्वे ऽपि नित्या अनित्या वा । अनित्यत्वे ऽपि उभयाव्यभिचारिण उभयव्यभिचारिणोऽन्यतराव्यभिचारि-

किञ्चित्कालान्तरभाविव्यभिचारशङ्काया दुर्वारत्वान्नास्त्येवानुमानमिति चार्वाकचोद्यं प्रत्युक्तम् । पूर्वार्द्धे शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तरामिति । शङ्का अस्ति चेद् यं कालमाश्रित्य व्यभिचारः शङ्कते तत्कालाकलनार्थमनुमानमवश्यमाश्रयणीयम् । अन्यथा तदाश्रितायाः शङ्काया एवानुत्थानात् । अथैतद्भयान्न शङ्कते तर्हि निःशङ्कत्वात् सुतरामनुमानसिद्धिरित्यर्थः । अथैवं स्थिते यदि सुहृद्भावेन परः पृच्छेत् अनुमानं मानमेव शङ्कोच्छित्तिस्तु कथमिति तत्रेदमुपतिष्ठते तर्कः शङ्कावधिर्मत इति । अर्थक्रमानुसारात् व्यवहितग्रहः तर्क एवैतच्छङ्कोच्छेदक इत्यर्थः । तथोक्ततर्कानवस्थाशङ्का तु व्याघातावधिकेत्याह । व्याघातावधिराशङ्केति ।

एवं व्यभिचारकोटौ तर्कप्रवृत्तिप्रकार उक्तः अथोपाधिकोटावपि तमाह । उपाधिविधूनने ऽपीत्यादि । तत्र परेण शङ्कमानमुपाधिं दशधा विकल्पयति । सर्वथेत्यादि । धूम-

(१) उत्तरत्रापि–पा॰ B पु॰ ।

गो वा । अन्यतराव्यभिचारे ऽपि धूममात्राव्यभिचारिणो वह्निमात्राव्यभिचारिणो वा । वह्निमात्राव्यभिचारे ऽपि व्याप्यमात्ररूपा व्यापकमात्ररूपा उभयरूपा वा । तत्र न प्रथमः । सर्वव्यवहारोच्छेदप्रसङ्गात् । प्रत्यक्षयोग्यत्वे ऽनुपलम्भबाधः । व्यापकानां नित्यानां चोपाधित्वे सर्वत्र सर्वदा वह्नेः सत्त्वप्रसङ्गः । उभयाव्यभिचारिणामुभयव्यभिचारिणां धूममात्राव्यभिचारिणां

मात्राव्यभिचारिण इति । साधनमात्राव्यभिचारिण इत्यर्थः । वह्निमात्राव्यभिचारिण इति । साध्यमात्राव्यभिचारिण इत्यर्थः । दृष्टान्तार्थं तु विशेषोपादानम् । एवमुत्तरत्रापि द्रष्टव्यम् । तत्राद्ये ऽनिष्टप्रसङ्गमाह । तत्रेति । अप्रामाणिकोपाधिशङ्कायाः सर्वत्र सुलभत्वात् स्वजनकादावपि सन्देहे पित्रादिव्यवहारा अप्युच्छिद्येरन्नित्यर्थः । द्वितीये ऽप्यनिष्टमाह । प्रत्यक्षेति । सोऽपि कदाचिदुपलप्स्यत इति शङ्कायास्तु पूर्वोक्तातिप्रसङ्ग एव निवारक इति भावः । तृतीयतुरीययो[१]रप्यनिष्टप्रसङ्गमाचष्टे । व्यापकानामिति । व्यापकानामुपाधित्वे सर्वत्र नित्यानामुपाधित्वे सर्वदेति च योज्यम् । अथ पञ्चमादिविकल्पचतुष्टयं युगपद्दूषयति । उभयेत्यादि । यद्येषामुपाधित्वमुच्यते तदा लक्षणाभावादाभासत्वं स्यादिति भावः । तत्राद्ये साधनाव्यापकत्वाभावात् द्वितीयचतुर्थयोः साध्यव्यापकत्वाभावात् तृतीये तूभयाभावाच्च लक्षणाभाव इति विवेकः । इत्थं क्रमा-

---

(१) व्यापकनित्यत्वपक्षयोः ।

वह्निव्यभिचारे ऽपि व्याप्यमात्ररूपाणां व्यापकमात्ररूपाणां चोपाधिलक्षणाभावः । उभयरूपास्तु सामग्रीतो नान्ये । सा च नोपाधिः । धूमस्य वह्निनेव तया व्याप्तेः साधनाव्यापकत्वाभावात् । न च कृतकत्वानुष्णत्वयोः सम्बन्ध इव साध्यधर्मिजातीयेतरत्वमिहाप्युपाधिः । तस्य प्रमाणबाधमात्रैकनियतत्वादिति । एवं प्रत्यक्षमपीह भूतले घटो नास्तीति भूतलवद्घटाभावे ऽपि प्रवर्तमानं यद्यभविष्यत् घटो भूतलमिवाद्रक्ष्यत्

द्विकल्पाष्टकं निरस्याथ नवमं व्युत्क्रम्य दशमं निरस्यति । उभयरूपास्त्विति । ततः किमत आह । सा चेति । कुत इत्यत आह । साधनाव्यापकत्वाभावादिति । तदभावे ऽपि हेतुमाह । धूमस्येति । कार्यस्य कारणेनेव कारणकारणेनापि व्याप्यत्वादित्यर्थः । अथ वह्निमात्राव्यभिचारे ऽपि व्यापकमात्ररूपा इति नवमः पक्षः । एवंलक्षणश्चोपाधिरत्र पक्षेतरत्वमस्त्येव बाधस्थले ऽङ्गीकृतश्च स च सर्वानुमानास्कन्दीति त्यज तामनुमानप्रामाण्यप्रत्याशामित्याशङ्कामुद्भाव्य विघटयति । न चेति । साध्यधर्मिजातीयेतरत्वं पक्षेतरत्वमित्यर्थः । पक्षीकृतसकलव्यक्तिसङ्ग्रहार्थं प्रकारवचनस्य जातीयरः प्रयोगः । कुतो नेदमिहोपाधिरत आह । तस्येति । अनुष्णं तेजः कृतकत्वाज्जलवदित्यादिबाधितविषयेष्वेव प्रयोगेषु पक्षेतरत्वस्य समव्याप्तेरुपाधिलक्षणस्य सम्भवादन्यत्रासम्भवात् तेष्वेव तस्योपाधित्वं नान्यत्रेत्यर्थः । अथ प्रत्यक्षे ऽपि तर्कप्रकारमाह । एवं प्रत्यक्षमपीति । अभावे ऽपि प्रवर्तमानं तद्ग्रहणाय व्याप्रियमाणमित्यर्थः । तर्केणानुज्ञायमानमनुगृहीतं सदित्य-

तस्य तेन सह तुल्यदर्शनयोग्यत्वादिति । न च दृश्यत इति तर्केणानुज्ञायमानं घटाभावं निश्चाययतीति । एवं स्वर्गकामो यजेतेत्यत्र समानपदोपात्तत्वाद्भाव्यत्वाच्च धात्वर्थः साध्यो भवतु भवतु वा पुरुषा-

र्थः । तर्कस्वरूपमाह । यदीत्यादि । अथ शब्दे ऽपि तर्कप्रवृत्तिप्रकारमाह । एवं स्वर्गेत्यादि अवधारयतीत्यन्तेन सन्दर्भेण । ननु व्युत्पन्नस्याकाङ्क्षासन्निधियोग्यतावत्पदकदम्बकश्रवणसमनन्तरमेव निर्विचिकित्सवाक्यार्थप्रतिपत्तौ कस्तर्कस्यावकाश इत्याशङ्क्य स्वर्गकामाधिकरणविचारोपन्यासेनावकाशं दर्शयति । स्वर्गकाम इत्यादि । तत्र स्वर्गकामो यजेत पशुकामो यजेतेत्यादौ प्रत्ययार्थभूताया भावनायाः किं धात्वर्थो भाव्यः उत स्वर्ग इति संशयः कृतः तत्र पूर्वपक्षवचनव्यक्तिमाह । धात्वर्थः साध्यो भवत्विति । साध्यो भाव्य इत्यर्थः । तत्र हेतुमाह । समानपदोपात्तत्वादिति । एकपदरूपश्रुतिगम्यत्वादित्यर्थः । स्वर्गस्तु पदान्तरोपात्तो वाक्यगम्यसम्बन्धः वाक्याच्च श्रुतिर्बलीयसीति भावः । हेत्वन्तरमाह । भव्यत्वाच्चेति । भवतीति भव्यो जन्यः कार्य इति यावत् । भव्यगेयेत्यादिना कर्तरि निपातनात् साधुः । तथाभूतं भव्यायोपदिश्यत इति न्यायात् स्वर्गेण यागं कुर्यादिति भव्ययागसिद्धये भूतस्वर्गादिद्रव्यं साधनत्वेनोपदिश्यते न तु यागेन स्वर्गं भावयेदिति भूतस्वर्गपश्वादिद्रव्यसिद्धये भव्ययागोपदेशो युक्तः । तदुक्तम् ।

भूतं च स्वर्गपश्वादि द्रव्यं भव्याय कर्मणे ।
विधीयते न भूताय भव्यकर्मोपदेशनम् ॥ इति ।

र्थत्वात् स्वर्ग इति संशये तर्कावतारः । यदि साध्यो धात्वर्थः स्यात् तदोपदेष्टुराप्तत्वं विधेश्चेष्टाभ्युपायत्वं प्रेक्षावतां प्रवृत्तिश्च व्याहन्येत । अस्ति चैतत् सर्वं प्रमाणतः सिद्धमिति तर्केणानुगृह्यमाणः शब्दः स्वर्गमेव

स्वर्गशब्दश्च लोके स्रक्चन्दनादिषु प्रयोगाद् द्रव्यवचनः कर्मिश्च साधनकामानुवादः । तेन भव्यत्वात् कार्यत्वाद् धात्वर्थ एव भाव्यो भावनायाः किमंशपूरक इति पूर्वपक्षवचनव्यक्त्यर्थः । पुस्तकेषु तु भाव्यत्वाद् दीर्घः पाठः प्रामादिकः उक्तार्थस्याकरस्यस्यैवानेनाभिधानात् साध्याविशिष्टत्वाच्चेति[१] । अथ सिद्धान्तवचनव्यक्तिं चाह । भवतु वेति । स्वर्गस्यैव भाव्यत्वे हेतुमाह । पुरुषार्थत्वादिति । तथाहि पदश्रुतेर्बलीयस्या विधिश्रुत्या प्रवर्तनात्मिकया प्रवृत्तिरूपा भावना धात्वर्थसम्बन्धात् प्रागेवावरुद्धा सती कथं कर्मियोगादवगतपुरुषार्थभावं प्रवृत्तियोग्यं स्वर्गमवधूय केवलक्लेशात्मकमपुरुषार्थं वा धात्वर्थं भाव्यत्वेनावलम्बिष्यत इति स्वर्ग एव भाव्य इति सिद्धं वचनव्यक्त्यर्थः । एवं समानपदोपात्तत्वपुरुषार्थत्वाभ्यां भाव्यसन्देहे तदवधारणाय तर्कः शब्दे लब्धावकाशो भविष्यतीत्याह । इति संशय इति । तर्हि स तर्को वाच्य इत्यपेक्षायां तर्कत्रयमाह । यदीत्यादिना । यद्यपुरुषार्थो धात्वर्थो भाव्यः स्यात् तदोपदेष्टुराप्तत्वमाप्तोपदेशात्मकस्य विधेरिष्टसाधनज्ञानोपायत्वमात्मनः प्रेक्षावत्प्रवृत्तिविषयत्वं च व्याहन्यादित्यर्थः । तर्काणां विपर्यये पर्यव-

सिद्धान्त-

---

(१) साध्यभाव्ययोः पर्यायत्वाच्च ।

भावनाफलत्वेनावधारयति ज्योतिष्टोमेन स्वर्गं भावयेदिति । एवमन्यत्राप्यन्यथासिद्धिनिरसनादिरनुग्रह[1]स्तत्रतत्र दर्शयितव्यः । तस्मात् साधूक्तं प्रमाणानुग्राहकस्तर्क इति । अत एव प्रमाणानामनुग्राहकस्तर्कस्तत्त्वज्ञानाय कल्पत इति भाष्यम् । प्रमाणविषयविभागात् तु प्रमाणानुग्राहक इति च वार्त्तिकम् । अनुजानन्ननुगृह्णातीति टीकापि । अन्वयव्यतिरेकविषये भूयोदर्शनसाहाय्यकमाचरन्ननुग्राहकस्तर्क इत्यात्मतत्त्वविवेकश्च । ननु तर्कस्याहार्यलिङ्गजन्यत्वेन

सानमाह । अस्ति चेति । फलितमाह । इति तर्केणेति । भावनाफलत्वेन भाव्यत्वेनेत्यर्थः । अथोपमानादावपि तर्कानुग्राहकत्वमतिदिशति । एवमिति । पञ्चषादिप्रमाणवाद्यभिप्रायेण तत्रतत्रेति वीप्सा । उपमानफलस्य मानान्तरसाध्यत्वे तत्प्रकरणोक्तदोषापत्तिरिति तर्केणान्यथासिद्धिनिरासः । आदिशब्दाद् विषयाभ्यनुज्ञानसंग्रहः । परमप्रकृतमुपसंहरति । तस्मादिति । तर्कस्य प्रमाणानुग्राहकत्वे पक्षिलादिसम्मतिमाह । अत एवेत्यादि । विषयविभागाद् विषयविवेकादित्यर्थः । अनुजानन्ननुगृह्णातीति । विषयाभ्यनुज्ञानमेवानुग्रह इत्यर्थः । उदयनोक्तमानानुग्राहकत्वमप्युपलक्षणं मत्वाह । अन्वयव्यतिरेकेति । अनुमानजीवितव्याप्तिग्राहकप्रमाणोपयोगित्वमेव तदनुग्राहकत्वमित्यर्थः । स्वयमप्रमाणस्य कथं प्रमाणानुग्राह-

---

(१) रूपोनुग्रह—पा॰ B पु॰ ।

विपर्ययरूपस्य कथं प्रमाणानुग्राहकत्वमिति चेत् । मैवम् । अनिष्टापादकत्वेनानियतेच्छाविच्छेदकत्वनियमात् । यथा सविषान्नभक्षणेच्छायां यदि भक्षयिष्यसि तदा मरिष्यसीत्यनिष्टापादनेन भक्षणेच्छाविच्छेद इत्यनुभवसिद्धमिति न सङ्कटं किञ्चिदत्रेति ।

निर्णयलक्षणमाह ।

निर्णयस्तर्कमानाभ्यामर्थतत्त्वावधारणम् ॥ ७५ ॥

कत्वमिति प्रत्यवतिष्ठते । नन्विति । ननु दुष्टेन्द्रियाद्यजन्यस्य कथं विपर्ययत्वमित्यत्राह । आहार्येति । बुद्धिपूर्वारोपोऽपि मिथ्येति भावः । न चायमनवधारणात्मकत्वात् संशय एवेति वाच्यम् अग्न्यभावे धूमो न स्यादेवेत्यवधारणात् समानधर्मादिकारणाभावाच्चेति सन्तोष्टव्यम् । कात्र कथं वा न हि दृष्टे ऽनुपपन्नं नामेति समाधत्ते । मैवमिति । अनिष्टप्रसञ्जनद्वारा सर्वत्रानियतेच्छाविच्छेदलक्षणानुग्रहनियमस्याप्यनुभवसिद्धत्वादित्यर्थः । कुत्रानुभूतस्तत्राह । यथेति । तस्माद्यथा स्वप्नदर्शनस्यायथार्थस्यापि यथार्थभाविशुभाशुभसूचकत्वं तथा तर्कस्यापि स्वयमप्रमाणस्यापि प्रमाणानुग्राहकत्वं नानुपपन्नमित्युपसंहरति । इति न सङ्कटं किञ्चिदत्रेति । इति तर्कपदार्थः ॥

ननूत्तरार्द्धे निर्णयस्तत्त्वावधारणमिति पर्यायकीर्तनं पुनरुक्तिरित्याशङ्क्य लक्ष्यलक्षणभावान्न दोष इत्याह । निर्णयेति । तर्कफलत्वात् तर्कानन्तर्यमस्येति चोक्तमेव स्मर्तव्यम् ।

प्रमाणतर्काभ्यां स्वपरपक्षसाधनोपालम्भविमर्शपूर्वको यथार्थाध्यवसायो निर्णयोऽत्राभिमतः । परीक्षासाध्यमर्थावधारणं निर्णय इत्याचार्याः । तदुक्तम् । विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति ॥ ७५ ॥

अथ कथालक्षणमाह ।

ननु तत्त्वावधारणमित्येतावदेव लक्षणमस्तु किं तर्कमानाभ्यामिति विशेषणेनेत्याशङ्क्य व्याचष्टे । प्रमाणतर्काभ्यामिति । यः प्रमाणतर्काभ्यां स्वपक्षसाधनपरपक्षोपालम्भपूर्वको विमर्शपूर्वकः संशयोपमर्दक इति यावत् यथा स्थाणुरेवायमित्यादि स एव निर्णयपदार्थोऽभिमतो नान्यो यथार्थोऽपीत्यर्थः । तेन घटाद्यवधारणव्युदासान्न विशेषणवैयर्थ्यमिति भावः । यथार्थेति सर्वायथार्थज्ञानव्युदासः । अर्थव्युदासाय प्रत्यय इति वक्तव्ये स्फुटार्थमध्यवसाय इत्युक्तम् । तद्व्यावर्त्यस्य यथार्थानध्यवसायस्य व्याघातहतत्वादिति । अत्रोदयनसम्मतिमाह । परीक्षासाध्यमिति । परीक्षा तर्कमानाभ्यां विचारो विमर्श इति यावत् । तत्साध्यमिति । अत्र सूत्रसम्मतिमाह । विमृश्येति । पक्षप्रतिपक्षाभ्यां स्वपक्षसाधनपरपक्षोपालम्भाभ्यामित्यर्थः । इति निर्णयपदार्थः ॥ ७५ ॥

ननूद्देशक्रमाद्वादलक्षणे वक्तव्ये किमन्यदनुद्दिष्टमेवोत्तरश्लोके कथ्यत इत्याशङ्क्य वादादीनां त्रयाणां कथावान्तरभेदत्वात् प्रथमं कथासामान्यलक्षणं कथयतीत्याह । कथेति । नन्वेवं चेत् कथैव त्रिविधाप्येकः पदार्थ इति पदार्थन्यूनत्वापत्तिः अन्यथा वादादिवत् प्रमाणादिपदार्थावान्तरभेदानामपि पृथक्पदार्थत्वे तदतिरेक इत्युभयथापि षोडशैव पदार्था इति नियमभङ्ग इति चेत् सत्यम्

विचारविययो नानावक्तृको वाक्यविस्तरः ।
कथा तस्याः षडङ्गानि प्राहुश्चत्वारि केचन ॥७६॥

विचारगोचरार्थविषयो नानावक्तृको वाक्यविस्तरः कथा । तस्याः कथायाः षडङ्गानि सङ्गिरन्ते । निरूप्यनिरूपकनियमः कथाविशेषव्यवस्था वादिप्रतिवादिनियमः सदस्यानुविधेय[1]संवरणम् निग्रहस्थानसामस्त्यासमस्त्योद्भावनप्रतिज्ञानम्

तथापि वादस्य निःश्रेयसौपयिकतत्त्वाध्यवसायहेतुत्वाज्जल्पवितण्डयोश्च तत्संरक्षणार्थत्वात् निःश्रेयसार्थिनां प्रत्येकमेव प्राधान्येनोपादेयत्वज्ञापनाय तेषां पृथक्पदार्थत्वेनोद्देशः प्रमाणादीनां त्वेतच्छेषत्वेनोपादेयत्वान्न तथात्वम् न च तद्विशेषवत्सच्छेषत्वमप्येकपदार्थत्वप्रयोजकमिति मन्तव्यम् तन्त्रान्तरे गुणादीनां द्रव्याभेदप्रसङ्गादिति सङ्क्षेपः ।

ननु विचारो विमर्शस्तद्विषयत्वं कथायां न सम्भवतीत्यसम्भवि लक्षणमित्याशङ्क्य श्लोके विचारशब्दस्य विचार्यत इति कर्मसाधनव्युत्पत्त्या विचार्यार्थपरत्वान्नायं दोष इति व्याचष्टे । विचारगोचरार्थेति । क्रमात्पदत्रयेण कलहवाक्यपञ्चावयवप्रयोगकथावाक्यस्य पदानां व्युदासः । तत्र षडङ्गानि दर्शयति । निरूप्येत्यादि । निरूप्यं प्रतिपाद्यमात्मतत्त्वादिकं निरूपकं तत्प्रतिपादकं प्रमाणमनुमानादि तयोर्नियमः अनेनेदं साधयामीति प्रतिज्ञानं कथाविशेषो वादादिः तस्य व्यवस्था अनेन कथयिष्यामीति नियमकरणम् तथानयोरयं वादी प्रतिवादीति नियमो नियमनम् अनु पश्चाद्विधेयं निष्पन्नकथाफ-

(१) सभ्या–पा· B पु· ।

कथापर्यवसानसंवित्तिरिति षडङ्गानि । अपरे तु चत्वारि । वादिप्रतिवादिनियमौ सदस्यानुविधेय(२) संवरणे चेति । लिपिकरणव्यवहारेषु लेखकोऽपि कश्चिदुभयसंमतो वरणीयः । अत्र कथकौ विद्यातः सम्भावितसाम्यौ स्याताम् । अन्यथा विशेषविज्ञानप्रयोजनायाः कथाया आनर्थक्यप्रसङ्गात् । वादमन्तरेणापि विशेषनिर्णयोपपत्तेः । सदस्यास्तु वादिप्रति-

लप्रतिपादनरूपमस्यास्त्यनुविधेयः सभापतिः तस्य सभ्यानां च संवरणमेते सभ्या अयमनुविधेय इति सम्परिग्रहः निग्रहसामस्त्यं जल्पवितण्डयोर्वादे त्वसामस्त्यमिति । एतच्च निग्रहान्ते स्फुटीभविष्यति । कथापर्यवसानस्य कथासमाप्तसंवित्तिपक्षादौ क्वचिदेकत्र समाप्तिरिति समयबन्धः । अथ चतुरङ्गानि दर्शयति । वादीत्यादि । वादिनियमः प्रतिवादिनियमः सभ्यसंवरणमनुविधेयसंवरणं चेति चत्वार्यङ्गानि । अन्यत् सर्वं तन्नान्तरीयकत्वान्न पृथग्वाच्यमिति भावः । अत्र पक्षद्वये ऽपि पाक्षिकमङ्गान्तरमाह । लिपिकरणेति । अथ वादिप्रतिवादिनोस्तुल्यबलत्वमावश्यकमित्याह । अत्रेति । ननु तुल्यत्वं दुर्ज्ञानमत आह । सम्भावितेति । अतुल्यत्वे बाधकमाह । अन्यथेति । कथमानर्थक्यं वादं विना निर्णयानुपपत्तेरित्याशङ्क्याह । वादमिति । पुरुषगौरवादेव श्रद्दधानस्य तदुपदेशमात्रादपि निर्णयसिद्धेरिति भावः । सभ्यलक्षणं तत्संख्यानियमं चाह । सदस्यास्त्विति । संख्यावैषम्यस्य प्रयोजनमाह । द्वैधेति ।

(२) सभ्यानुविधेय—पा· B पु· ।

कथावान्तरविधा दर्शयति ।

वादो जल्पो वितण्डेति तिस्रस्तस्या विधा मताः ।

तत्र वादस्य लक्षणं फलं च दर्शयति ।

तत्र प्रमाणतर्काभ्यां साधनाक्षेपसंयुता ॥ ११ ॥
वीतरागकथा वादस्तत्फलं तत्त्वनिर्णयः ।

प्रमाणतर्काभ्यामेव स्वपक्षसाधनपरपक्षोपालम्भौ करणीयावित्यभिमानमात्रमत्र विवक्षितं न[1] वस्तुतः उभयोरपि तथा कर्तुमशक्यत्वात् । यथाहुः । प्रामाणिकवचनमात्राभिप्रायपूर्विका कथा वाद इति ।

शपरमित्याशयेनाह । कथावान्तरेति । एवं पदार्थन्यूनताशङ्का तु प्रागेव निरस्तेत्यास्तां तावत् ।

उत्तरश्लोके पादत्रयेणैव वादलक्षणाच्चतुर्थपादवैयर्थ्यमाशङ्क्य फलाभिधानार्थत्वेन सार्थकत्वमाह । तत्रेति ।

ननु जल्पवितण्डयोरपि प्रमाणतर्कसम्भवाल्लक्षणमतिव्याप्तमित्याशङ्क्यावधारणस्य विवक्षितत्वान्नायं दोष इति व्याचष्टे । प्रमाणतर्काभ्यामेवेति । तेन छलादिनिवृत्तिः । तथा च प्रमाणतर्काभ्यामेव स्वपक्षसाधनपरपक्षोपालम्भवती कथा वाद इति लक्षणं द्रष्टव्यम् । ननु पक्षद्वयेऽपि कथं प्रमाणतर्कसम्भव इत्यत उक्तम् अभिमानमात्रमिति । अवास्तवत्वे हेतुमाह । उभयोरपीति । वस्तुनो द्वैरूप्यासम्भवादिति भावः । प्रामाणिकमात्रं प्रामाणिकमेवेदं वचनमित्यभिप्रायोभिमानः पूर्वो यस्याः सेत्यर्थः ।

---

(१) न तु-पा॰ C पु॰ ।

तत्त्वावसाय[1]फलत्वादस्यां वीतरागाणामेव शिष्याचार्यसब्रह्मचारिणामधिकारः[2] न च विजिगीषूणामित्युक्तं वीतरागकथेति । तदुक्तम् । तं शिष्यगुरुसब्रह्मचारिशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयादिति । अज्ञातज्ञापनं ज्ञातस्य स्थिरीकरणं संशयनिवर्तनमिति त्रिविधस्तत्त्वनिर्णयः । अत्र निग्रहस्थानमुत्तरत्र[3] दर्शयिष्यति । तदुक्तम् । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद इति ॥ ७७ ॥ ऽऽ ॥

नन्वेवं लक्षणे वीतरागपदं वृथेत्याशङ्क्य सत्यम् किं त्वधिकारिनिरूपणार्थमित्याह । तत्त्वाध्यवसायेति । वादस्य वीतरागमात्राधिकारित्वे सूत्रसम्मतिमाह । तदुक्तमिति । तं वादमित्यर्थः । अत्राधिकारित्रैविध्यात् फलत्रैविध्यमाह । अज्ञातेत्यादि । गुरुशिष्यवादे ऽज्ञातज्ञापनं फलम् सब्रह्मचारिवादे ज्ञातस्थिरीकरणम् शिष्टमुमुक्षुवादे संशयनिवर्तनमिति यथासङ्ख्यं द्रष्टव्यम् । एवं वादस्य लक्षणाधिकारिणौ निरूप्य तत्रोद्भाव्यानुद्भाव्यादिनिग्रहनियमजिज्ञासायामाह । अत्रेति । उत्तरत्रेति । निग्रहान्त इत्यर्थः । अथ वादलक्षणे सूत्रसम्मतिमाह । तदुक्तमिति । प्रमाणतर्काभ्यामेव साधनोपालम्भौ यस्मिन् स पक्षप्रतिपक्षपरि-

---

(१) तत्त्वाध्यवसाय–पा· C पु· ।

(२) सब्रह्मचार्यादीनामधिकारो–पा· B पु· ।

(३) निग्रहस्थानव्यवस्थितिमुत्तरत्र–पा· B पु· ।

जल्पवितण्डे दर्शयति ।

स च छलादिसम्भिन्नो[1] जल्पोऽस्य विजयः फलम् ॥ ७८ ॥

जल्प एव वितण्डा स्यात् प्रतिपक्षे त्वसाधने ।

स इति तच्छब्देन प्रमाणतर्कनियमाभिधानं तत्त्वावसाय[2]लक्षणं फलं च परिहायोक्तलक्षणो वादः परामृश्यते । छलादिप्रयोगाभ्यनुज्ञानाद्विजयफलत्वनिर्देशाच्च ततो भिद्यते । ततश्च प्रमाणतर्काभ्यां

ग्रहो वाद इति लक्षणम् । सिद्धान्ताविरुद्ध इत्यनेन तद्विरोधेऽपसिद्धान्तेन निग्राह्य इति सूचितम् । स्वपक्षसाधनं तत्समर्थनं परपक्षदूषणं तत्समर्थनं शब्ददोषवर्जनं चेति पञ्चावयवास्तदुपपादकाः । अन्यथाङ्गवैकल्यात् कथाभासत्वप्रसङ्ग इति भावः । इति वादपदार्थः ॥ ७७ ॥ ऽऽ ॥

अथोत्तरश्लोके स इति सर्वनाम्ना पुनर्वादोपादानात् तस्यैव लक्षणान्तराभिधानमिति मन्दभ्रमनिरासार्थमाह । जल्पवितण्डे इति ।

ननु स इति पूर्वोक्तलक्षणं वादं परामृश्य पुनस्तस्यैव तद्विरुद्धधर्माभिधाने व्याघातः स्यादित्याशङ्क्याह । स इतीति । विशेषणप्रयोजनमाह । छलादीति । अस्त्येव वादाद् भेदो जल्पस्य वितण्डायास्तु कथं भेद इति शङ्कां निरस्य लक्षणं निष्कृष्याह । ततश्चेति । स्वपरेत्यादिविशे-

(१) सम्भेदो–पा॰ C पु॰ ।

(२) तत्त्वाध्यवसाय–पा॰ C पु॰ ।

छलादिभिश्च स्वपरपक्षसाधनोपालम्भवती विजिगीषुकथा जल्पः । विजिगीषमाणयोरुभयोरपि साधनोपालम्भवती कथा जल्प इत्याचार्याः । तत्र हि मत्सरादिना विजिगीषया वा कथाप्रवृत्तेः । सदुत्तरापरिस्फूर्तौ छलादिप्रयोगेणापि प्रतिवादी पर्याकुलितमानसोऽप्रतिभो ऽसदुत्तरवादी वा भवेदितीतरस्यावष्टम्भे विजयसम्भवात् प्रमाणतर्काभ्यामेव व्यवहार इत्यभिमानोऽपि न विवक्षितः । तस्यां च कथायां परपक्षसाधनानुपालम्भे तु न स्वपक्षस्थितिमात्रेण विजयी अपि तु केवलं श्लाघ्य एव स्यात् । वञ्चितपरप्रहारस्तमप्रहरमाण इव वीरः । स्वसाधनासिद्धौ परदूषणमात्रेणापि

षणाद्वितण्डातो भेद इत्यर्थः । अत्रापि विजिगीषुपदमधिकारिनिरूपणार्थम् । अत्रोदयनसम्मतिमाह । विजिगीषमाणयोरिति । विजिगीषमाणाधिकारत्वाच्छलादिसम्भेदो लभ्यते तेन वादाद् भेदः । शेषेण क्रमाद् वितण्डाकथाभासाभ्यां भेदः । ननु विजिगीषवोरपि वादवत् तत्राभिमानिकोऽपि प्रमाणतर्कव्यवहारः किं नेष्ट इत्याशङ्क्याह । तत्रेति । यथा कथञ्चित् परभञ्जनैकतत्पराणां किं तया चिन्तयेति भावः । अवष्टम्भो बलात्कारः । एकपक्षसत्त्वस्वपरपक्षसाधनोपालम्भयोर्द्वयोरपि यः कर्ता स एव जेता नान्यतरकारी किं त्वभावाद् भावोऽतिरिच्यत इति न्यायादुभयभ्रष्टाद् वरमिति श्लाघते केवलमिति सदृष्टान्तमाचष्टे । तस्यां चेत्यादि । जल्पलक्षणे सूत्रसम्मति-

तथा यथा आत्मानमरक्षन् परघातीव वीरः। ततश्च स्वपरपक्षयोः साधनोपालम्भाभ्यामेव विजयो नान्यतरमात्रेणेति। तदुक्तम्। यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति ॥

प्रतिपक्षस्थापनामात्रहीनो जल्प एव वितण्डा भवति। अत्र प्रतिवादी यं कञ्चन सिद्धान्तमवलम्ब्य व्यवस्थितः प्रतिपक्षभङ्गमात्रेण विजयी भवति न तु जल्पवत्स्वपक्षसाधनेनापीत्युक्तम् प्रतिपक्षे त्वसाधन इति। सिद्धान्तावष्टम्भस्त्ववश्यं करणीयः।

माह। तदुक्तमिति। अत्र तन्त्रोच्चारितोपपन्नपदावृत्त्या यथोक्ते वादलक्षणे यदुपपन्नं योग्यं केवलप्रमाणतर्कतत्त्वावसायफलातिरिक्तं तेनोपपन्नो युक्तः छलादिसम्भिन्नो जल्प इति सूत्रार्थः। इति जल्पपदार्थः ॥

श्लोकोत्तरार्द्धे वितण्डालक्षणमुक्तं तस्यार्थं निष्कृष्याह। प्रतिपक्षेति। अत्र जल्प एवेति मासमग्निहोत्रवत् तद्धर्मप्राप्त्यर्थो नामातिदेशस्तेन छलादिसम्भिन्न इत्यर्थः। एतच्चास्यापि(१) जल्पवज्जयमात्रफलत्वान्न वादवत् केवलप्रमाणतर्कव्यवहारनियम इति ज्ञापनार्थमुक्तम्। लक्षणं तु प्रतिपक्षस्थापनारहिता वितण्डेत्येव। एतावतैव जल्पाद् वादादपि व्यावृत्तेः। ईदृग्वादाभासव्यावृत्त्यर्थं तस्यापि सम्भावितत्वादिति केचित्। प्रतिपक्षे त्वसाधन इति प्रतिपक्षस्थापनानिषेधादर्थादस्याप्यावलम्बो न कार्य इति भ्रमः स्याद् अतोऽभिप्रायं व्याचष्टे। अत्रेति। तर्ह्यस्याप्यपक्षस्य

(१) वितण्डाव्यवहारस्यापि।

अन्यथाऽनित्यः शब्दः कृतकत्वादिति नैयायिकेन प्रयुक्ते कश्चन वैतण्डिकाभिमानी मीमांसादृष्ट्या पूर्वमसिद्धिमुद्भाव्य वादिना पुनः साध्यमाने हेतौ सौगतमतानुसारेण सिद्धसाधनतामुद्भावयेदित्यपरिनिष्ठितः कथाव्यवहारः स्यात् । अत एव सूत्रकारोऽपि प्रतिवादिनः पक्षपरिग्रहमङ्गीकृत्य तस्य स्थापनामात्रं निराचष्टे स प्रतिपक्षस्थापनाहीनो वितण्डेति । जल्पवितण्डयोरेव चतुःपञ्चानां षट्सप्तानां वाङ्गानां

किमवलम्बनेनेत्यत आह । सिद्धान्तावष्टम्भस्त्विति । कुत इत्याशङ्क्यान्यथातिप्रसङ्गादित्याह । अन्यथेति । मीमांसामते शब्दस्य नित्यत्वात् कृतकत्वस्यासिद्धिः । साध्यमान इति । प्रयत्नानन्तरीयकत्वादिनेति शेषः । हेतौ कृतकत्वहेताबित्यर्थः । सौगतमते सन्मात्रस्य क्षणिकत्वात् सिद्धसाधनता नियता स्यादिति जयपराजयव्यवस्था न स्यादित्यर्थः । स्वोक्तं सूत्रसंवादेन द्रढयति । अत एवेति । पक्षपरिग्रहानङ्गीकारे प्रतिपक्षहीन इत्येवोच्येत न तु स्थापनाहीन इति भावः । यद्यपि कथा तस्याः षडङ्गानि प्राहुश्चत्वारि केचनेति सामान्येनोक्तं प्राक् तथापि तज्जल्पवितण्डाविषयमेव न वादविषयमिति नियच्छति । जल्पवितण्डयोरेवेति । चत्वारि पञ्च वा चतुःपञ्चानि षट् सप्त वा षट्सप्तानि तेषाम् । सङ्ख्ययाव्ययेत्यादिना बहुव्रीहिः बहुव्रीहौ सङ्ख्येये डजबहुगणादिति समासान्तो डच्प्रत्ययः । लेखकस्वीकारपक्षे पञ्चमसप्तमसम्भवः । अथ वादे

नियमावश्यम्भावः। वादे तु तदनपेक्षमेव तत्त्वावसायफलसिद्धेः। न च न विगृह्य कथां कुर्यादित्यादिभिर्जल्पवितण्डयोर्निषेधः शङ्कनीयः। नास्तिकनिराकरणार्थमवश्यकर्तव्यत्वेन तदितरविषयत्वान्निषेधस्य। तदुक्तम्। तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति ताभ्यां विगृह्य कथनमिति च ॥ ७८ ॥ ऽऽ ॥

अथ हेत्वाभासाः।

हेतोः केनापि रूपेण रहिताः कैश्चिदन्विताः ॥७९॥

तन्नियमाभावे हेतुमाह। वादे त्विति। तदनपेक्षमङ्गानपेक्षं क्रियाविशेषणं चैतत्। ननु निषिद्धयोर्जल्पवितण्डयोः किमर्थं लक्षणमुच्यते यत् प्रक्षाल्य त्यागः स्यादित्याशङ्क्याह। न चेति। कुतो न शङ्कनीय इत्याशङ्क्य निषेधस्य नास्तिकेतरप्रतियोगिककथाविषयत्वादित्याह। नास्तिकेति। तर्हि किं तदनयोः कर्तव्यताबोधकं शास्त्रमित्याकाङ्क्षायां सूत्रमेवेत्याह। तदुक्तमिति। स्मृतिवत् सूत्रस्यापि आर्षत्वात् तदपवादकत्वं युक्तमिति भावः। जल्पवितण्डे इति। कर्तव्ये इति शेषः। नन्वनेन सूत्रेणानयोः कर्तव्यतामात्रं प्रयोजनं चोक्तं न तु विगृह्य कथनमिति कथमस्यापवादकत्वमित्याशङ्क्योत्तरसूत्रे तदुक्तमित्याह। ताभ्यामिति। इति वितण्डापदार्थः ॥ ७८ ॥ ऽऽ ॥

अथ कथानन्तरमुद्देशक्रमाद्धेत्वाभासा लक्ष्यन्ते इत्याह। अथेति।

हेत्वाभासाः पञ्चधा ते[1] गौतमेन प्रपञ्चिताः ।

उक्तानां चतुःपञ्चानां रूपाणामन्यतमेन विकलास्तदितराङ्गसद्भावे ऽपि हेतव[2] आभासा भवन्ति । ते च पञ्चविधाः । तदुक्तम् । सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासा इति । गौतमग्रहणेन मतान्तरे विशेषं दर्शयति[3] । स चोपन्यस्य निरस्यत[4] इति ॥ ७९ ॥ ८८ ॥

तत्र सव्यभिचारः स्यादनेकान्तः स च द्विधा॥८०॥
साधारणस्तथा हेतुरसाधारण इत्यपि ।

रूपशब्दस्यानेकार्थत्वात् विवक्षितमर्थमाह । उक्तानामिति । अनुमानोक्तानां पक्षधर्मत्वादीनामित्यर्थः । नन्वेतल्लक्षणं केवलान्वयिकेवलव्यतिरेकिणोरतिव्याप्तमित्याह । चतुःपञ्चानामिति । तयोश्चतुरन्यतमराहित्यमितरत्र पञ्चान्यतमराहित्यं च विवक्षितम् । तथा च योग्यान्यतमरूपविकलो हेत्वाभास इत्यर्थः । तत्पाञ्चविध्ये सौत्रमुद्देशं प्रमाणयति । तदुक्तमिति ॥ ७९ ॥ ८८ ॥

तत्राद्यस्य लक्षणं विभागं चाह । तत्रेत्यादि ।

---

(१) पञ्चाधामी–पा· A पु· ।
(२) सम्पत्तावपि हेतव–पा· B पु· ।
(३) द्योतयति–पा· B पु· । सूचयति–पा· C पु· ।
(४) निरसिष्यत इति–पा· B पु· ।

तत्र हेत्वाभासेषु सव्यभिचारो नामानेकान्तः[१] एकत्रान्तो निश्चयो व्यवस्थितिर्नास्तीति। तदुक्तम्। अनैकान्तिकः सव्यभिचार इति। स च साधारणोऽसाधारण इति च द्विविधो भवतीति ॥ ८० ॥ ऽऽ ॥

ननु व्यवस्थान[२]मतिलङ्घ्यान्यत्रापि वृत्तिर्व्यभिचारः। तत्र साधारणस्य पक्षसपक्षलक्षणस्थानातिक्रमेण विपक्षेऽपि वृत्तेर्भवति व्यभिचारिता[३]। पक्षमात्रवृत्तेस्त्वसाधारणस्य कथं व्यभिचारिता। तस्य हि स्वस्थानवृत्तिरेव सङ्कुचिता दूरेऽन्यत्रापि वृत्तिरित्याशङ्कामपनुदन् विधाद्वयमेव विविच्य दर्शयति। आद्योऽन्वयादनेकान्तः पक्षत्रयकृताश्रयः[४] ॥ ८१ ॥

तत्रेत्यस्य प्रकृतिप्रत्ययार्थौ दर्शयन् लक्ष्यलक्षणपदे विविच्य योजयति। तत्र हेत्वभासेष्विति। तत्र विधाद्वयव्याप्तिज्ञानाय लक्षणपदं व्युत्पादयति। एकत्रेति। निश्चयवाचिनान्तशब्देन नियतत्वसाम्याद् व्यवस्थितिर्लक्ष्यते तेन साधारणस्य पक्षसपक्षयोरिव विपक्षेऽपि प्रवृत्तेरसाधारणस्य सति सपक्षे पक्षमात्रवृत्तेर्विपक्षादिवत् सपक्षादपि सर्वस्मात् व्यावृत्तेश्च स्वसीमातिक्रमेण व्यवस्थितत्वादनैकान्तिकत्वमित्यर्थः। अत्र सूत्रं संवादयति। तदुक्तमिति ॥ ८० ॥ ऽऽ ॥

अथ यथोक्तश्लोकेनोत्तरश्लोकस्य पौनरुक्त्यमाशङ्क्य शङ्कोत्तरत्वेन अस्यैव विचारणान्न दोष इत्याशयेन शङ्कापूर्वकमवतारयति। नन्विति।

(१) अनैकान्तिकः–पा॰ C पु॰। (२) स्वस्थान–पा॰ C पु॰। (३) व्यभिचारः–पा॰ B पु॰। (४) कृतान्वयः–पा॰ A पु॰।

व्यतिरेकादनेकान्तः पक्षमात्रान्वयः परः ।

अन्वयो व्यतिरेक इति च द्वे हेतुरूपे तत्रान्वयस्य भूमिः पक्षसपक्षौ व्यतिरेकस्य तु विपक्ष एव । सपक्षाश्च वा केचित् । तत्रान्वयस्य विपक्षे ऽपि वृत्तेर्यथा व्यभिचारः । एवं व्यतिरेकस्यापि सर्वेष्वपि सपक्षेषु वृत्तेर्भवत्येव व्यभिचारः । अत एव पक्षमात्रवृत्तेरपि केवलव्यतिरेकिणः सपक्षाभावादेव तत्र व्यतिरेको न वर्तत इति न व्यभिचारः । सपक्षविपक्षयोरुभयोरपि व्यतिरेकोऽस्तीति दर्शयितुं पक्षमात्रान्वयः पर इत्युक्तम् । पक्ष एवान्वयोऽन्यत्र सर्वत्र व्यति-

---

पक्षमात्रान्वय इत्यत्र सति सपक्षे इति शेषः । अन्यथा केवलव्यतिरेकिणोऽप्यहेतुत्वप्रसङ्गात् ।

इह श्लोके ऽन्वयव्यतिरेकग्रहणं किमर्थमित्याशङ्क्य व्याचष्टे । अन्वय इत्यादि । ननु व्यतिरेकस्य विपक्षमात्रभूमिकत्वे सपक्षैकदेशवृत्तेर्धूमादिहेतोरहेतुत्वं स्यादित्यत आह । सपक्षाश्च वा केचित् । नन्वेतावता पूर्वोक्तशङ्कानिरासः कथमत आह । तत्रान्वयस्येति । एवं च सति सपक्षे पक्षमात्रवृत्तिरसाधारणः असति तन्मात्रवृत्तिर्व्यतिरेकीति सिद्धमित्याह । अत एवेति । ननु श्लोके व्यतिरेकस्य सपक्षगामित्वं कुत्रोक्तमत आह । सपक्षविपक्षयोरिति । तत्रापि मात्रपदं प्रसादलभ्यमित्याह । पक्ष एवेति । क्रमेण विधाद्वयमुदाहरति । तत्रेत्यादि ॥ ८१ ॥ ऽऽ ॥

रेक एवेत्यर्थः । तत्र पक्षत्रयवृत्तिः साधारणः । यथाऽनित्यः शब्दः प्रमेयत्वादिति । सति सपक्षे पक्षमात्रवृत्तिरसाधारणः । यथाऽनित्या भूर्गन्धवत्त्वादित्युक्तमेवेति ॥ ८१ ॥ ऽऽ ॥

विरुद्धः स्याद्वर्तमानो हेतुः पक्षविपक्षयोः ॥ ८२ ॥

पक्षविपक्षयोरेव वर्तमानो हेतुर्विरुद्ध इत्येवकारोपश्लेषेण साधारणानैकान्तिकव्यवच्छेदसिद्धिः । साध्यविपर्ययव्याप्तो हेतुर्विरुद्ध इत्याचार्याः । यथा नित्यः शब्दः कार्यत्वादिति । तदुक्तम् । सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति ॥ ८२ ॥

प्रतिरुद्धः प्रकरणसमः स्यात् प्रतिसाधनैः ।

प्रतिप्रमाणप्रतिरुद्धो हेतुः प्रकरणसम इति ।

अथ विरुद्धं लक्षयति । विरुद्ध इति ।

उदाहरति । यथेति । अत्र कार्यत्वादिति हेतुः साध्याभिमतनित्यत्वविपरीतानित्यत्वव्याप्तः पक्षविपरीतयोरेव शब्दघटयोर्वर्तत इति स्याद् विरुद्ध इत्यर्थः । सिद्धान्तमिति । यं कञ्चन शब्दनित्यत्वादिसिद्धान्तं प्रतिज्ञाय तत्साधनाय तद्विरोधी तद्विपर्ययव्याप्तो हेतुः प्रयुक्तो विरुद्ध इत्यर्थः ॥ ८२ ॥

अथ प्रकरणसमं लक्षयति । प्रतिरुद्ध इति । स च प्रकरणेन प्रतिरोधकहेतुना समबलत्वात् प्रकरणसम इति द्रष्टव्यम् ।

प्रतिरोधो नाम हेतोरर्थनिश्चयप्रवृत्तिप्रतिबन्धः । सत्प्रतिपक्षो हेतुः प्रकरणसम इत्याचार्याः । ननु दुर्बलेन समबलेन प्रबलेन[1] वा प्रतिरोधः । त्रेधापि न सम्भवति । हीनबलस्य बाधितत्वेन प्रतिरोधकत्वायोगात्[2] । वस्तुनो द्वैरूप्यासम्भवेनोभयो[3]स्तुल्यबलत्वासम्भवात्[4] । प्रबलेन हीनबलस्य बाधितत्वेन कालातीतसङ्करप्रसङ्गाच्चेति । सत्यम् । वास्तवतुल्यबलत्वाभावे ऽपि अगृह्यमाणविशेषत्वेनाभिमानसिद्धसाम्येन प्रतिप्रमाणेन प्रतिरोधो विवक्षित इति न कश्चिद्दोषः । ततश्च नानुमानेनैव प्रतिरोधोऽनुमानस्याभिमानसाम्येन प्रत्यक्षादिनापि तत्सम्भवात् ।

ननु प्रतिरोधो नाम गतिप्रतिबन्धः स च हेतोर्वचनात्मकस्यासम्भवीत्यत आह । प्रतिरोधो नामेति । सत्प्रतिपक्षोऽविद्यमानप्रतीतिहेतुक इत्यर्थः । ननु सर्वथापि प्रतिरोधासम्भवात् खपुष्पकल्पोऽयं हेत्वाभास इति शङ्कते । नन्विति । स खलु पुरुषविशेषमपेक्षमाणो हेत्वाभासो भवतीत्याशयेन परिहरति । सत्यमिति । अत्राभिमानिकविशेषणलभ्यं विशेषान्तरमाह । ततश्चेति । अथानुमानिकस्याभिमानिकसाम्येन प्रत्यक्षेण प्रतिरोधमु-

---

(१) अधिकबलेन—पा॰ B पु॰ ।

(२) प्रतिरोधायोगात्—पा॰ C पु॰ ।

(३) विरुद्धप्रमाणयो—पा॰ B पु॰ ।

(४) बलायोगात्—पा॰ C पु॰ ।

यथा शुक्लोऽयं शङ्खः शङ्खत्वादितरशङ्खवदिति प्रयोगे पीतत्वेन प्रत्यक्षोपलब्धेः शुक्ल एव कथं स्यादिति। तमिमं प्रकरणसमं विरुद्धाव्यभिचारीति केचिद्व्यपदिशन्ति यथाहुः।

यत्राप्रत्यक्षता वायोररूपित्वेन साध्यते।
स्पर्शात् प्रत्यक्षता चासौ विरुद्धाव्यभिचारिता॥ इति।

तदुक्तम्। यस्मात् प्रकरणचिन्ता स निर्ण-

दाहरति। यथेति। एवमात्मनानात्वसाधनस्य व्यवस्थादेरद्वैतवाक्येन प्रतिरोध इत्याद्यूह्यम्। नन्वस्य(१) विरुद्धाव्यभिचारिणः परोक्ताद्भेदे पञ्चैवेतिनियमभङ्गादित्याशङ्क्य भेदमाह। तमिममिति। अभेदव्यक्तये(२) परोक्तमुदाहरणं दर्शयति। यथाहुरिति।

अत्र वायोरप्रत्यक्षत्वसाधकहेतोररूपित्वस्य प्रत्यक्षत्वे हेतुना स्पर्शवत्त्वेन प्रतिरुद्धत्वाद्विरुद्धः प्रतिरुद्धः सत्यव्यभिचाराप्रतीतेरव्यभिचारी चेति तस्यैव तथा व्यपदेशात् स एव स इत्यर्थः।

अथ स्वोक्तप्रकरणसमलक्षणे सूत्रसम्मतिमाह। तदुक्तमिति। यस्माद्वादिप्रयुक्ताद्धेतोरुपरि प्रकरणचिन्ता विपरीतसाध्यसाधकहेतुविचारः प्रवर्तते स निर्णयार्थं स्वसाध्यसिद्ध्यर्थमुपदिष्टो वादिहेतुः प्रकरणेन प्रतिहेतुना समबलत्वात् प्रकरणसम उच्यत इति सूत्रार्थः। अत्र

---

(१) अस्य प्रकरणसमस्य विरुद्धाव्यभिचारीतिव्यपदेशात् प्रकरणसम एव विरुद्धाव्यभिचारीति भावः।

(२) प्रकरणसमात्।

यार्थमपदिष्टः[1] प्रकरणसम इति । एकदेशिनस्तु स्वपक्षपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसम इति लक्षयन्ति उदाहरन्ति च । यथानित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति । तदिदं तावदसम्भवि लक्षणम् न ह्येकस्यैव हेतोरुभयत्रापि त्रैरूप्यं सम्भवति । नित्यत्वे साध्ये गगनं सपक्षः इतरत्र तदेव विपक्षः । न त्वेक एव हेतुः सपक्षे तत्र वर्तते विपक्षाच्च ततो व्यावर्तते चेति सम्भवति पक्षसपक्षयोरन्यतरत्वादित्यस्याप्येकदा शब्दाकाशयोरन्यतरत्वादित्यर्थोऽन्यदा शब्दघटयोरन्यतरत्वादित्यर्थः । ततश्च शब्दमात्रमत्रैकं नार्थ इति न किञ्चिदेतत् ।

असिद्धः साध्यतुल्यत्वाद्धेतुः साध्यसमो भवेत् ॥ ८३ ॥

असिद्धो हेतुः साध्यसम इति लक्षणम् । साध्य-

भूषणोक्तं लक्षणं दूषयितुमनुभाषते । एकदेशिनस्त्विति । दूषयति । तदिदमिति । कुत इत्यत आह । न हीति । असम्भवं व्यनक्ति । नित्यत्व इतीति । किं च एकस्य हेतोरुभयत्र त्रैरूप्यं लक्षणं तदैकत्वमेव हेतोरसिद्धमित्याह । [illegible]त्यादि ।

युक्तव्याप्त्युपजीव[illegible] लक्षयति । असिद्ध इति ।

उपलक्षणं चैतत् त[illegible]ष्याह । असिद्धो हेतुरिति । त्विति । साध्यादन्येन पापै[illegible]

---

(१) व्याप्त्युपजीवकमप्रयोजकं–पा· C [illegible]

समशब्दप्रवृत्तिनिमित्तप्रदर्शनं साध्यतुल्यत्वादिति(१)। तदुक्तम् । साध्याविशिष्टः साध्यत्वात् साध्यसम इति ॥ ८३ ॥

अथासिद्धिलक्षणं विवक्षन् सिद्धिलक्षणपुरःसरं सप्रकारमसिद्धिमाह ।

व्याप्तस्य पक्षधर्मत्वप्रतीतिः सिद्धिरिष्यते(२) ।
असिद्धिस्तदभावः स्याद्धेतोः(३) सा च चतुर्विधा ॥ ८४ ॥

व्याप्तेः पक्षस्य हेतोश्च तज्ज्ञानस्याप्यभावतः ।

सिद्ध्यभावोऽसिद्धिस्तद्वानसिद्धः । सिद्धिश्च

तर्हि साध्यतुल्यत्वादित्यस्य किं प्रयोजनमत आह । साध्यसमशब्देति । साध्यतुल्योऽसिद्ध इति यावत् । स साध्यसम इति सूत्रार्थः ॥ ८३ ॥

ननूक्तं साध्यसमलक्षणम् अथास्मिन् उदाहर्तव्यं किमेतदप्रस्तुतमेव सिद्ध्यादिकमुत्तरार्द्धे वृथा प्रपञ्च्यत इत्याशङ्क्य लक्षणपदार्थासिद्धिज्ञानस्य सिद्धिज्ञानसाध्यत्वात् तल्लक्षणपूर्वकमसिद्धिलक्षणं तद्विभागं चाह । अथेति ।

श्लोके तदभाव इत्यत्र तच्छब्देन सिद्धिपरामर्श इति व्याचष्टे । सिद्ध्यभावोऽसिद्ध इति । एषैत्थाभि[illegible]त्तरमर्द्धाभि- [illegible] अतिसामान्येति । [illegible] सामान्यमतिसामान्यं त- [illegible] तद्बीजत्वमित्याशङ्क्य यथैतत् [illegible]दुक्तमिति । उदाहरति । यथेत्यादि ।

(१) समत्वादिति—पा॰ B पु॰ [illegible]
(२) सिद्धिरुच्यते— पा॰ [illegible]
(३) तदभा[illegible]

व्याप्तस्य हेतोः पक्षधर्मत्वेन प्रतीतिः । ततश्च व्याप्तिपक्षधर्मताहेतूनामभावे व्याप्यत्वासिद्ध्याश्रयासिद्धिस्वरूपासिद्धयो भवन्ति । यथाहुः । असिद्धः साध्यसमः स चाविद्यमानसपक्षः पक्षे ऽविद्यमानोऽविद्यमानव्याप्तिकश्चेति त्रिधेति । व्याप्त्यादीनां त्रयाणामन्यतमस्य प्रतीत्यभावे त्वज्ञानासिद्धिरिति चतस्रोऽसिद्धयः । तत्र व्याप्यत्वासिद्धौ यथा गर्भस्थो मैत्रीत-

---

त्तिनिमित्तमित्याह । तद्वानसिद्ध इति । श्लोके योग्यत्वादव्यवहितयोरपि व्याप्तहेतुपदयोरन्वयं वदन् असिद्धिलक्षणं निष्कृष्याह । सिद्धिश्चेति । तथा च व्याप्त्यादिस्वरूपाभावे व्याप्यत्वासिद्ध्यादयस्त्रयो भेदाः तदन्यतमप्रतीत्यभावे त्वज्ञानासिद्धिरित्येवं चातुर्विध्यं सिद्ध्यतीति । फलितमाह । ततश्चेत्यादिना चतस्रोऽसिद्धयइत्यन्तेन । श्लोके पक्षस्येत्येतत् तद्धर्मस्याप्युपलक्षकमित्याह । पक्षतद्धर्मेति । तथा च पक्षस्य तद्धर्मस्य वा सन्दिग्धस्याभावेऽप्याश्रयासिद्धिरेवेति न त्रित्वहानिः । एतेन सिद्धसाधनस्याप्यत्रैवान्तर्भाव इति सिद्धम् । आद्यभेदत्रये तावदुदयनलक्षणमालां संवादयति । यथाहुरिति । अत्रासिद्धः साध्यसम इति सामान्यलक्षणम् । स चेत्यादिना [illegible] व्याप्यत्वासिद्धीनां विभागोद्देशः संग्रहे अथ को[illegible] मु[illegible] अथान्त्यपादं तच्छब्देनानन्तरो क्तेत्याकाङ्क्षायां सर्वं दर्श[illegible] ति दर्शयन् व्याचष्टे । व्याशक्तिवशादभिधासामर्थ्यादित्यर्थः [illegible] न्याह । तत्रेत्या-

---

(१) छलं भवेत्–पा· A पु॰ ।

नयः(१) श्यामः मैत्रीतनयत्वादिति(२) सम्प्रतिपन्नवदिति अयं हि शाकाद्याहारपरिणतिप्रयुक्तव्याप्तिकत्वात्(३) सोपाधिकसम्बन्ध इत्यसिद्धव्याप्तिकः । आश्रयासिद्धो यथा ईश्वरो न सर्वज्ञः कर्तृत्वादिति । स्वरूपासिद्धो यथा अनित्यः शब्दः चाक्षुषत्वादिति । भागासिद्धो यथा अनित्ये वाङ्मनसे मूर्तत्वादिति । विशेषणासिद्धविशेष्यासिद्धव्यर्थविशेषणासिद्धव्यर्थविशेष्यासिद्धादीनां उदाहरणानि स्वयमेव द्रष्टव्यानि । अज्ञानासिद्धो यथा । देवदत्तो बहुधनो

दि । ईश्वरो न सर्वज्ञ इत्यत्रेश्वरासिद्धौ धर्म्यसिद्धेस्तत्सिद्धौ धर्मिग्राहकबाधात् सन्दिग्धधर्म्यसिद्धेश्चोभयथाप्याश्रयासिद्धिरिति भावः । स्वरूपासिद्धेरेव भेदान्तरमाह । भागेति । अत्र पक्षैकदेशे वाचि मूर्तत्वाभावाद् भागासिद्धिः। पुनश्च स्वरूपासिद्धेर्भेदान्तराण्यतिदिशति । विशेषणेति । अनित्यः शब्दः मूर्तत्वे सति गुणत्वात् गुणत्वे सति मूर्तत्वात् गुणत्वे सति कृतकत्वात् इति क्रमादेषामुदाहरणानि । आदिशब्दादयं सार्वभौमो भविष्यति तादृग्भाग्यत्वे सति क्षत्रियत्वादित्यादिसन्दिग्धविशेषणासिद्धादिसङ्ग्रहः । अथाज्ञानासिद्धेषु हेत्वज्ञानासिद्धमुदाहरति । देवदत्त इति । सर्वं क्षणिकं म[illegible] । [illegible] वन्तिम[illegible] । [illegible] धर्मि लक्षणपदप्रवृ-

---

(१) मैत्रतनयः-पा· B पु· । [illegible] । न[illegible]

(२) मैत्रतनयत्वात्-पा· [illegible] ।

(३) व्याप्तिक[illegible] पु· । A पु· ।

[illegible] तदभा[illegible] ह्यसिद्धिः स्याद्धेतोः-पा· A पु· ।

भविष्यति तद्धेतुभूतादृष्टाश्रयत्वादिति । व्याप्त्याश्रययोरज्ञानासिद्धिरुदाहर्तव्या । एताश्चासिद्धयोऽन्यतरासिद्ध्युभयाऽसिद्धिभेदेन च भिद्यन्त इति ॥ ८४ ॥ ऽऽ ॥

सिद्धसाधने तु सिद्धविशेषणत्वेन पक्षाभासतामिति केचित्[१] । तान्निराकुर्वन्नसिद्धावन्तर्भावमाह ।

आश्रयासिद्धता हेतोः सिद्धधर्मस्य साधने[२] ॥८५॥
पक्षो हि संश्रयस्तस्य स च साध्यान्वितो यतः ।

भविष्यन्मैत्रीपुत्रो वाग्मी भविष्यति विशिष्टपुरुषत्वात् इत्यज्ञानव्याप्त्याश्रयासिद्धयोरुदाहरणे । अथ सर्वासिद्धिसाधारणं द्वैविध्यमाह । एताश्चेति । अनित्यः शब्दः बाह्येन्द्रियप्रत्यक्षद्रव्यत्वादिति वाद्यसिद्धिः नैयायिकैः द्रव्यत्वानभ्युपगमात् कृतकत्वादिति प्रतिवाद्यसिद्धिः मीमांसकैस्तदनङ्गीकारादित्युभयविधेयमन्यतरासिद्धिः तत्रैव चाक्षुषत्वादित्युभयासिद्धिः ॥ ८४ ॥ ऽऽ ॥

ननु पूर्वश्लोके पक्षतद्धर्मयोरभावादाश्रयासिद्धिरिति व्याख्यानादेव सिद्धसाधनस्याप्याश्रयासिद्धित्वमेवेत्युक्तप्रायमेव तत् किमर्थमुत्तरश्लोके पुनरुच्यत इत्याशङ्क्य पक्षपक्षाभासत्वपक्षप्रतिक्षेपार्थमित्याह । सिद्धसाधने त्विति ।

[illegible] [illegible]न्वित इति । सन्दिग्धसाध्यधर्मक इत्यर्थः ।
चारच्छलयोरु[illegible]

द्भावनं सामान्यच्छल[illegible]न पक्षाभासः सिद्धसाधनमिच्छन्ति के
दिनोक्ते क्रमादुद्भवः तदुक्त[illegible]
मित्यर्थः । तत्र यथाकालमनुद्भावन[illegible]

प्रतिवादिनोऽपि सिद्धस्य धर्मस्य साधने क्रियमाणे हेतुराश्रयासिद्धो भवति। कुतः पक्षो हि हेतोराश्रयः साध्यधर्मविशिष्टश्च धर्मी पक्ष इत्युक्तम्। तत्र यथा विशेष्यस्य धर्मिणोऽभावादाश्रयासिद्धः तथा विशेषणस्य साध्यधर्मवत्त्वस्याभावादपि विशेष्याभाव इव विशेषणाभावे ऽपि विशिष्टाभावस्याविशिष्टत्वादसिद्धिभेद एवायमिति ॥ ८५ ॥ ऽऽ ॥

कालातीतो बलवता प्रमाणेन प्रबाधितः ॥ ८६ ॥

प्रमाणबाधितविषयः कालातीतः। बलिन एव

ननु सिद्धसाधनस्य दोषत्वे सर्वस्यापि साध्यस्य प्रतिवादिनं प्रति सिद्धत्वात् सर्वानुमानोच्छेदः स्यादित्याशङ्क्य व्याचष्टे। प्रतिवादिनोऽपीति। ननु सत्यपि धर्मिणि कथं धर्माभावमात्रेणाश्रयासिद्धिरित्याशयेन शङ्कते। कुत इति। सत्यं न धर्मिमात्रमाश्रयः किं तु धर्मविशिष्टो धर्मीत्याह। पक्षो हीति। ततः किमत आह। तत्रेति। अभावादपीति। आश्रयासिद्धिरित्यनुषङ्गः। कुत इत्यत आह। विशेष्येति। इह विशिष्टस्याश्रयत्वात् तस्य च विशेषणविशेष्ययोरन्यतरापाये ऽप्यपायादित्यर्थः। प्रकृतमुपसंहरति। असिद्धीति ॥ ८५ ॥ ऽऽ ॥

अथ कालात्ययापदिष्टं लक्षयति। कालातीतेति।

ननु प्रमाणसिद्धस्वरूपस्य हेतोः [illegible] लक्षणपदप्रवृत्-विषयापहारलक्षण इति व्याचष्टे। [illegible] वर्तेति विशेषणं व्यावर्त्यभा[illegible]। न तु लक्षणाङ्गमित्य[illegible]

[illegible] पु॰। A पु॰।

तदभा[illegible] ह्यसिद्धिः स्याद्धेतोः–पा॰ A पु॰।

बाधकत्वाद्बलवतेत्युक्तम् । तत्र प्रत्यक्षबाधितो यथा अनुष्णोऽग्नि[1]र्द्रव्यत्वादिति । अनुमानबाधितो यथा सावयवाः परमाणवो मूर्तत्वादिति । कथमनुमानबाधित इति चेत् । उच्यते । आद्यावयवि स्वन्यूनपरिमाणोपादानमवयवित्वात् घटवत् । यथा अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महापरिमाणतारतम्यवत्[2] । अन्यथा मशकमातङ्गयोरप्यविशेषप्रसङ्गः अनन्तावयवारब्धत्वाविशेषादित्यनुमानेन निरवयवद्रव्यत्वेन परमाणुसिद्धेर्धर्मिग्राहकप्रमाणबाधितत्वात् । आगमबाधितो यथा यागादयः स्वर्गसाधनं न भवन्ति क्रियात्वादिति । उपमानबाधितो

बाध इत्याशयेन पृच्छति । कथमिति । धर्मिग्राहकेणेत्याह । आद्येति । त्रसरेणुः सावयवावयवारब्धः चाक्षुपद्रव्यत्वात् घटवदिति सिद्धं द्व्यणुकमाद्यावयविशब्दार्थः । अथ तदवयवानामपि कार्यद्रव्यारम्भकत्वेन सावयवत्वानुमाने बाधकमाह । अण्विति । अत्रोभयसाध्यानङ्गीकारे ऽनन्तावयवारब्धत्वाविशेषान्मशमातङ्गयोस्तुल्यपरिमाणत्वप्रसङ्ग इत्याह । अन्यथेति । अंशत्रयविशिष्टभावनावरोधात् स्वर्गसाधनत्वेनैवागमावगतानां तदसाधनत्वसाधने तेनैव धर्मिग्राहिणा बाध इत्याह । आगमेति । एवमुपमानावग-[illegible]दुवाच्यभावस्य गोसदृशपशोस्तदवाच्यत्वानुचारच्छलयोरुत्-इत्याह । उपमानेति । ननु विशेषणाभा-

---

द्भावनं सामान्यच्छल. B पु. ।

दिनोक्ते क्रमादुद्भवः तदुत्तर B पु. । महत्परिमाणतारतम्यमित्यर्थः । तत्र यथाकालमनुद्भावन

यथा गोसदृशो गवयशब्दवाच्यो न भवति वस्तुत्वादिति। ननु सिद्धसाधनवदस्यापि बाधितधर्मविशिष्टत्वेनापक्षभूते धर्मिणि वर्तमानस्याश्रयासिद्धिरेव स्यात्। मैवम्। अनुष्णत्वेन द्रव्यत्वस्य व्याप्तिग्रहणायोष्णत्वाभावरूपस्यानुष्णत्वस्य निर्णयार्थमुष्णत्वं क्वचिद्धर्मिणि ग्रहीतव्यम्। स च धर्मी वह्निरेवेति व्याप्तिग्रहणसमय एव बाधिते विषये पश्चात् पक्षत्वातिपातः। तथा चोपजीव्योपजीवकयोरुपजीव्यमेवोद्भाव्यमिति न्यायाद् बाधितविषयत्वमेवोद्भाव्यमिति। सिद्धसाधने तु व्याप्तिस्थितौ पक्षधर्मत्वमेव जीवनमित्याश्रयासिद्धिरेव भवेत्। एतेन बाधितविषयस्यापि पक्षाभा-

---

वाद्विशिष्टाभाव इति सिद्धसाधनोक्तन्यायेनापि विशिष्टस्य धर्मिणोऽभावात् तद्वदेवायमप्याश्रयासिद्धः किं न स्यादिति शङ्कते। नन्विति। सत्यं तथापि परिस्फूर्तिकत्वादुपजीव्यत्वेन प्राधान्याच्च बाध एवोद्भाव्यो नाश्रयासिद्धिरिति परिहरति। मैवमिति। तत्र बाधस्य पुरःस्फूर्तिकत्वं तावदाह। अनुष्णत्वेनेति। ततस्तदुपजीवनेन धर्मिणः पक्षत्वभङ्गादाश्रयासिद्धिरित्याह। पश्चादिति। फलितमाह। तथा चेति। सिद्धसाधनस्य तु सि[illegible] स्यैव हेतोः पक्षधर्मतामात्रविरहिणोऽन्य[illegible] लक्षणपदप्रवृ- श्रयासिद्धत्वमेवेति वैषम्यमाह। [illegible]

काणादास्तु कालातीतो [illegible]
दुष्टत्वात् प्रतिज्ञाभा[illegible] A पु०।

[illegible] ह्यसिद्धिः स्याद्धेतोः–पा० A पु०।

सतां वदन्तो निरस्ता भवन्तीति ॥ ८६ ॥

विभागोद्देशमाक्षिप्य समादधाति ।

पञ्चैव कथमाभासा विद्यते ह्यप्रयोजकः ।
इति पर्यनुयोगोऽयं तार्किकस्य न युज्यते ॥ ८७ ॥

अप्रयोजक इत्यपि कश्चिद्धेत्वाभासोऽस्तीति कथं पञ्चत्वपरिसंख्यानमित्ययं पर्यनुयोगस्तर्कव्यापारं जाननस्य न युज्यत इति ॥ ८७ ॥

कथं न युज्यते तत्राह ।

नेति । बाधस्यैवोद्भाव्यत्वाभिधानेनेत्यर्थः । तथा च पक्षादीनां सर्वेषामपि हेतुशेषत्वेन तद्दोषाणामपि हेतुदोषपर्यवसानाद्धेत्वाभास एवायं न पक्षाभास इति भावः ॥ ८६ ॥

ननु हेत्वाभासाः पञ्चैवेति पूर्वं सिद्धान्तितं पञ्चत्वपरिसंख्यानं किमर्थमकस्मादुत्तरार्द्धे निरस्यत इत्याशङ्क्य न तन्निरस्यते किं तु स्थूणानिखननेनाक्षिप्य दृढीक्रियते पञ्चैवेत्यादिना समञ्जसमित्यन्तेन सार्द्धचतुष्टयेनेत्यवतारयति । विभागोद्देशमिति ।

नन्वप्रयोजकसद्भावे कथं हेत्वाभासानतिरेक इत्याशङ्क्य तस्यापि तदाभासत्वादिति व्याचष्टे । अप्रयोजक इति । कश्चिदिति । पूर्वोक्तविलक्षण इत्यर्थः । पञ्चत्वपरि-
... त्वावधारणमित्यर्थः । पञ्चग्रहणस्य पञ्च पञ्च-
चारच्छलयो... ... रनिषेधपरत्वादिति तद्वेदेति वेदनार्थे
... द्भावनं सामान्यच्छे... ... स्तर्कव्यापाराभिज्ञ इति सोल्लुण्ठ-
दिनोक्ते क्रमादुद्भवः तदुक्त... ... पारं जानानस्येति ॥ ८७ ॥
मित्यर्थः । तत्र यथाकालमनुद्भावने... ...पपादयतीत्याह ।

यस्यानुकूलतर्कोऽस्ति स एव स्यात् प्रयोजकः ।
तदभावेऽन्यथासिद्धिस्तस्याः स हि निवारकः ॥८८॥
अतोऽप्रयोजकस्य स्याद्व्याप्यसिद्धेरसिद्धता ।

अनुकूलतर्कवत एव हेतोः प्रयोजकत्वात् तदभावेऽन्यथासिद्धिः स्यात् । उपाधिविधूननद्वारेणान्यथासिद्धिशङ्कानिरसनहेतुस्तर्क इत्युक्तत्वात् । अन्यथासिद्धोऽप्रयोजक उपाधिमानिति पर्यायाः । यथाहुः ।

समासमाविनाभावावेकत्र स्तो यदा तदा ।
समेन यदि नो व्याप्तस्तयोर्हीनोऽप्रयोजकः ॥ इति

कथमिति ।

तर्कविधूतान्यथासिद्धिशङ्कस्यैव हेतोः प्रयोजकत्वात् तद्रहितोऽप्रयोजकः स च निरुपाधिकसम्बन्धलक्षणव्याप्तिवैधुर्याद् व्याप्यत्वासिद्धित्वान्नातिरिच्यत इति श्लोकाभिप्रायमाह । अनुकूलेति । ननु तर्काभावमात्रेण कथमनन्यथासिद्धिरित्यत आह । उपाधीति । पक्षे विपक्षजिज्ञासाविच्छेदस्तनुग्रह इत्यत्रेति भावः । एतावता कथमप्रयोजकस्यानतिरिक्तत्वमत आह । अन्यथासिद्ध इति । अन्यप्रयुक्तव्याप्तिक इत्यर्थः । स च व्याप्यत्वासिद्ध एवेति भावः ।

अतोऽप्रयोजकस्य सोपाधिकपर्यायत्वे ता[illegible]तिमाह । समेत्यादि । यदैकत्र साध्ये सम[illegible] लक्षणपदप्रवृ- साध्यसमव्याप्तिकस्तद्भिन्नव्याप्तिक[illegible]
तयोर्मध्ये यो हीनव्याप्तिके[illegible]
व्याप्तश्चेदन्यथाऽसि[illegible]

[illegible] A पु. ।
[illegible]था ह्यसिद्धिः स्याद्धेतोः-पा. A पु. ।

केचित्तु परप्रयुक्तव्याप्त्युपजीवीत्यप्रयोजकं(१) व्यपदिशन्ति । यथाहुः ।

व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः ।
यस्मिन् सत्यमुना भाव्यमिति शक्त्या निरूप्यते ॥
अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः ।
दृष्टैरपि न तैरिष्टा व्यापकांशावधारणा ॥ इति ।

अन्ये तु सन्दिग्धव्याप्तिक इत्याहुः । यथा ।

साध्यादन्येन धर्मेण सपक्षेष्वनुयायिना ।

धित्वप्रसङ्गात् सोऽप्रयोजक उच्यते । तथा च सोपाधिकस्यैवाप्रयोजकव्यपदेश इति भावः ।

अथास्यान्यथासिद्धपर्यायत्वं च संवादयति । केचिदिति । परप्रयुक्तव्याप्त्युपजीवी अन्यथासिद्ध इत्यर्थः । यत्रैकेन साध्येनानेकेषां धर्माणामापाततो व्याप्तिर्दृश्यते तत्र तस्या व्याप्तेस्तेषु धर्मेषु कश्चिदेक एव धर्मः प्रयोजको निरूप्यते केनोपायेनेत्यत उच्यते । अस्मिन् साध्ये सत्येवामुना साधनधर्मेण भाव्यं नान्यथेत्येवमन्वयव्यतिरेकलक्षण्या शक्त्या सामर्थ्येनेत्यर्थः । ततोऽन्ये धर्माः परप्रयुक्तव्याप्त्युपजीवकाः पूर्वोक्तप्रयोजकधर्मोपरागोपलब्धव्याप्तिका इत्यर्थः । अत एव तैर्दृष्टैरपि व्याप्तवद्दृश्यमानैरपि न [illegible] प्रयु[illegible]रणमिष्यत इत्यर्थः । अत्रापि निषिद्धत्वप्रचारच्छलयोरुत्क्रमे[illegible] हिंसात्वादय एवोदाहरणम् ।

ङ्गावनं सामान्यच्छलस्य[illegible]पदेशान्तरं चास्तीत्याह । अन्ये
दिनोक्ते क्रमादुद्भवः तदुत्तरक[illegible]धनत्वादिसाध्यधर्मव्यति-
मित्यर्थः । तत्र यथाकालमनुद्भावने प० ।

विना पक्षे स्थितो धर्मः सन्दिग्धव्याप्तिको मतः ॥
इति ।

ततश्च सर्वथा असिद्धव्याप्तिकत्वेनासिद्धभेद एवायमप्रयोजको न तु पृथगाभास इति ॥ ८८ ॥ ऽऽ ॥

अनुकूलतर्काभाववत् प्रतिकूलतर्कसद्भावे ऽपि व्याप्यत्वासिद्ध एव हेतुः स्यादित्यत आह ।

भावे ऽपि प्रतिकूलानां तर्काणामीदृशी गतिः ॥८९॥

किं सर्वत्र नेत्याह ।

आत्माश्रयस्तथान्योन्यसंश्रयश्चक्रकाश्रयः[1] ।

रिक्तेन सकलसपक्षानुगतेन धर्मेण निषिद्धत्वादिना विना पक्षे स्थितो धर्मो हिंसात्वादिः परप्रयुक्तव्याप्तिकत्वसम्भावनया सन्दिग्धव्याप्तिको मतः कैश्चिदित्यर्थः ।

तथा च सञ्ज्ञाभेदमात्रेणाभासान्तरत्वे ऽतिप्रसङ्गात् सिद्धोऽसिद्धावन्तर्भाव इत्युपसंहारपरत्वेनातोऽप्रयोजकस्येत्येतद्व्याचष्टे । ततश्चेति ॥ ८८ ॥ ऽऽ ॥

ईदृशी गतिरिति । अनुकूलतर्करहितस्य हिंसात्वादेरिवास्पर्शवत्त्वादमूर्तत्वे मनसः क्रियावत्त्वं न स्यादिति प्रतिकूलतर्कहतस्यास्पर्शवत्त्वादेरपि अमूर्तत्वसाधनस्य व्याप्यत्वासिद्धत्वमेवेत्यर्थः ।

ननु प्रतिकूलतर्कपराहतस्य हेतोर्व्याप्यत्वासिद्धिमभिधाय तस्यैवोत्तरश्लोके स्वरूपासिद्ध[illegible]त्वे ता[illegible] तमित्याशङ्क्य सत्यम् तस्य क्वचिदप्[illegible]ध्ये सम[illegible] लक्षणपदप्रवृ[illegible]रयति । किं सर्वत्रेति । नन्वे[illegible] [illegible]व्याप्तिक[illegible]

(१) चक्रकाह्वय[illegible]ाप्तिकेष्व[illegible] A पु॰ ।
[illegible]ऽसिद्[illegible] [illegible]र्थ्या ह्यसिद्धिः स्याद्धेतोः-पा॰ A पु॰ ।

अनवस्थेत्यमी तर्काः स्वरूपासिद्धिहेतवः ॥ ९० ॥

पञ्चविधस्तर्क इत्युक्तम् । तत्रात्माश्रयादयश्चत्वारः प्रतिकूलतर्का यस्य हेतोरुद्भाव्यन्ते तस्य स्वरूपासिद्धिरेव स्यात् न व्याप्यत्वासिद्धिरिति ॥ ९० ॥

एवं चाप्रयोजकस्यासिद्धावन्तर्भावाद्विभागोद्देशः सुस्थ इत्युपसंहरति(१) ।

आभासपरिसंख्यानमेवं सति समञ्जसम् ।

अनध्यवसितः षष्ठो हेत्वाभास इति केचित् । यथाहुः । साध्यासाधकः पक्ष एव वर्तमानो हेतुरनध्यवसित इति तस्यासाधारणादिषु यथासम्भवमन्त-

---

सिद्धिहेतवश्चेद् व्याप्यत्वासिद्धेः किमवशिष्यत इत्याशङ्क्य तस्याश्चैकोऽवशिष्यते योऽनिष्टप्रसङ्गात्मेत्याशयवानाह । पञ्चविधस्तर्क इत्युक्तमिति । ततः किमत आह । तत्रेति । अनिष्टप्रसङ्गतर्कोद्भावने तु व्याप्यत्वासिद्धिरेवेति शेषः । तथा च प्रतिकूलतर्कसद्भावे ऽपि व्याप्यत्वासिद्धिरेवेति यदुक्तं तदपि सिद्धमिति भावः ॥ ९० ॥

अथोपसंहारवाक्यमभिप्रायाभिधानपूर्वकमवतारयति । एवं चेति ।

अथ न्यायैकदेशिमतेनाभासातिरेकमाशङ्कते । अनध्यव[illegible] इति । तस्य तदुक्तलक्षणं चाह । यथेति । केवल-

(१) [illegible]दिना प्रयु[illegible] [illegible]क्ति साध्यासाधक इति । शेषमाभा-
चारच्छलयोरुत्क्रम[illegible] [illegible]थ परोदाहृतानामनध्यवसितभे-
द्भावनं सामान्यच्छलस्य [illegible]न्तर्भावान्नातिरेक इति प-
दिनोक्ते क्रमादुद्भवः तदुत्तरके[illegible]
मित्यर्थः । तत्र यथाकालमनुद्भावने [illegible] ।

र्भावान्न पञ्चभ्योऽतिरेक इति[१] ॥

हेत्वाभासवद् दृष्टान्ताभासा अपि किमिति सूत्रकारैरेव नोद्दिश्यन्ते न च लक्ष्यन्त इत्याशङ्कायामाह ।

न सूत्रितं किमिति चेद्दृष्टान्ताभासलक्षणम् ॥ ९१ ॥

अन्तर्भावो यतस्तेषां हेत्वाभासेषु पञ्चसु ।

पक्षाभासवद्दृष्टान्ताभासानामपि हेत्वाभासेष्वेव यथायथमन्तर्भावान्न ते पृथक् सूत्रिता इति ॥ ९१ ॥ ऽऽ ॥

तेषां कस्य कुत्रान्तर्भाव इत्यत्राह ।

रिहरति । तस्येति । तत्रानित्यः शब्दः आकाशविशेषगुणत्वादित्यसाधारणः । एवमन्येषामपि सर्वमनित्यं सत्त्वादित्यादीनां व्याप्यत्वासिद्धिभागासिद्ध्यादिष्वन्तर्भावः सुगम एवेति भावः ।

ननूत्तरश्लोके सूत्रितशब्दप्रयोगो न युक्तः संग्रहकारस्य स्वयमसूत्रकारत्वादित्याशङ्क्य सूत्रकारस्यैवायमुपालम्भो न त्वस्येति दर्शयन्नवतारयति । हेत्वाभासवदिति । आशङ्कायामाहेति । आशङ्कामनूद्य निरस्यतीत्यर्थः ।

ननु दृष्टान्ताभासानां कथं हेत्वाभासेष्वन्तर्भाव इत्याशङ्क्य पक्षाभासवत् तल्लक्षणलक्षितत्वादि... ...चष्टे । पक्षाभासवदिति ॥ ९१ ॥ ऽऽ ॥ ... लक्षणपदप्रवृ-

ननूक्ता अपि हेत्वाभासक... ...र्द्वत्रये पुनरुच्यत इत्याशङ्क्य...

... A पु० ।

(१) यथायोग... ह्यसिद्धिः स्याद्धेतोः-पा० A पु० ।

साधारणो विरुद्धो वा दृष्टान्ते साध्यवर्जिते ॥९२॥
असाधारणता हेतोस्तस्मिन् साधनवर्जिते ।
व्याप्त्यसिद्धिरभावे स्यादाश्रयस्य द्वयोरपि[1] ॥९३॥

साध्यविकलो दृष्टान्तो विपक्ष एव स्यात्[2] । तत्र वर्तमानो हेतुः सपक्षान्तरवृत्तौ सत्यां पक्षत्रयवृत्तित्वात् साधारणानैकान्तिको भवति । यथाऽनित्यः शब्दः प्रत्यक्षत्वात् सामान्यवदिति । अत्र विपक्षे सामान्ये सपक्षे घटादौ पक्षे च शब्दे वर्तमानः प्रत्यक्षत्वादिति हेतुः साधारणो भवति । असत्यां तु सपक्षवृत्तौ पक्षविपक्षयोरेव वर्तमान इति विरुद्धो भवति । यथाऽनित्यः शब्दः श्रोत्रग्राह्यत्वाच्छब्दत्ववदिति । साध्यधर्मवति दृष्टान्ते साधनविकले सपक्षादपि व्यावृत्तेरसाधारणानैकान्तिको हेतुः स्यात् ।

सानामित्यर्थः ।

ननु साध्यविकलस्य साधारणविरुद्धयोरत्यन्तविलक्षणयोरन्तर्भावः कथमिच्छया विकल्प्यत इत्याशङ्क्य तत्र हेतोः सपक्षवृत्त्यवृत्तित्वाभ्यां द्वैविध्याद् व्यवस्थितविकल्प[illegible]व्याचष्टे । साध्यविकल इत्यादि । द्वितीयाद्व्या[illegible]दनां प्रयु[illegible]ध्नीति । ननूदाहृते साधनविकले हेतोः चारुच्छलयोरुत्क्रम[illegible]ण्यमस्तु यस्तूदाहृतदृष्टान्तव्यद्भावनं सामान्यच्छलस्य तु [illegible]
दिनोक्ते क्रमादुद्भवः तदुत्तरकक्ष[illegible]
मित्यर्थः । तत्र यथाकालमनुद्भावने [illegible]

यथा नित्यः शब्दः आकाशविशेषगुणत्वादात्मवदिति। ननु सकलसपक्षादपि व्यावृत्तो ह्यसाधारणो भवति केषुचित् सपक्षेषु वर्तमानो दृष्टान्ततया निर्दिष्टे सपक्षे चावर्तमानः कथमसाधारणः स्यात्। यथा नित्यः शब्दोऽमूर्तत्वात् परमाणुवदिति। सत्यमयमसाधारणो न भवति सपक्षेष्वाकाशादिषु वृत्तेः। तथाप्यनुपदर्शितव्याप्तिको हेतुः स्यादिति हेत्वाभासान्तर्गत एवेति भावः। दृष्टान्तधर्मिण एवाभावे तस्मिन् सत्येव द्वयोः[१] साध्यसाधनयोरभावे ऽप्यनुपदर्शितव्याप्तिको[२] हेतुः स्यात्। यथाऽनित्यः शब्दः प्रत्यक्षत्वादिति यथाकाशं यथा वा तत्कुसुममिति। ननु तस्यामेव प्रतिज्ञायां कृतकत्वादिति हेतुमभि-

---

क्ताववर्तमानोऽपि सपक्षान्तरे वर्तते तस्यासाधारणत्वासम्भवाद् दृष्टान्ताभासत्वमेवेत्याशयेन शङ्कते। नन्विति। तस्यासाधारण्याभावे ऽपि स्वनिर्दिष्टदृष्टान्तव्यक्तावनुपदर्शितव्याप्तिकत्वाद् व्याप्यत्वासिद्धावन्तर्भाव इत्याह। सत्यमिति। यद्यप्यत्रामूर्तत्वस्य पक्षत्रयवृत्तित्वादनैकान्तिकत्वं चास्ति तथाप्यपुरःस्फूर्तिकत्वादनुद्भाव्यं तत् उभयविकलाश्रयविकलयोस्तु व्याप्यत्वासिद्ध[illegible]व इति तृतीयार्द्धेनोच्यत इत्याह। दृष्टा[illegible]। क्वचिदनयो[३]रनन्तर्भावमाशङ्कते [illegible] लक्षणपदप्रवृ-

---

(१) तयोः—पा॰ D [illegible]

(३) साध्यस[illegible] A पु॰।

[illegible]यायो[illegible] ह्यसिद्धिः स्याद्धेतोः—पा॰ A पु॰।

धाय गगनतत्कुसुमयोर्निदर्शितयोर्न व्याप्त्यसिद्धिरिति दृष्टान्ताभासमात्रमत्रेति चेत् न अत्राप्यनुपदर्शितव्याप्तिको हेतुः स्यात् अतिपीडायां(१) व्याप्यत्वासिद्धिरेव । एवं च वैधर्म्यदृष्टान्ते ऽपि साध्याव्यावृत्तेरसाधारण्यं साधनाव्यावृत्तेर्विरोधः साधारण्यं वा उभयाव्यावृत्तावाश्रयाभावे ऽपि व्याप्यत्वासिद्धिः । ततश्च दृष्टान्ताभासानां हेत्वाभासान्तर्भावान्नासूत्रितत्वोपालम्भ इति ॥ ९२ ॥ ९३ ॥

छलं सामान्यतो लक्षयति ।

यामिति । कृतकत्वानित्यत्वयोर्व्याप्तिसद्भावे ऽपि निर्दिष्टदृष्टान्तव्यक्त्योरनुपदर्शितव्याप्तिकत्वमात्रेण कथञ्चिद् व्याप्यत्वासिद्धिरेवेत्यर्थः । अथ साधर्म्यदृष्टान्ताभासवद् वैधर्म्यदृष्टान्ताभासानामपि हेत्वाभासान्तर्भाव एवेत्याह । एवं च वैधर्म्येति । तत्र पूर्वोक्तसाधनविकलोदाहरण(२)मेवात्र साध्याव्यावृत्तस्योदाहरणं साध्यविकलोदाहरणं(३) च साधनाव्यावृत्तस्येति द्रष्टव्यम् । उभयेत्यादि स्पष्टम् । उपसंहरति । ततश्चेति । इति हेत्वाभासपदार्थः ॥ ९२ ॥ ९३ ॥

ननु छलस्य बहुशो लक्षणानि वक्ष्यन्ते तत् किमुच्यते किञ्चिदर्थमित्यादिनेत्यत आह । छलमिति । सामान्यलक्षणं विना विशेषलक्षणाप्रवृत्तेः प्रथमं सामान्यलक्षणमुदना प्रयु...

चारच्छलयोरुत्क्रमेण...

ज्ञावनं सामान्यच्छलस्य तु

दिनोक्ते क्रमादुद्भवः तदुत्तरकक्ष...

मित्यर्थः । तत्र यथाकालमनुज्ञावने ...

पा· B पु· ।

विशेषगुणत्वात् आत्मवत् ।

...मान्यवत् साधारण्यम् अनि·

किञ्चिदर्थं[१]मभिप्रेत्य प्रयुक्ते वचने पुनः ।
अनिष्टमर्थमारोप्य तन्निषेधश्छलं मतम् ॥ ९४ ॥

अर्थान्तरविवक्षया वाक्यप्रयोगे वक्तुरनभिप्रेतमेवार्थं तदर्थत्वेनाध्यारोप्यारोपितार्थदूषणं छलम् । अर्थश्चाभिधेय औपचारिकस्तात्पर्यविषयश्च विवक्षित इति तेन छलत्रयसंग्रह इति[२] । तदुक्तम् । वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति । वाक्यस्य विविधकल्पना नानात्वकल्पनोपपत्तिकारणतया वचनविघातः छलमित्यर्थः ॥ ९४ ॥

छलानि परिसङ्ख्यष्टे । तच्च त्रेधा वाक्छलादिभेदात् । तदुक्तम् । तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ।

तत् तु त्रेधा वाक्छलादिभेदतस्तत्र वाक्छलम् ।
अभिधावैपरीत्येन कल्पितार्थस्य बाधनम् ॥९५॥

किञ्चिदन्यमेव । अनिष्टमनभिप्रेतम् । तन्निषेध आरोपितार्थनिषेधः । तदेतत्सर्वं व्यनक्ति । अर्थान्तरेत्यादि । नन्वर्थशब्दस्याभिधेयवचनत्वादिदं लक्षणमनभिधेयार्थे वाक्छलादन्यत्राव्याप्तमित्याशङ्क्याह । अर्थश्चे[illegible]मुख्यसाधारणार्थोऽयमर्थशब्द इत्यदो[illegible]विकल्पोपपत्त्या अर्थान्तरकल्पनये[illegible] लक्षणपदप्रवृ-

[illegible]ासक[illegible]

(१) कमप्यर्थ–पा· [illegible]शिङ्क[illegible] ।
(२) इति सङ्क[illegible] A पु· ।
[illegible]यथायेप्ता ह्यसिद्धिः स्याद्धेतोः–पा· A पु· ।

अर्थान्तरविषयामभिधामभिप्रेत्य प्रयुक्तस्य शब्दस्यानभिमतार्थान्तरविषयामभिधामारोप्य कल्पितस्याभिधेयस्य निषेधो वाक्छलम् । अभिधेयान्तरविषयतया प्रयुक्तस्य शब्दस्याभिधेयान्तरमारोप्य तन्निषेध इत्यर्थः । यथाहुः । वाच्यान्तरकल्पना यत्र तद्वाक्छलमिति । तदुक्तम् । अविशेषाभिहिते ऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलमिति । त-

---

नन्वभिधावैपरीत्यमौपचारिकत्वं तच्च वाक्छले न सम्भवतीत्याशङ्क्याभिधान्तराश्रयणमिति व्याचष्टे । अर्थान्तरेति । ननु अनेकार्थस्यापि शब्दस्य वृत्तिद्वयायोगात् एकैवाभिधेति केयमभिधान्तरवाचो युक्तिरित्याशङ्क्य सत्यमभिधेयभेदाद्भेदव्यपदेश इत्याशयेन वास्तवमर्थमाह । अभिधेयान्तरेति । अथवा अस्त्वभिधाभेदः तथापि लक्षणे कल्पितार्थस्य बाधनमित्ययुक्तम् अभिधावैपरीत्यपदेनेत्यभिधोपादानसामर्थ्याद् विपरीताभिधादूषणस्यैव लक्षणत्वावगतेरभिधेयार्थदूषणायोगादित्याशङ्क्य तत्राप्यभिधेयपरत्वमेव विवक्षितम्(१) तत्परिहारेण केवलाभिधादूषणस्य दुष्करत्वादित्याशयेन तात्पर्यार्थमाह । अभिधेयान्तरमिति । वाच्यान्तरकल्पनेति । वाच्यान्तरे प्रयुक्तस्येति शेषः । प्रयु...ना कल्पयित्वा तन्निषेध(२) इत्यर्थः । अविशेषेचारच्छलयोरुत्क्रमेण...प्यमविशेषः तेनाभिहिते ऽर्थे प्रयुक्ते

द्भावनं सामान्यच्छलस्य तु ,

दिनोक्ते क्रमादुद्भवः तदुत्तरकक्षा...स्यैव विवक्षितमिति भावः ।

मित्यर्थः । तत्र यथाकालमनुद्भावने छ...

द्यथा आढ्योयं नवकम्बलवत्त्वादिति । अत्र नवश-ब्दस्य नूतनत्वमभिप्रेत्य प्रयोगे सङ्ख्याविशेषमभि-धेयमारोप्य निषेधति । कुतोऽस्य नव कम्बला एक एव कम्बलः प्रत्यक्षसिद्ध इति ॥ ९५ ॥

सामान्यच्छलमेतत् स्यादतिसामान्ययोगतः ।
तात्पर्यवैपरीत्येन कल्पितार्थस्य बाधनम् ॥ ९६ ॥

उत्तरमर्द्धं लक्षणांशः । सामान्यच्छलमिति लक्ष्य-निर्देशः । अतिसामान्ययोगत इति छलवादिनः प्रत्य-वस्थानबीजम् । एतदुक्तं भवति । निर्दिष्टस्य कस्य-चित् सामान्यस्यानभिमतमेव हेतुत्वादिकं तात्पर्य-विषयमारोप्य तस्यानभिमतेष्वेव विशेषेषु योगदर्श-नादनैकान्तिकत्वादिदोषोद्भावनमिति । यथा अयम

तु

र्थ-

शब्द इत्यर्थः । अभिप्रायादभिप्रेतार्थादित्यर्थः । कल्पा-
आरोपः गतमन्यत् । वाक्छलमुदाहरति । यथेत्यादि ॥ ९५ते

अथ सामान्यच्छललक्षणमाह । सामान्येति । भे
न्तराद्भिनत्ति । तात्पर्यवैपरीत्येनेति । या-

अतिसामान्ययोगत इत्यस्य लक्षणान्तःपातित्वा ।
ङ्कानिरासाय लक्ष्यलक्षणांशौ निर्द्धारयति । लणपदप्रवृत्ति
त्यादि । तर्हि तत्किमर्थमत आह
अतिक्रान्तमभिमतविषयवर्ति
योगत इत्यर्थः । कथम
तथा दर्शयति । एव

पु० ।
सिद्धः स्याद्धेतोः-पा० A पु० ।

ब्राह्मणोऽनूचान इत्युक्ते किमत्राद्भुतं ब्राह्मणोऽनूचान इति अत्र ब्राह्मणस्यानूचानत्वसम्भावनामात्रेण कश्चिद्वदति । तत्र ब्राह्मणत्वस्यानूचानत्वे हेतुत्वं तात्पर्यविषयमारोप्य छलवादी प्रत्यवतिष्ठते । न ब्राह्मणत्वमनूचानत्वे हेतुर्निराकृतिभिरनैकान्तिकत्वादिति । तदुक्तम् । सम्भवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलमिति ॥ ९६ ॥

उपचारप्रयोगेषु गौणलाक्षणिकेषु यः ।
मुख्यार्थासम्भवाद्बाध उपचारच्छलं तु तत्[1] ॥९७॥

शब्दानां शक्तिवशादेवाहत्य प्रतीयमानोऽर्थो

म्भवतोऽर्थस्य ब्राह्मणादौ सम्भावनामात्रेणोक्तस्यार्थ-
ानूचानत्वादेरतिसामान्ययोगात् उक्तब्राह्मणत्वादि-
समान्यस्यानूचानत्वातिक्रमेण व्रात्यादौ योगदर्शनात्
रेसद्भूतार्थकल्पना अनभिप्रेतहेतुत्वारोपेण विघट्टनं सा-
रेन्यच्छलमिति सूत्रार्थः ॥ ९६ ॥
र्न अथोपचारच्छललक्षणं व्याख्यातुं पठति । उपचा-
अ । गौणलाक्षणिकभेदेन द्विविधेष्वप्यौपचारिकप्रयोगेषु
दि क्तुरविवक्षितं मुख्यार्थमारोप्य तस्यासम्भवदोषेण
चारच्छ चारच्छलमिति श्लोकार्थः ।
द्भावनं सामान्यंच्छलस्य र्थः क औपचारिकः कतिविध-
दिनोक्ते क्रमादुद्भवः तदुत्तरक ति । शब्दानामित्यादि ।
मित्यर्थः । तत्र यथाकालमनुद्भावने । आहत्येति । अन-

मुख्यः। यथा गवादिशब्दानां गोत्वादिजातिक्रोडीकृता व्यक्तिः। औपचारिकस्तु मुख्यार्थद्वारा प्रतीयमानः। उपचारश्च द्विविधः गौणलक्षणाभेदात्। तत्र लक्षणा नाम मुख्यार्थसम्बन्धिन्यर्थान्तरे वृत्तिः। यथा गङ्गायां घोषः प्रतिवसति इत्यत्र गङ्गाशब्दस्य तत्सम्बन्धिनि तीरे वृत्तिः गौणी तु मुख्यार्थवर्तिगुणसामान्ययोगिन्यर्थान्तरे वृत्तिः। यथा सिंहो देवदत्त इत्यत्र सिंहवर्तिशौर्यादिगुणसामान्ययोगिनि देवदत्ते सिंहशब्दस्य वृत्तिः। यथाहुः।

अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता॥ इति(१)।

न्यव्यवधानेनेत्यर्थः। जातिक्रोडीकृता व्यक्तिरिति। न तु मीमांसकवज्जातिरेवेत्यर्थः। मुख्यार्थद्वारेति। मुख्यार्थेनैव द्वारा उपायेनेत्यर्थः। तेन हि स्वशब्दाभिहितेनाप्यनुपपन्नत्वात् स्वसम्बन्धी स्वगुणयोगी वार्थः प्रत्याय्यते स शब्दस्य औपचारिकोऽर्थः। स्फुटमन्यत्।

अत्र लक्षणागौण्योर्भट्टसम्मतिमाह। अभिधेयेत्यादि। मुख्यार्थानुपपत्तौ तत्सम्बन्धार्थान्तरप्रतीतिर्लक्षणा। लक्ष्यमाणेति। जातिरेव शब्दार्थः तदाक्षेप्या [illegible]क्षणपदप्रवृ- मीमांसकाः। तत्क्रोडीकृताव्यक्तिः [illegible] यिकाः। उभयथापि लक्ष्य[illegible]।

[illegible]थम[illegible] A पु॰।

(१) रिष्य[illegible]सिद्धिः स्याद्वेतोः-पा॰ A पु॰।

तत्र गौणं लाक्षणिकं वार्थमभिप्रेत्य वाक्यप्रयोगे वक्तुरनभिप्रेतमेव मुख्यार्थमारोप्य तदसम्भवेन दूषणाभिधानमुपचारच्छलम् । यथा गङ्गायां घोषः प्रतिवसति सिंहो देवदत्त इति वा प्रयुक्ते कथं जले घोषवासः कथं देवदत्तः सिंह इति वा प्रत्यवस्थानम् । अभिधातात्पर्यार्थोपचारवृत्तिव्यत्ययेन कल्पितार्थनिषेध इति त्रयाणां सङ्क्षेपतो लक्षणम् । छलं च

सादृश्यनिबन्धना वृत्तिर्गौणीत्यर्थः ।

अथैवं लक्षणवाक्यस्थपदार्थमभिधाय तद्वाक्यार्थमाह । तत्र गौणमित्यादि । उभयमुदाहरति । यथेति । अथ शिष्याणां सुखबोधार्थं छलत्रयस्यापि लक्षणत्रयं सङ्गृह्याह । अभिधेति । अभिधावृत्तिव्यत्ययेनोपचारवृत्तिव्यत्ययेनेत्यादि योज्यम् । तथा च वाच्यान्तरे प्रयुक्तस्य शब्दस्याविवक्षितवाच्यान्तरारोपेण तथौपचारिकार्थस्यानभिमतमुख्यार्थारोपेण सम्भावनामात्राभिप्रायेणोपन्यस्तस्यार्थस्य हेतुत्वारोपेण वचनविघाताः क्रमेण वागुपचारसामान्यच्छलानीत्यर्थः । अथैषामुद्भवोद्भावनयोरवसरमाह । छलं चेति । अत्र नवकम्बलोऽयं माणवकः मञ्चाः क्रोशन्तीति च वादिना प्रयुक्ते ततो द्वितीयकक्षायां प्रतिवादिना वागुपचारच्छलयोरुत्क्रमेणोद्भवः ततस्तृतीयकक्षायां वादिनोद्भावनं सामान्यच्छलस्य तु ब्राह्मणोऽयमनूचान इति वादिनोक्ते क्रमादुद्भवः तदुत्तरकक्षायां प्रतिवादिनोद्भावनमित्यर्थः । तत्र यथाकालमनुद्भावने छलप्रयोक्तुर्निरनुयो-

तत्र गौणं लाक्षणिकं वार्थमभिप्रेत्य वाक्यप्रयोगे वक्तुरनभिप्रेतमेव मुख्यार्थमारोप्य तदसम्भवेन दूषणाभिधानमुपचारच्छलम् । यथा गङ्गायां घोषः प्रतिवसति सिंहो देवदत्त इति वा प्रयुक्ते कथं जले घोषवासः कथं देवदत्तः सिंह इति वा प्रत्यवस्थानम् । अभिधातात्पर्यार्थोपचारवृत्तिव्यत्ययेन कल्पितार्थनिषेध इति त्रयाणां सङ्क्षेपतो लक्षणम् । छलं च

सादृश्यनिबन्धना वृत्तिर्गौणीत्यर्थः ।

अथैवं लक्षणवाक्यस्थपदार्थमभिधाय तद्वाक्यार्थमाह । तत्र गौणमित्यादि । उभयमुदाहरति । यथेति । अथ शिष्याणां सुखबोधार्थं छलत्रयस्यापि लक्षणत्रयं सङ्गृह्याह । अभिधेति । अभिधावृत्तिव्यत्ययेनोपचारवृत्तिव्यत्ययेनेत्यादि योज्यम् । तथा च वाच्यान्तरे प्रयुक्तस्य शब्दस्याविवक्षितवाच्यान्तरारोपेण तथौपचारिकार्थस्यानभिमतमुख्यार्थारोपेण सम्भावनामात्राभिप्रायेणोपन्यस्तस्यार्थस्य हेतुत्वारोपेण वचनविघाताः क्रमेण वागुपचारसामान्यच्छलानीत्यर्थः । अथैषामुद्भवोद्भावनयोरवसरमाह । छलं चेति । अत्र नवकम्बलोऽयं माणवकः मञ्चाः क्रोशन्तीति च वादिना प्रयुक्ते ततो द्वितीयकक्षायां प्रतिवादिना वागुपचारच्छलयोरुत्क्रमेणोद्भवः ततस्तृतीयकक्षायां वादिनोद्भावनं सामान्यच्छलस्य तु ब्राह्मणोऽयमनूचान इति वादिनोक्ते क्रमादुद्भवः तदुत्तरकक्षायां प्रतिवादिनोद्भावनमित्यर्थः । तत्र यथाकालमनुद्भावने छलप्रयोक्तुर्निरनुयो-

सटीकतार्किकरक्षायाम्

द्वितीयः परिच्छेदः ।

अथ जातिः । तत्र सामान्यलक्षणसूत्रम् । सा-

द्वितीयपरिच्छेदस्य

ज्ञानपूर्णकृता

लघुदीपिका टीका(१) ।

ॐनमः परमात्मने ।

चतुर्दशपदार्थात्मपरिच्छेदार्थविस्तृतिः ।
कृता जातिपरिच्छेदव्याख्यानमधुनोच्यते(२) ॥

अथ जातिः छलानन्तरमुद्देशक्रमप्राप्ता जातिः सामान्यतो विशेषतश्च लक्ष्यत इति शेषः । तत्र लक्ष्यमा-

---

(१) मल्लिनाथकृतनिष्कण्टकाटीकायाः पुस्तकत्रयं सम्पादितं मया परं तु त्रिष्वपि पुस्तकेषु प्रथमपरिच्छेदान्ते छलपदार्थनिरूपणानन्तरं समाप्तिर्दृश्यते ऽतोऽत्र द्वितीयतृतीयपरिच्छेदयोर्ज्ञानपूर्णकृता लघुदीपिकाख्या टीका सन्निवेश्यते। किं तु मल्लिनाथेन द्वितीयतृतीयपरिच्छेदौ जातिनिग्रहस्थाननिरूपकौ न व्याख्याताविति न भ्रमितव्यम् (पृ· १९० पं· १५) एतत्सर्वं जातिपरिच्छेदे स्फुटीभविष्यतीति, तथा (पृ· २०८ पं· ११) एतच्च निग्रहान्ते स्फुटीभविष्यतीति मल्लिनाथेनैव निष्कण्टकायामुक्तत्वात् । प्रथमपरिच्छेदस्य लघुदीपिका त्वन्ते मुद्रिता भविष्यतीत्यवगन्तव्यम् ॥

(२) प्रमाणादिच्छलान्तचतुर्दशपदार्थनिरूपकस्य प्रथमपरिच्छेदस्य व्याख्यानं कृतम् इदानीं जातिपरिच्छेदो द्वितीयो व्याख्यायत इति भावः ।

धर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरिति । तदिदं सदुत्तरप्रकरणसमातीतकालोद्भावनाभ्यामतिव्याप्तेः उत्कर्षसमादावव्याप्तेश्च लक्षणमुपलक्षणमात्रपरमिति मन्वाना भाष्यवार्त्तिकटीकातात्पर्यपरिशुद्धिकाराः सर्व एव सर्वास्वपि जातिषु समशब्दं प्रयुञ्जानस्य सूत्रकारस्य तदर्थ एवानुवृत्तत्वाल्लक्षणत्वेन विवक्षित इति व्याचक्षते । भाष्यकारस्तावदुत्तरवादिनाभिधीयमानं विशेषहेत्वभावं समशब्दस्यार्थमाह । यदभाष्यत् साधर्म्येण प्रत्यवस्थानमविशिष्यमाणमिति । अत्र साधर्म्यग्रहणमुपलक्षणार्थम् । ततश्च यथा त्वदुक्तं साधर्म्यं वैधर्म्यं वा सहचरितं तथास्मदुक्तमपि । न हि त्वदुक्तमेव साधकं नास्मदुक्तमित्यत्र विशेषहेतुरस्तीत्यादिनाकारेण व्याप्त्यादियुक्ताङ्गानपेक्षया साधर्म्यादिमात्राद्विशेषहेत्वभावाभिधानेन प्रत्यवस्थानं जातिरिति भाष्याभिप्रायः । वार्त्तिककारस्तु सममनुत्कृष्टमपकृष्टमुत्तरं जातिरिति मन्वान उत्तरवादिवाक्यगतमपकर्षं लक्षणया साम्यमाह । अपकर्षश्च स्थापनाहेतुप्रतिषेधासामर्थ्यम् । तच्च व्याप्तिवैधुर्यं स्थापनाहेतुरिव प्रतिषेधहेतुरपि व्याप्तिपक्षधर्मतयोरन्य-

णायां जातौ । प्रत्यवस्थानं परपक्षप्रत्यक्ष (?) इत्यर्थः । तदिदं लक्षणमित्युत्तरत्र सम्बन्धः । सदुत्तरेति जातिरूपप्रकरणसमव्यवच्छेदः ।

तराभावे भवत्याभासः । तत्र दूष्यदूषणव्याप्तौ सत्यामपक्षधर्मः कल्पितदूष्यं छलम् । तथाहि आढ्योऽयं नवकम्बलत्वादिति प्रयुक्ते कुतो नवास्य कम्बला इति छलवादिनो नेदं साधकमसिद्धत्वादिति हि विवक्षितम् । तत्रासिद्धत्वादितिहेतुर्दूष्यदूषणव्याप्तौ सत्यामपि पक्षभूते वादिहेतावसिद्धः अविवक्षितमेव सङ्ख्याविशेषमित्थं कल्पयित्वा प्रवर्तत इति छलं भवति । अकल्पितदूष्यस्तु केवलनिरनुयोज्यानुयोगो भविष्यति पक्षधर्मत्वे सत्यपि व्याप्तिशून्यः प्रतिषेधहेतुर्जातिः वादिसाधनं स्वसाध्यसाधनं न भवति युक्ताङ्गानपेक्षप्रतिधर्मप्रतिरुद्धत्वादित्यादयः प्रतिषेधहेतवः पक्षधर्मा अप्यसाधकत्वव्याप्त्यभावाद्भवन्ति जातय इति । तथा च वार्त्तिकम् । जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिषेधासमर्थो हेतुरिति स्वात्मनः परेण साम्यापादनाय प्रयुक्तमुत्तरं जातिरिति मन्वानष्टीकाकारो बुद्धिगतमेव साम्यं समशब्दप्रवृत्तिनिमित्तं मन्यतेस्म । यदाह समार्थः समीकरणार्थः प्रयोगो द्रष्टव्य इति । अयमत्र भावः । वादिना हेतौ प्रयुक्ते सदुत्तरापरिस्फूर्तौ प्रतिवादिनः साम्यापादनबुद्धिर्भवति अस्मदुक्तेन जात्युत्तरेणायं पर्याकुलितमानसो यदि स्वयमप्यसदुत्तरं ब्रूयात् तदा ममेवास्यापि निरनुयोज्यानुयोगः स्यात् निष्प्रतिभश्चेत् पर्यनुयोज्योपेक्षणं भवेदि-

त्युभावपि समौ भविष्यावः। यदि सदुत्तरेणायमस्मदुक्तां जातिमुद्धरेत् तदा ममैव पूर्वमापन्नः पराजयोऽवतिष्ठत इति पाक्षिकसाम्यापादनबुद्ध्या जातिवादिनः प्रत्यवस्थानमिति। आचार्यास्तु यदुत्तरं परकीयसाधनस्येव स्वस्यापि व्याघातकं भवति सा जातिरुत्तरस्यापि व्याघातकत्वेन स्वपरसाधनसाम्यं समशब्दप्रवृत्तिनिमित्तमाहुः। यथा जात्युत्तरं परसाधनमिव स्वात्मानमपि व्याप्नोति अतः स्वपरसाम्यात् सममित्युच्यत इति। अनेन स्वव्याघातकमुत्तरं जातिरित्युक्तं भवति।

तत्र तावद्यथावार्त्तिकं लक्षणमाह।

प्रयुक्ते स्थापनाहेतौ दूषणाशक्तमुत्तरम्।
जातिमाहुः

अत्र सिद्धत्वे ऽपि दूषणासामर्थ्यमशक्तिः। ततश्च छलादिव्यवच्छेदसिद्धिरिति।

अथ न्यायाचार्याभिमतं लक्षणमाह।

अथान्ये तु स्वव्याघातकमुत्तरम्॥ १॥

कालात्ययापदिष्टप्रकरणसामाभ्यां प्रत्यवस्थानं साधर्म्यवैधर्म्याभ्यामपि भवतीत्यजातौ जातिलक्षणम् तथोत्कर्षादिसमानां साधर्म्य एवैकपक्षे पक्षपात इत्याशङ्क्याह। तत्र तावदिति। यथावार्त्तिकमित्यत्र योजना चेत्यध्याहारः (?)।

दूषणाशक्तं दूषणेनाव्याप्तम्। ख्यापनपरं व्याख्यातप्रायमिदं पद्यम्। अतिरोहितार्थमित्यर्थः।

व्याख्यातचरं चेदमिति। अत्र जातीनां विभागोद्देशसूत्रम् । साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमा इति। द्वन्द्वात् परः श्रूयमाणः प्रत्येकमभिसम्बध्यत इति समशब्दस्य सर्वैः साधर्म्यादिभिः सम्बन्धः । सर्वसम्बन्धार्थमेव निग्रहस्थानवत् परस्परानपेक्षा अपि जातयः समासेनोद्दिश्यन्ते प्रत्येकावृत्तौ गौरवप्रसङ्गादिति ॥ १ ॥

अथ प्रतिधर्मसमाया जातेर्लक्षणमाह ।

अनभ्युपेतयुक्ताङ्गात् प्रमाणात् प्रतिरोधतः ।
प्रत्यवस्थानमाचख्युः प्रतिधर्मसमं बुधाः ॥ २॥

विभागोद्देशसूत्रम् न तु लक्षणैकपरमिति भावः । सर्वास्वपि जातिषु समशब्दं प्रयुञ्जानस्येति पूर्वोक्तमर्थं समर्थयति (?) । द्वन्द्वात्पर इति । जातिनिग्रहस्थानभेदानां पौर्वापर्यं नैवापेक्षिकं न तु पूर्वापरार्थसम्बन्धाधीनमित्याह । सर्वसम्बन्धार्थमेवेति । परस्परापेक्षा न प्रमाणप्रमेयादिभेदानामिति पूर्वलक्षणसापेक्षा इत्यर्थः (?) । तर्हि साधर्म्यवैधर्म्यसमप्रतिजातिशब्दान् किं न प्रयुङ्क्त इत्यत्राह । प्रत्येकावृत्ताविति ॥ १ ॥

उदयनेन प्रथमजातिद्वयस्यैका सञ्ज्ञा नैमित्तिककृता तां स्मारयति । अथ प्रतिधर्मसमाया इति ।

अनभ्युपेतयुक्ताङ्गादिति प्रकरणसमाख्यहेत्वाभा-

साधर्म्य-समवैधर्म्यसमेति-

येन केनचित्प्रमाणेन वादिना साध्योपसंहारे कृते अनभ्युपेतयुक्त्याङ्गेन प्रतिप्रमाणेन प्रतिरोधतः प्रत्यवस्थानं प्रतिधर्मसमः। अत्रावश्याभ्युपगन्तव्यानां तत्प्रमाणाङ्गानां वास्तवसद्भावाभावे ऽपि सद्भावाभिमानमात्रमपि नास्ति तेन सदुत्तरप्रकरणसमाद् व्यवच्छेदसिद्धिः तत्र सद्भावाभिमानस्य विद्यमानत्वात्। प्रकरणसमाया जातेर्व्यवच्छेदायोक्तं प्रतिरोधत इति। तत्र बाधेन प्रत्यवस्थानस्य वक्ष्यमाणत्वादिति ॥ २ ॥

ननु महतीयमपूर्वा प्रक्रिया यत् सूत्रकारादिभिरनुद्दिष्टामलक्षितां च प्रतिधर्मसमाभिधानां जातिं भवन्तो लक्षयन्तीत्यत आह ॥

साधर्म्यवैधर्म्यसमौ तद्भेदावेव सूत्रितौ।

सूत्रकारस्यापि प्रथमतः साधर्म्यवैधर्म्यसमावुद्देशपूर्वं लक्षयतस्तद्द्वारा प्रतिधर्मसमायामेव तात्पर्यम्। तयोस्तदवान्तरभेदत्वादिति किमर्थं तर्हि मुख्यमेव प्रतिधर्मसममुपेक्ष्यावान्तरभेदोपादानमिति

सव्युदासः प्रमाणादिति प्रत्यक्षादेः सर्वस्मात् प्रमाणादियं जातिः प्रवर्तत इति दर्शितं भवति। प्रतिरोधत इति प्रकरणसमाख्यजातेर्व्यवच्छेदः। स साध्यस्योपसंहारे प्रथममेव प्रतिपाद्यते। उद्देशपूर्वं लक्षयतः सामान्यविशेषसूत्राभ्यामशेषलक्षणं च कुर्वतः ते च उत्कर्षापकर्षसमादीनामवान्तरभेदाश्च स्वयमेवेति भाष्यवार्त्तिकादिषु कृतश्रमैः शिष्यैर्ज्ञातव्या इत्यर्थः ॥ २ ॥

चेत् तत्राह ।

अवान्तरभिदाः सन्ति सर्वत्रेति प्रसिद्धये ॥ ३ ॥

सर्वास्वपि जातिषु बहवोऽवान्तरभेदाः सन्ति । यथा तावत् प्रतिधर्मसमायां साधर्म्यवैधर्म्यसमौ ते च स्वयमेवोहनीया इति प्रदर्शनार्थमवान्तरभेदोपादानमिति ॥ ३ ॥

अवान्तरभेदत्वानङ्गीकारेण तयोः स्वतन्त्रजातित्वाभ्युपगमे ऽनिष्टप्रसङ्गमाह ।

तौ चेत् स्वतन्त्राभिमतौ प्रत्यक्षादेः प्रमाणतः ।
एवंविधः प्रसङ्गः स्याज्जातित्वेन न सूत्रितः ॥ ४ ॥

तदा ह्यनङ्गीकृतयुक्ताङ्गेन प्रत्यक्षादिना प्रमाणेन प्रतिरोधतः प्रत्यवस्थानस्य जात्यन्तरानन्तर्भावादजातित्वं स्यात् । तच्चायुक्तम् असदुत्तरत्वात् छलाद्यनन्तर्भावाच्चेति । अत्र सूत्रम् । साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमाविति । तदिति साध्यपरामर्शः । उपसंहारकर्मतया

तदा ह्यनङ्गीकृतेति । यदानुमानाभाससाधर्म्यवैधर्म्याभ्यामेव प्रत्यवस्थानमिमे अजाती स्यातां तदा ह्येवं सति समापन्नमिति भावः । जात्युत्तरानन्तरभावात् साधर्म्यादिचतुर्विंशतिजातीनां एवंविधप्रसङ्गस्य च लक्षणैकभावादित्यर्थः । कथमप्रस्तुतस्य तच्छब्देन परामर्श इत्यत्राह । उपसंहारकर्मतयेति । उपसंहारः समर्थनं तत्कर्मतया समर्थनीयत्वेन । सामान्यलक्षणसूत्रात् साधर्म्यवैधर्म्याभ्यां

प्रकृतत्वात्। उपपत्तेरिति तादर्थ्ये षष्ठी। साधर्म्यवैधर्म्याभ्यामित्यावर्तनीयम्। सामान्यलक्षणसूत्रात् प्रत्यवस्थानपदमनुवर्तनीयम्। लक्ष्यलक्षणपदानां यथासङ्ख्येन सम्बन्धः। स्वपक्षसाधनपरपक्षप्रतिषेधाभ्यां द्विभागेन प्रत्यवस्थाने प्रतिषेधभागेन जातित्वमिति सूचयितुं पुल्लिङ्गनिर्देशः। सामान्यलक्षणेनैव सदुत्तरप्रकरणसमत्वोद्भावनव्यवच्छेदः ततश्चायमर्थः सम्पद्यते साधर्म्येण वैधर्म्येण द्वाभ्यां वा साध्योपसंहारे वादिना कृते साध्यधर्मविपर्ययधर्मसिद्ध्यर्थमनङ्गीकृतयुक्ताङ्गेन साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः। तथोपसंहारे तथाविधेन वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसम इति। यथा अनित्यः शब्दः कृतकत्वात् घटवदित्युपसंहारे नैतदेवमस्ति ह्याकाशेनापि साधर्म्यममूर्तत्वं तद्वन्नित्यः किं न स्यात् न चेदेवमनित्योपि न स्यादविशेषादिति साधर्म्यसमः। तस्मिन्नेवोपसंहारे

प्रत्यवस्थानं जातिरित्यस्माल्लक्षणपदानां लक्ष्यपदयोर्लक्षणपदयोश्च पुल्लिङ्गनिर्देशः समाहृत्योक्तिः। सामान्यलक्षणेन दूषणासक्तं स्वव्याघातकं चोत्तरं जातिः अनेन सह उत्तरेति हेत्वाभासरूपप्रकरणसमस्य दूषणाशक्तताद्यभावात् तेन तद्व्यवच्छेद इत्यर्थः। ततश्च सूत्राङ्गानामेव संविधानसद्भावात् तथाविधेनाङ्गीकृतयुक्ताङ्गेन साधर्म्येणैव चेति नियमः। प्रत्यवस्थानेन तु साधन इत्याह। तस्मिन्नेवेति। प्रत्येकं च द्रष्टव्यम्। वैधर्म्येणोपसंहारे कृते साध-

घटवैधर्म्याच्छ्रावणत्वान्नित्यः किं न स्यात् इति वैधर्म्यसमः । एवं वैधर्म्येण द्वाभ्यां चोपसंहारे साधर्म्येण च प्रत्यवस्थानं प्रत्येकं च द्रष्टव्यम् । तथा प्रत्येकं समुच्चिताभ्यां चोपसंहारे समुच्चिताभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं चोदाहर्तव्यम् । अनुमानेन साध्योपसंहारे प्रत्यक्षेणापि प्रत्यवतिष्ठते । यथा पूर्वस्मिन्नेव प्रयोगे स एवायं गकार इति प्रत्यभिज्ञाप्रत्यक्षेण नित्यः किं न स्यात् प्रमाणत्वाविशेषादिति । तथा शब्दोपमानाभ्यां प्रत्यवस्थानमुदाहर्तव्यम् । सर्वासामपि जातीनां सप्राङ्गानि वक्ष्यति । अत्र

र्म्येण प्रत्यवस्थानं साधर्म्यसमः । वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः द्वाभ्यां साधर्म्यवैधर्म्याभ्यामुपसंहारे साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः इति प्रस्तुतम् । शब्दानित्यत्वानुमाने ऽन्यथोदाहर्तव्यमित्यर्थः । अथ प्रतिधर्मसमयोर्विशेषान्तरसमामाह । तथा प्रत्येकमिति । साधर्म्येण वा वैधर्म्येण वा उभाभ्यां वोपसंहारे कृते उभाभ्यां प्रत्यवस्थानं चोक्तोदाहरणे साधर्म्यवैधर्म्यसमाख्य एकः प्रतिधर्मसमविशेषो द्रष्टव्य इत्यर्थः । तथा शब्दोपमानाभ्यामिति । शब्दानित्यत्वानुमाने प्रयुक्ते नाचिक्षेतमुपाख्यानं मत्पुत्रोक्तं सनातनमित्याद्यागमादनित्यः किं न स्यात् । तथा तस्मिन्नेव प्रयोगे अनेन सदृशः पूर्वं तेनोक्तः शब्द इत्युपमानेन नित्यः किं न स्यादित्यादिप्रत्यवस्थानमूहनीयमित्यर्थः । प्रत्यक्षादिना प्रत्यवस्थानस्य प्रतिधर्मसम इत्येव सञ्ज्ञा द्रव्याविषयवृत्तित्वं

प्रतिधर्मसमो लक्ष्यः अनभ्युपेतयुक्ताङ्गेन प्रमाणेन प्रतिरोधतः प्रत्यवस्थानमिति लक्षणं युक्ताङ्गहीनप्रतिप्रमाणोपलम्भ उत्थानबीजं सत्प्रतिपक्षत्वमारोप्यम् तद्भ्रान्तिः फलम् प्रमादः प्रतिभाक्षयश्चावसरः सर्वत्रेति वक्ष्यति । दुष्टत्वमूलं तु द्विविधं साधारणमसाधारणं चेति । तत्र साधारणं स्वव्याघातत्वम् । असाधारणं तु त्रिविधम् । युक्ताङ्गहीनत्वमविषयवृत्तित्वं चेति । अत्र साधारणं तावन्नेदं स्वसाध्यसाधकम् अनङ्गीकृतयुक्ताङ्गेन प्रमाणेन प्रतिरुद्धत्वादिति हि जात्यात्मकः प्रतिषेधः । स च स्वात्मानमपि व्याहन्ति नेदं दूष्यदूषकं तथाविधप्रतिप्रमाणप्रतिरुद्धत्वादिति । असाधारणं तु युक्ताङ्गहीनत्वं युक्तं व्याप्त्याद्यङ्गमनपेक्ष्य प्रवृत्तत्वादिति । तत्र सूत्रं गोत्वाद्गोसिद्धिवत् तत्सिद्धिरिति । यथा व्याप्तात् तद्गोत्वादेव गोव्यवहारसिद्धिः नाव्याप्तात् पशुत्वादेः तथा व्याप्तादेव कृतकत्वादिहेतोः साध्यसिद्धिर्नाव्याप्तादमूर्तत्वादेरिति यु-

---

हीनार्थकाङ्क्षभावे सत्यदूष्ये दूषणाभिधानमङ्गीकृत्य युक्ताङ्गं यथा व्याप्तादिति । अयं पिण्डो गौरिति व्यवहर्तव्यः गोत्वात् व्यतिरेकेणाश्ववदिति । अत्र गोव्यवहाराख्यसाध्येनाविनाभूतत्वात् गोत्वादिति हेतोर्यथा साध्यसिद्धेर्यथा च साध्यव्यभिचारिणः पशुत्वादिति हेतोर्न गोव्यवहारसिद्धिरेवमित्यर्थः । नाव्याप्तादिति । अमूर्तत्वा-

त्साङ्गहानिप्रदर्शनं सूत्रार्थः ॥ ४ ॥

कस्याप्यनिष्टधर्मस्य वादिसाधनशक्तितः ।
दृष्टान्तात् पक्ष उत्कर्ष उत्कर्षसम उच्यते ॥ ५ ॥

दृष्टान्तधर्मिणि दृष्टस्य पक्षे चाविद्यमानस्य धर्मस्य वादिनिर्दिष्टसाधनसाहचर्यमात्रेण साध्यधर्मस्येव दृष्टान्तात् पक्षे समुत्कर्षेण प्रत्यवस्थानमुत्कर्षसमः । अविशेषसमातो भेदप्रदर्शनायोक्तं वादिसाधनशक्तित इति । तत्र हि सत्त्वादिना हेत्वन्तरेणोत्कर्षं वक्ष्यति । सद्भावोपपत्तेरिति । उदाहरणं तु अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे अनित्यत्वेनेव मूर्तत्वेनापि सहचरितं कृतकत्वं घटादावुपलब्धं शब्दे ऽपि मूर्तत्वं साधयेत् । न चेदेवमनित्यत्वमपि न साधयेदविशेषात् । तथा क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति प्रयोगे कार्यं कर्तृमत्त्वेनेव किं चिज्ज्ञशरीरिकर्तृमत्वेनापि सहचरितं घटादावुपलब्धमिति क्षित्यादावपि तथाविधमेव कर्तारं साधयदभिमतसर्वज्ञाशरीरिकर्तृत्वं विरुणद्धीति विशेषवि-

---

दिहेतोर्गुणकर्मादौ नित्यत्वव्यभिचारेण तस्मात् तत्सिद्धिरित्यर्थः ॥ ४ ॥

वादिसाधनशक्तितः वाद्युक्तहेतुबलात् उदाहरणान्तरापदेशव्याजेनेश्वरानुमानं प्रति मीमांसकादीनाम् । एवंरूपवचनमेतज्जात्युत्तरमित्याह । क्षित्यादिकमि-

रुद्धो हेतुरिति । कः पुनरस्योत्थानहेतुः पक्षे ऽविद्यमानस्य दृष्टान्ते वादिहेतुसहचरितस्य धर्मस्योपलम्भः विशेषविरुद्धत्वमारोप्यं तद्भ्रान्तिः फलम् साधारणदुष्टत्वमूलं तु नेदं स्वसाध्यसाधकं विरुद्धत्वान्नित्यत्वसाधनकृतकत्ववदिति । प्रतिषेधहेतोरपि विशेषविरुद्धत्वं नित्यत्वसाधनकृतकत्वे नित्यत्वासाधकत्वं दृष्टमिति साधकत्वमिव नित्यत्वासाधकत्वमपि साधयेदित्यभिमतमनित्यत्वासाधकत्वं विरुणद्धीति । असाधारणं तु युक्ताङ्गहीनत्वं कार्यत्वादेः कर्तृमत्त्वादिनेव

ति । अभिमतं न्यायवाद्यभिमतम् । विरुणद्धीति । तेनाव्याप्तत्वात् तं प्रतिक्षिपति । सर्वत्र तज्जातिविशेषो लक्ष्यः तत्तद्विशेषसूत्रोक्तं लक्षणं प्रमादः प्रतिभाहानिर्वावसर इत्येतत्त्रयमुक्तप्रायमिति । तस्याङ्गान्तराण्याह । पक्षेऽविद्यमानस्येत्यादिना । तद्भ्रान्तिः फलं विशेषविरोधः आयातं ततोऽङ्गं पराजित इति वादि भ्रमो जातिवादिनः फलमित्यर्थः । साधारणदुष्टत्वमूलं स्वव्याघातकत्वं नेदं स्वसाध्यसाधकमिति वादिसाधनसाहचर्यमात्रेण दिष्टं तत्पक्षोनिष्टधर्मप्रसञ्जनं ह्युत्कर्षसमः स जात्युत्तरेऽप्यस्ति कथं नित्यत्वसाधककृतकत्वरूपे दृष्टान्तविरुद्धत्वानित्यत्वसाधकमस्ति तदसाधकत्वं जातिवादिनो विरुद्धत्वात् इति हेतोः पक्षभूते वादिसाधने व्यापनं ततश्च नित्यत्वासाधकत्वं जातिवाद्यभिहितमनित्यत्वादिति हेतोः कर्तृमत्त्वानित्यत्वादिनेव किञ्चित् शरीरिकर्तृमत्त्वमूर्तत्वादिना

शरीरादिनापि व्याप्त्यभावात् सत्यां तु व्याप्ताविष्टापादनादिति ॥ ५ ॥

व्यावृत्ते व्यापकाभासे
पक्षतो लिङ्गसाध्ययोः ।
आकर्षोऽन्यतरस्य स्या-
दपकर्षसमः स्फुटः ॥ ६ ॥

दृष्टान्ते साध्यस्य हेतोर्वा व्यापकत्वेन कञ्चिद्धर्ममारोप्य पक्षे तन्निवृत्ते व्यापकाभावाद्व्याप्याभाव इति साध्यस्य हेतोर्वा पक्षादपकर्षणमपकर्षसमः यथा पूर्वयोरेव प्रयोगयोर्दृष्टान्ते घटे कृतकत्वस्य वा अनित्यत्वस्य वा व्यापकं मूर्तत्वं तच्च शब्दाद्व्यावृत्तमिति तयोरन्यतरस्य निवृत्तिः घटादौ कर्तृमत्त्वस्य कार्यत्वस्य वा व्यापकं शरीरित्वम् तच्च क्षित्यादेर्निवृत्तमिति तयोरन्यतरस्य वा निवृत्तिरिति । उत्थानहे-

---

व्याप्तिर्नास्ति कार्यस्य शरीरस्य कर्तृकत्वाभावात् कृतकस्य कर्मणो मूर्तत्वाभावाच्च ॥ ५ ॥

अथ तेषामपि शरीरकर्तृकत्वमूर्तत्वसद्भावे जातिवाक्यस्य सिद्धसाधकत्वात् युक्ताङ्गहानिरित्यर्थः । अपकर्षणमपकर्षेण प्रत्यवस्थानं प्रथमं शब्दनित्यत्वानुमाने अपकर्षसमं दर्शयति । घटादौ कर्तृमत्त्वस्येति । साध्यपक्ष इति प्रबलप्रमाणबुद्ध्या साध्यापकर्षाभिधाने बाधितविषयत्वं प्रतिप्रमाणबुद्ध्या चेत् सत्प्रतिपक्षत्वमिति विभागः हेत्वपकर्ष इति विभागः हेत्वपकर्ष इति यया कयाचिद्बुद्ध्या हेत्वपकर्षे सिद्धत्वमारोप्य उत्कर्षसमवदिति । नेदं स्वसा-

तुस्तु दृष्टान्ते साध्यहेत्वोर्व्यापकाभिमतस्य धर्मस्य पक्षे निवृत्त्युपलम्भः। साध्यापकर्षे बाधितविषयत्वं सत्प्रतिपक्षत्वं वा आरोप्यम्। हेत्वपकर्षे त्वसिद्धत्वं तदाभासोयं साधारणमसाधारणं च दुष्टत्वमूलमुत्कर्षसमावदूहनीयमिति ॥ ६ ॥

हेतोस्तु यादृशं रूपं पक्षमात्रे विवक्षितम्।
तद्रूपहेतुमान् साध्यः सपक्षोऽप्यन्यथा पुनः ॥ ७॥
भवेत् साधनवैकल्यमिति वर्ण्यसमोदयः।

पक्षवर्तिनो हेतोरसिद्धार्थत्वादीनि रूपाणि विवक्षितानि सपक्षवर्तिनस्तु सिद्धार्थत्वादीनि। तानि पञ्चरूपाणि च रूपाणि वक्ष्यति। तत्र सपक्षविवक्षितरूपवद्धेतुमत्तया सिद्धस्य दृष्टान्तस्य पक्षमात्रविवक्षि-

ध्यसाधकं बाधितविषयत्वात् सत्प्रतिपक्षत्वादसिद्धत्वाद्धेति जातिवाद्युक्तहेतवोऽपि न साध्यसाधका भवितुमर्हन्ति। प्रत्येकं तथाविधबाधादियुक्तत्वादित्याद्यूहनीयम्। तथा व्यापकव्याप्य इत्यत्रापि न तु व्यापकाभासाभावादिति व्याप्त्याख्ययुक्ताङ्गहीनत्वं चोहनीयमित्यर्थः ॥ ६ ॥

अथौचित्यादनवसरे ऽप्युत्थानबीजमाह। तत्र सपक्षविवक्षितेति। असिद्धार्थहेतुमान् उभयसाध्यसिद्धसाध्यधर्मसहितहेतुयुक्तः। एवं रूपान्तरेष्वतिप्रवृत्तसाध्यज्ञापनशक्तिमत्त्वादिवक्ष्यमाणरूपचतुष्टययुक्तो हेतुः सपक्षे विद्यते वा न वा। आद्ये पक्षवत्पक्षोऽपि साध्यधर्मवत्तया वर्ण्यः स्याद् द्वितीये तथाविधहेतुमत्तया सपक्षः साध्यः स्यात्। अन्यथा साध्यसाधनवैकल्ययोरन्यतरप्रस-

तद्रूपवद्धेतुमत्त्वेनासिद्धिः कारणं वर्ण्यसमायाः । तत-श्चेयमेवं प्रवर्तते किं पक्षवदसिद्धार्थहेतुमान् सपक्षः सिद्धार्थहेतुमान् वा पूर्वत्र सपक्षे ऽपि साध्यधर्मवत्तया वर्ण्यः साध्यः स्यादित्यर्थः । अन्यथा साध्यधर्मस्या-सिद्धत्वसाध्यविकलो दृष्टान्तः स्यात् उत्तरत्र पक्षवि-वक्षितहेतुमत्तया दृष्टान्तः साध्यः स्यात् । अन्यथा तादृशस्य हेतोरभावात् साधनविकलः स्यादिति । एवं रूपान्तरेषु च त्रिष्वपि प्रवृत्तिकारः स्वयमेव बोद्धव्यः। साध्यसाधनवैकल्ये दृष्टान्तस्यारोप्ये । अतिपीडायां हेतोर्विरुद्धत्वासाधारणत्वदुष्टत्वे मूलं तु यथोक्तवर्ण्य-त्वप्रतिषेधहेतावपि सुवचत्वात् त्वव्याघातः । अ-विषयवर्तित्वं च पक्षवर्तिहेतुरूपाणां सपक्षवर्तिन्य-पि सञ्चारणात् । अयुक्ताङ्गाधिकत्वं वा सपक्षवर्ति-नो हेतोर्न युक्तानामेवासिद्धार्थत्वाद्यङ्गानामुररीकर-णादिति ॥ ७ ॥ ऽऽ ॥

ङ्गादिति बोद्धव्यमित्यर्थः । अतिपीड़ायां हेत्वाभासपर्य-न्तचिन्तायां विरुद्धत्वासाधारणत्वसाध्यविकलः सपक्षो विपक्ष इति तत्रापि वर्तमानो हेतुः पक्षविपक्षयोरेव वर्तत इति विरुद्धः । साध्यधर्मवति सपक्षेऽप्यवर्तमानो हेतुः पक्षमात्रवृत्तिरसाधारणो भवत्यतस्तदुभयमारोप्यमित्य-र्थः । यथोक्तवर्ण्यत्वस्येति । नेदं स्वसाध्यसाधकं विरुद्ध-त्वादसाधारणत्वादिप्रतिषेधहेतोः अविपक्षविवक्षितरू-पाणां सपक्षसत्त्वमसत्त्वं विकल्प्य उभयथापि वर्ण्यत्वस्य सुवचत्वादित्यर्थः ॥ ७ ॥ ऽऽ ॥

सपक्षवर्तिनो हेतोर्यादृग्रूपं विवक्षितम्[१] ॥ ८ ॥
पक्षोपि तादृग्घेतुः स्यादन्यथा हेत्वसिद्धता[२] ।
सपक्षवत् तदा साध्य इत्यवर्ण्यसमाकृतिः ॥ ९ ॥

किं सपक्षवत्पक्षोपि सिद्धार्थहेतुमान्न वा । न चेत् पक्षोपि न साध्यः स्यात् सपक्षवर्तिनः सिद्धार्थस्य हेतोस्तत्राभावात् तथा च स्वरूपासिद्धो हेतुः । सिद्धार्थधर्मवर्तित्वे तु सिद्धधर्मविशिष्टत्वात् पक्षो न साध्यः स्यात् तथा चापक्षधर्मो हेतुरिति प्रत्यवस्थानमवर्ण्यसमः । एवं रूपान्तरेष्वपि दर्शयितव्यम् उत्थानहेतुस्तु पक्षधर्मत्वापेक्षितरूपवद्धेतुमत्वे ऽपि पक्षस्य पक्षाविवक्षितसपक्षमात्रविवक्षितरूपवद्धेतुमत्त्वेनासिद्धिः साधारणमसाधारणं दुष्टत्वमूलं वर्ण्यसमावद् द्रष्टव्यम् ॥ ८ ॥ ९ ॥

सपक्षवर्तिन्यपि हेतोरिति शेषः । पक्षो न साध्यः स्यात् साध्येन गृहीतव्याप्तिहेतुः पक्षे न चेत् न तत्र साध्यसाधनसिद्धिरित्यर्थः । अपक्षधर्मः आश्रयासिद्धः एवं रूपान्तरेष्वपीति । अनारब्धसाध्यज्ञापनशक्तित्वादिरूपचतुष्टयवद्धेतुसद्भावासद्भावौ पक्षो न साध्यः स्यादिति द्रष्टव्यमित्यर्थः । साधारणमसाधारणं चेति । प्रतिषेधहेतोरप्यवर्ण्यस्वरूपस्य व्याघातकत्वमविषयवृत्तित्वमयुक्ताङ्गाधिकत्वं च पूर्ववद् ज्ञातव्यमित्यर्थः ॥ ८ ॥ ९ ॥

(१) व्यवस्थितम्—पा· A पु·

(२) अन्यथासिद्धिहेतुता—पा· B पु· ।

कानि पुनः पक्षमात्रवर्तिनो हेतोर्विवक्षितानि रूपाणि कानि चासपक्षमात्रवर्तिन इत्यत्राह ॥

असिद्धार्थत्वमारब्धसाध्यज्ञापनशक्तता ।
व्याप्तिप्रामाणशून्यत्वं संशयैकार्थता तथा ॥१०॥
स्वरूपभेदश्चेत्येतत् पक्षमात्रं विवक्षितम् ।
हेतुरूपं सपक्षे तु तादृग्रूपविपर्ययः ॥ ११ ॥

हेतोरर्थः प्रमेयं सिषाधयिषितो धर्म इति यावत् । स हि पक्षे ऽसिद्धो भवति । अन्यथा सिद्धसाध्यताप्रसङ्गात् सपक्षे तु सिद्धः इतरथा साध्यवैकल्यप्रसङ्गात् पक्षे साध्यज्ञापनाय प्रवृत्तशक्तिर्हेतोरन्यत्र न तथा पूर्वमेव प्रमाणान्तरेण साध्यसिद्धिः पक्षे संशयसमानविषयो हेतुः सन्दिग्धन्यायप्रवृत्तेः इतरत्र तथा साध्यधर्मनिश्चयात् पक्षे व्याप्तिग्राहकशून्यो हेतुः । तत्र साध्यस्य प्रमाणान्तराभावात् अपरत्र प्रमाणान्तरात् साध्यहेतोर्व्याप्तिर्गृह्यते । पक्षे धूमादिविशेषः कश्चित् परत्र तज्जातीयोऽन्यो विशेष इत्येतानि हेतुरूपाणि पक्षसपक्षयोर्व्यवस्थया विवक्षितानीति ॥ १० ॥ ११ ॥

धर्मस्यैकस्य केनापि धर्मेण व्यभिचारतः ।
हेतोश्च व्यभिचारोक्तेः विकल्पसमजातिता ॥१२॥

पक्षे ऽसिद्धो भवति प्रतिवादिन इति शेषः । तत्र साध्यस्येति । प्रस्तुतानुमानेनैव हि पक्षे साध्यासाद्धः न प्रमाणान्तरेण तत्साध्यसाधनयोर्व्याप्तिः पक्षेण प्रमाणान्तरसिद्धिरित्यर्थः ॥ १० ॥ ११ ॥

अत्र षष्ठ्यन्तो धर्मशब्दो हेतुधर्मान्तरं चाह। तृतीयान्तस्तु साध्यधर्मं धर्मान्तरं च। ततश्चैकस्य हेतुधर्मस्य धर्मान्तरेण वा धर्मान्तरस्य साध्यधर्मेण वा धर्मान्तरस्य धर्मान्तरेण वा व्यभिचारदर्शनमुत्थानहेतुः। तेन हेतोरपि साध्यव्यभिचारापादनं विकल्पसमः। तच्च दृष्टान्ते साध्येन सह वर्ततां हेतुः पक्षे तु तेन विनैव वर्ततामिति व्यवस्थयैवापादनीयम्। तत्र हेतोर्धर्मान्तरं प्रति व्यभिचारस्त्रिविधः। पक्षदृष्टान्तयोः पक्षयोर्दृष्टान्तयोर्वेति। तत्र प्रथमो यथा। अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे यथा कृतकत्वं शब्दे विभागजत्वेन सह वर्तते घटे विनैव वर्तत इति विभागजत्वं व्यभिचरति। तथा कृतकत्वं घटे अनित्यत्वेन सह वर्ततां शब्दे तु तेन विनैव वर्ततेत्यनित्यत्वं व्यभिचरेदिति। द्वितीयस्तु अनित्ये वाङ्मनसी कृतकत्वादिति प्रयोगे कृतकत्वं यथा वाङ्मनसयोर्मूर्तत्वममूर्तत्वं च व्यभिचरति तथा साध्यमपि व्यभिचरेदिति। तृतीयस्तु क्रियावाना-

---

इति व्यवस्थयैव शून्ये पक्षे वृत्तिरेव व्यभिचारः न तु विपक्षगामित्वमिति नियमः घटे ऽपि नैव वर्तते शब्दविभागयोरेव विभागजत्वं अतस्तद्व्यतिरिक्ते घटे विभागजत्वमन्तरेण कृतकत्वं वर्तत इत्यर्थः। मूर्तत्वममूर्तत्वं चेति। यथा कृतकत्वं मनसि मूर्तत्वेन सह वर्तते। यथाह वान्यमूर्तत्वेन(?)

त्मा क्रियाहेतुगुणयोगित्वात् लोष्टवत् तूलवदित्यत्र क्रियाहेतुगुणयोगित्वं हेतुः यथा क्रियावतो लोष्टतूलयोर्यत्तु लघुत्वे व्यभिचरति तथा क्रियावत्त्वमपीति। धर्मान्तरस्य साध्यधर्मं प्रति व्यभिचारो यथा अनित्यः शब्दः कृतकत्वादिति प्रयोगे यथा प्रमेयत्वमाकाशघटयोरनित्यत्वं व्यभिचरति तथा कृतकत्वमपीति। धर्मान्तरस्य धर्मान्तरं प्रति व्यभिचारो यथा द्रव्यत्वस्य पयःपावकयोरुष्णत्वव्यभिचारात् कृतकत्वस्याप्यनित्यत्वाव्यभिचार इति । अनैकान्तिकाभासोऽयं दुष्टत्वमूलं तु अव्याप्तस्य व्यभिचारान्न व्याप्तस्यापि व्यभिचारः। तथाभ्युपगमे वा प्रतिषेधहेतोरप्यन्यव्यभिचाराद्व्यभिचारः स्यादिति व्याघातः । अविषयवृत्तित्वं चान्यव्यभिचारादन्यस्यासाधकत्वापादनादिति ॥ १२ ॥

सह वर्तते मनसि वर्तत एवमित्यर्थः। आत्मनि क्रियाहेतुर्गुणः प्रयत्नः प्राणादिव्यापारहेतुत्वात् लोष्टे वेगः गुरुलघुत्वविशेषतदभावौ अनैकान्तिकचोदनाभासोऽयं पक्षे साध्यं विनैव वृत्तिर्नाम पक्षविपक्षयोर्वृत्तिः भवत्यतः पक्षत्रयवृत्तित्वादनैकान्तिकचोदनाभासोऽयं सत्यपक्षवृत्तित्वादाश्रयासिद्ध इत्यर्थः । अव्याप्तस्येष्टसाध्यव्यभिचारिणो विभागजत्वादेः प्रतिषेधहेतोरपीति धर्मान्तरादिकं प्रति व्यभिचाराज्जातिवादिहेतोरप्यसाधकत्वरूपसाध्यव्यभिचारः स्यादित्यर्थः ॥ १२ ॥

दृष्टान्तहेतुपक्षाणां सिद्धानामपि साध्यवत् ।
साध्यतापादनं तस्माल्लिङ्गात् साध्यसमो भवेत् १३

प्रमाणान्तरसिद्धानामेव पक्षहेतुदृष्टान्तानां साध्यधर्मस्येव तत एव लिङ्गात् साध्यत्वापादानं साध्यसमः । तस्मादिति वर्ण्यसमतो भेदं दर्शयति । एवं प्रत्यवतिष्ठमानस्यायमभिमानः । दृष्टान्ते हि प्रयोजकत्वं हेतोर्गृह्यते तच्च साध्यं प्रत्येव प्रयोजकत्वं नान्यत्रेति । तत्रापि साध्यसिद्ध्यर्थमयमेव हेतुः प्रयोक्तव्यः । इतरथा पक्षे ऽपि साध्याप्रयोजकत्वं स्यात् । एवं लिङ्गधर्मिणावपि सिद्धावनुमानाङ्गं भवतः तत्सिद्धिश्च न प्रमाणान्तरादुचिता लिङ्गस्य तत्राप्रयोजकत्वेन साध्ये ऽप्यप्रयोजकत्वापत्तेः । क्रोडीकृतलिङ्गधर्मिलिङ्गिविषयानुमितिज्ञानजनकत्वाल्लिङ्गस्य न हि लिङ्गधर्मिणावपोह्य साध्यमात्रप्रतीतिर्लिङ्गाज्जायते । अथ-

साध्यस्य साधकं साधनमिति प्रसिद्धिं विहाय पक्षादीनामप्यनेनैव साधनेन साध्यत्वं वदतः कोऽभिप्राय इत्याशङ्क्याह । एवं प्रत्यवतिष्ठमानस्येति । प्रयोजकत्वं साधकत्वम् इतरथा सपक्षे ऽप्यनेनैव साधनेन साध्यसिद्ध्यनङ्गीकारे कथमेवमित्यत्राह । क्रोडीकृतेति । धर्मिलिङ्गसहितसाध्यधर्मस्यानुमेयत्वादित्यर्थः । अयमेव न्याय इति दृष्टान्तगतसाध्यस्यापि अयमेव हेतुः साधक इति स्थिते तत्रापि धर्मिहेतुसहितस्य साध्यत्वात् तयोरप्ययमेव साधक इत्यवगन्तव्यमित्यर्थः । असिद्धत्वादय इत्यादिश-

(१) सपक्षेषु—पा॰ B पु॰ ।

मेव न्यायो दृष्टान्तधर्मिणि तद्वर्तिनि च हेतौ दर्शयितव्यः । ततश्च पक्षहेतुदृष्टान्तानामपि सिद्ध्यर्थमयमेव हेतुर्यावन्न प्रयुज्यते तावत् तेषामसिद्धिर्भवेदिति । साध्यविकलत्वासिद्धत्वादय आरोप्यन्त इत्यस्य प्रतिषेधहेतावपि दुर्वारत्वात् स्वव्याघातः । अयुक्ताङ्गस्वीकारश्च पक्षादीनां तत एव लिङ्गात् सिद्धेरयुक्ताया एवाभ्युपगमात् उत्कर्षसमादीनां षण्णां लक्षणसूत्रम् साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः । अत्रोत्कर्षादिसमाख्यानिर्वचनमेवासां लक्षणम् । साध्यदृष्टान्तयोर्धर्मविकल्पः पञ्चानां कारणम् साध्यः पक्षः धर्माणां विकल्पो नानात्वं वैचित्र्यं तच्च तत्रतत्र दर्शितमेव ।

ऽदेनान्यथासिद्धत्वं साधनविकलदृष्टान्ताश्रयासिद्धत्वं च गृह्यते । हेतुदोषस्त्वाश्रयासिद्धिः स्वरूपासिद्धिः विरुद्धत्वमसाधारणत्वं व्याप्त्यसिद्धिश्च तत्तचोदनाभासोऽयं तत्तद्भ्रान्तिः फलमिति च द्रष्टव्यम् । अस्य यथोक्तसाध्यत्वस्य । अत्रोत्कर्षादीति । पक्षदृष्टान्तयोर्धर्मविकल्पाद्युत्थानबीजभेदादुत्कर्षेण प्रत्यवस्थानं अपकर्षेण प्रत्यवस्थानमित्यादिकमासां जातीनां लक्षणमित्यर्थः । वैचित्र्यं सदसत्त्वं वैलक्षण्यं च । तत्रतत्रेति । उत्कर्षसमे साधनसहचरितमात्रस्य धर्मान्तरस्य पक्षदृष्टान्तयोः सदसत्त्वं धर्मविकल्पः अपकर्षसमे साध्यसाधनयोः व्यापकाभिमतस्य धर्मान्तरस्य दृष्टान्तपक्षयोः सदसत्त्वम् वर्ण्यसमे हेतोः पक्षस्थि-

विकल्पसमायां तु साध्यदृष्टान्तयोरिति पदं साध्ययोर्दृष्टान्तयोः साध्यदृष्टान्तयोरिति प्रत्येकसमुदायोपलक्षणपरं योजनीयम् । उभयसाध्यत्वाच्चेति षष्ठस्य हेतुः । चकारः पूर्वोक्तं धर्मविकल्पं समुच्चिनोति । अनुमाने सिद्धभागः साध्यभागश्चोभयं नाम तयोः सिद्धसाध्यत्वं धर्मविकल्पः । तत्र साध्यभागस्येव सिद्धभागस्यापि साध्यत्वमुभयसाध्यत्वं ततश्च सिद्धभागसाधनार्थमनुमानप्रयोगप्रसञ्जनं साध्यसम इत्यर्थः । आसामुद्धारसूत्रम् किञ्चित् साधर्म्यादुपसंहारसिद्धे वैधर्म्यादप्रतिषेधः । किञ्चित् साधर्म्याद् व्याप्तात् साध्योपसंहारे सिद्धे वैधर्म्यादव्याप्तात् कुतश्चिद्धर्मात् प्रतिषेधो न भवतीत्यर्थः । वर्ण्यावर्ण्यसाध्यसमानां स्वव्याघातत्वप्रदर्शनार्थं सूत्रम् साध्यातिदेशाच्च दृष्टान्तोपपत्तेरिति । यतः साध्यधर्मोऽन्यत्रातिदिश्यते स दृष्टा-

---

तरूपाणां पक्षसपक्षयोः सदसत्त्वम् विकल्पसमे साध्यसाधनधर्मान्तराणां पक्षदृष्टान्तयोः दृष्टान्तयोश्च नानात्वम् साध्यसमे ऽनुमानस्य सिद्धसाध्यभागयोर्धर्मिहेतुसाध्यधर्माणां सिद्धत्वसाध्यत्वरूपवैलक्षण्यं धर्मविकल्पः साध्यभागस्येव सिद्धभागस्याप्यनेनैव साध्यत्वापादनादुभयसाध्यत्वमिति तत्र दर्शितमित्यर्थः । व्याप्ताद् वाद्युक्तात् कृतकत्वादिति हेतोः । अव्याप्तात् जातिवाद्युक्तात् युक्ताङ्गहीनत्वादियुक्ताद्विरुद्धादिहेतोः । यतः यस्मात् दृष्टान्तादन्यत्र साध्यधर्मिणि अतिदिश्यते यथा घटः तथा शब्दोऽपीति प्रतिपाद्यते उभयोरपि सिद्धत्वादित्यवर्ण्य-

न्तः । सिद्धेन चातिदेशो भवत्यसिद्धस्येति न्यायात् सिद्धो दृष्टान्तः । पक्षस्तु साध्योऽङ्गीकार्यः उभयोरपि सिद्धत्वे साध्यत्वे वा दृष्टान्तदार्ष्टान्तिकभावव्याघात इति ॥ १३ ॥

प्राप्य साध्यं साधयति हेतुश्चेत् प्राप्तिकर्मणः । साध्यस्य पूर्वं सिद्धिः स्यादिति प्राप्तिसमोदयः ॥ १४ ॥

कृतिज्ञप्तिसाधारणीयं जातिः ततश्च साध्यं कार्यं ज्ञाप्यं च । तत्र कार्यमनुमितिज्ञानं ज्ञाप्यमनुमेयम् हेतुश्च लिङ्गं तज्ज्ञानं वा । प्राप्तिः संयोगादिर्विषयविषयिभावश्च सिद्धिः सत्त्वं ज्ञातत्वं च

समयोरुत्तरम् । साध्यत्वे वेति । वर्ण्यसाध्ययोरुत्तरमिति विभागः ॥ १३ ॥

प्राप्तिकर्मणः प्राप्त्याख्यसम्बन्धप्रतिसम्बन्धिनः ।

कृतिज्ञप्तीति । अनुमितिज्ञानस्योत्पत्तिपक्षे अनुमेयप्रतिपक्षे चेयं जातिः प्रवर्तत इत्यर्थः । ततश्चेति । सिद्धिशब्दस्य कृतिज्ञप्तिवाचकत्वात् साध्यशब्दस्यानुमितिज्ञानानुमेयं च वाच्यमित्यर्थः । हेतुश्चेति । व्याप्तत्वेन परामृष्टं लिङ्गपरामर्शो वा हेतुरिति पूर्वमेवोक्तमित्यर्थः । प्राप्तिः संयोगादिरिति । यदा लिङ्गं हेतुस्तदा साध्येन यथायोगं संयोगसमवायादिः सम्बन्धः यदा लिङ्गज्ञानं हेतुस्तदा-विषयविषयीभाव इत्यर्थः । सिद्धिः सत्त्वमिति । कृतिपक्षे सिद्धिरुत्पत्तिः ज्ञप्तिपक्षे ज्ञातत्वमित्यर्थः । आहत्यपदेन किमुक्तं भवतीत्यत्राह (?) । एतदुक्तं भवतीति । तेना-

एतदुक्तं भवति लिङ्गं तज्ज्ञानं वा स्वकार्यमनुमितिज्ञानं प्राप्य साधयेदप्राप्य वा अप्राप्य चेत् सर्वस्यापि सर्वं साधनं भवेदविशेषात् तेन प्राप्येति वक्तव्यम् सतां च प्राप्तिः सम्भवति सम्बन्धस्योभयनिष्टत्वेनान्यतरस्याप्यसत्त्वे निराश्रयत्वप्रसङ्गात् । तथा च कार्यस्याप्यवश्याङ्गीकर्तव्ये सत्त्वे कार्यकारणयोरुभयोरपि सत्त्वेनाविशेषात् किं कस्य कारणं कार्यं वेति निष्फलमनुमानमिति कृतिपक्षे प्राप्तिसमायाः प्रवृत्तिः ज्ञप्तिपक्षे ऽप्यप्राप्य ज्ञापनेऽतिप्रसङ्गात् प्राप्येति वक्तव्यं लिङ्गज्ञानस्य लिङ्गिना संयोगादिप्राप्त्यसम्भवात् विषयविषयिभाव एवाङ्गीकार्यः । तत्र च लिङ्गज्ञाने लिङ्गवल्लिङ्गिनोऽपि स्फुरणात् ज्ञातत्वेनाविशेषात् किं कस्य ज्ञापकं ज्ञाप्यं चेति। ततश्च प्राप्तावविशेषेण साधनत्वप्रतिक्षेपो लक्षणम्। अप्राप्तावतिप्रसङ्गादसाधनत्वमुत्थानहेतुः । साध्यस्य पूर्वं सिद्धिर्हेतोर्विशेषणं तच्चात्र नास्तीति विशेष-

प्राप्येति पक्षे दोषदर्शनेन । तथा च प्राप्तिप्रतिबन्धिनश्च निष्फलमनुमानम् अनुमितिज्ञानजननं ह्यनुमानप्रयोजनं तच्चेत् पूर्वमेव स्यादनुमानप्रयोगो व्यर्थः स्यादित्यर्थः । अतिप्रसङ्गाद्धेतोरविशेषज्ञापकत्वे प्रसङ्गात् लिङ्गज्ञानस्य लिङ्गपरामर्शाख्यस्य हेतोर्लिङ्गिना साध्येन संयोगादिगुणस्य सतो ज्ञानस्याश्रयव्यतिरिक्तेन संयोगसमवायाद्यसम्भवादित्यर्थः। तच्चात्र नास्तीति। हेतुसिद्धिसमये साध्यस्यापि सिद्धत्वात् उक्तमत्र अप्राप्तिसमायां प्राप्य साधयन्नित्य-

णासिद्धिरारोप्या । दुष्टत्वमूलमुत्तरत्र प्रदर्शयिष्याम इति ॥ १४ ॥

अप्राप्य साधयन् साध्यं हेतुः सर्वं च साधयेत् ।
अप्राप्तेरविशिष्टत्वादित्यप्राप्तिसमस्थितिः ॥१५॥

प्राप्तावविशेषेणासाधनत्वात् अप्राप्य कारणं ज्ञापनं च वक्तव्यम् । तच्चायुक्तमतिप्रसङ्गात् । न हि दाह्यमप्राप्तो दहनो दहति प्रकाश्यमप्राप्य प्रदीपः प्रकाशयतीति च दृष्टमिष्टं चेत्येवमप्राप्तावतिप्रसङ्गादसाधनत्वेन प्रत्यवस्थानमप्राप्तिसम इति लक्षणम् । प्राप्तावविशेषादसाधनत्वमुत्थानहेतुः । साध्यप्राप्तिहेतोर्विशेषणं तच्चात्र नास्तीति पूर्ववद्विशेषणासिद्धिरारोप्येति । अनयोर्लक्षणसूत्रम् प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्यविशिष्टत्वादप्राप्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमाविति । हेतोः साधकत्वमिति शेषः । विकल्पेनास्थानहेतुं दर्शयति । कार्यकारणभावापलापवादिनो ह्येवमाहुः ॥

व्यापि साध्यहेतुव्याप्त्या शब्दानामित्यर्थः ॥ १४ ॥

पूर्ववदियमपि कृतिज्ञप्तिसाधारणीति दर्शयति । अप्राप्य करणं ज्ञापनं चेति । अतिप्रसङ्गात् अप्राप्त्यविशेषात् सर्वस्य करणे ज्ञापने च प्रसङ्गादित्यर्थः । न हि दृष्टमिष्टं चेति सम्बन्धविकल्पेनेति सूत्रे प्राप्य साध्यमप्राप्य वा हेतोरित्यन्तं न लक्षणोपयुक्तमिति भावः । एवंविधं जात्युत्तरं न कश्चिद्वदत्यस्थानोपालम्भोऽयमित्याशङ्क्याह । कार्यकारणभावेति । अपलापवादिनः बौद्धचार्वाकादयः ।

असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः ।
असम्बन्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ इति ।

स्वव्याघातकत्वमनयोः सुगममेव प्रतिषेधकहेतावपि दूष्यं प्राप्य वा अप्राप्य वेत्यादिप्रसङ्गस्य दुर्वारत्वात् । असाधारणं तु प्राप्तिसमाया अयुक्ताङ्गाधिकत्वं कृतिपक्षे साध्यप्राप्तेरयुक्ताया एव स्वीकारात् । अयुक्तिश्चाप्राप्तेरेव दण्डादिभिर्घटादिनिष्पत्तिदर्शनात् । ज्ञप्तिपक्षे तु लिङ्गस्य तावल्लिङ्गिना प्रतिबन्धलक्षणा प्राप्तिरस्ति । लिङ्गज्ञानस्यापि तद्व्याप्तविषयिलक्षणा लिङ्गिना प्राप्तिरस्त्येव । साक्षाद्विषयविषयिलक्षणा नास्तीति चेत् । तर्ह्ययुक्ताङ्गस्वीकारः लिङ्गज्ञानस्य साक्षात् साध्यधर्मविषयत्वस्यानङ्गत्वादिति । अप्राप्तिसमाप्येतेन निरस्तैवायुक्ताङ्गश्च व्याप्तिलक्षणायाः प्राप्तेरनङ्गीकारात् । साक्षात् सम्बन्धोऽङ्गमिति

नास्ति सम्बन्धः कार्यस्येति शेषः । कारणैर्मृद्दण्डचक्रादिभिः कारणैः सत्त्वसङ्गिभिः सत्पदार्थसम्बन्धवद्भिश्च स्वयंसिद्धेर्वा न व्यवस्थितिः एकस्मात् सर्वस्योत्पत्तिप्रसङ्ग इत्यर्थः ।

प्रतिषेधहेतोरपि नेदं स्वसाध्यसाधकं विशेषणासिद्धत्वादित्यत्रापि ज्ञप्तिपक्षेऽप्ययुक्ताङ्गाधिक्यं प्रतिपादयितुमाह । ज्ञप्तिपक्षे त्विति । प्रतिबन्धलक्षणा व्याप्तिरूपा । लिङ्गज्ञानस्यापीति । लिङ्गपरामर्शो हेतोः साध्यव्याप्तलिङ्गविषयत्वरूपः साध्येन सम्बन्धोऽस्तीत्यर्थः । साक्षाद्विषयेति । हेतुसाध्ययोरव्यवहितसम्बन्धाभावे ज्ञाप्यज्ञापकभावो न युक्त इति चेदित्यर्थः । एतेन प्राप्तिसमोक्तदोषा-

चेत् तर्ह्यनङ्गाङ्गीकारः । अभिचारकर्मणा भ्रातृव्यमारणादौ साध्यमाने दृष्टमेतत् । यत् साक्षादप्राप्तमपि साधनं भवतीति तदेतत् सर्वमभिसन्धायोक्तं घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेध इति । केचित्तु साधनविशेषः साध्यविशेषेण व्याप्तो न वा । न चेत् न तं गमयेदतिप्रसङ्गात् व्याप्तश्चेद्व्याप्तिग्रहणसमय एव लिङ्गिविशेषस्यापि ज्ञातत्वादनर्थकमनुमानमिति प्रत्यवस्थानं प्राप्तिसमः । अप्राप्तिसमस्तु लिङ्गपरामर्शस्य करणत्वात् । करणानां च कर्मप्रत्यासत्त्यवश्यम्भावात् साध्यविशेषप्राप्तिर्वक्तव्या । सा चात्र नास्तीति प्रत्यवस्थानमिति लक्षयन्ति । अनयोरप्युक्तलक्षणकक्षीकारात् तदवान्तरविशेषत्वमङ्गीचक्रुराचार्याः ॥ १५ ॥

सिद्धे दृष्टान्तहेत्वादौ साधनप्रश्नपूर्वकम्(१) ।

णामत्रापि सुवचत्वेन । दोषान्तरमाह । अयुक्ताङ्गश्चेति । मारणादौ मारणोच्चाटनविद्वेषणस्तम्भनादौ इति मिस्रे सप्तमी । प्राप्य साध्यमिति सूत्रस्यार्थान्तरं वक्त्रन्तरव्याजेनाह । केचित्त्विति । साधनविशेषः पक्षवर्ती हेतुः साध्यविशेषेण सिषाधयिषितधर्मेण । कारणानां चेति । वास्यादिकरणानि दार्वादिकर्मणा सम्बद्धान्येव क्रियाजननद्वारा द्वैधीभावादिकं फलं जनयतीत्येवमेतदपीत्यर्थः । एतदपि व्याख्यानमस्मदभिमतमित्याह । अनयोरपीति । तदवान्तरविशेषत्वं प्राप्त्यप्राप्तिसमयोरपीति तदवान्तरविशेषत्वं प्राप्त्यप्राप्तिसमयोरवान्तरभेदत्वम् ॥ १५ ॥

(१) कारणप्रश्नपूर्वकम्–पा॰ A पु॰ ।

अनवस्थाभासवाचः प्रसङ्गसमजातिता ॥ १६ ॥

इयमपि कृतिज्ञप्तिसाधारणी जातिः तथा च साधनमुत्पादकं ज्ञापकं वा सिद्धिश्च स्वरूपतो ज्ञानतश्च । दृष्टान्तस्य कारणानपदेशादिति सूत्रखण्डे दृष्टान्तपदं स्वरूपतो ज्ञानतश्च सिद्धिमात्रमुपलक्षयति । कारणं ज्ञापकं कारकं वा कृतौ तावत् । अनुमितिज्ञानहेतूनां पक्षहेतुदृष्टान्तानां सिद्धानामपि कारणान्तरं वाच्यम् । न हि ते नित्याः कार्यस्यापि सदातनत्वप्रसङ्गात् न च तस्मादुत्पद्यन्ते स्वात्मनिवृत्तिविरोधात् असतः कारणत्वानुपपत्तेः कार्यस्यापि स्वत एवोत्पत्तिप्रसङ्गाच्च एवं तत्कारणस्यापीत्यनवस्थेति ।

दृष्टान्तहेत्वादावित्यादिशब्देन पक्षो गृह्यते ।

स्वरूपतः उत्पत्तितः । पक्षहेत्वोरेतज्जातिप्रवृत्तिः सूत्रकारस्याननुमतेत्याशङ्क्याह । दृष्टान्तस्येति । सिद्धानामपि पक्षहेतुदृष्टान्तानामनवस्थादुस्थतयोत्पादकज्ञापकानभिधानात् प्रत्यवस्थानं प्रसङ्गसम इति सूत्रार्थः । नित्या अनाद्यनन्ताः । कार्यस्यापीति । करणसामग्र्या अनादित्वे तथाविधस्य कार्यस्याप्यनादित्वप्रसङ्गादित्यर्थः । असतः कारणत्वे सति स्वोत्पत्तेः पूर्वमसतः पक्षादेः स्वहेतुत्वायोगादित्यर्थः । एवं तत्कारणस्यापीति । उक्तेन प्रकारेण पक्षादीनां कारणवत्त्वे सिद्धे तेषामपि कारणानां कारणान्तरं वाच्यमेवं तेषामपीत्यनवस्थाप्रसङ्ग इत्यर्थः । पूर्वत्र कृतिपक्षे उत्तरत्र

ज्ञप्तौ तु प्रमाणे ऽपि किं प्रमाणं दृष्टान्ते ऽपि को दृष्टान्त इति प्रमाणादिपरम्परानुयोगे नानवस्थेत्यनवस्थाभासप्रसञ्जनमिति लक्षणम् । पूर्वत्र कारणपरम्परापेक्षामुखेनासत्त्वारोपः कारणम् उत्तरत्रानिश्चितस्यानिश्चायकत्वाध्यारोपः अनवस्थालक्षणप्रतिकूलतर्कपराहतिरारोप्या हेतुदोषपर्यन्तचिन्तायां पूर्वत्र पक्षादेः स्वरूपासिद्धिरुत्तरत्राज्ञानासिद्धिः । अत्र साधारणो मूलदोषः सुगम एव। असाधारणं तु ज्ञप्तावयुक्ताङ्गाधिकत्वम् । ज्ञातस्यैव ज्ञापकत्वमयुक्तमेव रूपादिव्यवहारार्थं प्रदीप उपादीयमाने चक्षुरादिषु व्यवस्थादर्शनेनानवस्थाप्रसङ्गाभावात् । लिङ्गविशेषणत्वात् ज्ञातत्वमपि ज्ञातव्यं विशेषणान्तरवत् तच्च लिङ्गान्तरेणापि ज्ञातव्यम् तत्रापि तथेत्यनवस्थेति चेत् न साध्यविपर्ययसंसर्गव्यवच्छेदकानामेव लिङ्गविशेषणानामवश्यज्ञेयत्वं

ज्ञप्तिपक्षे । प्रतिकूलतर्कपराहतिरिति न कश्चिद्धेतुदोषोऽस्तीत्याशङ्क्याह । हेतुदोषेति । पक्षादेरिति पक्षहेतुदृष्टान्तानामनुत्पत्तौ हेतोराश्रयस्वरूपे व्याप्यत्वासिद्धय आरोप्यन्त इत्यर्थः । अज्ञानासिद्धिः अज्ञातस्य पक्षादेरज्ञापकत्वादाश्रयाज्ञानासिद्ध्यादिका आरोप्यन्त इत्यर्थः । सुगम एव नेदं स्वसाध्यसाधकं सिद्धत्वादिति प्रतिषेधहेतोरप्युत्पत्तिज्ञप्तिपक्षयोः पूर्वोक्तदोषः सुवचन इत्यर्थः । चक्षुरादिष्विति । अज्ञातस्यैव चक्षुरादेः ज्ञापकत्वाव्यभिचारादर्शनेनेत्यर्थः । विशेषणान्तरवत् सामान्यवत्त्वादिवत् । साध्यविपर्ययेति । हेतोर्व्यभिचारपरिहाराणामित्यर्थः ।

न तु लिङ्गसहकारिमात्रत्वेनोपयुक्तानामपि । तथा चाविषयवृत्तित्वं कृतौ तु न तावत्कारणापेक्षैव दोषः । तदपेक्षप्रदीपोपादाने ऽनवस्थाभावात् । असिद्धविषयानवस्थायां हि दोषः तस्य सिद्धविषयायामपि सञ्चारणादविषयवृत्तित्वम् । तदुक्तम् प्रदीपोपादाने प्रसङ्गनिवृत्तिवत् तद्विनिवृत्तिरिति । विपरीतप्रसञ्जिकेत्यपि काचित्प्रसङ्गसमास्तीति केचित् । यथा इह भूतले घटो नास्तीत्यप्राप्तौ घटो न प्रतिषेधमर्हति तेन घटप्राप्तिप्रसङ्ग इति । तदसत् प्राप्तिसमायामेवान्तर्भावादस्यां तत्र हि प्रतिषेध्यमपि ज्ञातव्यं तस्य ज्ञापकं चक्षुरादि करणं भूतलाद्यधिकरणं च अप्राप्य प्रतिषेधातिप्रसङ्गात् प्रतिषेध्यं प्राप्य प्रतिषेधतीति वक्तव्यम् । प्राप्तिनिवृत्तिलक्षणत्वात् प्रतिषेधस्य प्राप्तौ च सत्त्वेनाविशेषात् प्रतिषेधायोग इति ॥ १६ ॥

तथा चेति । ज्ञानानपेक्षेषु ज्ञेयत्वापादानादविषयवृत्तित्वमित्यर्थः । ज्ञापकस्य कारणसापेक्षस्य च प्रदीपस्योपादाने कारणपरम्परापेक्षारूपानवस्थाप्रसङ्गविनिवृत्तिवदित्यत्रापि तथाविधानवस्था दोषाय न भवतीति । प्रसङ्गसमायाः प्रकारान्तरमाशङ्क्य निराकरोति । विपरीतप्रसञ्जिकेति । प्राप्तिसमायामस्यान्तर्भावमुपपादयति । इहेति । इह भूतले घटो नास्तीत्यज्ञातस्येति वक्तव्यम् तज्ज्ञापकं चक्षुरादि करणं भूतलाद्यधिकरणं च अधिकरणस्य घटस्य ज्ञानयोगात् ताभ्यामप्राप्तस्य ज्ञेयत्वायोगात् प्राप्तत्वे भूतलेघटसद्भावप्रसङ्गात् प्रतिषेधाभाव इति प्राप्तिद्वारायामप्रसङ्ग इति तत्रान्तर्भाव इत्यर्थः ॥ १६ ॥

अनङ्गत्वधिया हेतोः प्रतिदृष्टान्तमात्रतः ।
प्रत्यवस्थानमाचख्युः प्रतिदृष्टान्तलक्षणम् ॥ १७ ॥

हेतुरनङ्गं साध्यातिदेशो दृष्टान्त एवाङ्गमित्यभिमानेनोत्थानहेतुना प्रतिदृष्टान्तमात्रावष्टम्भेन बाधप्रतिरोधयोरन्यतरेण प्रत्यवस्थानं प्रतिदृष्टान्तसमः । यथा घटदृष्टान्तेनानित्यः शब्दः आकाशदृष्टान्तेन नित्यत्वस्यैव सिद्धेरिति बाधः । 'घटदृष्टान्तेनानित्यश्चेत् आकाशदृष्टान्तेन नित्यः किं न स्यात् । न चास्ति दृष्टान्तयोर्विशेष इति प्रतिरोधः । तदुक्तं प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रतिदृष्टान्तसम इति सूत्रखण्डेनेति । अयमस्योद्धारक्रमः । अधिकबलेन हि प्रतिदृष्टान्तेन बाधः स्यात् तुल्यबलस्यैव बाधकत्वे दृष्टान्तेनैव तद्बाधप्रसङ्गात् न च व्याप्तहेतुमत्तामन्तरेण साध्यधर्मवत्तामात्रेण प्रतिदृष्टान्तस्याधिकबलत्वं सम्भवति । ततश्च युक्ताङ्गहानिः । बाधं प्रत्यधिकबलस्याङ्गत्वेनानङ्गीकारात् तदिदमुक्तम् प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः अनधिकबलस्यैव प्रतिदृष्टान्तस्य बाधहेतुत्वे दृष्टान्तोऽपि किं बाधहेतुर्न स्यात् । बाधहेतुः स्यादेवेत्यर्थः । प्रतिरोधश्च तुल्यबलेन भवति न चानयोस्तुल्यबलत्वम् । दृष्टान्तस्य

प्रतिदृष्टान्तसमपक्षयोरेकसूत्रगतत्वप्रकाशनायोभयत्र सूत्रखण्डेनेत्युक्तम् । दृष्टान्तेनैव येन केनचिद्धर्मादिदृष्टान्तेनैव प्रतिदृष्टान्तहेतुत्वे च प्रतिदृष्टान्तमात्रस्य बाधहेतुत्वे

हेतुनावष्टब्धत्वात् प्रतिदृष्टान्तस्य तदभावादत्रापि युक्ताङ्गहानिः प्रतिरोधाङ्गस्य तुल्यबलत्वस्यानङ्गीकारात् । अत्रैवं सूत्रगमनिका । प्रतिदृष्टान्तमात्रस्य हेत्ववष्टम्भशून्यस्य हेतुत्वे दृष्टान्तोऽपि यद्यहेतुरविक्षमानहेतुः स्यात् तदाप्रतिरोधः न त्वयमहेतुः हेतुनावष्टब्धत्वादिति । अनङ्गं हेतुरिति चेत् तर्हि प्रतिदृष्टान्तः प्रतिषेधको न भवति गर्दभवदिति स्वव्याघात इति ॥ १७ ॥

अनुत्पन्ने साधनाङ्गे हेतुवृत्तेरभावतः ।
भागासिद्धिः प्रसङ्गः स्यादनुत्पत्तिसमो मतः ॥१८॥

साधनाङ्गानां धर्मिलिङ्गसाध्यदृष्टान्ततज्ज्ञानानामन्यतमस्योत्पत्तेः पूर्वं हेतुवृत्तेरभावात् भागासिद्ध्या प्रत्यवस्थानमनुत्पत्तिसमः । तत्र धर्मिणोऽनुत्पत्तौ यथा अनित्यः शब्दः कार्यत्वादित्युक्ते अनुत्पन्नस्यापि शब्दस्य पक्षत्वात् तस्य चेदानीमभावादाश्रयभागासिद्धो हेतुरिति । लिङ्गानुत्पत्तौ यथा गुर्विदं पतनवत्त्वादित्युक्ते पतनोत्पत्तेः प्रागवस्थायामपि गुरुत्ववत्त्वस्य साध्यत्वेन तदवस्थस्यापि पक्षत्वात् भागासिद्धो हेतुरिति । साध्यानुत्पत्तौ यथा गन्धवद् घटः पार्थिव-

---

प्रतिरोधहेतुत्वे च सतीत्यर्थः । बाधहेतुः स्यादेव अतद्द्वयस्य (?) प्रस्तुतार्थसूचकत्वात् । अत्र प्रतिरोधपक्षे सूत्रगमनिका ॥ १७ ॥

त्वादित्युक्ते प्रथमक्षणे गन्धवत्त्वं नास्ति घटसमवायिकारणत्वेन तदुत्तरकालीनत्वाद्गन्धस्य । तथा च व्यापकस्य गन्धवत्त्वस्याभावेन व्याप्यस्यापि पार्थिवत्वस्याभावात् भागासिद्धो हेतुरिति । दृष्टान्तानुत्पत्तौ यथा द्रव्यमात्मा गुणवत्त्वाद् घटवदित्युक्ते प्रथमक्षणे घट एव निर्गुण इति दृष्टान्ते भागासिद्धो हेतुरिति । धर्मिज्ञानानुत्पत्तौ यथा द्रव्यं वायुः स्पर्शवत्त्वादित्युक्ते अज्ञातस्यापि वायोर्द्रव्यत्वं विवक्षितम् । न च तत्रायं हेतुः सिद्ध इति अज्ञातभागासिद्धो हेतुरिति । एवं लिङ्गादिज्ञानानुत्पत्तौ दर्शयितव्यम् । अकार्यं च कथमनित्यं निष्पतनं च कथं गुरु अपार्थिवं च कथं गन्धवत् निर्गुणं च कथं द्रव्यम् अनुपलब्धहेतुकं च कथं साध्यधर्मवदिति विरोधपर्यवसितं चेति । तदुक्तं प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसम इति । साधनाङ्गानामुत्पत्तेः प्राक् कारणस्य हेतोरभावात् प्रत्यवस्थानमनु-

---

तदुत्तरकालीनत्वात् द्वितीयक्षणभावित्वात् प्रथमक्षणे साध्याभावेऽपि कथं हेतोर्भागासिद्धिरित्यत्राह । तथा च व्यापकस्येति । दृष्टान्ते भागासिद्धं ततोऽसिद्धव्याप्तिकोऽयं हेतुरिति भावः । एवं लिङ्गादीति । प्रस्तुतप्रयोगे साध्यदृष्टान्तानामेकदेशाज्ञानेनापि भागासिद्धिरूहनीयेत्यर्थः । अस्या जातेरारोप्यान्तरमाह । अकार्यं चेति । अकार्यमनुपन्नः शब्दः अपार्थिवं प्रथमक्षणे गन्धरहितत्वेनापार्थिवो घटः अनुपलब्धहेतुकं अज्ञातस्पर्शवत्त्वहेतुको घटज्ञानो (?)

त्पत्तिसम इत्यर्थः। अनुत्पन्नस्य स्वकार्यासामर्थ्यं द्वारं विरोधासिद्धी आरोप्ये उद्धारसूत्रं तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेध इति। उत्पन्नस्य शब्दादेस्तथाभावात् पक्षादिभावान्नाश्रयासिद्धिः। अनुत्पन्नस्यापि शब्दत्वात् कथं तद्व्यवच्छेद इति चेत्, न तस्य तुच्छत्वेनाशब्दत्वात् तथा चाविषयवृत्तित्वम्। असिद्धिर्दोष एव न त्वपक्षीकृतस्येति। यदा कदाचिदुत्पन्नस्यापि पतनादेर्यावद्द्रव्यभाविना गुरुत्वेन व्याप्तेर्नोत्पत्तेः पूर्वमसिद्धिर्दोषः तथा च युक्ताङ्गत्यागः। व्याप्तिप्रकारमनपेक्ष्य दोषोद्भावनात् साध्यदृष्टान्तद्वारिकयोरपि तथा व्यापकत्वरूपं व्याप्यत्वरूपं चानपेक्ष्य प्रवृत्तेः। अज्ञानद्वारिकायां त्वविषयवृत्तित्वम् अज्ञानं हि पक्षादेर्दोषः न त्वनुपन्यस्तत्वेनापक्षादिभूतस्येति। एवमनङ्गीकारे सर्वत्र स्वव्याहतिरूहनीयेति ॥ १८ ॥

सन्देहहेतुसद्भावात् सति निर्णयकारणे।
संशयस्य प्रसङ्गो यः स संशयसमो मतः ॥ १९ ॥

वायुः सर्वत्र सामान्यनिर्देशात् नपुंसकोक्तिः। तस्य तुच्छत्वेन भावप्रतियोगिनमित्युक्तत्वेन (?) साध्यदृष्टान्तद्वारिकयोरपि तथा पार्थिवत्वस्य यदा कदाचिदुत्पन्नेन गन्धवत्त्वेन व्याप्तत्वात् यदा कदाचिदुत्पन्नस्य गुणवत्त्वस्य द्रव्यत्वेन व्याप्तत्वाच्च पूर्ववद्युक्ताङ्गहानिरित्यर्थः। अत एवोपपादयति। व्यापकत्वरूपमिति। सर्वत्र अधृस्वपि पक्षेषु ॥ १८ ॥

निर्णयकारणोपन्यासे ऽपि संशयहेतूनां समानधर्मादीनामन्यतमसद्भावमात्रात् संशयापादनेन प्रत्यवस्थानं संशयसमः यथा अनित्यः शब्दः कृतकत्वाद् घटवदिति अनित्यत्वनिर्णयप्रमाणोपन्यासे यदि निर्णायकसद्भावान्निर्णयः स्यात् तर्हि नित्यानित्ययोः सामान्यघटयोः समानमैन्द्रियकत्वं संशयहेतुः शब्दे ऽस्तीति नित्यानित्यत्वे संशयोऽपि स्यात् स्वकारणसद्भावे ऽपि वा संशयानुत्पत्तौ निर्णयोपि न स्यादविशेषादिति । समानधर्मादिसंशयकारणविधुरस्य निर्णयकारणस्य निर्णयहेतुत्वमित्यभिमानः कारणम् । कार्यापेक्षया सत्प्रतिपक्षत्वमारोप्यं निर्णयप्रतिपक्षस्य संशयस्योपस्थानात् । व्याप्यापेक्षया विशेषणासिद्धिः संशयहेतुविरहे निर्णयहेतुत्वमित्यभिमानात् तस्य चात्राभावादिति । अत्र सूत्रम् । सामान्यदृष्टान्तयोरैन्द्रियकत्वे सामाने नित्यानित्यसाधर्म्यात् संशयसम इति । अत्र समान इत्यन्तमुदाहरणप्रदर्शनपरम् । नित्यानित्यशब्दौ सपक्षविपक्षावुपलक्षयतः साधर्म्यपदं च

---

१ समानधर्मादीनां समानधर्मानेकधर्मविप्रतिपत्त्या न[illegible]वम[illegible]ादिति मात्रया निर्णयकारणसाहित्याभावे [illegible]तीति गम्[illegible]ते संशयापादनेन प्रत्यवस्थानमिति [illegible]षः। अविशेषात् कारणसद्भावे विशेषाभावात् । [illegible] वा [illegible]नात् आधानात् [illegible]स्य चात्राभावात् कृतकत्व[illegible]ेत त[illegible]निर्णयहेतोः समानधर्मादिसंशयहेतुविरहस्याभावात् । उदाहरणप्रद-

संशयहेतुम् । ततश्च साध्यतदभावयोः संशयकारणा-
दित्यर्थः । एवं च विषयतः कारणतश्च व्याप्तिर्भवति ।
दोषमूलं तु युक्ताङ्गहानिः निर्णायकाभावविशिष्टस्य
समानधर्मादेः संशयहेतुत्वमित्यनङ्गीकारात् । अन्यथा
निर्णायकसद्भावे ऽपि समानधर्मादेः संशयोत्पत्तौ तद-
नुच्छेदप्रसङ्गात् । अयुक्ताङ्गाधिकत्वं वा समानधर्मादि-
विरहस्य निर्णयाङ्गत्वाभ्युपगमात् व्याघातस्तु सुगम
एव । सूत्रं तु साधर्म्यात् संशये न संशयो वैधर्म्यादु-
भयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युप-
गमाच्च सामान्यस्याप्रतिषेध इति । तत्र साधर्म्यवैध-
र्म्याभ्यां संशयकनिर्णायकावुपलक्षयति । सामान्य-
ग्रहणेन च संशयहेतुम् । एतेनायमर्थः समानधर्मादेः
संशये जनयितव्ये निर्णायकसद्भावान्न संशयः स्यात् ।
तस्मिन्नपि सत्येव संशयोत्पत्तौ संशयानुच्छेदप्रसङ्गः
समानधर्मादेर्नित्यं संशयहेतुत्वं च नाभ्युपगच्छामः ।

र्शनपरं न लक्षणोपयुक्तमिति भावः । साध्यतद्भावयो-
रिति । साध्यतद्विपरीतयोः संशयकारणस्य समानध-
र्मादेः सद्भावादित्यर्थः । एवं चेति । नित्यानित्य[illegible]धच्छ-
शब्दानां एवमर्थस्वीकारे सति सर्वानुमानेषु [illegible]सर्वसंशरि-
तु[illegible]तिः प्रवर्तत इत्यर्थः । अन्यथा युक्ता[illegible]ङ्गहीनत्वान
ङ्गीकारात् [illegible]च्छेदप्रसङ्गात् संशयानवस्थाप्र[illegible]ङ्गात् । स्व-
व्याघातस्त्विव[illegible] जातिवादिनः प्रतिषेधानुम[illegible]ने ऽपि समा-
नधर्मादिसद्भावात् प्रतिषेधवति कृतक[illegible]वे हेतुरसिद्धो

ततश्च संशयापादनलक्षणप्रतिषेधो नास्तीति सूत्रार्थः ॥ १९ ॥

तुल्यत्वमभ्युपेत्यैव परहेतोः स्वहेतुना ।
बाधेन प्रत्यवस्थानं प्रक्रियासम इष्यते ॥ २० ॥

अभ्युपगतानधिकबलेन प्रतिप्रमाणेन परकीयहेतोर्बाधाभिमानेन प्रत्यवस्थानं प्रकरणसमा जातिः । तदुक्तम् उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति । साधर्म्यमत्र प्रतिप्रमाणमात्रोपलक्षणपरम् । प्रक्रियत इति प्रक्रिया साध्योऽर्थः तस्य सिद्धेर्निश्चयादित्यर्थः । तथा च प्रतिधर्मसमानो भेदसिद्धिः । यथा अनित्यः शब्दः कार्यत्वादित्युक्ते मैवं श्रावणत्वेन नित्यत्वस्य सिद्धेः । प्रत्यभिज्ञाबाधितत्वाद्वेति प्रतिप्रमाणोपलम्भः कारणमस्याः बाध आरोप्यः । दुष्टत्वमूलं तु सौत्रः स्वव्याघातः । यथा प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेरिति । अयमर्थः स्थापनानधिकबलात् प्रतिपक्षसाधकप्रमाणात् प्रक्रियमाणार्थसिद्धेर्हेतोर्नास्मत्पक्षस्य बाधलक्षणप्रतिषेधः । प्रतिषेधानधिकबलेनैव स्थापनाहेतुना भवत्प्रतिपक्षस्यास्मत्साध्यस्य सिद्धेरिति बाधाङ्गस्याधिकबलत्वस्यानङ्गीकारो युक्ताङ्गत्यागश्चेति हृदयम् ॥ २० ॥

विरुद्धः कालात्ययापदिष्टः प्रकरणसमो वा न वा आद्ये प्रस्तुतहेतुरपि तथा द्वितीये ऽर्थादापन्नः स्यात् तथेति सकलहेत्वाभासप्रसङ्गो द्रष्टव्य इत्यर्थः (?) ॥ १८ ॥

हेतोर्विकल्प्य साध्यार्थपूर्वापरसहोदयम् ।
त्रेधापि तस्य हेतुत्वभङ्गो हेतुसमो भवेत् ॥ २१ ॥

इयं च कृतिज्ञप्तिसाधारणी जातिः । साध्यार्थात् पूर्वं पश्चात् तेन सह वा साधनस्योदयः उत्पत्तिर्ज्ञानं वा तत्र सहभावो विशेषादहेतुः पूर्वभावे साध्यप्रतियोगित्वेन साधनत्वस्य साध्याभावे किमपेक्षेदं साधनं स्यादिति साधनत्वाभावः । पश्चाद्भावे पूर्वसिद्धस्य साध्यस्य कथमिदं साधनं स्यादिति । त्रेधापि हेतुत्वभङ्गेन प्रत्यवस्थानमहेतुसमः प्रतिकूलतर्कोद्धारं साध्यसाधनभावो दूष्यः इतरेतराश्रयलक्षणप्रतिकूलतर्कप्रतिघात आरोप्यः सूत्रं तु त्रैकाल्यासिद्धेर्हेतोरहेतुसम इति । सेयं जातिः सूत्रकारैरेव प्रमाणपरीक्षायामुदाहृतैव । प्रत्यक्षादीनामप्रामाण्यं त्रिकाल्यासिद्धेरिति । उद्धारसूत्रम् न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिरिति । ज्ञप्तिपक्षे तावत् त्रिकालयुक्तादपि हेतोर्यथायथं साध्यज्ञानदर्शनान्न त्रैकाल्यासिद्धिरिति । भग्नव्याप्तिकत्वात् तर्कस्य युक्ताङ्गहानिः । कृतिपक्षे तु पूर्वकालीनादेव हेतोः पश्चाद्भाविनः साध्यस्योत्पत्तेर्न त्रैकाल्यासिद्धिः । साध्यप्रतियोगि[illegible] साधनस्य कथं तदभावे सिद्धिरिति चेत् न साधनत्वव्यवहारस्तावद्बुद्धिस्थेनापि साध्येन सिध्यतीति न स्वरूपसत्तामपेक्षते । तद्व्यापारश्च स्वशक्तिमात्रेण भवन्न

प्रतियोग्यधीनः भिन्नकालयोः साध्यहेत्वोः कथं सम्बन्ध इति चेत् । साध्यसाधनसम्बन्धस्य तथाविधस्यैव दृष्टत्वात् ततश्चानङ्गाभ्युपगमः समानकालत्वस्य सम्बन्धानङ्गस्यैवोररीकरणात् । स्वव्याघातप्रदर्शनपरमपि सूत्रम् प्रतिषेधानुपपत्तेश्च प्रतिषेध्याप्रतिषेध इति । निगदव्याख्यातमेतत् ॥ २१ ॥

व्याप्तिं विना वादिवाक्यादर्थाक्षेपाभिमानतः ।
विपरीतसमारोपमर्थापत्तिसमं विदुः ॥ २२ ॥

असत्यामेव व्याप्तौ वादिवचनमात्रेणार्थादाक्षिप्तमित्यभिमानादुक्तविपरीतमारोप्य प्रत्यवस्थानमर्थापत्तिसमः । तदुक्तम् । अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसम इति । उक्तविपरीताक्षेपशक्तिरर्थापत्तिः ततस्तदाभासो लक्ष्यते अर्थापत्त्याभासात् प्रतिपक्षसिद्धिमभिधाय प्रत्यवस्थानमर्थापत्तिसम इत्यर्थः । यथा अनित्यः शब्द इत्युक्ते ऽर्थादाक्षिप्तमन्यन्नित्यमिति विशेषविधौ परिसंख्यान्यायेन शेषनिषेधस्य नान्तरीयकत्वात् । तथा च घटादेर्नित्यत्वात् साध्यविकलो दृष्टान्त इति विरोधः । अनित्यसाधर्म्यादनित्यत्वोक्तौ नित्यसाधर्म्यान्नित्य इत्यापन्नमिति प्रतिरोधः । अनुमानादनित्य इत्युक्ते ऽर्थादापन्नं प्रत्यक्षान्नित्य इति बाधः । सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादनित्य इत्युक्ते ऽर्थादापद्यते तदभावान्नित्य इति ।

ततश्चाप्रत्यक्षेष्वाद्यादिशब्देषु भागासिद्धिः । अस्मिन्नेव हेतावुक्ते कृतकत्वमनित्यत्वसाधनं न वेति विकल्प्य न चेदिदमपि न स्यात् अविशेषात् । साधकश्चेदुच्येतार्थादापद्यते नान्यत् साधकमिति । एवं तस्मिन्नेव प्रयुक्ते कृतकत्वमनैकान्तिकं न वेति विकल्प्य पूर्वत्रेदमपि तथा स्यादविशेषात् । यदि नेत्युच्यते ऽर्थादापन्नमन्यदनैकान्तिकमित्यादिसर्वदोषोपसंहारो द्रष्टव्यः । स्विशेषविधिः शेषान्तरनिषेधं गमयतीत्यभिमान उत्थानहेतुः । यथायथमसिद्धाद्यन्यतममारोप्यं व्याप्तिमनपेक्ष्यानुक्तमात्राक्षेपे त्वत्पक्षहानिरपि स्यात् । अनुक्तत्वलक्षणादूषणोपाधिसमाक्रान्तत्वादिति स्वव्याघातः युक्ताङ्गहानिश्च व्याप्तिमनपेक्ष्य प्रवृत्तेः । तदिदमुभयमप्यसूत्रयत् अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेरिति ॥ २२ ॥

व्याप्तिमनपेक्ष्य अग्निरस्तीत्युक्ते ऽर्थादापन्नं तत्र शैत्यं नास्तीति जलमस्तीत्युक्ते ऽर्थादापन्नं तत्राग्निर्नास्तीत्यादि । अव्याप्त्यमविवक्षानुक्तापक्षेपस्तं विहायेत्यर्थः (?) । अनुक्तत्वलक्षणा अनुक्ताक्षेपलक्षणा । अनुक्तस्येति । वादिनानुक्तस्य वादिसाध्यविपरीताक्षेपशक्तेर्हेतोर्वादिवाक्यप्रतिषेधे सति जातिवादिपक्षस्य च तत एव हानिरुपपन्ना । अनुक्तत्वादनुक्तत्वाक्षेपरूपदूषणोपाधिसद्भावादिति स्वव्याघातः । जातिवाद्युक्तोपपत्तेर्वाद्युक्ताभावेनैकान्ततः प्रतिषेधकत्वाभावाद्युक्ताङ्गहानिश्चेति सूत्रार्थः ॥ २२ ॥

धर्मैणैकेन केषाञ्चिदविशेषप्रसञ्जनम् ।
साधनप्रतिबन्ध्या यत् सोऽविशेषसमो मतः ॥ २३ ॥

केषाञ्चित्पदार्थानां साधारणेनधादिसाधनव्यतिरिक्तेन केनचिद्धर्मेण तेषामेकत्वेनैकधर्मत्वेनैकाकारधर्मत्वेन वा यदविशेषप्रसञ्जनं स्थापनाहेतुप्रतिबन्ध्यभिप्रायेण क्रियते सोऽविशेषसमः । एवमस्याः प्रवृत्तिः यदि कृतकत्वेन धर्मेण शब्दघटयोरनित्यतारूपधर्माविशेषः स्यात् तर्हि सत्त्वादिना धर्मेण सर्वेषामपि पदार्थानामविशेषः किं न स्यात् । अत्रैकत्वेनाविशेषे पक्षाद्यविभागः । एकधर्मत्वेनाविशेषे सर्वस्याप्येकजातीयत्वम् । एकाकारधर्मत्वेनाविशेषे सर्वस्याप्यनित्यता स्यात् । एवं च पृथिव्यादीनां नवानां द्रव्य-

---

एकत्वेन एकस्यैव ह्यविशेषो मुख्यः स्यादतः पक्षमा-
त्रत्वेन एकधर्मत्वेन सर्वेषामेकेन धर्मेणान्वितत्वेन प्रतिप-
दार्थभिन्नत्वेऽप्येकरूपधर्मत्वेन। सत्त्वादिना सत्त्वप्रमेयत्व-
वाच्यत्वज्ञेयत्वादिधर्मसद्भावेन। पक्षाद्यविभागः सत्त्वादि-
हेतुना सर्वस्यापि पक्षैक्ये सिद्धवादिहेतोः पक्षसपक्षविप-
क्षविभागाभावादनुमानाप्रवृत्तिरिति भावः । एकजाती-
[illegible]वं सत्त्वादिना सर्वस्य साध्यधर्मजातीयत्वसिद्धौ पूर्वव-
[illegible]दनुमानाप्रवृत्तिरिति भावः । सर्वस्याप्यनित्यता स्यादि-
ति । सत्त्वादिना सर्वस्य प्रस्तुतसाध्यधर्मवत्त्वे सिद्धे व्या-
प्त्यसिद्धिरनुमानाप्रवृत्तिरित्यर्थः । विषयहेतोरनियमार्थ-
मुदाहरणान्तराण्याह । एवं च पृथिव्यादीनामिति । एवं

त्वेन धर्मेण क्रियावत्त्वेनाविशेषः स्यात् । शब्दघटयोरैन्द्रियकत्वेन मूर्तत्वेनाविशेषः स्यात् । एवं घटजातीयत्वं घटतादात्म्यं चेति । कस्यचिद्धर्मस्य कश्चित्प्रत्यसाधकत्वदर्शनं कारणमस्याः । असाधकत्वमारोप्यम् । सूत्रं तु एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसम इति । एकधर्मोपपत्तेरविशेष इति साधनप्रतिबन्ध्यभिप्रायेणेदं प्रत्यवस्थानमिति दर्शितम् । सद्भावः सत्त्वं तच्च साधारणधर्ममात्रोपलक्षणम् । तस्योपपत्तेः सर्वस्याविशेषापादकधर्माक्रान्तसमुदायस्यैकत्वाद्यविशेषप्रसङ्गापादनेन प्रत्यवस्थानमित्यर्थः । अस्याः स्वव्याघातः सुगम एवेति युक्ताङ्गहानिमाह सूत्रकारः क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभाव इति । क्वचित् सत्तादौ हेतौ सति तद्व्यापकाभिमतस्य तादात्म्यादिधर्मस्यानुपपत्तेः । क्वचित्कार्यत्वादौ सति तद्व्यापकस्यानित्यत्वादिधर्मस्योपपत्तेः प्रतिषेधाभाव इति । पूर्वत्र व्याप्यभावादुक्त-

घटजातीयत्वमिति । ऐन्द्रियकत्वेनोभयोरेकजातिमत्त्वमेकत्वं स्यादित्यर्थः । असाधकत्वमारोप्यम् आश्रयासिद्धिस्वरूपासिद्ध्यसाधारणत्वादिदोषदुष्टत्वाद्धेतोरसाधकत्वमारोप्यमित्यर्थः । प्रतिबन्ध्यभिप्रायेण दृष्टान्तबुद्ध्या । अविशेषापादनात्मकधर्मः सत्त्वद्रव्यत्वैन्द्रियकत्वादिः । सुगम एव विनीतमसाधकमाश्रयासिद्धत्वात् (?) प्रयाजास्तित्वसाधकत्वविश्वपरिणामित्ववदित्यादि प्रतिषेधहे-

रत्र तद्भावादिति भावः ॥ २३ ॥

अस्मत्पक्षे ऽपि किमपि प्रमाणमुपपत्स्यते[१] ।
त्वत्पक्षवदितिप्राप्तिरुपपत्तिसमो मतः ॥ २४ ॥

वादिना साध्यसिद्धये प्रमाणे ऽभिहिते मत्पक्षे किमपि प्रमाणं भविष्यति त्वत्पक्षवदिति प्रमाणसद्भावमात्रोपपादनेन प्रत्यवस्थानमुपपत्तिसमः । यथा अनित्यः शब्दः कार्यत्वादित्युक्ते यद्यनित्यत्वे प्रमाणं कार्यत्वमस्तीत्यनित्यः तर्हि नित्यत्वपक्षे ऽपि किञ्चित्प्रमाणं भविष्यति । वादिप्रतिवादिनोरन्यतरोक्तत्वात् त्वत्पक्षमत्पक्षयोरन्यतरत्वात् प्रकृतसन्देहविषयत्वात् विप्रतिपत्तिविषयत्वाद्वा त्वत्पक्षवत् । तथा च बाधः प्रतिरोधो वेति । इयं च प्रतिधर्मसमकरणसमाभ्यां भिद्यते अत्र प्रमाणस्यैवोपपादनात् तत्र सिद्धेन प्रमाणेन साध्योपपादनात् अस्याः सामान्यतः प्रमाणसम्भावनाद्वारं सूत्रं तु उभयकारणोपपत्तेरुपपत्तिसम इति । वादिसाधनानन्तरं प्रतिवादिनापि कारणस्य प्रमाणस्योपपादनादर्थादुभयकारणोपपत्तेरुप-

तावपि यथाश्रयासिद्धत्वेनोभयोरसाधकत्वेनाविशेषः यंदित्यादिः सुखवेद्य इत्यर्थः ॥ २३ ॥

— प्रकृतसन्देहविषयत्वात् शब्दो नित्योनित्यो वेति सन्देहे सतीदमनुमानं प्रवर्तते ऽतस्तद्विषयत्वादित्यर्थः । साध्यस्य वादिसाध्यविपरीतः स्यात् ॥ २४ ॥

(१) मुपपद्यते—पा॰ A पु॰ ।

पत्तिः न तु प्रतिवादिनैवोभयत्र प्रमाणोपपादनादि- ति । उपपत्तिकारणानुज्ञानादप्रतिषेध इति सूत्रा- रूढः स्वव्याघातः वादिसाध्योपपत्तेः कारणं प्रमाणं तस्य पक्षवदिति निदर्शयता प्रतिवादिनाप्यनुज्ञानान्न प्रतिषेधः । अनुज्ञाप्रतिषेधयोरेकत्रासम्भवादिति युक्ताङ्गहानिश्च । बाधप्रतिरोधौ प्रतिप्राबल्यसाम्य- योरङ्गत्वादनुपन्यस्तस्य प्रमाणस्य तन्निरूपणासम्भ- वाच्चेति ॥ २४ ॥

अवधारणतात्पर्यं वादिवाक्ये विकल्प्य यत् ।
तद्बाधात् प्रत्यवस्थानमुपलब्धिसमो हि सः (१) ॥ २५ ॥

वादिवाक्यस्यावधारणतात्पर्यं तावदारोप्य तद्विशेषं विकल्प्य सर्वथाऽवधारणबाधेन प्रत्यवस्थान- मुपलब्धिसमः । यथा पर्वतोऽग्निमानित्युक्ते किं पर्वत एवाग्निः उत पर्वतोऽग्निमानेवेति । न प्रथमः महा- नसादीनामप्यग्निमत्त्वोपलम्भात् । न द्वितीयः अग्निं विनापि कदाचित्पर्वतस्योपलब्धेः । ततश्च साध्या- भावे ऽपि धर्म्युपलभ्यत इति बाधः । तथा तस्यामेव

तद्विशेषमवधृतार्थविशेषम् । किं पर्वत एवेति । किं पर्वत एवाग्निमानुताग्निमानेव पर्वत इति विकल्प्येत्यर्थः ।

(१) समो मतः—पा॰ A पु॰ ।

प्रतिज्ञायां धूमवत्त्वादित्युक्ते धूमः किं धर्मिणान्ययोगव्यवच्छेदेन सम्बध्यते उतायोगव्यवच्छेदेन । न प्रथमः पर्वते वृक्षादेरप्युपलब्धेः । न द्वितीयः धूमाभावे ऽपि कदाचित् पर्वतोपलब्धेः। ततश्च साधनाभावे ऽपि धर्म्युपलभ्यत इत्यसिद्धिः । तथा पूर्वोक्तद्वयसमाहारेण साध्यसाधनयोरभावे ऽपि धर्म्युपलभ्यत इति बाधासिद्धी। तथा तस्मिन्नेव प्रयोगे किमत्रावधार्यते । किं पर्वत एवाग्निमान् उताग्निमानेव पर्वतः किं धूमवत्त्वादेवेति। न प्रथमद्वितीयौ महानसादेरग्निमत्त्वोपलम्भात् पर्वते वृक्षाद्युपलब्धेश्च । न तृतीयः धूमाभावे ऽपि तत्रत्यालोकादेरग्निमत्त्वोपलम्भात् । तेन साधनाभावे ऽपि साध्योपलम्भादव्याप्तिरिति। समव्याप्तिके तु कृतकत्वापरामर्शे ऽपि प्रत्ययभेदभेदित्वादेः शब्दानित्य-

---

अग्निमत्त्वोपलम्भात् ततो बाधितः प्रतिज्ञातार्थ इति शेषः। तथा पूर्वोक्तेति। एकैकं विहाय प्रतिज्ञाहेतू युगपत् पूर्ववद्विकल्प्येत्यर्थः । एवं प्रतिज्ञाहेत्वोः प्रत्येकसमुदायपरमवधारणविकल्पं दूषयित्वा तत्साध्यस्यैकस्यावधारणं विकल्प्याद्यं दूषयति। तथा तस्मिन्नेवेति। किं पर्वत एवेति किं धूमवत्त्वात् पर्वतोऽग्निमानेवेति अथ धूमवत्त्वादेव पर्वतोऽग्निमानिति वा साध्यत इत्यर्थः।आलोकादेरित्यादिशब्देन महानसादिशब्दे विशेषः। अत्र विशेषश्च गृह्यते(?) सपक्षैकदेशवृत्तिहेतावेवंविधप्रत्यवस्थानावकाशः सपक्षव्यापिनि कथमिति चेत् तत्राह। समव्याप्तिके त्विति। कृतकत्वापरामर्शे ऽपीति । शब्दोऽनित्यः कृतकत्वादित्युक्ते किमत्राव-

त्वोपलब्धेरव्याप्तं कृतकत्वमिति ज्ञानाभावद्वारेण प्रवृत्तिर्दर्शिता। तथा साध्याभावे ऽपि साधनमुपलभ्यत इति अतिव्याप्त्यापि प्रत्यवतिष्ठते। यथा केवलान्वयिप्रयोगे साध्याव्यापीदं साधनं व्यतिरेकाभावात् प्रसिद्धानैकान्तिकवदिति। अत्र सूत्रं निर्दिष्टकारणाभावे ऽप्युपलम्भादुपलब्धिसम इति। वादिना निर्दिष्टस्य प्रमित्यङ्गस्य व्यापारवतोऽप्यभावे साध्योपलम्भात् प्रत्यवस्थानमित्यर्थः। बीजं तु वाक्यस्यावधारणतात्पर्यं तावदवश्याभ्युपगन्तव्यम्। एवकारार्थमनादृत्यार्थेन प्रयोगादित्यभिमानेनावधारणविकल्पे क्रियमाणे तदनुपपत्तिः। बाधादय आरोप्याः दोषमू-

---

धार्यते किं शब्द एवानित्य इति वा उत कृतकत्वादेव शब्दोऽनित्य इति वा। नाद्यः घटादेरप्यनित्यत्वात्। न द्वितीयः कृतकत्वापरिज्ञाने ऽपि तीव्रस्तीव्रतरस्तीव्रतमः शब्द इत्यादिविलक्षणबुद्धिपरिच्छेद्यत्वसामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादेर्हेतोः शब्दानित्यत्वसिद्धेः कृतकत्वहेतोरप्रयोजकत्वप्रसङ्गादित्यर्थः। न केवलमव्याप्त्या प्रत्यवस्थानमियं जातिः किं त्वतिव्याप्त्यापीत्याह। तथा साध्याभावे ऽपीति। प्रमित्यङ्गस्य अनुमितिजनकस्य व्यापारवतः प्रत्यावृत्तसाध्यज्ञापनशक्तिमतः हेतोरिति शेषः। एवकारार्थमवधारणम्। आर्थेन कारणान्तरादपि तद्धर्मोपपत्तेरित्यत्रापि शब्दार्थेन प्रयोगात् सूत्रकारस्येति शेषः। बाधासाधारणस्वरूपव्याप्यत्वासिद्धयः। अयोग-

लमयुक्ताङ्गाधिक्यम् । अयोगव्यवच्छेदमात्रेणावधारणोपपत्तावन्ययोगव्यवच्छेदेनावधारणास्वीकारात् । तथाभ्युपगमे स्वोक्तिव्यापनाङ्गाघातः । तदुक्तम् कारणान्तरादपि धर्मोपपत्तेरप्रतिषेध इति । अनेन हेत्वन्तरादपि साध्योपपत्तिं वदन् हेताववधारणानङ्गीकारप्रदर्शनेन सर्वत्रापि तदनङ्गीकारं सूत्रयतीति ॥ २५ ॥

स्वस्मिन् विषयिधर्माणां तदतद्रूपकल्पनात् ।
विपर्ययप्रसङ्गः स्याज्जातिश्चानुपलब्धितः ॥ २६ ॥

विषयनिघ्ना धर्मा विषयिधर्माः । ते चोपलब्ध्यनुपलब्धी इच्छानिच्छे द्वेषाद्वेषौ कृत्यकृती शक्त्यशक्ती उपपत्त्यनुपपत्ती व्यवहृत्यव्यवहृती भेदाभेदावित्येवमादयः । एते स्वात्मनि ताद्रूप्येण वर्तन्ते उताताद्रूप्येणेति विकल्प्योभयथापि स्वरूपव्याघातप्रसञ्जनेन प्रत्यवस्थानमनुपलब्धिसमः । नन्वेवं विषयिधर्मसमेत्यभिधीयेत सत्यं सैवार्थानुगता सञ्ज्ञा उपलक्षणसञ्ज्ञे-

---

व्यवच्छेदमात्रेण यदा धर्मी तदा हेतुः स्वेन सम्बध्यत इति पक्षं विहाय यदा हेतुः तदा धर्मिणा सम्बध्यत एवेत्यङ्गीकारमात्रेण । सर्वत्रापीति । प्रतिज्ञासाध्यादावप्यवधारणानङ्गीकारं सूत्रितवानित्यर्थः ॥ २५ ॥

विषयनिघ्ना विषयमवलम्ब्य प्रवृत्ताः धर्माः कस्यचित् गुणभूताः उपपत्त्यनुपपत्तीसम्भावनासम्भवने । ताद्रूप्येणानुलब्ध्यादिरूपेण उताताद्रूप्येण यद्वा ताद्रूप्येण न वर्तन्त

यमनुपलब्धिसमेति । तद्युपलब्धिरेव मूर्द्धाभिषिक्तो विषयिधर्म इति तदेवोपलक्षणमुचितम् मैवम् उपलब्धिसमसङ्करप्रसङ्गात्। केचित्तु भावात्मकेषु विषयिधर्मेषु प्रवृत्तमिदमेव प्रत्यवस्थानमुपलब्धिसमः अभावात्मकेषु त्वनुपलब्धिसम इति व्याचक्षते। तदशिष्यम् अनादेशिकत्वात् । व्यवच्छेदकवाक्यार्थरुचीनां पूर्वोदाहृतप्रत्यवस्थानस्याजातित्वप्रसङ्गाच्च तस्यान्यत्रानन्तर्भावात् । उपलब्धं लिङ्गं साध्याङ्गमिति तदर्थोऽयं प्रयोगः। सा चोपलब्धिः स्वात्मन्यनुपलब्धिरूपेण वर्तते चेत् साप्युपलभ्या स्यात् नोपलब्धिः विषय-

इत्यर्थः अनुपलब्धिसमः। सङ्करेति। जातिद्वयस्योपलब्धिसम इत्येकनामप्रसङ्गादित्यर्थः । भावात्मकेषु अनन्तरप्रयोगेषु उपलब्धीच्छाद्वेषादिषु अभावात्मकेष्वनन्तरप्रयोगेष्वनुपलब्ध्यनिच्छादिषु । अशिष्यमसाम्प्रदायिकमयुक्तं च। अनादेशिकत्वाद्भाष्यकारादिभिरनुक्तत्वात्। व्यवच्छेदवाक्यार्थरुचीनां नित्यसामान्यानङ्गीकारेण घटादिशब्दानां घटत्वादिसमारोपश्लिष्टव्यक्तिवाचकत्वाभावेनायं घट इति शब्दस्यायं पटादिर्न भवतीति व्यावृत्तिरेवार्थ इतिवदतां बौद्धानामित्यर्थः । पूर्वोदाहृतेति । उपलब्धिसमायां प्रयुक्तावधारणविकल्पस्य अजातित्वप्रसङ्गात् अङ्गाधिक्यनासदुत्तरस्य छलाद्यनङ्गभूतस्य जात्यन्तरोक्तलक्षणहीनस्य भावाभावधर्मरहितस्य च जातावप्यन्तर्भावाभावप्रसङ्गः। अत एव जातिसामान्यलक्षणमतिव्याप्तं स्यादिति भावः। तदर्थोऽयमिति । लिङ्गपक्षदृष्टान्तादीनामुपलब्धिप्रयोजनो-

वत् । अवृत्तेरुपलब्धिरूपेणावर्तमानघटादिवदुपलब्धिर्न स्यादिति तद्विषयो लिङ्गादिर्नोपलभ्यः स्यादिति व्यर्थः प्रयोगः । एवमनुपलब्धत्वाच्छब्दो नास्तीत्युक्ते अनुपलब्धेः स्वात्मनि तद्रूपेण वृत्तौ विषयवत् स्वस्याप्यनुपलब्धत्वात् तद्वदेवाभावप्राप्तावनुपलब्ध्यभावश्चोपलब्धिरेवेति विपरीतापत्तिः स्वात्मनि स्वरूपेणावृत्तौ तु सैव न स्यादिति तद्विषयः शब्दोनुपलब्धो न स्यादित्युभयथाप्यसिद्धो हेतुः तदुक्तम् तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः । यदि ताद्रूप्येण वृत्तावप्यनुपलब्धा न भवति शब्दोप्यनुपलब्धो न स्यात् अनुपलब्धोपि वा

यमनुप्रयोग इत्यर्थः । उपलब्धिरूपेणेति । यथा स्वस्मिन्ननुपलब्धिरूपेण वर्तमानो घटादिर्नोपलब्धिर्भवत्येवमित्यर्थः । तद्विषय उभयमप्यनुपलब्धिरूपोपलब्धिगोचरः । तद्विषय उभयप्रकारेणापि अनुपलब्धिरूपानुपलब्धिगोचरः । असिद्ध इति हेतुः पूर्वं श्रुतशब्दोद्य नास्ति अनुपलब्धत्वादितिहेतुरसिद्धस्ततः शब्दोऽनित्य इत्यभिप्रायः । तदनुपलब्धेरिति । तस्य शब्दादेरनुपलब्धेः कदाचिदनुपलब्धत्वात् कदाचिन्न तद्द्वयसमाहारेणोपलब्धत्वात् कदाचित् स्वरूपाभावान्न स्वभावसिद्धौ तस्य शब्दादेरनुपलब्धिरिति परोपलब्धिरुपपन्ना तत एव नित्यत्वप्रसङ्ग इति प्रत्यवस्थानमनुपलब्धिसम इति सूत्रार्थः । ताद्रूप्येण वृत्तावप्यनुपलब्धिः स्वस्यामनुपलब्धिरूपेण प्रवर्तत इति पक्षाङ्गीकारेऽपि अनुपलब्धो न भवति शब्द इत्यनुवर्तते तदेवोपपाद-

नैव नास्तीत्युच्येत । तर्ह्यनुपलब्धत्वादिति हेतुस्तत्रानैकान्तिकः शब्दे नास्तितां न साधयेदिति । एवमन्यत्रापि विषयिधर्मेषु दर्शयितव्यम् । अनुमानविषयावलम्बनेनापि प्रवर्तते । यथा सन्दिग्धे न्यायः प्रवर्तते सन्देहस्य स्वात्मनि ताद्रूप्येण वृत्तौ विषयवत् स्वयमेव सन्दिग्धः कथं विषयं सन्दिग्धं कुर्यात् । अवृत्तौ तु घटादिवत् सन्देहो न स्यादिति न्यायविषयाभावः । तथा शब्दप्रत्यभिज्ञानं भ्रान्तमित्युक्ते भ्रमयोगाद्भ्रान्तिः । भ्रमः स्वस्मिंस्ताद्रूप्येण वृत्तौ स्वयमेव भ्रान्तः कथं विषयं भ्रान्तं कुर्यात् । अन्यथा स्वव्याघातः । इयं संशयपरीक्षायां सूत्रकारैरुदाहृता विप्रतिपत्तौ च संप्रतिपत्तेः, अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया इति ।

यति । अनुपलब्धोपीति । अनुपलम्भात्मकत्वात् अनुपलब्धेरिति सूत्रकारवचनादनुपलब्धावपि भवत्येवानुपलब्धिः ततस्तद्विषयः शब्दोनुपलब्धः ततः शब्दो हेतुरिति भावः । तत्पक्षे दोषान्तरमाह । तर्ह्यनुपलब्धत्वादिति । तत्र अनुपलब्धत्वे ऽपि सत्यामनुपलब्धौ । एवमन्यत्रापीति । साध्यार्थज्ञानेच्छायां सत्यां तन्निवृत्तये खल्वनुमानप्रसङ्गः सा चेच्छा स्वात्मनि ताद्रूप्येण वर्तते वा न वा उभयथापीच्छा न स्यात् अतस्तन्निवर्तकप्रयोगो व्यर्थ इत्यादिकमूहनीयमित्यर्थः । पूर्वमनुमानमवलम्ब्यास्या जातेः प्रवृत्तिरुक्ता इदानीमनुमेयमवलम्ब्य प्रवृत्तिमाह । अनुमानविषयावलम्बनेनापीति । अन्यथा ताद्रूप्येणावृत्तौ । विप्रतिपत्तौ चेति । विप्रतिपत्तिः संशयकारणमिति न वक्तव्यं विप्रति-

तथा शब्दपरीक्षायां अन्यदन्यस्मादनन्यदित्यन्यताभावः अनियमे नियमान्नानियम इति । अस्यां च विषयिधर्मोपलम्भः कारणम् । आपाततः प्रतिकूलतर्क आरोप्यः अतिपीडायामसिद्धिरनैकान्तिकं वा । प्रत्युत्तरं विषयिधर्मः स्वात्मनि ताद्रूप्येण वर्तत इति पक्षं कक्षीकुर्मः । न च स्वात्मनो विषयीकरणं किं तु तदात्मकत्वमिति न स्वरूपव्याघातप्रसक्तिः । तदिदमनङ्गाधिक्यं स्वात्मनो विषयत्वस्यानङ्गस्यैवाङ्गीकारात् । तदुक्तम् अनुपलम्भात्मकत्वादनुपलब्धेरहेतुरिति । अस्याप्युपलक्षणत्वादुपलम्भात्मकत्वादुप-

---

पत्तिरूपेण स्वात्मनि वृत्तावृत्तौ विप्रतिपत्त्यभावादव्यवस्थात्मकं ज्ञानं संशय इति न वक्तव्यमुभयथाप्यव्यवस्थाया अभावादिति सूत्रतात्पर्यम् । अन्यदन्यस्मादिति । पूर्वोक्तेभ्यः पश्चादुक्तानां वर्णानामन्यत्वात् न वर्णा नित्या इति न वक्तव्यम् अन्यत्वस्य धर्मेभ्योऽन्यत्वेन अनन्याभावादभिव्यञ्जकानां प्रतिवादिनामभिव्यङ्ग्यविशेषे नियमाभावान्न वर्णविशेषाः प्रयत्नव्यङ्ग्या इति न वक्तव्यम् उभयथाप्यनियमाभावादिति सूत्रान्तराभिप्रायः । प्रतिकूलतर्क आत्माश्रयरूपः न विषयीकरणं विषयवन्न स्वमवलम्ब्य प्रवर्तनं तदात्मकत्वं तत्तद्रूपम् अनुपलम्भात्मकत्वादनुपलब्धिरूपत्वादनुपलब्धेरसत्त्वप्रतिपादकहेतुना स्वानुपलब्धेरहेतुरिच्छात्मकत्वादिच्छाया अहेतुरित्याद्या-

लब्धो हेतुरित्यादिसूत्रविपरिणामेन सर्वत्र समाधानमूहनीयम् ॥ २६ ॥

साधर्म्यादेर्विपक्षाणां सपक्षत्वप्रसञ्जनम् ।
साधनप्रतिबन्द्या यत् स ह्यनित्यसमोदयः ॥ २७ ॥

साधर्म्येण वैधर्म्येण वा वादिना साध्योपसंहारे कृते तत्प्रतिबन्द्यभिप्रायेण साधर्म्यादिना सर्वस्यापि साध्यधर्मवत्तां प्रदर्श्य विपक्षस्यापि सपक्षत्वापादानमनित्यसमः । तर्हि साध्यधर्मसमेति लक्ष्येति । सत्यम् एषैवान्वर्थसञ्ज्ञा उपलक्षणनामेदमनित्यसम इति । सूत्रमप्युपलक्षणपरम् यथा साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसम इति । अत्र साधर्म्यग्रहणं वैधर्म्यस्याप्युपलक्षणम् । सर्वानित्यत्वप्रसङ्गादिति सर्वस्यापि साध्यधर्मवत्त्वप्रसङ्गादित्यर्थः । उपलक्षणाभिप्रायसूचनार्थं तुल्यधर्मोपपत्तेरिति सामान्येनोक्तम् । अन्यथा अनित्यत्वधर्मोपपत्तेरित्यवक्ष्यत् तदियमेवं प्रवर्तते यद्याकाशवैधर्म्यादनित्यः शब्दः त्रैलोक्यमपि तद्वैधर्म्यादनित्यं भवेत् । यथा

कारान्तरं सूत्रस्य कल्पयित्वेत्यर्थः ॥ २६ ॥

एषु वक्तव्यत्वादुद्देशक्रममतिलङ्घ्यानित्यसमजातिं तावल्लक्षयति । साधर्म्यादेरिति । साधर्म्यादेर्हेतोः वादिसाध्यसिद्धिश्चेत् तत एव सर्वस्यापि साध्यवत्त्वं स्यादिति प्रत्यवस्थानमनित्यसम इति सूत्रार्थः । तद्वैधर्म्यात् शब्दगु-

यदि महानससाधर्म्यादग्निमान् पर्वतः तर्हि तत्साधर्म्यात् त्रैलोक्यमप्यग्निमद्भवेदित्यादि । अविशेषसमायां तु पक्षादेरविशेषमात्रोपपादनम् इह तु विपक्षस्य सपक्षत्वापादने तात्पर्यमिति न तया सह संकरः । परिकरस्तु तद्वदेव बोद्धव्यः । उद्धारस्तु नेदं विवक्षितार्थसाधकम् असाधकसाधर्म्यात् अस्ति च तदस्य घटधर्मत्वमिति वा तस्यामेव प्रतिज्ञायां समानधर्मत्वात् सत्त्ववदिति वा तयोरेव पक्षदृष्टान्तयोर्घटधर्मत्वादिति वा जातिवाक्यार्थः । सर्वत्र स्वोक्तिव्यापनाद् व्याघातः । प्रथमे तावदिदमपि वाक्यं विवक्षितमर्थं न प्रतिपादयेत् तदप्रतिपादकसाधर्म्यात् । अस्ति च तदस्य प्रतिज्ञाद्यवयवयोगित्वं स्थापनावाक्येनेति व्याघातः । द्वितीये ऽपि तस्यामेव प्रतिज्ञायां समानधर्मत्वात् स्थापनावाक्यवदिति । तृतीये नेदं प्रतिषेधकम् आकाशधर्मत्वात् स्थापनावाक्यवदिति व्याघातः । तदेतत् सर्वं मनसि कृत्य साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्या-

णरहितत्वात् तत्साधर्म्यात्(?) । परिकरस्त्विवति । कस्यचिद्धर्मस्य किञ्चित् प्रत्यसाधकत्वमस्या उत्थानबीजं हेतोरसाधकत्वमारोप्यमित्यर्थः । असाधकसाधर्म्यात् अनित्यत्वसाधकेन घटत्वादिना घटधर्मरूपत्वरूपसाधर्म्ययुक्तत्वादित्यर्थः । स्थापनावाक्येन असाधकत्वेनाभिमतवादिवाक्येन । असिद्धेः साध्यसिद्ध्यनङ्गस्य घटत्वादेः साधर्म्यात् घटधर्मत्वादेर्हेतोः वादिवाक्यप्रतिषेधो न सिद्ध्यति प्रति-

दिति । अपरं च व्याप्तिलक्षणमुक्ताङ्गहानिप्रदर्शनपरं सूत्रम् दृष्टान्ते साध्यसाधनभावेन प्रतिज्ञातस्य धर्मस्य हेतुत्वात् तस्य उभयथा भावान्नाविशेष इति ॥ २७ ॥

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः ।
धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत् ॥ २८ ॥

विवक्षितस्य कस्यचिद्विशेषणधर्मस्य तद्रूपत्वमतद्रूपत्वं वेति विकल्प्योभयथाप्यनुपपत्त्यभिधानेन धर्मिणस्तद्विशिष्टत्वखण्डनं नित्यसमः उपलक्षणनामैतत् अन्वर्थसञ्ज्ञा तूपरञ्जकसमेति । ततश्च नित्यानित्यभिन्नाभिन्नकार्याकार्याश्रितानाश्रितसत्यासत्यसदसत्स्थिरास्थिरैकानेकानुवृत्तानुवृत्तविशेषणाविशेषणसापेक्षानपेक्षक्रमाक्रमवाच्यावाच्यपरोक्षापरोक्षवर्तमानावर्तमानहेयाहेयसहितासहितविरुद्धाविरुद्धज्ञाताज्ञातेष्टानिष्टद्विष्टाद्विष्टकृताकृतशक्ताशक्तो-

षेध्येन वादिवाक्येन जातिवादिवाक्यस्य प्रतिज्ञाद्यवयवयोगित्वसाधर्म्यसद्भावेन स्वव्याघातकत्वादिति सूत्रार्थः । दृष्टान्ते साध्येन व्याप्तत्वेन भूयोदृष्टस्य कृतकत्वादिधर्मस्य हेतुत्वात् तथाविधहेतोः जातिवाक्ये ऽभावान्नोभयोः साम्यमतो जातिवाक्यं व्याप्त्याख्ययुक्ताङ्गहीनमिति सूत्रान्तरार्थः ॥ २७ ॥

उपरञ्जकधर्मः संसर्गिधर्मः विषयविषयिधर्मः अनुपलब्धिसमायामुक्तः इह तु विषयसंसृष्टधर्मा इति विशेषो द्रष्टव्यः ततश्च नित्यसम इत्युपलक्षणनामत्वात् । न पश्चाद-

त्पन्नानुत्पन्नव्यवहृताव्यवहृतघटाघटसन्दिग्धासन्दिग्धेत्याद्यपीतरविकल्पोपक्रमाः संगृहीता भवन्ति। एवमियं प्रवर्तते अनित्यः शब्द इति प्रतिज्ञायां तावदाह। अत्र साध्यमनित्यत्वम् अनित्यं नित्यं वा। तत्र अनित्यत्वे कदाचित् तदभावाच्छब्दो नित्यः स्यादिति न पश्चादनित्यत्वावकाशः। अथ नित्यं चेदनित्यत्वधर्मस्य नित्यत्वात् तद्धर्मिणोऽपि शब्दस्य नित्यता स्यादनाश्रयधर्मावस्थानासम्भवात्। तदिदमुक्तं नित्यमनित्यभावादनित्यस्योपपत्तेर्नित्यसम इति। अनित्यतया साध्ये शब्दे नित्यमनित्यत्वस्य भावाच्छब्दनित्यत्वोपपत्त्यभिधानेन प्रत्यवस्थानं नित्यसम इत्यर्थः। किं चेदमनित्यत्वं नित्यं चेत् तर्हि नित्यो धर्मः कथं धर्मिणमनित्यं कुर्यात्। न हि रक्तजपाकुसुमयोगात् स्फटिको नीलः स्यात्। अनित्येन नित्यत्वेन योगादनित्यः शब्दः स्यादिति चेत् तर्हि रक्तजपाकुसुमसंसर्गनिबन्धनस्फटिकारुणिमवद्भातत्वप्रसङ्गः। तदाकारवस्तु सम्बन्धात् तदाकारत्वे घटाकारद्रव्यसम्बन्धात् पटस्यापि घटत्वप्रसङ्गश्च स्यात्। अपि च अनित्यत्वेनित्यत्वान्तरयोगादनित्यं स्वभावतो वा पूर्वत्रान-

---

नित्यत्वावकाशः धर्मिग्राहकप्रमाणबाधितत्वादनित्यत्वसाधनमयुक्तमित्यभिप्रायः। अस्यां प्रकारान्तरेण प्रत्यव-

वास्या उत्तरत्रातत्स्वभावानां घटादीनामनित्यता न स्यात् । तेषां चानित्यत्वस्वभावत्वे द्रव्यत्वव्याघात इत्यादिः सरूपेण प्रवृत्तिः । विरूपेण तु नित्यः शब्द इति प्रतिज्ञायां नित्यत्वयोगान्नित्यः । तच्च धर्मिणो-भिन्नमभिन्नं वा भिन्नं चेत् भिन्नत्वयोगात् तदपि भिन्न-त्वान्तरयोगादित्यनवस्थापातः । नित्यत्वधर्मस्य धर्मि-णः शब्दादभिन्नत्वे धर्मधर्मिणोरन्यतर एवावशिष्यते तत्र धर्ममात्रस्थितावाश्रयासिद्धिः । धर्मिमात्रस्थितौ साध्याभावेन कालातीतप्रसङ्गः । तथा अनित्यः शब्द इत्युक्ते अनित्यत्वं कार्यमकार्यं वा । कार्यमपि शब्देन सहोत्पद्यते ततः पूर्वं पश्चाद्वा । न प्रथमः कल्पः धर्मिणः समवायिकारणत्वेन पूर्वं भावावश्यम्भावात् । अत एव न द्वितीयः न च तृतीयः अनित्यत्वधर्मोत्पत्तेः

स्थानमाह । किञ्चेदमिति । अतत्स्वभावानां स्वभावतो नित्यानित्यत्वधर्मविलक्षणानां द्रव्यत्वव्याघातः अनि-त्यत्वं नाम नित्यत्वाभावः ततस्तत्स्वभावानां भावरूप-द्रव्यत्वं व्याहतमित्यर्थः । सरूपेण वृत्तिः अनित्यत्वादि-साध्यधर्मसजातीयपरम्परया प्रत्यवस्थानप्रकार एवमुक्त इत्यर्थः । विरूपेण साध्यधर्मविजातीयभिन्नत्वादिपरम्प-रया प्रत्यवस्थानरीतिः वक्ष्यत इति शेषः । भिन्नत्वयो-गात् भेदधर्मसंसर्गाद् भिन्नः स्यात् । तदपीति । तदपि भिन्नत्वं स्वधर्मेणानित्यात् भिन्नाश्च तस्यैतद्योगात् भिन्न-त्वान्तरेण भिन्नं भवेदेवं तदप्यनवस्थापात इत्यर्थः । धर्म-मात्रस्थितौ धर्मपरिशेषे । अत एवेति । धर्मिणः पूर्वसि-

पूर्वं शब्दो नित्यः स्यात् । तथा च नानित्यत्वावकाशः अनित्यत्वस्याकार्यत्वे तु धर्मिणोप्यकार्यत्वान्नित्यत्वापातः । तथा घट इत्युक्ते घटत्वयोगाद् घटः तत्किं नित्यमनित्यं वा नित्यत्वे घटोऽपि नित्यः स्यात् । नित्यधर्माश्रयत्वात् नित्यपरममहत्त्वाश्रयव्योमवत् । अनित्यत्वे सामान्यरूपताव्याघात इत्यादिसूत्रतात्पर्यार्थः । अस्या धर्मधर्मिभावो द्वारं प्रतिकूलतर्क आरोप्यः । उद्धारसूत्रं तु । प्रतिषेध्यनित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभाव इति । अनित्यः शब्दो न भवति नित्यभूतानित्यत्वधर्माश्रयत्वात् । नित्यपरममहत्त्वाश्रयव्योमवदिति जात्युत्तरार्थः । तत्रानित्यतया प्रतिषेध्ये शब्दे नित्यमनित्यभावादिति हेतुः सिद्धश्चेत् तदा नित्यमनित्यत्वस्य स्वीकारादनित्ये नित्यत्वप्रसङ्गाभिधानेन कृतस्य प्रतिषेधस्याभावः । हेत्वङ्गीकारे प्रतिज्ञाव्याघातात् प्रतिज्ञाङ्गीकारे हेतुव्याघातादिति सूत्रोत्तरार्थः । यथायोगं व्याघातमात्रोपलक्षणं तात्पर्यार्थः । तथाहि यदुक्तम् ।

ड्यावश्यम्भावादेव सहोत्पत्तिरयुक्त इत्यर्थः । तत्स्वरूपविरूपप्रवृत्तिप्रकाराणां सूत्रे ऽवकाश इत्याह । सूत्रतात्पर्यार्थ इति । प्रतिकूलतर्कशब्देन तद्वारकाश्रयासिद्धिप्रमाणबाधश्च गृह्यते । यथायोगमिति । एवं नित्यत्वाद्युपरञ्जकधर्मेषु साध्यमानेष्वपि प्रतिज्ञाहेत्वोरन्योन्यव्याघातमात्रं सूत्रतात्पर्यार्थ इत्यर्थः । तदेवोपपादयति ।

अतदाकारो वा धर्मो न धर्मिणस्तदाकारतामापादयतीति । तन्न धर्म एव हि धर्मिण आकारः न तु तेनापाद्यमर्थान्तरमस्ति ततश्चायुक्ताङ्गत्वं तदाकारापादकत्वस्यायुक्तस्याङ्गीकारात् । कथं धर्मिणो भिन्न आकारः स्यादिति चेत् न भिन्नस्यैवाकारत्वात् । न चातिप्रसङ्गः स्वभावतो व्यवस्थानात् । काल्पनिकं धर्मधर्मिभावमभ्युपगच्छतापि काल्पनिकस्यापि भेदस्यावश्याभ्युपगमनीयत्वात् । न हि स्वयमेव स्वस्य धर्मो भवति आत्माश्रयत्वप्रसङ्गात् स्वव्याघातश्च । इदमसाधकमित्यत्रासाधकत्वयोगादसाधकं तत्किं तदाकारमतदाकारं वा भिन्नमभिन्नं वा कार्यमकार्यं वेत्यादिविकल्पप्रवृत्तेर्दुर्वारत्वात् । एवं हेतुदृष्टान्त-

तथाहीत्यादिना । अतदाकार इति । अनित्यत्वादिधर्मरहितस्तद्भिना अनित्यत्वादिधर्मो न धर्मिणमनित्यत्वादियुक्तं करोतीति तदुक्तं पूर्वमित्यर्थः । कथं धर्मिण इति स्वरूपशब्दपर्यायः ततो न विरोध इत्यर्थः(!) । भिन्नस्याकारत्वे सर्वस्य सर्व एवाकारः स्यादित्यत्राह । न चातिप्रसङ्ग इति । स्वभावत इति । शरीरिणो भिन्नस्य शरीरत्वे ऽपि यथा घटपटादीनां शरीरत्वाभावः एवं भिन्नेषु कश्चिदेवाकारो न तु सर्व इति भावः । काल्पनिकमिति । धर्मधर्मिणोः भेदानवस्थानादभेदे धर्मधर्मिभावाभावान्न वास्तवः कश्चिद्धर्मधर्मिभावोऽस्ति किं तु काल्पनिक इति वदता बौद्धादिनेत्यर्थः । भेदानभ्युपगमे बौद्धमाह । न हि स्वयमेवेति । आत्माश्रयत्वप्रसङ्गात् आत्माश्रयं स्वमाश्रित्य स्वस्याव-

योरपि योज्यम् । एवमन्य आकारो न भवत्यन्यत्वादित्यादावपि दर्शयितव्यम् । अत्र सर्वत्र धर्मधर्मिभावानभ्युपगमे तवापि न हेतुसाध्ये स्याताम् । तदभ्युपगमे वा न प्रतिषेध इति सर्वत्रापि व्याप्तिहान्या युक्ताङ्गहानिश्च दर्शयितव्या । उपलब्धियोगादुपलब्धस्तत्रापि तथेति युक्तियोगाद्युक्तस्तत्रापि तथेति कृतियोगात् कार्यं तत्रापि तथेत्यादाविष्टप्रसङ्गत्वम-

---

श्यानप्रसङ्गात् । एवं हेतुदृष्टान्तयोरपीति । इदमसाधकमसिद्धत्वात् शब्दानित्यत्वे चाक्षुषत्ववत् इत्यत्रासिद्धियोगादसिद्धत्वं सा च तदाकारवृत्त्यादिकं चक्षुःसम्बन्धाचाक्षुषत्वं स च सम्बन्धस्तदाकारोतदाकारो वेत्यादिकं चोहनीयमित्यर्थः । अन्य आकार इति । अन्यत्वादिकं शब्दादेराकारो न भवितुमर्हति तदन्यत्वात् घटस्य पटवदित्याद्यनुमाने ऽपि प्रतिज्ञाहेतुदृष्टान्तेषु पूर्वोक्तरीत्या व्याघातो दर्शयितव्य इत्यर्थः । पुनरप्यसाधारणदोषमाह । अत्र सर्वत्रेति । सर्वत्र जातिवादिनोतदाकारस्तदाकारो वेत्यादिसर्वानुमानेषु न हेतुसाध्ये स्यातां हेतुसाध्ययोरपि धर्मिणो धर्मत्वाद्धर्मधर्मिभावानभ्युपगमे ते ऽपि न स्त इत्यर्थः । तदभ्युपगमे वेति । अनुमानसिद्ध्यर्थं धर्मधर्मिभावाभ्युपगमे वातदाकारस्तदाकारो वेत्यादिना वादिवाक्यप्रतिषेधो न सिद्ध्यतीत्यर्थः । व्याप्तिहान्या जातिवादिना तत्रतत्रोक्तप्रतिकूलतर्काणां दूषणव्याप्त्यभावेनेत्यर्थः । केषुचिदुपरञ्जकधर्मेषु तर्कस्याङ्गान्तरहानिमाह । उपलब्धियोगादिति । इष्टप्रसङ्गत्वम् उपलब्धिकृतीनामुपलब्धत्वोक्तस्वकार्यत्वसहभावात् तत्प्रयोगोस्मदिष्ट इत्य-

प्यस्तीति सर्वेषामपि प्रसङ्गानां यथायथं तर्काङ्गपञ्च-कान्यतमहानिरूहनीया । एतामेव जातिमवष्टभ्य शुष्कतर्कवादिनां बौद्धचार्वाकवेदान्तिनां बालजनसम्मोहनहेतवः कण्ठकोलाहला इति संक्षेपः ॥ २८ ॥

असिद्धतां वादिहेतोरुक्त्वान्तं साधयेत् स्वयम् ।
तद्दूषणान्मूलहेतुभङ्गः कार्यसमो मतः ॥ २९ ॥

हेतुशब्दोऽत्र साधनाङ्गोपलक्षणार्थः तेन पक्षहेतुदृष्टान्तानामन्यतमस्य साधनाङ्गस्यासिद्धत्वमुद्भाव्य तत्साधकत्वेन स्वयमेवोत्प्रेक्षया किञ्चिदभिधाय स्वोत्प्रेक्षितदूषणेन वादिसाधनभङ्गापादनं कार्यसमः । अनित्यः शब्दः कार्यत्वादित्युक्ते प्रत्यवतिष्ठते । असिद्धं तावत् कार्यत्वं तत्साधकं च प्रयत्नानन्तरीयकत्वं तच्चाभिव्यक्तौ कूपोदकादिभिरनैकान्तिकम् । ततश्च कार्यत्वासिद्धिस्तदवस्थैवेति । एवं पक्षदृष्टा-

---

र्थः । सर्वेषामपीति । नित्यानित्यत्वादिसर्वोपरञ्जकधर्ममुद्दिश्य ये प्रसङ्गाख्यास्तर्का उक्ताः तेषु केचिद्व्याप्ताः केचित् प्रतितर्कपराहताः केचिदिष्टार्थाय पर्यवसानहीनाः केचिदिष्टरूपाः केचिदनुकूलाः अतः सर्वे तर्काभासा इत्यूहनीयमित्यर्थः । बालजनसम्मोहना न्यायतत्त्वानभिज्ञबालजनभ्रामिका ॥ २८ ॥

तत्साधकं चेति । शब्दः कार्यो भवितुमर्हति प्रयत्नानन्तरभावित्वात् घटवत् प्रमाणात् कार्यत्वहेतुसिद्धिरित्यर्थः । एवं पक्षदृष्टान्तयोरपीति । शब्दघटयोरनित्यत्वं नाम प्रध्वंसनं तयोः सम्बन्धो विद्यमानकालेऽपि नष्टकाले वा ।

न्तयोरपि दर्शयितव्यम् । कथं तर्हि प्रयत्नकार्यानेकत्वात् कार्यसम इतिसूत्रसङ्घटना । किमत्र दुर्घटं प्रयत्नस्य कार्यो विषयः हेयोपादेयतया व्यवहर्तव्य इति यावत् । तस्यानेकत्वं पारमार्थिकापारमार्थिकत्वम् । तस्मात् प्रत्यवस्थानमिति । यद्वा प्रयत्नविषयस्यानेकत्वं जन्यत्वाभिव्यङ्ग्यत्वाभ्यां नानात्वम् । तस्मादनैकान्तिकत्वेन प्रत्यवस्थानमित्युदाहरणविशेषपरं योजनीयम् । बौद्धास्तु

साध्येनानुगमात् कार्यसामान्येनापि साधने ।
सम्बन्धिभेदाद्भेदोक्तिदोषः कार्यसमो मतः ॥

आद्ये व्याघातः द्वितीये परस्पराश्रयत्वम् अतः पक्षदृष्टान्तावसिद्धौ तत्साधकं च शब्दघटौ प्रध्वंससम्बन्धयोग्यौ पूर्वत्रिकान्तर्भूतत्वात् व्यतिरेके च सामान्यवदित्याद्यनुमानम् तच्चात्मादावनैकान्तिकम् अतस्तयोरसिद्धिस्तदवस्थैवेत्यादिकं द्रष्टव्यमित्यर्थः । उक्तार्थस्य सौत्रत्वं नास्तीति शङ्कते । कथं तर्हीति । प्रथमं सकलानुमानव्यापकं सूत्रार्थमाह । प्रयत्नस्य कार्यो विषय इति । हानोपादानव्यवहाररूपानुमानवाक्यगोचरस्य लिङ्गादेः सिद्धत्वासिद्धत्ववतः प्रत्यवस्थानं कार्यसम इति सूत्रस्याहत्यार्थः । शब्दानित्यत्वानुमानपरमर्थान्तरमाह । यद्वेति । साध्येनानित्यत्वेनाव्याप्तत्वात् कार्यत्वहेतुना शब्दस्यानित्यत्वसाधने कृते सपक्षे साध्येन व्याप्तो हेतुः पक्षे नास्तीति पक्षे वर्तमानो हेतुर्नास्त्यतोऽसिद्धोऽसाधारणो वा स्यात् ॥

इति लक्षयन्ति । उदाहरन्ति च अनित्यः शब्दः कार्यत्वाद् घटवदित्युक्ते घटस्य कार्यत्वमन्यन्मृद्दण्डादिपूर्वकं शब्दस्य चान्यत्ताल्वादिव्यापारपूर्वकमिति कार्यत्वस्य भेद इति। अत्र हेतोः स्वरूपविशेषमात्रोपन्यासानुपन्यासपर्यवसाने वर्ण्यावर्ण्ययोरन्यतरः स्यात् । यदि दृष्टान्तदृष्टमृद्दण्डादिपूर्वकत्वनिवृत्तेः पक्षे कार्यत्वनिवृत्तिरिति पर्यवस्येत् तदापकर्षसमः। अथ पक्षे ऽपि मृद्दण्डादिपूर्वकत्वमुत्कृष्येत तदोत्कर्षसमः स्यादिति न किञ्चिदेतत्। अत्र भाष्यवार्त्तिकटीकासु सङ्कुलानि वचांसि प्रबोधसिद्धावाचार्यैरस्मदुक्त एवार्थे सङ्कलितानीति न सङ्कटं किञ्चित् । अस्य चानैकान्तिकत्वादिदुष्टसाधानोत्प्रेक्षाकारणं मौलस्याङ्गस्यासिद्धिरारोप्या उदाहरणविशेषे दुष्टत्वमूलप्रदर्शनार्थं सूत्रम्। कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेरिति । अत्र प्रयत्नशब्देन परम्परया तत्कार्यस्ताल्वादिव्यापारो लक्ष्यते। उत्प-

दृष्टान्तहेतुगतविशेषसद्भावासद्भावयोः पक्षोप्यसाध्यं स्यादित्येतावन्मात्रपर्यवसान इत्यर्थः । न किञ्चिदेतत् बौद्धोक्तं कार्यसमलक्षणमिति स्फुटबहुदोषवत्त्वान्न पक्षादिसममित्यर्थः । अत्र कार्यसमलक्षणे । अनैकान्तिकत्वादित्यादिशब्देनासिद्धिः गृह्यते । उदाहरणविशेषे कृतकत्वानुमानमुद्दिश्य प्रवृत्ते जात्युत्तरे । परम्परया आत्मप्रयत्नेन शरीरवायुचेष्टा तया । ताल्वादिव्यापार इति ।

त्तेरन्यस्मिन्नभिव्यक्तिलक्षणे कार्ये प्रयत्नो हेतुर्न भवति । कुतः सत एव शब्दस्यानुपलब्धिकारणोपपत्तेर्हि तथा स्यात् । न चास्यानुपलब्धिकारणं किञ्चिदस्ति आवरणाद्यसम्भवस्योक्तत्वादिति भावः । ततश्च कार्यः शब्दः अनभिव्यञ्जकप्रयत्नानन्तरोपलब्धेरिति हेत्वसिद्धिपरिहारः सूत्राक्षरार्थः । निर्विशेषणस्य प्रयत्नानन्तरीयकत्वादिति हेतोर्व्यभिचारः । सविशेषणस्य न दोषमावहतीत्यविषयवृत्तित्वमुक्तमेव । दूषणस्य विषयो नानुक्त इत्यविषयवृत्तित्वं चार्थतो दर्शितमिति ॥ २९ ॥

जातेः सप्ताङ्गानि दर्शयति ।

लक्ष्यं लक्षणमुत्थानं पातनावसरौ फलम् ।
मूलमित्यङ्गमेतासाम् ।

तानि तर्हि प्रतिजाति व्याक्रियन्तामिति चेत् तत्राह ॥

तत्रोक्ते लक्ष्यलक्षणे ॥ ३० ॥

हेतुतया । आवरणादीत्यादिशब्देनायोग्यत्वमसंस्कार्यत्वं च गृह्यते । न दोषमावहतीत्यविषयवृत्तित्वमिति । अत्रान्यथा स्वव्याघातप्रसङ्ग इति वाक्यमध्याहार्यम् । तात्पर्यतोऽस्य विषयवृत्तित्वमाह । उक्तमेवेति ॥ २९ ॥

जातेः सप्ताङ्गानीति । एवं चतुर्विंशतिजातिरुक्त्वा इदानीं सकलजातिसाधारणानि सप्ताङ्गान्युद्दिशति मूलपद्यकार इत्यर्थः ॥ ३० ॥

प्रमादः प्रतिभाहानिरासामवसरः स्मृतः ।
सुलभं परिशिष्टे ऽन्यद् वयं विस्तरभीरवः ॥ ३१ ॥

तत्र सप्ताङ्गेषु लक्ष्यं लक्षणं चोक्तमेव । सर्वासामप्यवसरः प्रमादः प्रतिभाहानिर्वा सभासङ्क्षोभादिना पर्याकुलितचेतस्तया सदसद्विवेकानवधारणनिबन्धनमसदुत्तरं प्रयुज्यते सदुत्तरप्रतिभाहानिश्च जातिप्रयोगावसरः । मूकीभावादसदुत्तरप्रयोगोपि वरं पाक्षिकसाम्यसम्भवादिति बुद्ध्या प्रवृत्तेः । अन्यदुत्थानबीजं कुत्रचिद्धेत्वाभासे निपातनं प्रयोगफलं दोषमूलं चेति चतुष्टयं प्रबोधसिद्धिनामनि परिशिष्टे विस्तृतमिति तत्परिश्रमशालिभिर्भवितव्यम् । तत्र ह्येवमुक्तम् ।

लक्ष्यं लक्षणमुत्थितिस्त्ववतिपदं मूलं फलं पातनम्
जातीनां सविशेषमेतदखिलं प्रव्यक्तमुक्तं रहः ॥ इति ।

सभासंक्षोभादिनेत्यादिशब्देन वादिवाचालता सभापत्युन्मुखता च गृह्यते ॥

लक्ष्यं सामान्यविशेषजातिस्वरूपं लक्षणं तदसाधारणो धर्म उत्थितिः तत्तज्जातीनामुत्थानहेतुस्त्ववतिपदं जातिप्रयोगावसरः मूलं साधारणासाधारणदुष्टत्वं फलं जातिप्रयोजनं वादिनस्तदा भ्रान्तिरिति यावत् पातनं जात्युत्तरेण वादिसाधने आपाद्यमसिद्धत्वादिदूषणं सविशेषं जात्यवान्तरभेदसहितं रहः सूत्रभाष्यादिषु साकल्येनानभिव्यक्तत्वादतिगूढम् ।

वयं तु संग्रहाधिकारिणो विस्तराद्भीत्या न व्याकृतवन्त इति ॥ ३१ ॥

जातिलक्षणे बुभुत्सातिशयोत्पादनार्थमाह ॥

कथासम्भोगवैदग्धीसम्पादनपटीयसी ।
ध्रियतां जातिमालेयं जातिमालेव पण्डितैः ॥३२॥

जल्पवितण्डयोः सदुत्तरापरिस्फूर्तौ स्वयं प्रयोगेण परप्रयुक्तोद्धारणेन च कथावैदग्ध्यहेतुत्वाज्जातयोऽवश्यमवधारणीयाः । अन्यथा सदुत्तराप्रतिभाने परप्रयोगे च मूकीभाव एव शरणं भवेदिति कथानिर्वाहाकौशलेन पाण्डित्याभिमानो भज्येतेति ॥ ३२ ॥

सदुत्तरेण जातीनामुद्धारे तत्त्वनिर्णयः ।
जयेतरव्यवस्थेति सिद्धेदेतत्फलद्वयम् ॥ ३३ ॥
षण्डसम्भोगतुल्याः स्युरन्यथा निष्फलाः कथाः ।
इति दर्शयितुं सूत्रैः षट्पक्षीमाह गोतमः ॥ ३४ ॥
असदुत्तररूपा सा द्रष्टव्या परिशिष्टतः ।

वयं मूलपद्यकाराः ॥ ३१ ॥

कथासम्भोगेति । विजिगीषुकथायाः सम्भोगप्रयोगस्तत्र । वैपदं विकुशलता तस्या उपार्जने असाधारणकारणमियं जातिसंहतिः विजिगीषुभिः विद्वद्भिर्लक्षणादिसहिता ज्ञातव्येत्यर्थः ।

वादकथायाश्च लाघवानवकाशाद्विशिनष्टि । जल्पवितण्डयोरिति । अन्यथा जातिलक्षणाद्यनवबोधे कथा न निर्वहति एवमसामर्थ्यम् ॥ ३२ ॥

परप्रयुक्ता जातीः सदुत्तरेणानुवृत्य स्वयमपि जात्यन्तरप्रयोगेन वादे तत्त्वनिर्णयलक्षणफलसिद्धिः। असत्साधनेन तदसम्भवात्। न च जल्पवितण्डयोर्जयपराजयव्यवस्था उभयोरपि निगृहीतत्वात्। ततश्च पण्डमैथुनवन्निष्प्रयोजनमेव कथात्रयमापद्येतेति दर्शयन् सूत्रकारः शिष्यशिक्षार्थं कथाभासरूपां षट्पक्षीमसूत्रयदिति। तत्र वादिनः प्रत्युत्तररूपं तृतीयं पक्षमाह। प्रतिषेधे ऽपि समानो दोष इति। प्रयत्नानन्तरीयकत्वं कार्यत्वसाधकं न भवति अनैकान्तिकत्वादिति प्रतिषेधे ऽपि तुल्यो दोषः। तत्रापि कार्यसमायाः सुवचत्वात्। प्रयत्नस्य व्यञ्जकत्वाङ्गीकारेण-

---

कथासन्ततिविच्छेदेन द्वितीयपद्यव्याख्यानप्रयोजनं प्रथमपदार्थमप्याह। परप्रयुक्ता इत्यादिना। तत्त्वनिर्णयः सवीतरागफलसिद्धिः। अनेन वादेऽपि प्रमादाच्छलादिप्राप्तिः सम्भावितेति दर्शितं भवति॥

षट्पक्षी वादिनः स्वसाध्यसाधनरूपः प्रथमः पक्षः प्रतिवादिनो जात्युत्तरप्रयोगाद् द्वितीयः पुनर्वादिनोः सत्प्रयोगः तृतीयः पुनरपि प्रतिवादिनोसत्प्रयोगश्चतुर्थः अथ वादिनो मिथ्याप्रयोगः पञ्चमः पश्चात् प्रतिवादिनोसङ्गतोक्तिः षष्ठः। एतेषां षण्णां पक्षाणां समाहारः षट्पक्षी तामाह सूत्रकार इत्यर्थः। प्रत्युत्तररूपं वादिवाक्यस्य प्रतिवचनं जात्युत्तरं तस्य प्रवचनं प्रत्युत्तरं तद्रूपमिति भावः। प्रयत्नानन्तरीयकत्वं सिद्धस्य वादिसाधनस्य साधकत्वेन सोत्प्रेक्षितः। प्रतिषेधे ऽपि जात्युत्तरे ऽपि। तुल्यत्वमेवाह। त-

नैकान्तिकत्वमुच्यते । तस्य व्यञ्जकत्वमसिद्धम् । तत्साधकस्य प्रयत्नानन्तरोपलब्धेरिति हेतोर्घटादिकार्यैरनैकान्तिकत्वादिति कार्यसमः । अथवा अनैकान्तिकत्वादिति प्रतिषेधहेतावपि समानोऽनैकान्तिकत्वदोषः । न ह्ययमनेकान्ततः प्रतिषेधक एव स्वसत्ताया अप्रतिषेधकत्वादिति वाक्छलप्रयोगादिति । यद्वा दोषवत्त्वमात्रेण साम्यमुक्त्वा यं कञ्चिद्दोषमाह । अत्र प्रथमतृतीययोर्मतानुज्ञा स्वदोषानुद्धरणेन परदोषापादनात् । द्वितीये तु निरनुयोज्यानुयोग इति । किमस्यामेव जातौ कथाभासप्रवृत्तिरित्याशंक्यमित्याह ।

आपीति । एतदेवोपपादयति । प्रयत्नस्येति । शब्दनित्यत्ववादिना तस्य प्रयत्नव्यङ्ग्यत्वमङ्गीकृत्य मूलोदकादावनैकान्तिकत्वमुक्तम् । तस्य शब्दस्य प्रयत्नव्यङ्ग्यत्वमसिद्धम् । तत्साधकत्वं च शब्दः प्रयत्नव्यङ्ग्यः प्रयत्नानन्तरोपलब्धत्वात् मूलोदकादिवदिति । अयमपि हेतुः प्रयत्नजन्यैर्घटादिभिः अनैकान्तिकत्वादसाधकः ततः प्रयत्नव्यङ्ग्यत्वासिद्धिः शब्दस्य तदवस्थैवेति कार्यसम इत्याह इत्यर्थः । अथ सूत्रगतप्रतिषेधशब्दयोरर्थान्तरमाह अभिधावृत्तिवैपरीत्यात् प्रतिषेधहेतोरनैकान्तिकत्वम् न तु पूर्ववद्व्यभिचारादित्याह । न ह्ययमिति । अथ दोषशब्दस्य सम्मुखदोषमात्रवाचकत्वमित्याह । यद्वेति । अनिष्टापादनाज्जातिवादिनः स्वसाधनस्य साम्यत्वमनभिमतं तस्यैव वादिनोप्यनभिधानेप्यभिधावादिवदित्यर्थः । द्वितीये छलप्रयोग इति षट्पक्षाः

सर्वत्रैवमिति । सर्वास्वपि जातिषु कथाभासः प्रवर्तत इत्यर्थः । यथा क्षित्यादिकं सकर्तृकं कार्यत्वान्मूर्तत्वादिति । सदसत्प्रयोगे तद्वदाकाशसाधर्म्यात् शरीराजन्यत्वादकर्तृकं किं न स्यादिति साधर्म्यसमः । शरीराजन्यत्वं व्योमादौ परममहत्त्वेन सह दृष्टं क्षित्यादिनाप्यशरीरिकर्तृमता सता परममहता भवितव्यमित्युत्कर्षसमः । यद्याकाशदृष्टान्तेन परममहत्त्वं साध्यते तर्हि रूपदृष्टान्तेन तद्रहितत्वं किं न स्यादिति प्रतिदृष्टान्तसमः । शरीराजन्यत्वेऽपि किञ्चिदमूर्तं दृष्टमाकाशादि किञ्चिच्च मूर्तं क्षित्यादीति । तथा किञ्चिदकर्तृकं भविष्यत्याकाशादि किञ्चिच्च सकर्तृकं क्षित्यादीति विकल्पसमः । तथा कार्यत्वं मूर्तत्वं वा साध्यमप्राप्य साधनेऽतिप्रसङ्गात् प्राप्य साधकमिति वक्तव्यम् । तदा किं कस्य साध्यं साधनं चेति प्राप्तिसम इति षट्पक्षाः । अथ प्रतिवादिनश्चतुर्थपक्षमाह । प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः । प्रतिषेधस्य द्वितीयपक्षस्य विप्रतिषेधस्तृतीयपक्षः । तत्रापि तुल्यो दोषः सैव जातिः वाक्छलेनानैकान्तिकत्वं वा दोष-

---

साधर्म्योत्कर्षप्रतिदृष्टान्तप्राप्तिसमा वादिसाधनसहिता एवं षट्पक्षा दर्शिताः । तथा वैधर्म्योत्कर्षसमाद्याश्च षट्पक्षाः द्रष्टव्या इति भावः । प्रतिषेधविपरीतः सैव जातिः

वत्त्वमात्रेण वा पूर्ववत् तुल्यो भवतीति । वादिनः पञ्चमं पक्षमाह । प्रतिषेधदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसङ्गो मतानुज्ञा । प्रतिषेधे द्वितीयपक्षे तृतीयपक्षस्थेन मयोक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे तृतीयपक्षे समानदोषप्रसङ्गो मतानुज्ञा नाम निग्रहस्थानं भवतीति । अथ प्रतिवादी द्वितीयपक्षस्थेन मया प्रथमपक्षे समुद्भावितदोषमनुद्धृत्य तृतीयपक्षस्थेन त्वया द्वितीयपक्षे क्रियमाणः समानदोषप्रसङ्गो मतानुज्ञा भवेदिति षष्ठं पक्षमाह । स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोष इति । अत्र स्वशब्देन वादी निर्दिश्यते । तस्य पक्षः स्थापना तं लक्षीकृत्य प्रवृत्तो द्वितीयः पक्षः स्वपक्षलक्षणः । तस्यापेक्षाभ्युपगमः । ततः परपक्षे ऽप्युपपत्त्युपसंहारे प्रतिषेधे ऽपि समानो दोष इति परापादितदोषोपसंहारे एवंत्वादिति हेतुनिर्देशे च क्रियमाणे समानो मतानुज्ञा दोष इति । किमर्थमिदं षट्पक्षीप्रदर्शनं त्रिपक्षादावप्युभयोरसदुत्तरप्रयोगे कथाभासो दर्शयितुं शक्यत एवेति चेत् । सत्यं तथापि षट्पक्षीं नातिवर्तते । ततः परं सभ्यैरेव वादिनौ निवार्य कुकथात्वप्रदर्शनमिति प्रदर्शयितुं तदिति मन्येथाः कुतः पुनः सभ्यास्तृतीया-

कार्यसमा । षष्ठपक्षे सूत्रतात्पर्यं पूर्वमेवाह । अथ प्रतिवादीति । पूर्वोक्त एवार्थे सूत्रं योजयति । अत्र स्वशब्देनेति ।

दिषु कुकथात्वमनुद्भावयन्तश्चतुर्थादिपक्षमनुमन्यन्ते। श्रूयतामवहितैः। सभ्यास्तावत्कथायां स्वयं कर्तृत्वेनानन्वयादुत्थाप्य विवक्षाः तदुत्थापनं च प्रश्नेन चोभयोरप्रतिभया वा कथाभासप्रबन्धेन वा भवति। पर्यनुयोज्योपेक्षणं च सभ्यैरुद्भाव्यम्। तच्च सत्साधनोपक्रमायां कथायां प्रथमद्वितीययोरसम्भावितमेव। तृतीये वादिनः सम्भावितमप्यनुद्भाव्य प्रतिवाद्यनुयोगमपेक्षमाणास्तूष्णीमासते। तत्र चतुर्थः पक्षः प्रवर्तते। तत्र सम्भावितस्यापि वाद्यनुयोगापेक्षयाऽनुद्भावने पञ्चमः पक्षः वादिनोः स्तम्भरूपमनुविधेयप्रश्नावसरमपेक्षमाणेषु षष्ठः। प्रश्नसमयातिक्रमे पुनरननुयुक्तावपि वादिनो निवार्य कुकथात्वमावेदयन्ति। अन्यथावसरप्राप्तपर्यनुयोज्योपेक्षणानुद्भावने तेषामज्ञत्वप्रसङ्गात्। प्रतिवाद्यादिप्रश्ने त्रिपक्षादिषु पर्य-

त्रिपक्षादौ चतुःपञ्चपक्षाणामन्यतमे। तदितिषट्पक्षीप्रदर्शनमिति। येन केनचिदापादिता वक्तुमिच्छा येषां तदेतदुत्थाप्य विवक्षा निमित्तवशाद्दोषवादिन इत्यर्थः। तदुत्थापनं च विवक्षाजननं च वादिनः प्रतिवादिनोऽनुविधेयस्य वानुयोगेन पर्यनुयोज्योपेक्षणग्रहणान्निग्रहान्तराणि वादिभ्यामेव मुखत उद्भावनीयानीति दर्शयति। समयातिक्रमे प्रश्नत्रयस्यावसरे गच्छति सति कथाभासप्रबन्धे चानुवर्तमान इत्यर्थः। अन्यथा षट्पक्षानन्तरं वादिनौ निवार्य। प्रतिवादीति प्रतिवादिप्रश्ने त्रिपक्षः

वस्यति । वादे तु तृतीयकक्षायां वादिनोरनुयोज्या-
नुयोगमुद्भाव्य सदुत्तरेण कथा प्रवर्तनीया । तदनुद्भा-
वने चतुर्थ्यां स्वदोषोद्भावनम् । पञ्चम्यामपि तथा ।
अप्रतिभाप्रतीत्यर्थं षष्ठस्यावकाशः । परस्परं स्वयं
चानुद्भावनेन निरङ्कुशकथाप्रवृत्तौ सभ्यानामवसर
इति सङ्क्षेपः ॥ ३३ ॥ ३४ ॥ ऽऽ ॥

इति श्रीवरदराजविरचिते तार्किकरक्षाव्या-
ख्याने सारसंग्रहे द्वितीयः परिच्छेदः ॥

वादिप्रश्ने वा पञ्चपक्षिकया पर्यवस्यति तत ऊर्ध्वं न
सानुवर्तत इत्यर्थः । निरनुयोज्यानुयोगं प्रतिवादिन इति
शेषः । स्वदोषोद्भावनं प्रतिवादिना कर्तव्यमिति शेषः ।
पञ्चम्यामपि तथा । वादिना स्वदोषोद्भावनं कर्तव्यमित्य-
र्थः । परस्परं स्वयं चेत्यभिधानेन वीतरागत्वाद् वादे न
जयपराजयप्रश्नावकाश इति गम्यते ॥ ३३ ॥ ३४ ॥ ऽऽ ॥

इति तार्किकरक्षायां ज्ञानपूर्णमुखोद्गता ।
चतुर्विंशतिजातीनां सम्पूर्णा लघुदीपिका ॥

सटीकतार्किकरक्षायाम्

तृतीयः परिच्छेदः ।

अथ निग्रहस्थानम् । तत्र सूत्रम् । अप्रतिपत्तिर्विप्रतिपत्तिश्च निग्रहस्थानमिति । अत्र परोक्तस्वोक्तयोरज्ञानमप्रतिपत्तिः । तयोरेव विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः । अन्यथाप्रतीतिरिति यावत् । तयोश्च प्रत्येकं समुच्चये चाव्यापकत्वात् क्वचिदप्रतिपत्तिः क्वचिद्विप्रतिपत्तिरिति व्यवस्थाश्रयणे ऽप्यनुगताकाराभावेनालक्षणत्वादुभयानुगततत्त्वाप्रतिपत्तिस्ताभ्यां लक्ष्यते । सा च परबुद्धेरप्रत्यक्षत्वात् स्वरूपतो न निग्रहस्थानं भवतीति स्वज्ञापकं न लक्षयति । ततश्च तत्त्वाप्रतिपत्तिलिङ्गं निग्रहस्थानमित्युक्तं भवति ।

कृता जातिपरिच्छेदव्याख्या लघुतरा मया ।
क्रियते निग्रहस्थानपरिच्छेदस्य साधुना ॥

तयोश्चेति । अप्रतिपत्तिर्निग्रहस्थानलक्षणं चेद् विप्रतिपत्तिर्न स्यादेषा चेदितरा न स्यात् उभयं चेदेकैका न स्यात् विषयभेदेनोभयं चेदनुवृत्तलक्षणं नास्ति अत उभयगततत्त्वाप्रतिपत्तिस्ताभ्यां लक्ष्यते । सा चात्मगता पराप्रत्यक्षेति तया तज्ज्ञापकं लक्ष्यते ततो लक्षितलक्षणन्याये-

अत्र निग्रहस्थानप्रवृत्तिनिमित्तानुसारेण लक्षणमाह ।
अखण्डिताहङ्कृतिनः पराहङ्कारखण्डनम् ।
निग्रहस्तन्निमित्तस्य निग्रहस्थानतोच्यते ॥ १ ॥

अत्र कथायामित्युपस्कर्तव्यम् । अन्यथातिप्रसङ्गात् । यथोक्तमाचार्यैः । कथायामखण्डिताहङ्कारेण परस्याहङ्कारखण्डनमिह पराजयो निग्रह इति । तानि च द्वाविंशतिः परिसंख्यानात् । तदुक्तम् । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानीति । चशब्दस्त्वर्थः । तेन कथामध्ये भूतावेशापन्नानि झटितितिरोधानेन गलितोद्भावनावसरा-

---

न तत्त्वाप्रतिपत्तिलिङ्गं निग्रहस्थानमिति सामान्यलक्षणं सूत्रतात्पर्यार्थ इत्याहेत्यार्थः । अत्र निग्रहस्थानेति । एवं सूत्रस्य दुर्घटत्वात् तदर्थं हृदि कृत्य प्रकारान्तरेण मूलपद्यकारः सामान्यलक्षणमाहेत्यर्थः ।

उपस्कर्तव्यमुत्तरपद्यगतमाकर्षणीयम् । अतिप्रसङ्गात् कथाव्यतिरेकेण परस्परं विवदमानानामनिपुणवचसां निग्रहस्थानप्रसङ्गादित्यर्थः । तानि तत्त्वाप्रतिपत्तिलिङ्गानि । परिसंख्यानात् सूत्रकारेण तावतामेव निग्रहस्थानत्वेनोक्तत्वात् । भूतावेशाभिभूतप्रलापापस्माराद्यावेशेनो-

णि पुरःस्फूर्तिकान्यनधिकृतोद्भावनानि च व्यवच्छि-नत्ति । प्रतियोग्यपेक्षया तात्कालिकातत्त्वज्ञानलिङ्ग-स्य निग्रहस्थानत्वात् तेषां चानेवंविधत्वादिति ॥ १ ॥

कथायां यच्च पक्षादि येन निर्दिष्टमादितः ।
तस्य तेन पुनस्त्यागः प्रतिज्ञाहानिरुच्यते ॥ २ ॥

वादिना प्रतिवादिना वा येन कथायां यत्प-क्षहेतुदृष्टान्तदूषणानामन्यतमं प्रथमं निर्दिष्टं तस्य दूषणसमुन्मेषेण तथा निर्वाहमपश्यता तेन पुनस्त्या-गः प्रतिज्ञाहानिर्नाम निग्रहस्थानं भवति । त्यागश्च यदि दुष्टमेतत् तन्माभूदिति कण्ठतोऽर्थतश्च द्विधा भवति । पक्षे तावत् साध्यसाधनधर्मिणां तद्विशेषणानां च त्यागाः षड् भवन्ति । तत्राद्यो यथा । अनित्यः शब्दः ऐन्द्रियकत्वादित्युक्ते सामान्यमैन्द्रियकं नित्यं दृष्टमि-

---

क्तानि । झटितीति । केनचित् समोदं निग्रहं स्पष्टमुक्त्वा स्ववचनं स्वयमेव बुद्ध्या परिहृतत्वादुच्यमानो का उक्ता तस्योद्भावनकालतया स्पष्टा (?)। पुरः स्फूर्तिकेति । प्रति-वादिवचनात् पूर्वमेवातितिक्ष्णमति केनचित् पार्श्वस्थेनो-द्भावितानि । तेषां चेति । आद्ये त्वज्ञानलिङ्गत्वाभावात् द्वितीये तदवसानानर्हतया अज्ञानलिङ्गत्वाभावात् तृतीये ऽन्योक्तत्वेन प्रतिवादिनो विजयाभावाच्चेत्यर्थः ॥ १ ॥

आद्यः साध्यत्यागात् द्वितीयः साधनत्यागात् तृतीयः धर्मित्यागात् मनसः परिग्रहे ऽपि पूर्वोक्तस्य वि-शिष्टस्य त्यागाद्धर्मिहानिरिति द्रष्टव्यम् । चतुर्थः साध्य-

त्यनैकान्तिकत्वेन प्रत्युक्ते तर्हि शब्दोऽपि नित्यः स्यादिति । द्वितीयस्तु तस्मिन्नेव हेतौ तथैव प्रत्युक्ते तर्हि कृतकत्वादस्त्विति । तृतीयस्तु अनित्ये वाङ्मनसे मूर्तत्वादित्युक्ते भागासिद्धा च प्रत्युक्ते तर्हि मन एवास्त्विति । चतुर्थस्तु क्षित्यादिकं बुद्धिमत्कर्तृपूर्वकमित्युक्ते उपादानादिगोचरज्ञानचिकीर्षाप्रयत्नवत एव कर्तृत्वाद्बुद्धिमदिति विशेषणवैयर्थ्ये ऽभिहिते तर्हि सकर्तृकमेवास्त्विति । पञ्चमस्तु अनित्यः शब्दः प्रयत्नकार्यत्वादित्युक्ते विशेषणवैयर्थ्योक्तौ तत्परित्यागः । षष्ठस्तु ऐन्द्रियकः शब्दो नित्यः कार्यत्वादित्युक्ते तथैव प्रत्युक्ते शब्द एवास्त्विति ॥

दृष्टान्ते ऽपि हानेः पूर्ववत् षट् प्रकाराः । आद्यो यथा । अनित्यः शब्दः ऐन्द्रियकत्वात् घटवदित्युक्ते सामान्येनानैकान्तिकत्वोद्भावने घटोऽपि तर्हि नित्योऽस्त्विति । द्वितीयस्तु तस्यामेव प्रतिज्ञायां प्रत्यक्षगुणत्वाद् द्व्यणुकरूपवदित्युक्ते साधनवैकल्योद्भावने कार्यत्वहेत्वाधारतया स एव दृष्टान्त

विशेषणत्यागः वैयर्थ्ये पुनरुक्तत्वेन दुष्टत्वे । पञ्चमः हेतुविशेषणत्यागः । विशेषणेति । प्रयत्नविशेषणस्य व्यावृत्त्यभावेन कृतकत्वोक्तौ । षष्ठः धर्मिविशेषणत्यागः । तथैव प्रत्युक्ते ऽपि सिद्धसाधनपरिहारार्थं हि धर्मिविशेषणमत्र त्वैन्द्रियकत्वं विशेषणम् ।

तदभावार्थमित्युक्ते सति दृष्टान्ते चाद्यद्वितीयादि-

इति । तृतीयस्तु तस्मिन्नेव दृष्टान्ते तथैव प्रत्युक्ते घटरूपं तर्हि भविष्यतीति । यथा च साधर्म्यदृष्टान्तत्वेन प्रत्युक्ते माभूदयं वैधर्म्यदृष्टान्तोऽस्त्विति । चतुर्थस्तु यत्कार्यं तद्बुद्धिमत्कर्तृपूर्वकं यथा घट इत्युदाहृते पूर्ववद्विशेषणवैयर्थ्योक्तौ तत्परित्यागः । पञ्चमस्तु यत्प्रयत्नकार्यं तदनित्यं यथा घट इत्युक्ते प्रयत्नविशेषणस्य वैयर्थ्योक्तौ त्यागः । षष्ठस्तु यथा स्थूलपदानर्थक्योद्भावने तस्य त्यागः ॥

दूषणहानिस्तु स्वरूपतो विशेषणतश्च द्विधा तत्राद्यो यथा । अनित्यः शब्दः कृतकत्वादित्युक्ते अनैकान्तिकत्वोद्भावने निरनुयोज्यानुयोगत्वेन दूषिते स्वरूपासिद्धिस्तर्हीति । द्वितीयस्तु स्वरूपासिद्धिपरिहारे व्याप्यत्वासिद्धिस्तर्हीति ॥

ननु यद्दर्शनेनायमुक्तं त्यजति स एव दोषो

शब्दानामित्यर्थः पूर्ववत् । यथा च साधर्म्येति । द्व्यणुकरूपान्वयदृष्टान्तत्वाभावे यदनित्यं न भवति तत्प्रत्यक्षमपि न भवति यथा द्व्यणुकरूपमिति । अयमेव व्यतिरेकदृष्टान्तः । यद्वा एवमपि दृष्टान्ते दूषिते तर्हि व्यतिरेकेणापि परमाणुरूपवदित्यर्थः ।

निरनुयोज्यानुयोगत्वेन अविद्यमानदोषोद्भावनत्वेन । स्वरूपासिद्धिपरिहारे ऽनभिव्यञ्जकप्रयत्नानन्तरभावित्वेन हेतुना शब्दस्य कृतकत्वहेत्वसिद्धपरिहारे ऽभिहिते सतीत्यर्थः ॥

निग्रहस्थानमस्तु न हानिरिति चेत् । न सतस्त्यागे तावद्धानिरेव निग्रहस्थानम् असतस्त्यागे ऽपि त्यागेनैव पूर्वदोषस्य परिहृतत्वादियमेव निग्रहस्थानम् । इयं तु प्रत्युत्तरानुपातिनी तदुत्तरकक्ष्योद्भाव्या । तत्रोपेक्षितानुद्भावयितुं निग्रहापादिका सतस्त्यागे तु प्रतिवादिनोऽसद्दोषोद्भावनेन निरनुयोज्यानुयोगापातात् तदनुद्भावनेनोक्तं त्यजतः पर्यनुयोज्योपेक्षणसहचारिणी हानिरवश्योद्भाव्या आत्मन एकनिग्रहापत्तेः परस्य रुद्धयापत्तेरवष्टम्भविजयावहत्वात् । वादे तु सद्धानिरुद्भाव्या नेतरा । अत्र निर्वाह्यमेव वदेदुक्तं च निर्वहेदिति रहस्यम् ॥ २ ॥

यद्दर्शनेन यस्यानैकान्तिकत्वभागासिद्ध्यादेर्दर्शनेन । सतस्त्यागे प्रामाणिकसाध्यसाधनादिपरित्यागे सति हानिरेव यथोक्तदोषस्याभासत्वात् तदधीननिग्रह इति भावः । असतः प्रमाणिकत्वाभाववतः । प्रत्युत्तरानुपातिनीति । प्रथमद्वितीयपक्षयोस्त्यागायोगात् तृतीयचतुर्थादिपक्षेषु सम्भाविता चतुर्थपञ्चमादिपक्षेषूद्भाव्या । तत्रोपेक्षिता प्रतिवाद्यादेः पर्यनुयोज्योपेक्षणप्रदेत्यर्थः । वादिनः अवश्योद्भाव्या प्रतिवादिनेति शेषः । स्वस्यापि निगृहीतत्वात् कथं परदोषोद्भावनमिति चेत् तत्राह । आत्मन इति । अवष्टम्भविजयो नाम न्यूनदोषवता परस्याधिकदोषोद्भावनम् ॥ २ ॥

एवं तर्ह्युक्तहानिरिति व्यपदेशः स्यात् तत्राह ॥

अत्र[१] प्रतिज्ञाग्रहणमुक्तमात्रोपलक्षणम् ।

सत्यम् अन्वर्थसञ्ज्ञेयमेव । उपलक्षणानामेव प्रतिज्ञाहानिरिति। कथं तर्हि सूत्रम् प्रतिदृष्टान्तधर्मानुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिरिति । इदं हि दृष्टान्ते साध्यधर्महानिः प्रतिज्ञाहानिरित्याह । यद्वा दृष्टश्चासौ अन्ते निगमने व्यवस्थित इति दृष्टान्तशब्देन पक्षमभिधाय स्वीयपक्षे प्रतिपक्षधर्मानुज्ञानरूपा साध्यधर्मा हानिः प्रतिज्ञाहानिरिति। सत्यम् तथापि लक्ष्यलक्षणपदानामुक्तमात्रोपलक्षणत्वान्न कश्चिद्दोष इति ।

एवं तर्हि धर्मिसाध्यहेतुदृष्टान्तानां दूषणतद्विशेषणानां हानिरियमिति सिद्धे सति ।

उक्तस्यार्थजातस्य सूत्रं नानुगुणमिति शङ्कते । कथं तर्हीति । पूर्वपक्षी स्वयमेव सूत्रार्थमाह । इदं हीति । घटोऽपि तर्हि नित्योऽस्त्वित्येवैवेयमिति सूत्रस्य वाचनिकोर्थः नान्या हानिरित्यर्थः । यद्वेति । सूत्रस्यार्थान्तरविवक्षायां शब्दोऽपि तर्हि नित्यः स्यादित्येवैवेयं नान्येत्युक्तं भवति। अतः सूत्रानुक्तः प्रपञ्च इति भावः । सत्यमित्यर्द्धाङ्गीकारसूचनम् । लक्ष्यलक्षणपदानां प्रतिज्ञाहानिप्रतिदृष्टान्तधर्मेषु दृष्टान्तशब्दानाम् । एवमियं प्रतिज्ञाहानिः पक्षदृष्टान्तदोषभेदाच्चतुर्दशविधा सा च माभूत् तर्हीत्यन्यथास्त्विति च प्रत्येकं द्विधा अतोष्टाविंशतिभेद इति द्रष्टव्यम् ॥

---

(१) तत्र–पा॰ A पु॰ ।

अविशेषितपूर्वोक्ते साध्यांशे दूषिते पुनः ॥ ३ ॥
तद्विशेषणनिक्षेपः प्रतिज्ञान्तरमिष्यते[1] ।

द्व्यंशो ह्यनुमानप्रयोगः । साध्यांशः साधनांशश्चेति । तत्र साध्यांशः प्रतिज्ञोदाहरणे प्रयोज्यभागो निगमनं चेति । शेषः साधनांशः । तत्र निर्विशेषणं प्रयुक्तस्य साध्यांशस्य दूषणोद्भावने परेण कृते सति तत्परिजिहीर्षया पुनर्विशेषणं प्रक्षिप्य पूर्वोक्तस्यैव निर्देशः प्रतिज्ञान्तरम् । तथा च सूत्रम् । प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरमिति । अविशिष्टस्य साध्यभागस्य प्रतिषेधे कृते धर्मविकल्पं प्रक्षिप्य तदर्थस्य तस्यैव पूर्वोक्तस्यार्थस्य तदर्थं साध्यसिद्ध्यर्थं वा निर्देशः प्रतिज्ञान्तरमित्यर्थः । तच्च पक्षतद्विशेषणसाध्यतद्विशेषणप्रक्षेपेण चतुर्विधम् यथा नित्या वर्णाः श्रावणत्वाच्छब्दत्ववदित्युक्ते ध्वनिभिरनै-

उदाहरणे प्रयोज्यभागः यत् कृतकं तदनित्यं दृष्टमित्यादौ तदनित्यं दृष्टमित्यादिः शेषः हेतुरुदाहरणे यत् कृतकमित्यादिः उपनयश्च निर्विशेषणं निरुपपदं प्रक्षिप्य उक्तदोषनिवारकमर्थान्तरमुक्त्वा धर्मविकल्पं प्रक्षिप्य धर्मो ध्वनिर्वर्णात्मकत्वादिः तस्य विकल्पः पक्षतद्विशेषणत्वादिरूपेण योजनं तथोक्तवेत्यर्थः । अर्थान्तरमाह । तदर्थमिति । साध्यसिद्ध्यर्थमित्यत्र प्रतिषेधनिवृत्त्यर्थमिति द्रष्टव्यम् ।

(१) मुच्यते-पा॰ A पु॰ ।

कान्तिकत्वेन दूषिते सध्वनयो वर्णा नित्या इति पक्षान्तरप्रक्षेपः । तद्विशेषणप्रक्षेपस्तु अनित्यः शब्दः कार्यत्वादित्युक्ते ध्वनिभागे सिद्धसाध्योद्भावने वर्णात्मकः शब्द इति । अग्निमदिदं सुरभिमलिनधूमवत्त्वादित्युक्ते विशेषणासामर्थ्ये साधिते साग्निकृष्णागरुदारुमदिति साध्यान्तरप्रक्षेपः । विवादाध्यासितं बुद्धिमत्पूर्वकमित्युक्ते सिद्धसाध्यताभिधाने उपादानादिगोचरबुद्धिमत्पूर्वकमिति साध्यविशेषणप्रक्षेपः । उदाहरणे प्रयोज्यभागे यथा । यत् सुरभिमलिनधूमवत् तदग्निमदित्युक्ते प्रयोज्यांशे न्यूनतया प्रत्युक्ते तत् साग्निकृष्णागरुदारुमदिति । निगमने ऽपि प्रतिज्ञायामिवाविशिष्टप्रतिज्ञैकदेशोपसंहारे तथैव प्रत्युक्ते चतुर्विधो विशेषणप्रक्षेपः स्वयमेवोदाहरणीयः । न

ध्वनिभिः अनित्यत्वेनोभयसम्बन्धात् तीव्रत्वादिसामान्याभिव्यञ्जकैः । विशेषणासामार्थ्यम् सुरभिमलिनविशेषणयोर्व्यावर्त्याभावेन वैयर्थ्यम् । सिद्धसाध्यत्वाभिधाने भोक्तृत्वहेत्वदृष्टजन्यत्वेन परम्परया बुद्धिमात्रपूर्वकत्वात् सिद्धसाधनमित्युक्ते सति । उपादानादीत्यादिशब्देन उपकरणसम्प्रदानप्रयोजनानि गृह्यन्ते । दारुमदित्यादिशब्देन ईश्वरानुमानस्योदाहरणे प्रयोज्यभागे साध्ये विशेषणप्रक्षेपो गृह्यते । निगमने ऽपीति । तस्मान्नित्या वर्णाः तस्मादिदमग्निमत् तस्मादिदं बुद्धिमत्पूर्वकमित्येतेषु पूर्वदूषितेषु पूर्ववत् पक्षतद्विशेषणसाध्यतद्विशेषणप्रक्षेपेण विशेषणाभा-

चैवं हानिरेवाविशिष्टस्य परित्यागादिति वाच्यम् । पूर्वोक्तस्यापरित्यागात् त्यक्तस्य विशेषणाभावस्य प्रागनुक्तत्वादिति । अत्र कल्पान्तरे न विशेषणीयमिति रहस्यम् ॥ ३ ॥ ८८ ॥

पदयोर्वाक्ययोर्वा य एकवक्तृकयोर्मिथः ॥ ४ ॥
व्याघातो निग्रहस्थानं स्यात् प्रतिज्ञाविरोधतः ।

एकवक्तृकयोः पदयोर्वाक्ययोर्वा यः परस्परव्याघातः स प्रतिज्ञाविरोधो नाम निग्रहस्थानं भवति । तदुक्तं प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोध इति ।

वोपि निरस्तः । एवमनुपन्यस्ते इत्युक्तहानिरत्र नास्तीति मतं (बहिर्भावेन प्रस्तुतसाध्यं शब्दानित्यत्वं प्रतीत एव व्याकरणादिमतानुसारेण । अत्र न्यूनादिति उदाहरणाद्यवयवान्तरवचनादयं हेतुः हेतुं स्वत्यादि वचनाच्च न्यूनपुनरुक्तादिसम्भेदे सत्यपि उक्तग्राह्यत्वात् वादिवाक्योपरमानन्तरं ग्राह्यत्वात् उच्यमानग्राह्यत्वात् वादिवाक्योच्चारणसमयवेद्यत्वेन प्रथमप्रतिपन्नत्वादित्यर्थः) । (१)शेषमवशेषं हानिवद्द्रष्टव्यम् । कक्ष्यान्तरे तृतीयादिपक्षे । एवं प्रतिज्ञान्तरस्य दशविधो भेदः ॥ ३ ॥ ८८ ॥

एकवक्तृकयोरिति विशेषणस्य तात्पर्यं वक्ष्यति । अवान्तरवाक्ययोः प्रतिज्ञाहेत्वादिपञ्चसु मध्ये द्वयोर्द्वयोरुक्तयोरन्योन्यविरोध उक्तविरोध इति सूत्रतात्प-

---

(१) ( ) एतच्चिह्नितपाठो मूलासम्बद्धः ।

अत्र प्रतिज्ञाहेतुपदाभ्यां प्रतियोगिद्वयमुपलक्ष्यते । लक्ष्यगतेन च प्रतिज्ञापदेनोक्तमात्रं प्रतिज्ञाहेतुविरोध इति लक्ष्यनिर्देशे कर्तव्ये एकपदनिर्देशेन एकस्मिन्नप्यवयवे तदंशयोर्विरोधं सूचयति । स च प्रतिज्ञायां धर्मधर्मिनिषेधात् तयोरेव विधानाच्चतुर्विधः । तत्र प्रथमो यथा ईश्वरो न कर्तेति द्वितीयस्तु नास्तीश्वर इति । तृतीयस्तु ईश्वरः किञ्चिद्ज्ञ इति । चतुर्थस्तु अतीतमस्तीति । प्रतिज्ञाहेत्वोर्विरोधो यथा गुणव्यतिरिक्तं द्रव्यातिरिक्तत्वादिति । प्रतिज्ञादृष्टान्तयोर्यथा अनित्यः शब्दः प्रमेयत्वात् यत्प्रमेयं तदनित्यं यथा व्योमेति । प्रतिज्ञोपनययोस्तु हेतुविरोधाविरोधाभ्यामनवकाशः । प्रतिज्ञानिगमनयोस्तु यथा अनित्य इति प्रतिज्ञाय तस्मान्नित्य इति । हेतुदृष्टान्तयोर्यथा अनित्यः शब्द ऐन्द्रियकत्वात् द्व्यणुकादिवदिति ।

र्थार्थ इत्याह । अत्र प्रतिज्ञेति । सूत्रकारस्य सकलावान्तरवाक्यविरोधे तात्पर्यम् । भवतु पदयोर्विरोधः तत्रलब्ध इत्याशङ्क्याह । प्रतिज्ञाहेतुविरोध इतीति । तत्र प्रथमो यथेति । द्वितीयस्त्विवति । ईश्वरसिद्धावसिद्धौ च निषेधो न युक्तः निषेधविरोध इत्यर्थः । तृतीयस्त्विवति जगत उपादानगोचरबुद्धिमत्त्वेन सर्वज्ञस्यैवेश्वरत्वात् तस्य किञ्चिद्ज्ञत्वविधारणं विरुद्धमिति भावः । चतुर्थस्त्विवति । गतकालस्यातीतत्वात् तस्य वर्तमानकालत्वं विरुद्धमित्यर्थः ।

हेतूपनययोर्यथा तत्रैवानैन्द्रियकश्च शब्द इति । एवं तर्क्ये दूषणवाक्ये ऽपि विरोधः स्वयमेवोहनीयः । न चायमपसिद्धान्तः एकवक्तृकवाक्यविषयत्वात् । न च विरुद्धहेत्वाभाससङ्करः । तत्र साध्यविपर्ययव्याप्तिनिदर्शनेन विरोधस्योद्भाव्यत्वात् । अत्र चास्ति नास्तीतिवदुक्तिमात्रेण विरोधस्फुरणादिति । एवंविधानां च दुरवलेपात् प्रमादाद्वोक्तिसंभवः । अयं च प्रथमकक्ष्यातिपाती तदुत्तरकक्ष्योद्भाव्यः । मिथो व्याहतं न वदेदिति तत्त्वम् ॥ ४ ॥ ऽऽ ॥

स्वयमुक्तापलापेन प्रतिज्ञान्यासनिग्रहः ॥ ५ ॥

स्वोक्तस्य स्वयमेवापलापः प्रतिज्ञासंन्यासः । तदुक्तम् पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः । अत्र पक्षशब्द उक्तमात्रपरः । तथा प्रतिज्ञातार्थशब्दश्च । अपनयनमपलापः । ततश्चोक्तप्रतिषेधे परेण कृते तत्परिजिहीर्षयोक्तापलाप उक्तसंन्यास इत्यर्थः । स च चतुर्विधः । केनेदमुक्तमिति वा परमतमेतन्मयोक्तमिति वा स्वयमेवोक्त्वा त्वयेदमुक्तमिति

तत्रैव अनन्तरप्रस्तुतशब्दानित्यत्वानुमाने । एवं तर्क्ये इति । नित्यत्वे ऽविनाशित्वप्रसङ्गः । कृतकत्वहेतुर्यदि पक्षविपक्षयोरेव वर्तते तर्ह्यनैकान्तिको ऽयमित्यादिकमूहनीयमित्यर्थः । तदुत्तरकक्ष्योद्भाव्यः द्वितीयपक्षादावुद्भाव्यस्ततो ऽपेक्षितो निग्रहाय भवतीति तात्पर्यम् । एवं प्रतिज्ञाविरोध एकादशविध इति द्रष्टव्यम् ॥ ४ ॥ ऽऽ ॥

वा परोक्तमेव मयानूदितमिति वा। न चेदमसंभवदुक्तिकम् दूषणोद्भावने ह्यस्फूर्तिदशायां त्यागवदपलापस्यापि संभवात्। न च कापालवादित्रादिनेवापलापेनापि पूर्वदोषो न परिहृतः। यतः स एव निग्रहस्थानं भवेत् वादे स्खलितसंगूहनाभावेऽपि प्रमादात् कथञ्चित् संभवादुद्भाव्यम्। शेषमशेषं हानिवत्। प्राश्निकाद्यवगतं नापलपेदिति रहस्यम् ॥ ५ ॥

हेत्वन्तरं साधकांशे दूषिते तद्विशेषणम्।

अविशेषोक्तसाधकभागे दूषिते सति तद्दोषपरिजिहीर्षया पूर्वोक्तस्यैव पुनः केनापि विशेषणं हेत्वन्तरं नाम निग्रहस्थानं भवति। तदुक्तम् अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषणमिच्छतो हेत्वन्तरं नाम निग्रहस्थानमिति। अत्र हेतुपदेन साधकभागमुपलक्षयति। इच्छया च तत्कार्यं विशेषणवचनम्। न हि स्वस्थोऽकस्मादुक्तं विशिनष्टीति प्रतिषेधपरिजिहीर्षा अस्य मूलमिति दर्शयितुमुक्तं प्रतिषिद्ध इति। एतच्च हेत्वा-

---

प्रतिज्ञाशब्दौ लक्ष्यलक्षणगतौ त्यागवत्। स एव पूर्वोक्तदोष एव। शेषमशेषमिति। पक्षहेतुदृष्टान्तदूषणानां दुष्टत्वे साध्यसाधनाद्यपलापरूपेणायमपि चतुर्दशविधो भवति तृतीयकक्षादावयं सम्भावितः उत्तरकक्षादौ तुल्योऽन्यथा निग्रहाय भवतीत्यादिकं प्रतिज्ञाहानिवदस्यापि द्रष्टव्यमित्यर्थः ॥ ५ ॥

केनापि विशेषणेन सहेति विशेषः। जात्युत्तरत्वेन

द्विविशेषणभेदात् तच्चतुर्विधम् । तत्र हेतौ यथा अनित्यः शब्दः अस्मदादिबाह्येन्द्रियग्राह्यत्वादित्युक्ते सामान्येन व्यभिचारात् सामान्यवत्त्वं हि विशेषणम् । उदाहरणे प्रयोजकांशे यथा यदस्मदादिबाह्येन्द्रिय-ग्राह्यं तदनित्यं यथा घट इत्युक्ते प्रयोजकांशन्यूनतया प्रत्युक्ते सामान्यवत्त्वे सतीति । उपनये यथा तथा चायमस्मदादिबाह्येन्द्रियग्राह्य इत्युक्ते तथैव प्रत्युक्ते तथैव विशेषणम् । दूषणे यथा हेतौ प्रयुक्ते साधकोऽयं न भवति सपक्षे सत्त्वात् अनित्ये प्रमेयत्ववदित्युक्ते जात्युत्तरत्वेन दूषिते विपक्षवृत्तित्वे सति सपक्षे सत्त्वादिति एवं विपक्षव्यावृत्तत्वात् गन्धवत्त्ववदित्युक्ते सपक्षव्यावृत्तत्वे सतीति विशेषणनिक्षेपेण परोक्तदोषप्रतीकारे ऽपि हेत्वन्तरमेव अप्रतीकारे तु साधने हेत्वाभासो दूषणे निरनुयोज्यानुयोगः स्यात् । तथापि हेत्वन्तरमेवोद्भाव्यं सिद्धत्वात् साध्यत्वाच्च तयोः पूर्वमप्यदुष्टस्य दोषाभासोद्भावने विशेषतः पर्यनुयो-

---

सपक्षे सतोऽसाधकत्वे दूषणवाक्यस्यापि तथात्वेन स्वव्याघातप्रदर्शनेन । गन्धवत्त्ववत् नित्या भूः गन्धवत्त्वादितिवत् । अप्रतिकारे त्विति । विशेषणप्रतिक्षेपे ऽप्यनैकान्तिकत्वाद्यपरिहारे साधनस्य तत्तद्धेत्वाभासो व्यवस्थित एव दूषणस्य निरनुयोज्यानुयोगो व्यवस्थित इत्यर्थः । सिद्धत्वाद्विशेषणप्रक्षेपस्य प्रथमतः कृतत्वात् । साध्य-

त्योपेक्षणासध्रीचीनमिदं सद्धानिषदुद्भाव्यं परिकरशुद्धिः प्रतिज्ञान्तरवद्द्रष्टव्येति ॥

प्रकृतानुपयुक्तोक्तिरर्थान्तरमिति स्थितिः ॥ ६ ॥

प्रक्रान्तस्य साधनस्य दूषणस्य वानुपयुक्तमनङ्गं यत् तस्य वचनमर्थान्तरं नाम निग्रहस्थानं भवति। तदुक्तम् प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरमिति। अन्यदित्यध्याहाराल्लक्ष्यपदस्यार्थान्तरमित्यस्यावृत्तेर्वा प्रकृतमर्थमपेक्ष्येति ल्यब्लोपाद्वा पञ्चम्युपपत्तिः। अन्यथा तृतीया स्यात्। अप्रतिसम्बद्धार्थमननुरूपसम्बद्धार्थवचनमर्थान्तरं नाम निग्रहस्थानमित्यर्थः। तच्च स्वपरोभयानुभयमतभेदेन चतुर्विधम्। स्वमतेन ता-

---

त्वाच्च तयोर्हेत्वाभासनिरनुयोज्यानुयोगयोः विशेषणप्रक्षेपेऽप्युन्नेयत्वेन पश्चात् सिद्धत्वादित्यर्थः। परिकरशुद्धिः इदं न हेतुज्ञानवतः पूर्वमुक्तस्यापरित्यागात् त्यक्तस्य विशेषणाभावस्य पूर्वमनुक्तत्वादिदं तृतीयकक्ष्यातिपाति तदुत्तरकक्ष्योद्भाव्यमित्याह।

प्रक्रान्तस्य आरब्धस्य अन्यदित्यध्याहारात् प्रस्तुतादर्थादन्यदर्थेनाननुरूपसम्बन्धं वस्तु तस्य तस्य वचनमर्थान्तरमित्यर्थः। लक्ष्यपदस्येति। प्रक्रान्तादर्थान्तरं यत् तेनानुरूपसम्बन्धं तस्य वचनमर्थान्तरमिति वेत्यर्थः। प्रकृतमर्थमिति। प्रस्तुतमर्थं प्रकृत्य यदनभिमतसम्बन्धं वस्तु तस्य वचनमर्थान्तरमिति वेत्यर्थः। अत्र स्वपरशब्देन

वत् अनित्यः शब्द ऐन्द्रियकत्वात् गुणश्च सः आकाशस्य च । तदुपहितं श्रोत्रं तेन चायं गृह्यते समवायात् स च नित्यः सम्बन्ध इत्यादि । परमतेन तु तथैवोपक्रम्य द्रव्यं शब्दः संयोगेन गृह्यते ताल्वादिव्यापाराभिव्यङ्ग्यं चेत्यादि । उभयमतेन तु तथैवोपक्रम्य नित्यत्वं चास्यानुमानगम्यं तच्च प्रमाणम् । तच्चतुर्विधं षड्विधं चेत्यादि । उभयमतबहिर्भावेन यथा तथैवोपक्रम्य हेतुरयं हेतुश्च हिनोतेर्धातोस्तुन्प्रत्यये कृदन्तं पदमित्यादि झटिति दोषस्फुरणे समाधानमपश्यतस्तत्तिरोधानार्थमस्योक्तिः संभवति । अत्र न्यूनादिसंभवे ऽपि तस्योक्तग्राह्यत्वादस्य चोच्यमानग्राह्यत्वादिदमेवोद्भाव्यम् । अन्यथा प्राप्तावसरस्यानुद्भावनेन निग्रहापत्तेः । अत्र च प्रकृतोपयुक्तमेव ब्रूयादिति रहस्यम् ॥ ६ ॥

अवाचकप्रयोगे स्यान्निरर्थकसमुद्भवः ।

अवाचकपदं प्रयुञ्जानस्य वादिनो निरर्थकं नाम निग्रहस्थानं भवति । तदुक्तम् वर्णक्रमनिर्देशवन्निरर्थकमिति । वर्णानां क्रमनिर्देशो मातृकापाठकः । तेन तुल्यं वर्तते यद्वचनमवाचकप्रयोगादिरिति यावत् ।

वादिप्रतिवादिनौ नैयायिकमीमांसकौ गृह्येते । तथैवोक्तस्य अनित्यः शब्द ऐन्द्रियकत्वादित्यारभ्य द्वितीयकक्ष्योद्भाव्यमिति द्रष्टव्यम् ॥ ६ ॥

तन्निरर्थकं नाम निग्रहस्थानमित्यर्थः । अवाचकप्रयोगश्च बहुप्रकारः । कचटतपेत्यादिवर्णमात्रोच्चारणम् लिङ्गवचनविभक्तिविपर्यासः कृत्तद्धितसमासाख्यातविपर्यासः संस्कृतमुपक्रम्य म्लेच्छभाषावचनमित्यादि । एवमपि कथञ्चिदर्थप्रत्ययसिद्धेः कथमयं निग्रहहेतुरिति चेत् नामीमांसकानामपि वाचकावाचकविभागस्य सिद्धत्वात् । यस्याप्ययमसिद्धः तस्यापि समानसमयैरेव पदैर्वक्तव्यम् । अन्यथा स्वाज्ञानसंवरणार्थं स्वभाषया प्रत्यवतिष्ठमाने दाक्षिणात्ये तूष्णींभाव एव शरणमार्यस्येत्यज्ञानमेवावशिष्यत इति गतं कथाव्यसनेन । न च दुर्ज्ञानं समानसमयत्वं परबुद्धेरप्रत्यक्षत्वादिति वाच्यम् । प्रथमत एवोभयप्रसिद्धव्याकरणादिव्यवहाराङ्गीकारेण लिङ्गविपर्यासादीनां समानसमयत्वाभावनिश्चयोपपत्तेः । अत्र च समानसमयैरेव पदैर्व्यवहरेदित्युपदेशः ॥

लिङ्गवचनेति । नियतलिङ्गानां पदानां लिङ्गान्तरोच्चारणं लिङ्गविपर्यासः वृक्षं तिष्ठतीत्यादिकः । विभक्तिविपर्यासः । कपिः कलं कूजन्ति पिकोलं काममदहदित्यादिकः । वर्णविपर्यासवचनं प्राकृतपैशाचिकद्राविडादिभाषावचनम् । आदिशब्देन तेणानकृत्तद्धितसमासविपर्यासमाह । एवमपि लिङ्गादिविपर्यासे सत्यपि । न वाच्यमिति सम्बन्धः । दुर्ज्ञानं ज्ञातुमशक्यम् । समानसमयत्वं बुद्धिविशेषसाम्यम् । प्रथमत एव कथारम्भात् प्रागेव ॥

त्रिभङ्ग्यन्तरमुक्ते ऽपि प्राश्निकैः प्रतिवादिना ॥ ७ ॥

वाक्यमज्ञायमानार्थमविज्ञातार्थमुच्यते ।

वादिना त्रिभङ्ग्यन्तराभिधाने ऽपि प्राश्निकैः प्रतिवादिना चाविज्ञायमानार्थमविज्ञातार्थं नाम निग्रहस्थानं भवति । तदुक्तम् । परिषत्प्रतिवादिभ्यां त्रिरभिहितमपि अविज्ञातमविज्ञातार्थमिति। वादिना त्रिरभिहितमपि परिषत्प्रतिवादिभ्यामर्थवत्तयाऽविज्ञातमविज्ञातार्थमित्यर्थः । तच्च त्रिविधम् । स्वतन्त्रमात्रप्रसिद्धम् रूढिमनपेक्ष्य योगापेक्षया प्रवृत्तम् निर्णयोपायप्रकरणाद्यभावेन संशयाक्रान्तं चेति । तत्राद्यं स्फ्यकपालपुरोडाशदशापवित्रादिमीमांसकानां पञ्चस्कन्धद्वादशायतनचतुरार्यसत्येत्यादि बौद्धानाम्।

त्रिभङ्ग्यन्तरमेकस्य वाक्यस्य त्रिप्रकारमेकार्थवाक्यत्रितयं वा । प्राश्निकैः सभ्यत्वेन वृत्तैः । प्रकरणाद्यभावेन प्रकरणौचित्यादिप्रस्तावाभावेन । यज्ञपात्रविशेषाः स्फ्यकपालादयः । पुरोडाशं होमद्रव्यम् । दशापवित्रं गृहसम्मार्जनं वस्त्रम् । आदिशब्देन चमस(?) उपलादि गृह्यते । पञ्चस्कन्धेति। रूपवेदनाविज्ञानसंज्ञानसंस्काराः पञ्चस्कन्धाः । षडिन्द्रियाणि षड्विषयाश्च द्वादशायतनानि। आचार्यस्य शुद्धोदनेः चत्वारि सत्त्वानि दुःखसमवायनिरोधमार्गः श्रवणमनननिदिध्यासनतत्त्वज्ञानानि भा-

द्वितीयं तु पयःपयोधिसंभूताकान्तपदवैशेषिकधर्मः पूर्वैकावधिपदार्थोपलक्षितवस्तुसत्तावान् नियतपूर्वकालवर्तिपदार्थसमवेतत्वात् पाकव्यापारनिष्पन्नसंयोगासमवायिकारणद्रव्यवदिति । तृतीयं तु श्वेतो धावतीति तत्राद्यं परसिद्धान्तपरिज्ञानशौण्डीर्याभिमानेनोभयानुमत्या कदाचिदुपादीयेतापि उत्तरं तु द्वयं सर्वथा अनुपादेयमेव। अन्यथा प्रतिवाद्यपि वैयात्यात्तादृशमुपाददानो न निगृह्येतेति कथाभासप्रबन्धः स्यात्। तर्हि किं त्रिरभिधानापेक्षया प्रथमत एवाविज्ञाते तयोद्भाव्यतामिति चेत् न अनवधा-

---

दिक्षणसंवृत्त्यादिकं गृह्यते। द्वितीयं केवलयौगिकवचनं पयःपयोधीति पयःपयोधिसम्भूता क्षीराब्धिजाता लक्ष्मीः तस्याः कान्तो विष्णुः तस्य पदं वियत् तस्य वैशेषिकधर्मः शब्दः पूर्वैकावधिपदार्थः प्रध्वंसाभावः तदुपलक्षितवस्त्वनित्यं तत्सद्भावः अनित्यत्वं तद्वान् अनित्यत्वधर्मयुक्तो भवितुमर्हतीत्यर्थः। नियतपूर्वकालवर्ती पदार्थ उपादानकारणं तत्र समवेतत्वात् कार्यत्वादित्यर्थः। पाकव्यापारेति उदाहरणार्थं कुलालादिव्यापारसंजातावयवसंयोगासमवायिकारणघटादिवदित्यर्थः। श्वेतो धावतीत्यत्र संशयाक्रान्तत्वं धवलः कश्चिद्द्रवादि धावतीति श्वा इतो देशान्तरं प्रति धावतीत्यनयोरर्थयोरन्यतरनिर्णायकाभावाद् दुष्टत्वम्। आद्यं स्वीयमतसिद्धार्थवचनम्। शौण्डिर्यं कौशलम्। वैयात्यात् सामर्थ्यात्। परि-

मादिशङ्कानिराकरणाय प्राश्निकैरपेक्षणात् । तर्हि कुतोऽयमिति नियमः । ततः परमज्ञानस्योक्तिदोषहेतुकत्वविनिश्चयेन परिषदानपेक्षणात् । न हि परिषदपेक्षया वादी पुनरभिधत्ते नावधत्ते चेति संभवति । न च विदुषी परिषद्भूयोभूयः सम्यगुक्तमपि नावगच्छति । न च वीतरागद्वेषेयमवगते ऽप्यनवगतिमाविष्करोति । अतस्त्रिरिति नियम इत्याचार्याणामाशयः । परिषदनुज्ञोपलक्षणं त्रिरभिधानमिति भूषणकारः । चतुरभिधाने ऽपि न कश्चिद्दोष इति वदतस्त्रिलोचनस्यापि स एवाभिप्रायः । त्रिरभिधानं च पूर्वोक्तस्यैव वाक्यस्येति केचित् । अन्ये तु तस्मिन्नेवार्थे वचनभङ्गिभेदेनेति । तदभिप्रायेणात्रोक्तं त्रिभङ्ग्यतरमिति । अन्यथा त्रिरित्येवावक्ष्यदिति पराज्ञानापादनव्यामोहादिनास्योक्तिसम्भवः । अत्र च लोकरूढं गमितयोगं

हरति । ततः परमज्ञानस्येति । निरुक्ते ऽप्यनवधानशङ्का भवत्वित्यत्राह । न हि परिषदपेक्षयेति । न हि सम्भवतीति सम्बन्धः । असम्भवमेवाह । न च विदुषीति । स एवाभिप्रायः चतुरभिधाने ऽपीत्यपिशब्दयोगात् त्रिरेति नियम एवाभिप्राय इत्यर्थः । त्रिरित्येव त्रिरुक्ते ऽपीत्येव । पराज्ञानेति । परमज्ञं करिष्यामीति भ्रान्त्या लोकरूढं लोकप्रसिद्धार्थं गमितयोगम् अवयवशक्त्यनुसारेणावगमितयोगम् ।

प्रकरणादिसध्रीचीनं निरस्तदोषमेव वाक्यं ब्रूयादिति रहस्यम् ॥ ७ ॥ ऽऽ ॥

पदजातं वाक्यजातमनन्वितमपार्थकम् ॥ ८ ॥

गुणप्रधानभावेनानन्वितार्थं पदजातं वाक्यजातं वापार्थकं नाम निग्रहस्थानमिति । तदुक्तम् पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकमिति । पौर्वापर्यं विशेषणविशेष्यभावः तस्यायोगो नैराकाङ्क्ष्यम् । तस्मादनन्वितार्थमपार्थकमित्यर्थः । न चेदं निरर्थकं वाचकत्वात् । न चार्थान्तरम् अन्वयाभावात् । सर्वथाप्यसम्भवदन्वयम् यथा कुण्डमजाजिनं फलं पिण्ड इति । दश दाडिमानि षडपूपा इति च । व्यवधानादनन्वयं यथा ओदनं सरसि भुक्त्वा स्नातो यातीति ।

प्रकरणादिसध्रीचीनम् अर्थनिर्णायकप्रकरणलिङ्गादिसहितम् ॥ ७ ॥ ऽऽ ॥

गुणप्रधानभावेन विशेषणविशेष्यभावेन । अनपेक्षणमनभिमतार्थत्वादिदं वाक्यं निरर्थकान्तर्भूतमित्याशङ्क्याह । न चेदमिति । प्रस्तुतानुपयुक्तवचनत्वादिदमप्यर्थान्तरान्तर्भूतमित्यत्राह । न चार्थान्तरमिति । पललं मांसं पलालं वा । वाक्ययोरनन्वयमुदाहरति दश दाडिमानि षडपूपा इत्यादि । व्यवधानादनन्वयमाकाङ्क्षणीयस्य पदस्य दूरस्थत्वेन झटित्यस्पर्शान्वयम् । सरसि स्नात्वोदनं भुक्त्वा यातीत्यन्वयः । विकल्पशेषादनन्वयं भवतीति सम्बन्धः ।

विकल्पशेषानन्वयम् संभाव्यमानसर्वान्वयप्रकारनिरासे तदनभ्युपगमाद्भवति । तत्रान्यतमान्वयाभ्युपगमे तु तदन्वयोक्तखण्डनमेव निग्रहः । अत्रोत्तरयोः पराज्ञानापादनव्यामोहात् प्रमादाच्चोक्तिसंभवः । प्रथमस्य वक्तृकौशलेनापि संभवः यथा नित्या वेदाः अनादिश्च संसारः अकर्तृकं च क्षित्यादि जगद्वैचित्र्यं च न निर्हेतुकमिति । अत्रान्वितमेव वदेदित्युपदेशः ॥

विवक्षितक्रमं वादवादाङ्गावयवादिकम् ।
विपर्यस्तं वदति चेत् प्राप्तैवाप्राप्तकालता ॥९॥

आदिशब्देनात्रावयवांशं कथारम्भं च संगृह्णाति । अयमिह कथायां विवक्षितक्रमः । सभ्यानुविधेयसंवरणानन्तरं तत्सन्निधावुभयप्रसिद्धव्याकरणादिव्यवहारमभ्युपगम्य कथाविशेषादिनियमः करणीयः । ततः सभ्योपक्षिप्ते प्रतिवादिना वा पृष्टे प्रमाणमभि-

---

वाद्युक्तस्य वाक्यस्य संभावितं नानाविधमन्वयं विकल्प्य तस्य सर्वस्यान्वयस्य दोषाभिधाने सति अवशिष्टान्वयाभावादपार्थकं भवतीत्यर्थः । तत्र विकल्पितेषु मध्ये । तदन्वयोक्तखण्डनमेव तत्तदन्वयप्रकाराणामुक्तदोष एव निग्रहस्थानमपार्थकमित्यर्थः । उत्तरयोर्व्यवधानादनन्वयविकल्पशेषानन्वययोः ॥

व्याकरणादीत्यादिशब्देन प्राकृतपैशाचिकसंस्कृतपद्यबन्धादिव्यवहारो गृह्यते । कथाविशेषनियमः आवाभ्यां कथात्रये ऽन्यतमकथायामेव वक्तव्यमिति नियमः कर्तव्य

धाय संक्षेपतो विस्तरतो वा हेत्वाभासा उद्धरणीयाः। प्रतिवादिनाप्यनुभाषणपुरःसरं वादिसाधनं दूषयित्वा स्वपक्षे साधनमभिधेयम् तत आभासोद्धारः कर्तव्यः वितण्डायां तु दूषणमात्र एव पर्यवसातव्यमिति। तत्र प्रथमं साधनमभिधाय पश्चाद्व्यवहारादिकं नियच्छतः कथारम्भविपर्यासः। आभासोद्धारानन्तरं साधनं प्रयुञ्जानस्य वादाङ्गविपर्यासः। प्रतिवादी तु यदि स्वपक्षसाधनानन्तरं परपक्षमुपालभते तदा वादविपर्यासः। अवयवविपर्यासस्तु कृतकत्वाच्छब्दोऽनित्य इति। अनित्यः शब्द इत्यवयवांशविपर्यासः। एवं वादजल्पयोः पञ्चविधो विपर्यासः। इतरत्र चतुर्विध

इत्यर्थः। सभ्योपक्षिप्ते त्वमेनं प्रत्यमुमर्थं साधयत्विति सभ्यैरुपस्थापिते ऽर्थे न तु स्वाभिमत इत्यर्थः। प्रतिवादिना वा सभ्यैरुपस्थापिते ऽप्यस्मिन् साध्ये किं प्रमाणमिति प्रतिवादिनापि पृष्टे ऽर्थे। यद्वा वादकथायां त्वदीये साध्ये किं प्रमाणमिति प्रतिवादिनापि पृष्टे ऽर्थे। अनुभाषणपुरःसरं वाद्युक्तं सकलं स्वदूष्यमात्रं वानुभाष्येत्यर्थः। अभिधेयं वक्तव्यम्। दूषणमात्र एवेति। वितण्डायां प्रतिवादिनः स्वपक्षासद्भावे ऽपि तस्य साधनाभावाद्वादिसाधनदूषणमेव कर्तव्यमित्यर्थः। व्यवहारादिकमिति। व्यवहारोऽत्र संस्कृताद्यन्यतममेवावाभ्यां व्यवहर्तव्यमिति निश्चयः। आदिशब्देन सभ्यानुविधेयवरणादिकं गृह्यते। अनित्यः शब्द इत्यवयवांशविपर्यासः स च

इति। केचित्तु प्रतिवाद्युद्भावित एवाभास उद्धरणीयः साधनाभिधानानन्तरं स्वयमेवाभासोद्धारे सत्यनवस्थाप्रसङ्गात् । तथा च न वादाङ्गविपर्यास इत्याचक्षते। आचार्यास्तु व्याघातावधिराशङ्केत्यनवस्थापरिहारं पश्यन्तः प्राचीनमेव पक्षमुररीकुर्वन्ति । भूषणकारस्तु विपर्ययेणार्थप्रतीतिसम्भवादपशब्दवन्नियमकथायामेवैतन्निग्रहस्थानमिति मन्यतेस्म । तदयुक्तम् । अनुपक्षिप्ते साधने निराश्रयदोषोद्धारासम्भवादुपक्षिप्तं दूष्यमदूषयित्वा प्रतिवादिनोपि स्वपक्षसाधनस्यानर्हत्वादवयवतदंशयोः क्रमावश्यम्भावस्य प्रथमाध्याये

धर्मिणि धर्माश्चिन्त्यन्त इति न्यायात् सिद्धधर्मिणमुद्दिश्य तत्राप्रसिद्धसाध्यधर्मविधिरुचितः अत्र तथाकरणात् प्रतिज्ञांशविपर्यास इत्यर्थः। इतरत्रेति । वादविपर्यासाभावात् वितण्डायां चतुर्विधविपर्यास एवेत्यर्थः। अनवस्थाप्रसङ्गात् प्रतिवाद्यभिमतदूषणजातमाशङ्क्य समाधानेन कथाप्रबन्धानुच्छेदप्रसङ्गादित्यर्थः । व्याघातावधिराशङ्केति । यावत् न स्ववचनव्याहतिप्रसक्तिस्तावदेवाशङ्का प्रवर्तते तत आशङ्कानवस्थानं न प्रसज्यत इति पश्यन्त इत्यर्थः। विपर्ययेण कथारम्भविपर्यासादिकरणादिना । नियमकथायां विवक्षितक्रमेणैवावाभ्यां वक्तव्यमिति नियमपूर्विकायां कथायाम् । कथामात्रस्य क्रमापेक्षास्तीत्युपपादयति । अनुपक्षिप्त इति । प्रथमाध्याय इति । प्रमाणतद्विशेषतदवयवादिलक्षणं प्रथमेध्याये क्रमेण

साधितत्वाज्ञार्थप्रतीतिसम्भावनामात्रेण प्रयोगाङ्गी-कारे कृतवासदिवादरभूतदित्यादीनामपि प्रयोग-प्रसङ्गात्। यथाकथञ्चिदर्थप्रतीतिः साध्येत्यभिमानात् सभाक्षोभाद्वास्योक्तिसम्भवः। अवयवविपर्यासवच-नमप्राप्तकालमिति सूत्रे ऽवयवशब्दः कथाभागोपलक्ष-णार्थः। अत्र चाकाङ्क्षाक्रमेण ब्रूयादिति संक्षेपार्थः॥९॥

आत्मसिद्धान्तसिद्धेषु वादाङ्गावयवादिषु।
एकस्यावचने प्राहुरन्यूनं न्यूननिग्रहम्॥१०॥

आदिशब्देनात्र कथारम्भमुपादत्ते। तेन यथा स्वसिद्धान्तेष्ववश्योपादेयत्वेन सिद्धा वादतदंशावय-वकथारम्भाणां मध्ये यस्य कस्यचिदवचने न्यूननाम निग्रहस्थानं भवति। व्यवहारनियमादिकथारम्भमकृ-त्वा साधनं प्रयुञ्जानस्य कथारम्भन्यूनम्। साधनं प्रयु-ज्याभासोद्धारमकुर्वाणस्य तत्करणेन वा साधनमप्रयु-ञ्जानस्य वादांशन्यूनम्। प्रतिवादिनोपि स्थापनामदूष-

वदता सूत्रकारेण समर्थितत्वादित्यर्थः। कृतवासेत्यादेर-र्थो मया यथावन्न तत्त्वतो ज्ञायते। कथाभागोपलक्षणार्थः कथारम्भवादतदंशावयवतदंशाख्यकथाभागमुपलक्षयती-त्यर्थः॥ ९॥

अन्यूनं सलक्षणं (?) अवयवांशन्यूनस्य हेत्वाभासरू-पत्वादत्र गणनेत्यर्थः। तत्करणेन हेत्वाभासोद्धारणेन तद-

यित्वा स्वपक्षं साधयतस्तदसाधनेन वा तां दूषयतो वादन्यूनं प्रतिज्ञादीनामन्यतमस्यावचने त्ववयवन्यूनमिति चतुर्विधमेतत् । हीनमन्यतमेनाप्यवयवेन न्यूनमितिसूत्रमुपलक्षणपरं योजनीयम् । ननु यदि सौगतो द्व्यवयवं प्रयुङ्क्ते तदा न्यूनेन निगृह्येत तत्परिहारार्थं पञ्चावयवप्रयोगे स्वपसिद्धान्तेन ततोवयवपरिमाणचिन्तायामर्थान्तरत्वप्रसङ्गः । अशक्या च सा तन्निरूपकस्याप्यनुमानस्यानिर्णीतावयवपरिमाणत्वादिति । तदेतत्प्रबोधसिद्धिकार एव परिजहार यदाह । स्वसिद्धान्तनिर्णीतप्रयोगावयवपरिमाणापेक्षया न्यूनाद्यवतार इति । अन्यत्राप्युक्तम् । आत्मसिद्धान्तसिद्धेष्विति । हन्तैवमयमपसिद्धान्त एव स्यात् । न हि सिद्धान्तविरुद्धाचरणमपसिद्धान्तः । सर्वनिग्रहस्थानानामप्यपसिद्धान्तत्वप्रसङ्गात् । अपि तु सिद्धान्तविरुद्धाभ्युपगमः । अत्र च न्यूनस्य गमकत्वानभ्युपगमे ऽपि सभाक्षोभेण स्तम्भितस्य न्यूनप्रयोगोपपत्तिः । वचनलिङ्गा हि वक्तुरभिप्राया इति न्यूनवचनेनैव तस्य गमक-

---

साधनेन स्वपक्षस्यासाधनेन । तत् स्थापनावादिसाधनमित्यर्थः । सूत्रमुपलक्षणपरं सूत्रगतावयवशब्देन कथारम्भवादवादांशा अपि लक्ष्यन्त इत्यर्थः । द्व्यवयवमुदाहरणोपनयरूपम् । अशक्या च सा अवयवपरिमाणचिन्तेत्यर्थः । न्यूनादीत्यादिशब्देन अधिकस्वीकारः । एवं स्व-

त्वाभिप्रायस्योन्नयने ऽपि तस्य जघन्यत्वेनास्यैव निग्रहहेतुत्वम् । अथवा यथावस्तु यथासिद्धान्तं व्यवहर्तव्यमिति नियमात् पूर्वं न्यूनस्यावतारः तदुत्तरं त्वपसिद्धान्तस्य न वावयवेयत्ताचिन्तायामर्थान्तरत्वमन्यतरासिद्ध्युद्भावने हेतोः सिद्धिव्युत्पादनवत् प्रकृतोपयोगात् । अत्र परिपूर्णं ब्रूयादिति संक्षेपः ॥ १० ॥

अन्वितस्योपयुक्तस्य पुनरुक्तेतरस्य या ।
कृतकार्यकरस्योक्तिरधिकं तत् प्रचक्षते ॥ ११ ॥

अन्वितमुपयुक्तमपुनरुक्तं कृतकार्यकरमभिधीयमानमधिकं नाम निग्रहस्थानम् । अन्वितत्वादिविशेषणैरपार्थकार्थान्तरपुनरुक्तानां व्यवच्छेदः । हेतूदाहरणाधिकमधिकमितिसूत्रं दूषणानुवादाधिकयोरप्युपलक्षणम् । हेतूदाहरणग्रहणेनावयवान्तराधिक्यासम्भवं सूचयति । न हि प्रतिज्ञानिगमनयोरधिकं

सिद्धान्तसिद्धावयवन्यूनादिवचने । जघन्यत्वेन न्यूनप्रतीत्यनन्तरभावित्वेन । अन्यतरासिद्धीरिति । शब्दो नित्यः कृतकत्वादित्यत्र मीमांसकेनासिद्धो हेतुरित्युक्ते शब्दः कृतकोऽनभिव्यञ्जकप्रयत्नानन्तरभावित्वादित्यर्थः ॥ १० ॥

अन्वितत्वादिविशेषणैरिति । प्रकृतार्थासङ्गतवचनमपार्थकं सङ्गतौ सत्यामपि प्रकृतानुपयोगिवचनमर्थान्तरम् प्रकृतान्वये उपयोगे सत्येककार्यविषयं पुनर्वचनं पुनरुक्तम् उक्तरूपत्रयसद्भावे ऽपि सप्रयोजनत्वात् अनुवादो न निग्रहः तत एतैश्चतुर्भिर्विशेषणैः एतच्चतुष्टयं व्यवच्छिन्नमि-

सम्भवति । एकार्थत्वे पुनरुक्तिप्रसङ्गात् । अन्यथा प्रकृतासङ्गतार्थान्तरत्वप्रसङ्गात् । अपरथापार्थकत्वप्रसङ्गाच्च उपनयाधिकं तु हेत्वधिकान्न विशिष्यते । एतच्च विशेषतः स्वशब्देनोपादानात् सामान्यत आदिशब्दोपादानाच्च द्विधा वर्तते । यथा अग्निमान् पर्वतः धूमवत्त्वात् आलोकवत्त्वादिति स्वशब्देन धूमादिमत्वादित्यादिशब्देन यथा महानसः यथा आपाक(?) इति । यथा महानसादिरिति च । असिद्धो हेतुरनैकान्तिकश्चेत्यादि । अनुवादाधिकं तु प्रकृतानुपयोगादर्थान्तर एवान्तर्भावयन्ति केचित् । परिषत्प्रतिवादिजिज्ञासानुरोधस्य कथाङ्गत्वेनाप्रतिपत्तेः । अनङ्गत्वेन वा विप्रतिपत्तेस्तदनपेक्षितमधिकं ब्रुवाणस्याप्रतिपत्तिविप्रतिपत्ती स्त एवेत्यस्य निग्रहस्थानत्वं युक्तमेव । परिषज्जिज्ञासायां यावत्स्फूर्ति वक्तव्यम् । न च तत्रापि सामस्त्यनियमाभ्युपगमोऽसर्वज्ञेन शक्यः । दूषणाभि-

---

त्यर्थः । अन्यथा भिन्नार्थत्वे प्रकृतानुपयुक्तार्थत्व इति यावत् । अपरथा अनुपयुक्तत्वे प्रकृतानन्वये च सतीत्यर्थः । एतच्च अधिकारभृन्निग्रहस्थानम् । अनैकान्तिकश्चेत्यादीत्यादिशब्देन असिद्धत्वादिदोषवान् हेतुरित्यादिकं गृह्यते । वाग्मित्वातिशयज्ञापकस्याधिकस्य कथं निग्रहस्थानत्वमित्याशङ्क्याह । परिषत्प्रतिवाद्यविज्ञापितं न तत्रापि परिषदनुज्ञासद्भावे ऽप्येकस्य साध्यसाधनान्तरसद्भावात्

धाने तु शक्यत एव तेषां परिमितत्वादिति । अत्र चाकृतकरमेवं वदेदिति संग्रहः ॥ ११ ॥

शब्दादाक्षेपतो वापि प्रतीतस्यैव कीर्तनम् ।
प्रयोजनविनाभूतं पुनरुक्तमिति स्थितिः ॥ १२ ॥

प्रतीतस्यैवार्थस्य प्रयोजनमन्तरेण पुनरपि शब्देन प्रतिपादनं पुनरुक्तम् । सप्रयोजनं पुनर्वचनमनुवादः । यथा निगमने पक्षस्य । तद्व्यवच्छेदार्थमुक्तं प्रयोजनविनाभूतमिति न केवलं शब्दतः प्रतिपन्नस्यैवाक्षेपतः प्रतिपन्नस्यापि पुनर्वचनं पुनरुक्तमिति दर्शयितुमाक्षेपत इत्युक्तम् । ततश्च पुनःशब्देनोक्तेरावृत्तिमाह । किं तु प्रतीतिरित्युक्तं भवति । कीर्तनमितिशब्देनैव प्रतिपादनं विवक्षितम् । तेनार्थादापन्नस्य पुनरर्थादापत्तिर्न दोषायेति दर्शितं भवति । त्रिविधं चैतत् । शब्दपुनरुक्तमर्थपुनरुक्तमपक्षेपपुन-

---

तत्सर्वमहं वदामीति प्रतिज्ञातुमनीश्वरेण न शक्यमित्यर्थः ॥ ११ ॥

प्रतीतस्यैव परिषदा प्रतिवादिना वा अवधानेन ज्ञातस्य । ततश्च शब्दतः तात्पर्यतश्च सिद्धस्य पुनरपि शब्देन प्रतिपादनं पुनरुक्तमिति स्थितत्वाच्चेत्यर्थः । एवं वाक्ये ऽर्थापत्त्याख्ये ऽनुमानभङ्गे एवं पुनरुक्तिरुदाहर्तव्येति शेषः । पुनरुक्तिलक्षणे सूत्रान्तरमाह । अर्थादापन्नस्येति । प्रतिपन्नार्थस्य पुनर्वचनं पुनरुक्तिरिति वक्तव्ये सति शब्दावयवयोः

रुक्तं चेति । तत्राद्यं यथा अनित्यः शब्दोऽनित्यः शब्द इति । द्वितीयं तु पर्यायेणाभिधानं यथा अनित्यः शब्दः विनाशी ध्वनिरिति । तृतीयं तु अग्निनोष्णेन युक्तः पर्वतः उष्णेनाग्निना युक्त इति च । एवं वाक्येऽपि जीवन् देवदत्तो गृहे नास्तीत्युक्त्वा बहिरस्तीत्यादि । तदेतत् सर्वमुक्तम् । शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादादिति अर्थादापन्नस्य स्वशब्देन पुनर्वचनमिति च नियमकथायामेव पुनरुक्तं निग्रहस्थानं नान्यत्रेति विश्वरूपादयः । शब्दपुनरुक्तस्य भेदेन निर्देशोऽप्यर्थभेदे ऽप्युक्तशब्दो न पुनर्वक्तव्य इति नियमकथायां शब्दमात्रपुनरुक्तिरपि निग्रहस्थानमिति सूचयितुमिति विश्वरूपजयन्ताविति ॥ १२ ॥

ज्ञातार्थं प्राश्निकैर्वाक्यं त्रिरुक्तं नानुभाषते ।
योनुद्भाव्य स्वमज्ञानं तस्यैवाननुभाषणम् ॥ १३ ॥

प्राश्निकैर्ज्ञातार्थमितिवचनात् प्रतिवादिज्ञानमविवक्षितमिति दर्शयति । त्रिरुक्तमित्युच्चारणयोग्यतामात्रप्रदर्शनपरम् न न्यूनाधिकसंख्याव्यवच्छेदपरमुक्तं वादिनेति शेषः । तदनुपादानं तु मन्दस्य

पुनर्वचनमिति सूत्रकारस्य तात्पर्यमाह । शब्दपुनरुक्तस्येति ॥ १२ ॥

उच्चारणयोग्यतामात्रं सभायामशक्तस्यासत्येवं दूषणादिव्यतिरिक्तत्वमात्रम्(?)। न न्यूनाधिकेति। प्रथमत एव परिषत्प्रतिपत्तिसिद्धेरविज्ञातार्थवन्न त्रिरिति नियम इत्यर्थः। तदनुपादानं मूलपद्यकारेण वादिनेत्यनुक्तिः। अन्यथा

कदाचित् परिषदाप्यनूद्य दीयत इति सूचनार्थम्। अज्ञानानुद्भावनवदविच्छेदेऽपि कथायां विवक्षितः। अन्यथा विक्षेपस्यैवापातात्। तेनायमर्थः। वादिनोक्तस्य प्राश्निकैर्विज्ञातार्थस्य पुनर्वादिना परिषदा वानूद्य दत्तस्योच्चारणयोग्यस्याज्ञानमनाविष्कुर्वता कथामप्यविच्छिन्दता यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति। न चात्राज्ञानाप्रतिभयोरवसरः ज्ञातार्थस्य स्फुरदुत्तरस्यापि सभाक्षोभेण वाक्कुण्ठत्वेन वाप्यननुभाषणोपपत्तेः। तयोस्तदानीमनिश्चयादननुभाषणस्य च योग्यानुपलब्धस्यैव निर्णीतत्वात्। अत्र च नञः पर्युदासवृत्तित्वाभ्युपगमात्तदित्यादिसर्वनाम्नानुवादो दूष्यैकदेशानुवादो यथानुवादः केवलदूषणोक्तिः स्तम्भनं चेति पञ्चाप्यननुभाषणत्वेन सङ्गृह्यन्ते। सर्वं चैतन्निग्रहस्थानमेव तूष्णीम्भावे दूषणाश्रयोपादानस्याङ्गत्वाप्रतिपत्तेः दूषणमात्रवचने निराश्र-

---

कथाविच्छेदे सति। तेन एवं यद्यस्यावयवार्थनिर्णयेन। कथामप्यविच्छिन्दता यत्किञ्चिद्वचनेन कथाभासप्रबन्धं कुर्वता प्रतिवादिनेति शेषः। वाक्कुण्ठत्वेन सदपातिना यथा यथा व्यवहारवैधुर्येण (?)। तयोस्तदानीमिति। अज्ञानाधिकारात् केवलं तूष्णीम्भावाभावाच्चाज्ञानाप्रतिभयोरननुभाषणसमये निर्णयाभावादित्यर्थः। योग्यानुपलब्धस्य श्रोतुं योग्यस्यानुभाषणस्याश्रुतत्वेन सिद्धस्य। पर्युदासवृत्तित्वं अनुभाषणव्यतिरिक्तवाचकत्वम्। दूषणाश्रयोपा-

यद्दूषणस्यादूषकत्वेनासाधनोपादानात् अयथानुवादे च दूषणोपादानाद्विप्रतिपत्तेः । एकदेशानुवादे च तथा एकदेशदूषणे तु समुदायस्यादूषितत्वात् । न ह्यनित्यत्वे साध्ये ऐन्द्रियकत्वमात्रस्यानैकान्तिकत्वेन गुणत्वेन विशेषितस्याप्यनैकान्तिकता स्यात् । सर्वनाम्नानुवादे ऽपि प्रकृतस्य भूयस्त्वेन सन्देहानतिक्रमेण तूष्णीम्भावाविशेषात् । न च दूषणस्वरूपयोग्यतया दूष्यविशेषनिश्चयः । असिद्धत्वादिना सर्वस्यापि दूष्यत्वात् । योग्यमेवायं ब्रवीतीत्यनिश्चयाच्च । दूष्यमात्रमेवानुभाषणीयम् न तु सर्वं वादिवाक्यम्

दानस्य वादिवाक्ये दूष्यमात्रानुवादस्य । असाधनोपादानार्थं दूष्यप्रतिक्षेपासमर्थदूषणोपादानरूपविप्रतिपत्तेरित्यर्थः । व्यधिकरणत्वेन वादिसाधनदूषणबुद्ध्या तद्व्यतिरिक्तमनूद्य दूषणवचनादित्यर्थः । तथेत्यविशिष्टप्रतिपत्तिमुपपादयति । गुणत्वेनेति । गुणत्वे सत्यैन्द्रियकत्वादित्युक्तस्येत्यर्थः । सन्देहानतिक्रमेण प्रकृतेषु मध्ये अस्यायं दोषो नान्यस्येति निर्णायकाभावेन । न च दूषणस्वरूपेति । विप्रतिपन्नमुपलब्धिमत्कारणमित्यत्र विप्रतिपन्नस्यानेकत्वे ऽपि यथा साध्यविशेषोपादानेन तद्विशेषसिद्धिरेवं दूषणस्वरूपविशेषसामर्थ्याद् दूष्यविशेषसिद्धिरिति न वाच्यं दूषणस्य साध्यवदन्यताश्रयावृत्तित्वाभावादित्यर्थः । योग्यमेवेति । दूषणयोग्यं प्रत्ययं प्रतिवादी दूषणं ब्रूते नान्यं प्रतीति वादिनो निश्चयाभावाच्च न विशेषनिश्चय इति

अनुपयुक्ताभिधानेनार्थान्तरत्वप्रसङ्गात् । प्रौढिप्रकटनाय सर्वानुभाषणनियमे तदकरणमेव निग्रहहेतुर्भवति । न च तेनैव वादिवाक्येनानुभाषणीयमिति नियमः । वाक्यान्तरेणानुभाषणे ऽपि तत्प्रयोजनसिद्धेः तत्प्रसिद्धपदैरेवानुवादेनानुभाषणमित्यननुभाषणाभासं दर्शयद्भिराचार्यैरेव वादिप्रसिद्धपदैरप्यनुभाषणस्याङ्गीकृतत्वाच्च विज्ञातस्य परिषदा त्रिरभिहितस्याप्रत्युच्चारणमननुभाषणमिति सूत्रं सुगममेवेति ॥ १३ ॥

ज्ञाते ऽपि वादिवाक्यार्थे प्राश्निकैस्तत्र चेत् परः ।
स्वाज्ञानमुद्भावयति तदाज्ञानेन निग्रहः ॥ १४ ॥

वादिना त्रिरुक्ते प्राश्निकैर्ज्ञातार्थे सत्यपि वादिवाक्ये प्रतिवादी स्वाज्ञानमाविष्करोति न ज्ञायते मयेति तदा तस्याज्ञानं नाम निग्रहस्थानं भवति । अज्ञानानाविष्करणे त्वननुभाषणमेव निश्चितत्वादुद्भाव्यम् । अज्ञातं चाज्ञानमिति सूत्रे चकारः परिषद्विज्ञानं वादित्रिरभिधानं च समुच्चिनोति । अविज्ञातं वादिवाक्यं येन तस्याज्ञानमिति । अथवा भावे क्तोत्पत्तिरङ्गीकार्या यस्य वादिवाक्यार्थे अज्ञानं तस्याज्ञानमित्यर्थः ॥ १४ ॥

पूर्वेण सम्बन्धः । तत्प्रसिद्धपदैः वादिवाक्यव्यतिरिक्तपदैः । अननुभाषणाभासं निरनुयोज्यानुयोगविशेषम् ॥ १३ ॥

वादिवाक्यमर्थप्रतिपत्तये विशेषः । भावे क्तोत्पत्तिर्विशेष्यवाचकस्य शब्दस्य विशेषण धर्मपरत्वम् ॥ १४ ॥

वाद्युक्तस्यानूदितस्य प्रतिवादी यदोत्तरम् ।
प्रतिपत्तुं न शक्नोति तदास्याप्रतिभा भवेत्[1] ॥१५॥

वादिनोक्तस्य स्वेन चानुभाषितस्य वाक्यार्थस्य प्रतिषेधरूपमुत्तरं यदा प्रतिवादी न प्रतिपत्तुमीष्टे तदा तस्याप्रतिभा नाम निग्रहस्थानं भवति । तूष्णीम्भाववद्राजवार्त्तावतरणश्लोकादिपाठकेशादिविरचनगगनसूचनभूतलविलेखनादि यत् किञ्चित् क्रियान्तरकरणेऽपि निगृह्यत एव न त्वपस्मारभूतावेशादिनिमित्तेषु तेषामपकर्षासूचकत्वात् । भूषणकारादयस्तु श्लोकादिपाठे अर्थान्तरापार्थकादिप्रसङ्गात् तूष्णीम्भावमेवाप्रतिभानिग्रहहेतुमाहुः । असत्साधने पर्यनुयोज्योपेक्षणसहचारिणी । इतरत्रेयमसङ्कीर्णा न चावश्योद्भाव्या उत्थितस्वेदादिना सुव्यक्तत्वात् । कथावसाने तिरोधानायोगाच्च उत्तरस्याप्रतिपत्तिरप्रतिभेति सूत्रमुक्तार्थमेवेति ॥ १५ ॥

गगनसूचकं गगनगतकाष्ण्र्यादिविशेषप्रदर्शनम् । निगृह्यत एव । अप्रतिभयेति शेषः । श्लोकपाठ इति । पठितस्य श्लोकादेः प्रकृतार्थान्वये सत्यनुपयुक्तत्वेनार्थान्तरत्वमनन्वये ऽपार्थकत्वं कस्यचिदर्थस्य वाचकत्वे निरर्थकत्वमित्यादिप्रसङ्गादित्यर्थः । असत्साधन इति । असङ्कीर्णा न निग्रहान्तरसहिता । उत्थितपराजयप्रकाशकविषादगर्वस्मितस्वेदादीत्यादिशब्देन देहकम्पगद्गदत्वादिकं गृह्यते ॥ १५ ॥

---

(१) भवेदप्रतिभा तदा—पा॰ A पु॰ ।

कथामभ्युपगम्यैव तद्विच्छेदाय कस्यचित् ।
व्याजस्य वचने प्राहुर्विक्षेपं निग्रहग्रहम्[1] ॥ १६ ॥

कथामुपक्रम्य परिषदि श्रोतुमेकतानमनसि प्रतियोगिनि च दत्तावधाने सम्प्रति मे महत्प्रयोजनमस्ति श्वः परश्वो वा कथयिष्यामीति कस्यचिद्व्याजस्य वचने विक्षेपलक्षणं निग्रहस्थानमाहुराचार्याः । अप्रतिभायां वृथाचेष्टाभिरिवात्रापि व्याजोऽन्तरेणाशक्तिरुन्नीयत एव । अत्र च ताम्बूलभक्षणोद्गिरणमूत्रोच्चारणाद्यावश्यकमनुष्यधर्मा व्याजा भवन्ति सर्वप्राणिधर्मत्वात् कथाविच्छेदाहेतुत्वाच्च । उपक्रमादारभ्य कथाया यावत् समाप्ति चास्यावसरः । अवश्योद्भाव्यं चैतत् अन्यथा अहङ्कारखण्डनाभावात् । कथाविच्छेदाहेतुत्वात् कार्यव्यासङ्गात् कथाविच्छेदो विक्षेप इति सूत्रं सुगममेव ॥ १६ ॥

अनिष्टप्रमतोऽन्येषामिष्टमापादयेद्यदि ।
मतानुज्ञेति तस्य स्यान्निग्रहस्थानमुद्भटम् ॥ १७ ॥

निग्रहग्रहमपजयाख्यमपि वाच्यम् ।

कथामुपक्रम्य अन्येन वादं कर्तुं सभामध्यमारुह्य । मूत्रोच्चारणादीत्यादिशब्देन विवेकास्फुरणजकासष्ठीवनादिकं गृह्यते । इयं वादिप्रतिवादिनोर्द्वयोरपि सम्भवतीत्याह । उपक्रमादारभ्येति ॥ १६ ॥

---

(१) विक्षेपं नाम निग्रहम्—पा॰ B पु॰ ।

स्वसिद्धान्ते परेणापादितं दोषमनुद्धृत्य परस्यानिष्टबुद्ध्या इष्टप्रसञ्जनं मतानुज्ञेत्यर्थः । तथा च सूत्रम् । स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञेति । यथा केनचिदात्मनश्चोरत्वमभ्युपगम्य पुरुषत्वाच्चोरस्त्वमसीत्युक्ते तत एव हेतोस्त्वमपि चोर इति प्रसञ्जनम् । न ह्यनेनात्मनश्चोरत्वं परिहृतम् । न ह्येकमिन्धनमग्निसम्बद्धं दग्धमित्यन्यन्न दह्यते । न चायं प्रसङ्गः इष्टापादनत्वात् । तथा अनित्यः शब्दः कार्यत्वादित्युक्ते तत एव हेतोर्घटोऽप्यनित्यः स्यादित्यादीन्यप्युदाहरणानि । अत्रानिष्टमेव परस्य ब्रूयादिति रहस्यम् । भूषणकारः पुनरेवं व्याख्यातवान् । यस्तु स्वपक्षे दोषमनुद्धृत्य केवलं परपक्षे दोषं प्रसञ्जयति स तु परापादितदोषाभ्युपगमात् परमनुजानातीति मतानुज्ञया निगृह्यत इति । अत्र स्वदोषपरिहारेणैव परस्य दोषं प्रसञ्जयेदिति सङ्क्षेप इति ॥ १७ ॥

अनिष्टं प्रतिवादिनोभिमतं स्वपक्षे परोक्तदोषमनुद्धृत्येति शेषः । अनेन त्वमपि चोर इति वचनेन न हि दूष्यत इति सम्बन्धः । न चायं प्रसङ्गः त्वमपि चोर इति वचनं प्रस्तुतानुमानस्यानिष्टप्रसङ्गाख्यप्रतिकूलतर्को न भवतीति परस्य स्वचोरत्वस्येष्टत्वादित्यर्थः । आदिशब्दादीश्वरो न कर्ता आत्मत्वाज्जीववदित्युक्ते तर्हि तत एव जीवोऽप्यसर्वज्ञः स्यात् । क्षित्यादिकं नेश्वरकर्तृकं कार्यत्वाद् घटवदित्युक्ते तर्हि तत एव घटः सावयवी स्यादित्यादिकं

अवश्योद्भाव्यमापन्नकालं निग्रहमागतम् ।
अनुद्भावयतः पर्यनुयोज्योपेक्षणं भवेत् ॥ १८ ॥

पर्यनुयोज्योपेक्षणव्यतिरिक्तनिग्रहस्थानप्राप्तौ तदनुद्भावनमेव निग्रहहेतुः । न स्वोपेक्षणानुद्भावनमपि । तथा सति द्वयोरपि वादिनोर्निग्रहानन्त्यप्रसङ्गात् प्रयोजनाभावाच्च नोपेक्षणानुद्भावनमुद्भावनीयम् तथानेकदोषसन्निपाते यदेकोद्भावनेनेतरोपेक्षणं तदप्यनुद्भाव्यमेव । अन्यथाधिकत्वप्रसङ्गात् । तेनोक्तमवश्योद्भाव्यमिति पुरःस्फूर्त्तिकानधिकृतोद्भावितानां झटिति संवरणेन तिरोहितावसराणां च उत्तरकाले

गृह्यते । एवं व्याख्यातवान् सूत्रमेवं व्याकृतवान् ॥ १७ ॥

तथा सतीति । पर्यनुयोज्योपेक्षणानुद्भावनस्यापि पर्यनुयोज्योपेक्षणत्वेन प्रथमस्खलनप्रवृत्तयोर्वादिप्रतिवादिनोस्तद्रूपनिग्रहपरम्परा प्रसङ्गादित्यर्थः । प्रयोजनाभावाच्चेति । दुष्टत्वेन पर्यनुयोज्यमात्रमुपेक्षितवानिति हि तदुद्भावनं तदा स्वदोषस्यापि कीर्तनादुभयोर्निगृहीतत्वेन जयपराजयनिरूपणप्रयोजनासिद्धेश्च । उपेक्षणस्योद्भाव्यत्वमेव न स्वतस्तदुद्भावनं निग्रहकारणमित्यर्थः (?) । अन्यथेति । दोषान्तराणामप्युद्भावने अनियमकथायां दूषणाधिकत्वप्रसङ्गादित्यर्थः । प्रयोजनाभावात् अन्योद्भावितोद्भावने स्वस्य जयपराजयाभावात् । झटिति परिहृतानामुद्भावने परस्परं पराजयाभावाच्चेत्यर्थः । उक्तार्थे निग्रहस्थान-

प्रयोजनाभावादुपेक्षणमेवोचितम् । अत एवोक्तमापन्नकालमिति । ततश्चावश्योद्भावस्योद्भावनकालमापन्नस्य यदनुद्भावनं तत् पर्यनुयोज्योपेक्षणमित्यर्थः । निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणमिति सूत्रमुक्तार्थे गमयितव्यम् । प्राप्तपर्यनुयोज्यशब्दयोरर्हत्यर्थत्वात् । न चास्याप्रतिभासङ्करः प्रतिज्ञाहान्यादिषु स्खलितोपेक्षणेन सदुत्तरमाददानस्याप्रतिभाया असम्भवात् सम्भवाच्चोपेक्षणस्य । ननु न तावदिदं वादिनोद्भाव्यं पर्यनुयोज्यं मां त्वमुपेक्षितवानसीति स्वयमेव स्वदोषोद्भावनायोगात् । नापि प्रतिवादिना आत्मनैवात्मनि ग्रहायोगात् पर्यनुयोज्यत्वज्ञाने सत्युपेक्षणायोगाच्च । सत्यम् एतदाशङ्क्य परिहृतं वाचस्पतिमिश्रैः । सभापतिना वादिप्रतिवादिभ्यां वा पर्यनुयुक्तया परिषदा तन्निग्रहस्थानमुद्भावनीयमिति । विश्वरूपजयन्तयोः पुनः परमस्य शक्तिं जिज्ञासमानेन मया आभासप्रयोगः कृतः । सोऽप्यनेन मन्द-

---

विशेषानुद्भावनं पर्यनुयोज्योपेक्षणमित्यत्र तदेवोपपादयति । प्राप्तपर्यनुयोज्येति । लक्षणगतप्राप्ततज्ज्ञानापन्नकालनिग्रहव्यवच्छेदस्य लक्ष्यगतपर्यनुयोज्यशब्देनावश्योद्भाव्येतरव्यवच्छेदस्य प्रसिद्धत्वादित्यर्थः(?) । पर्यनुयोज्योपेक्षणं नाम तं प्रति न किञ्चिद्वचनं तथा सत्यप्रतिभेदमित्याशङ्क्याह । न चास्येति । क्षुद्रस्खलनेन तदनवधार्यमिति

मतिना नोद्भावित इति वदता वादिनोद्भावनीयमिति निश्चयः। वादे द्वयोरपि निग्रहात् परिषद एव विजयः। जल्पवितण्डयोस्तु साधनाभासेनापि प्रतिवादिनोहङ्कारखण्डनाद्वादी विजयत एव। अत्र त्रिलोचनवाचस्पतिप्रभृतीनां न काचिद्विप्रतिपत्तिरिति ॥ १८ ॥

अतन्निग्रहसम्प्राप्तं तन्निग्रहनिमित्ततः।
निगृह्णतो निग्रहः स्यादयोग्यस्यानुयोगतः ॥ १९ ॥

सर्वथा निग्रहस्थानमप्राप्तो निग्रहस्थानान्तरप्राप्तावप्युद्भाव्यमाननिग्रहस्थानमप्राप्तश्चातन्निग्रहसम्प्राप्तमित्युच्यते। तमपि तेनैव निग्रहस्थानेन निगृह्णतो निरनुयोज्यानुयोगो नाम निग्रहस्थानं भवति ॥१९॥

तस्यावान्तरभेदमाह।

अप्राप्तकाले ग्रहणं हान्याद्याभास एव च।
छलानि जातय इति चतस्रोऽस्य विधा मताः ॥ २० ॥

शेषः। तस्मिन् विश्वरूपजयन्तयोर्मते कथाभेदाद्विशेषमाह। वादे द्वयोरिति। द्वयोरपि निग्रहात्। अत्र प्रस्तुतविश्वरूपजयन्तावेव ॥ १८ ॥

तेनैवाप्राप्तेन निग्रहस्थानेनैव ॥ १९ ॥

तत्र छलजाती दर्शिते । प्रतिज्ञाहान्यादीनामाभासाः प्रबोधसिद्धौ प्रपञ्चिताः । यथा अनेकविकल्पस्फुरणेन विकल्पयतोऽनिष्टकल्पत्यागेन प्रतिज्ञाहानिः । प्रकरणाद्यापन्नविशेषाविष्करणेन प्रतिज्ञान्तरम् । नञ्प्रयोगमात्रेण विरोधः । स्वारोपितानभ्युपगमेन संन्यासः । स्वयमगृहीतस्य विशेषणस्य पुनरुत्कीर्तनेन हेत्वन्तरम् । वस्तुतः प्रस्तुतानुगुणस्याप्यापाततस्तथानध्यवसायेनार्थान्तरम् । आत्मनो

अनिष्टकल्पत्यागेनेति । शब्दो नित्यः कृतकत्वादित्युक्ते शब्दस्य नित्यत्वमनित्यत्वं वा त्वया साध्यते । आद्ये विरुद्धहेतुः द्वितीये त्वसिद्ध इति प्रत्युक्ते वादिना न मया नित्यत्वपक्षोऽङ्गीकृत इत्युक्ते तर्हि प्रतिज्ञाहान्या निगृहीतोऽसीत्यर्थः । प्रकरणाद्यापन्नेति । विप्रतिपन्नशब्दो नित्य इत्युक्तेर्विप्रतिपन्नविशेषणेन नित्यत्वेन सम्प्रतिपन्नं ध्वनिमयोप्यवर्णात्मकः शब्दो नित्य इति हि साध्यते तदा प्रतिज्ञान्तरेण निगृहीतोऽसीति । नञ्प्रयोगेति । शब्दो नित्यः कृतकत्वादित्युक्ते प्रतिज्ञायां तस्मिन् हेतौ नास्ति अतः प्रतिज्ञाहेत्वोर्विरोधात् प्रतिज्ञाविरोधेन निगृहीत इति । स्वारोपितेति । शब्दो नित्यः कृतकत्वादित्युक्ते विरुद्धः कृतकत्वहेतुः कथं शब्दनित्यत्वं साधयेदित्यनुयुक्तेन वादिना न नित्यत्वमस्मत्साध्यं किं त्वनित्यत्वमित्युक्ते तर्हि प्रतिज्ञासन्न्यासेन निगृहीत इति । स्वयमगृहीतस्येति । शब्दो नित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादित्युक्ते सामान्यवत्त्वे सतीति विशेषणम् अस्ति सामान्ये व्यभिचार इति दूषितेन वादिना सामान्य-

वैयाकरणत्वेन वाचकप्रयोगे ऽपि निरर्थकम् । आत्मनः परिषदेकदेशस्य वानवबोधेनाविज्ञातार्थम् । पौर्वापर्यायोगेऽपि स्वयमप्रतिसन्धानेनापार्थकम् । अनवधानाद्विपर्ययेणाप्राप्तकालम् । अन्यत्र व्यासङ्गादश्रुतेन न्यूनम् । पार्श्वस्थाद्युक्तेन हेत्वादिनाधिकम् । श्रुतिसामान्यमात्रेण पुनरुक्तम् । तदप्रसिद्धपदैरेवापरिनुवादेनाननुभाषणम् । अनवबोधितायामपि परिषदि स्वावष्टम्भमात्रेणाज्ञानम् । उत्तरं वदतोपि स्वेदादिना प्रतिभाक्षयः । आवश्यकप्राणिधर्मेण विक्षेपः । सिद्धसाधनेन मतानुज्ञा । स्वदोषोद्भावनेन हेत्वाभासा इति निग्रहस्थानाभासाः । तथानुयोज्यत्वेपि प्रतिज्ञाहान्यादौ प्रतिज्ञान्तरादिस्थले ऽपि जातिः । वाक्छलादावपि छलत्वेनोपचाराच्छलादिसाधर्म्यसमादौ जातित्वेन प्रकरणसमादीति ॥ २० ॥

अप्राप्तकालग्रहणं तु स्वंस्वमवसरमप्राप्यातिक्रम्य वा निग्रहस्थानानामुद्भावनमिति । किमेषामुद्भावनकालो नियतः येन तदुल्लङ्घनं निग्रहहेतुः स्यात् ।

यत्वे सतीति विशेषितस्य कथं व्यभिचार इत्युक्ते तर्हि हेत्वन्तरेण निगृहीत इति । वस्तुतः प्रस्तुतो नित्यः शब्दो नित्यं कृतकत्वात् कृतकश्च शब्दः अनभिव्यञ्जकप्रयत्नानन्तरोपलब्धित्वात् न विशेषणासिद्धो हेतुः प्रयत्नस्याभिव्यञ्जकत्वे प्रतिवादिवद्युगपत्सकलशब्दाभिव्यञ्जकत्वप्रसङ्गादित्युक्ते तर्हि हेत्वन्तरमति निगृहीत इति ॥ २० ॥

ङ्गामित्याह ॥

उक्तग्राह्याः केचिदन्ये ऽनुक्तग्राह्यास्तथापरे ।
उच्यमानदशाग्राह्या इति कालस्त्रिधा स्थितः ॥ २१ ॥

नैतन्मया ज्ञायत इत्युक्तमेव ग्राह्यमज्ञानम् । तदुक्तिमन्तरेणापि जातमात्रमेव ग्राह्यं हेत्वन्तरादि । जायमानावस्थायामेव ग्राह्यमपशब्दार्थान्तरादि । तदिदानीमुपेक्षाकारणाभावादिति । उद्भावनकालस्त्रिधा व्यवस्थितः । तत्रोच्यमानग्राह्यमपशब्दादिकमुत्तरकालमुद्भावयतो निग्रहस्थानं भवति । एवमितरत्रापि दर्शयितव्यमिति । तदेतत्सर्वमभिप्रेत्योक्तम् अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोग इति ॥ २१ ॥

सिद्धान्तमेकमालम्ब्य तद्विरुद्धपरिग्रहे ।
अपसिद्धान्ततः सिद्धं निग्रहस्थानमक्षयम् ॥ २२ ॥

यस्य कस्यचिच्छास्त्रस्य सिद्धान्तमालम्ब्य कथायां प्रवृत्तायां मध्ये तत्सिद्धान्तविरुद्धार्थान्तरपरिग्रहे त्वपसिद्धान्तो नाम निग्रहस्थानं भवति । यथा एकप्रकृतयो महदादिविकारा एतद्रूपान्वितत्वात् घटवदित्युक्ते का प्रकृतिः के वा विकारा इति पृष्टः

साङ्ख्यो यदि यतः असन्तो भावा जायन्ते सा प्रकृतिः जननाशवन्तो भावा विकारा इति वदति। तदा स्वस्य सत्कार्यवादपरित्यागादपसिद्धान्त इति। न चान्यसिद्धान्तमाश्रित्य कथाप्रवृत्तिः सम्भवति। अन्यथा क्षणभङ्गसाधनं प्रयुञ्जानो बौद्धोऽस्फूर्त्तिको नैयायिकेन सिद्धसाधनतामुद्भाव्य निगृह्येतेति। न चास्य विरोधान्तर्भावः शङ्कनीयः। तस्यात्मीयवाक्यान्तरव्याघातात्मकत्वात्। अस्य च मूलाचार्यवाक्यव्याघातरूपत्वात्। न चायमागमविरोधः उभयप्रसिद्धप्रमाणभावाक्यान्तरविरोधरूपत्वात् तस्य। यथा इदानीमिव सर्वत्र दृष्टान्ताधिकमिष्यत इति वदतो मीमांसकस्य सृष्टिप्रलयप्रतिपादकवैदिकवाक्यविरोधः। स्वाभ्युपगतप्रामाण्यतीर्थङ्करवाक्यविरोधात्मकोऽयमपसिद्धान्त इति विशेषः। अस्फूर्त्तिसमये ह्यस्मत्सिद्धान्तानभिज्ञोऽयमिति प्रतिवाद्यज्ञानादन्यथा व्याख्यास्यामीति शौण्डीर्यादेकदेशिमतं तदिति वैयात्याद्वास्योक्तिसम्भवः। सूत्रं तु सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्त इति ॥ २२ ॥

हेत्वाभासाः प्रसंख्याता येन रूपेण लक्षिताः।
तेऽपि तेनैव रूपेण निग्रहस्थानसञ्ज्ञिताः ॥ २३ ॥

पूर्वं ये सावान्तरभेदाः सव्यभिचारादयः पञ्चप्रकारा हेत्वाभासा लक्षिताः ते ऽपि तेनैव हेत्वाभा-

स्वरूपेण निग्रहस्थानं भवन्ति । तदुक्तम् । हेत्वाभासाश्च यथोक्ता इति । तथैव निग्रहस्थानमिति शेषः । चकारेण साध्यविकलत्वादिदृष्टान्तदोषमनुपदर्शितान्वयत्वाद्युक्तिदोषमात्माश्रयत्वादितर्कप्रतिघातमनुक्तं त्रयमपि समुच्चिनोति । तेषां च हेत्वाभासान्तर्गतत्वात् पृथगनभिधानं तदनन्तर्गतावपि प्रतिज्ञाविरोधवत् स्वयमपि स्पष्टप्रतिपत्तित्वेन पृथगुद्भाव्यत्वाच्चकारेण समुच्चयः । तर्हि विरोधोपि समुच्चीयतां किं पृथगुपादानेन । नैवम् तस्यावयवान्तरे दूषणे ऽपि सम्भवेनासङ्कीर्णोदाहरणसम्भवात् । यद्येवं प्रतिकूलतर्का अपि दूषणे सम्भवन्तः पृथगुपादीयेरन् । सत्यम् उपात्ता एव सूत्रकारैरेव जात्युत्तरे तेषां प्रपञ्चितत्वादिति ॥ २३ ॥

एते हान्यादयो हेत्वाभासावसानान्ताः सर्वे ऽपि निग्रहहेतवो यथायथं सभासङ्क्षोभादिभिस्तत्कारणैर्जल्पवितण्डयोरुभयोरपि सम्भवन्ति अवश्योद्भावनीयाश्च । अन्यथा पर्यनुयोज्योपेक्षणप्रसङ्गात् । उद्भाविताश्च कथामपि पर्यवसाययन्ति । सर्वेषामपि जयपराजयव्यवस्थाहेतुत्वात् तन्मात्रफलत्वाच्च जल्पवितण्डयोरित्याह ॥

एते सम्भविनः सर्वे समुद्भाव्याश्च निग्रहाः ।

विच्छेदकाः कथायां च द्वयोर्जल्पवितण्डयोः ॥ २४ ॥

वादे तु निग्रहस्थानप्रकारचातुर्विध्यमाह ॥

चतुर्द्धा निग्रहगतिर्वादे ऽसम्भववर्जिताः ।
अनुद्भाव्यास्तथोद्भाव्याः कथाविच्छेदका इति ॥ २५ ॥

तत्रासम्भविनस्तावदाह ॥

अर्थान्तरमविज्ञातं हानिर्न्यासो निरर्थकम् ।
अपार्थकमिति प्रायः षट्कं वादेष्वसम्भवि ॥ २६ ॥

एतेषामर्थान्तरादीनां स्वाज्ञानसंवरणपराज्ञानप्रकाशनमात्रफलत्वेन प्रवृत्तेर्वादे च तदुभयासम्भवादसम्भावितत्वम् । प्रमादादिना कथञ्चित् तत्रापि सम्भवमाशङ्क्योक्तं प्राय इति ॥ २६ ॥

सम्भवे ऽप्यनुद्भावनीयानाह ॥

विक्षेपोऽप्रतिभाज्ञानं हेत्वन्तरमुपेक्षणम् ।
साध्यान्तरं मतानुज्ञा वादे ऽनुद्भाव्यसप्तकम् ॥ २७ ॥

साध्यान्तरमिति प्रतिज्ञान्तरमुच्यते । प्रमादादिना सम्भवतामप्येषामनुद्भावनेनापि कथाप्रवृत्तौ तत्त्वनिर्णयाविघातादनुद्भाव्यतेति ॥ २७ ॥

सम्भवत उद्भावनीयानाह ॥

न्यूनाधिकापसिद्धान्तविरोधाननुभाषणम् ।
पुनरुक्तं[१] विपर्यासो वादेषूद्भाव्यसप्तकम् ॥ २८ ॥

न्यूनत्वादिदोषदूषितस्य साधनस्य तत्त्वावसायहेतुत्वाभावात् न्यूनत्वादिकमुद्भाव्यं तत्समाधानेन कथा प्रवर्तनीया । न त्वेते कथाविच्छेदहेतवो भवन्तीति ॥ २८ ॥

हेत्वाभासो हि कारणं तथा निरनुयोज्यानुयोग इति च निग्रहस्थानद्वयं सम्भवादुद्भावनीयं कथाविच्छेदकं चेत्याह ॥

वादे कथावसानस्य हेत्वाभासो हि कारणम् ।
तथा निरनुयोज्यानामनुयोग इति द्वयम् ॥ २९ ॥

इति वरदराजकृता तार्किकरक्षा समाप्ता ॥

हेत्वाभासेन साध्यस्यासिद्धेस्तत्परित्यागेन सम्यग्घेतूपादानावश्यम्भावात् सर्वोपक्रान्ता कथा विच्छिद्यत एव । निरनुयोज्यानुयोगश्च तत्त्वावसायानङ्गं कथाभासप्रबन्धहेतुत्वेन कथापर्यवसानहेतुर्भवति । केचित्तु वादसूत्रे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति च विशेषणोपादानादपसिद्धान्तः स्वसिद्धान्तसिद्धावयवपरिमाणन्यूनतामधिकतां च कथाविच्छेदनिमित्तमित्याचक्षत इति ॥ २९ ॥

(१) पुनरुक्तिः—पा॰ B पु॰ ।

न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः ।
इयं वरदराजस्य कृतिर्विजयतेतराम् ॥

आलोड्य दुस्तरगभीरतरान् प्रबन्धान्
वाचस्पतेरुदयनस्य तथापरेषाम् ।
सारो मयात्र समगृह्यत वावदूकै-
र्नित्यं कथासु विजिगीषुभिरेष धार्यः ॥

इति श्रीवरदराजविरचिते तार्किकरक्षाव्याख्याने
सारसंग्रहे तृतीयः परिच्छेदः ॥

समाप्तमिदं वरदराजविरचितं सारसंग्रहाभिधानं
न्यायप्रकरणम् ॥

शिवमस्तु ॥

सर्वैश्वर्यनिजावासं सर्वविद्यानिसेवितम् ।
श्रीयज्ञेश्वरहरेः सूनुं श्रीविष्णुस्वामिगुरुं नुमः(१) ॥

इति श्रीज्ञानपूर्णकृता वरदराजीयसारसंग्रहटीका
लघुदीपिका समाप्ता ॥

मङ्गलमस्तु ॥

(१) श्रीयज्ञेश्वरहरेः सूनुमित्यत्र श्रीविष्णुस्वामिगुरुमित्यत्रापि श्रीशब्दप्रयोग उपचारार्थः अन्यथा छन्दोभङ्गापत्तेः ॥